संस्कृतविश्वविद्यालय-ग्रन्थमालाया: 115 पुष्पम्

# यजुर्वेदे वैश्विकचिन्तनम्





प्रधानसम्पादक:

म.म. प्रो. मुरलीमनोहरपाठक:

कुलपति:

लेखक:

म.म. डॉ. देवेन्द्रप्रसादमिश्र:



शोध-प्रकाशनविभाग:

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय:

नवदेहली-110016

संस्कृतविश्वविद्यालयस्य ग्रन्थमालाया: 115 तमं पुष्पम्

# यजुर्वेदे वैश्विकचिन्तनम्

प्रधानसम्पादक:
**म.म. प्रो. मुरलीमनोहरपाठक:**
कुलपति:

लेखक:
**म.म. डॉ. देवेन्द्रप्रसादमिश्र:**

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय:**
(केन्द्रीयविश्वविद्यालय:)
नवदेहली–110016

प्रकाशकः
**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
(केन्द्रीयविश्वविद्यालयः)
बी-4, कुतुबसांस्थानिकक्षेत्रम्
नवदेहली-110016

**आई.एस.बी.एन : 81-87987-92-0**

**वर्षम् : 2022**

**© श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य**

**मूल्यम् : ₹ 600/-**

**मुद्रकः**
**डी.वी. प्रिंटर्स**
97 जवाहरनगरम्, कमलानगरम्,
देहली-110007

# यजुर्वेदे वैश्विकचिन्तनम्

## अनुक्रमणिका


| क्र.सं. | विषयः | लेखकः | पृ.सं. |
|---|---|---|---|
| ❁ | **प्ररोचना** | म.म. प्रो. मुरलीमनोहरपाठकः **कुलपतिः** श्रीला.ब.शा.रा.सं. विश्वविद्यालयः, नवदेहली | v-viii |
| ❁ | **नान्दीवाक्** | प्रो. श्रीनिवास वरखेड़ी **कुलपतिः** केन्द्रीयसंस्कृत-विश्वविद्यालयः, देहली | ix-x |
| ❁ | **स्वस्तिवाक्** | आचार्यो जयकान्तसिंहशर्मा अध्यक्षो वेदवेदाङ्गपीठस्य | xi-xiv |
| ❁ | **कामधुग्वाक्** | प्रो. बिहारीलालशर्मा निदेशकः (आई.क्यू.ए.सी.) | xv-xvii |
| ❁ | **हृत्प्रतिपत्तिः** | प्रो. रामसलाही द्विवेदी आचार्यो व्याकरणविभागस्य | xviii-xxi |
| ❁ | **शुभाशंसा** | म.म. प्रो. केशवरामशर्मा | xxii-xxiv |
| ❁ | **कृतज्ञताज्ञापनम्** | लेखकः | xxv-xxxi |
| ❁ | **भूमिका** | | xxxii-xlv |
| ❁ | **शुक्लयजुर्वेदीया शतरुद्री** | | xlvi-liii |
| | **प्रथमोऽध्यायः** | वेदपदार्थः | **१-१८** |
| | **द्वितीयोऽध्यायः** | वेदस्यैतिह्यम् | **१९-३६** |
| | **तृतीयोऽध्याय** | आधुनिकसन्दर्भे यजुर्वेदे वैश्विकचिन्तनस्य प्रयोजनम् | **३७-४२** |
| | **चतुर्थोऽध्यायः** | यजुर्वेदे विश्वस्योद्भवो विकासश्च | **४३-५७** |

| | | |
|---|---|---|
| **पञ्चमोऽध्यायः** | यजुर्वेदे मानवजातेरुद्भवो विकासश्च | ५८-६६ |
| **षष्ठोऽध्यायः** | यजुर्वेदे वर्णाश्रमधर्मसमीक्षणम् | ६७-७६ |
| **सप्तमोऽध्यायः** | वैदिकसंस्कारस्य जनजीवने प्रभावः | ७७-८८ |
| **अष्टमोऽध्यायः** | वैश्विकदृष्ट्या यजुर्वेदे वैदिकसमाजस्य समीक्षणम् | ८९-१०७ |
| **नवमोऽध्यायः** | यजुर्वेदे पृथिवीतत्त्वविमर्शः | १०८-११७ |
| **दशमोऽध्यायः** | यजुर्वेदे जलतत्त्वविमर्शः | ११८-१२७ |
| **एकादशोऽध्यायः** | यजुर्वेद अग्नितत्त्वविमर्शः | १२८-१३८ |
| **द्वादशोऽध्यायः** | यजुर्वेदे वायुतत्त्वविमर्शः | १३९-१४७ |
| **त्रयोदशोऽध्यायः** | यजुर्वेद आकाशतत्त्वविमर्शः | १४८-१५६ |
| **चतुर्दशोऽध्यायः** | वैश्विकदृष्ट्या यजुर्वेदे प्रकृतिचिन्तनस्य समीक्षणम् | १५७-१७५ |
| **पञ्चदशोऽध्यायः** | यजुर्वेदे पुरुषसूक्तसमीक्षणम् | १७६-१८५ |
| **षोडशोऽध्यायः** | यजुर्वेदे रुद्रसूक्तसमीक्षणम् | १८६-१९५ |
| **सप्तदशोऽध्यायः** | यजुर्वेदे ब्रह्मसूक्तसमीक्षणम् | १९६-२११ |
| **अष्टादशोऽध्यायः** | यजुर्वेदे मेधासूक्तसमीक्षणम् | २१२-२१६ |
| **एकोनविंशोऽध्यायः** | यजुर्वेदे यमसूक्तसमीक्षणम् | २१७-२२६ |
| **विंशोऽध्यायः** | वैश्विकदृष्ट्या यजुर्वेदे पञ्चसूक्तानां समीक्षणम् | २२७-२५० |
| **एकविंशोऽध्यायः** | यजुर्वेदे भौतिकविज्ञानम् | २५१-२६१ |
| **द्वाविंशोऽध्यायः** | यजुर्वेदे रसायनविज्ञानम् | २६२-२७२ |
| **त्रयोविंशोऽध्यायः** | यजुर्वेदे जीवविज्ञानम् | २७३-२९३ |
| **चतुर्विंशोऽध्यायः** | यजुर्वेद आयुर्विज्ञानम् | २९४-३२८ |
| **पञ्चविंशोऽध्यायः** | यजुर्वेदे ज्योतिर्विज्ञानम् | ३२९-३३६ |
| **षड्विंशोऽध्यायः** | वैश्विकदृष्ट्या यजुर्वेदे वैज्ञानिक-परिकल्पनायाः समीक्षणम् | ३३७-३५१ |


| | | |
|---|---|---|
| **सप्तविंशोऽध्यायः** | यजुर्वेदे श्रौतयज्ञानां वैश्विकचिन्तने योगदानम् | ३५२-३६७ |
| **अष्टाविंशोऽध्यायः** | यजुर्वेदे स्मार्तयज्ञानां वैश्विकचिन्तने योगदानम् | ३६८-३७६ |
| **एकोनत्रिंशोऽध्यायः** | यजुर्वेद उपासनाविषयकसमीक्षणम् | ३३७-३८८ |
| **त्रिंशोऽध्यायः** | यजुर्वेदे सामाजिकजीवने वैदिक-देवतानां वैश्विकदृष्ट्या समीक्षणम् | ३८९-३९७ |
| **एकत्रिंशोऽध्यायः** | यजुर्वेदे धर्मनीतिः | ३९८-४०५ |
| **द्वात्रिंशोऽध्यायः** | यजुर्वेद अर्थनीतिः | ४०६-४१६ |
| **त्रयस्त्रिंशोऽध्यायः** | यजुर्वेदे दण्डनीतिः | ४१७-४२९ |
| **चतुस्त्रिंशोऽध्यायः** | यजुर्वेदे राजनीतिः | ४३०-४४० |
| **पञ्चत्रिंशोऽध्यायः** | वैश्विकदृष्ट्या यजुर्वेदे नीतीनां वैदिकाख्यानानां च समीक्षणम् | ४४१-४४९ |
| **षट्त्रिंशोऽध्यायः** | यजुर्वेदे धर्मविषयको विचारः | ४५०-४५९ |
| **सप्तत्रिंशोऽध्यायः** | यजुर्वेद अर्थविषयको विचारः | ४६०-४६८ |
| **अष्टात्रिंशोऽध्यायः** | यजुर्वेदे कामविषयको विचारः | ४६९-४७८ |
| **एकोनचत्वारिंशोऽध्यायः** | यजुर्वेदे मुक्तिविषयको विचारः | ४७९-४८७ |
| **चत्वारिंशोऽध्यायः** | यजुर्वेदे वैश्विकदृष्ट्या पुरुषार्थ-चतुष्टयस्य समीक्षणम् | ४८८-५०० |
| **उपसंहारः** | | ५०१-५२२ |
| **ग्रन्थानामनुक्रमणिका** | | ५२३-५२८ |


**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**
**बलं विष्णोः प्रवर्धताम्**

हेमाद्रिकृतचतुर्वर्गचिंतामणिस्थव्रतखंडोक्तविश्वकर्मशास्त्रवचनानुसारेण शिक्षासहितवेदस्वरूपाणि.




| | | | | |
|---|---|---|---|---|
| ऋग्वेदः श्वेतवर्णः स्यात्<br>द्विभुजो रासभाननः ॥<br>अक्षमालायुतः सौम्यः<br>प्रीतश्चाध्ययनोद्यतः ॥१॥ | अजास्यः पीतवर्णः स्यात्<br>यजुर्वेदोऽक्षसूत्रधृक् ॥<br>वामे कुलिशपाणिस्तु<br>भूतिदो मंगलप्रदः ॥२॥ | नीलोत्पलदलाभासः<br>सामवेदो हयाननः ॥<br>अक्षमालान्वितो दक्षे<br>वामे कंबुधरः स्मृतः ॥३॥ | अथर्वणाभिधो वेदो<br>धवलो मर्कटाननः ॥<br>अक्षसूत्रं च खट्वाङ्ग-<br>बिभ्राणो यजनप्रियः ॥४॥ | शिक्षा शुभ्राभयकरा<br>ज्ञानमुद्रान्विता शुभा ॥<br>अक्षसूत्रा सकुंडीका<br>द्विभुजा दंडपंकजा ॥५॥ |



**प्रो. मुरलीमनोहरपाठकः**
कुलपतिः
**Prof. Murlimanohar Pathak**
Vice Chancellor

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
(केन्द्रीयविश्वविद्यालयः) 'ए' ग्रेड (नैक)
बी-४ कुतुबसंस्थानिकक्षेत्रम्, नवदेहली-११००१६
**Shri Lal Bahadur Shastri National Sanskrit University**
(Central University) 'A' Grade (NAAC)
B-4 Qutub Institutional Area , New Delhi -110016 (INDIA)
Ph. :011-26851253,26564003, Fax : 011-26520255
E-mail :profmpathak@gmail.com, vcslbsrsv@yahoo.co.in

सं.-लाबशा./वी.सी.२०२२/76(i) दिनाङ्कः ०४.०२.२०२२

# प्ररोचना

विदितचरमेव विदुषां यत्तपःस्वाध्यायनिरतानां निखिलार्थजातं करामलकवत् प्रत्यक्षीकुर्वाणानामस्मत्पूर्वजानां विमलहृदयपटले लब्धोदयस्यानाद्यक्षरराशेः सर्वज्ञानमयस्य भगवतो वेदस्य पारेवाचां महिमेति। तत्रापि संहितादिशा चतुर्मुख इवानुदिशं प्रसरत्याम्नाये क्रियार्थतामादधान इव, ऋग्भिः स्तुवन्ति यजुर्भिर्यजन्तीति प्रथित्यान्वर्थतां जुषमाण इवायं यजुर्वेदश्चत्वारिंशदध्यायघटितो यागादिविवरणसंवलितो ब्रह्मविद्यायामीशावास्योपनिषदि पर्यवसितो **मन्त्रब्राह्मणयोर्वेदनामधेयमिति** लक्षणानुगुणगौरवेणोत्स्मयते। सोऽयं यजुर्वेदो न केवलं चतुरस्रश्रौतार्थविधानसंसाधनव्यग्र एव, अपितु प्रजासु गुणाधाने सचिन्तः पितेव यथावसरं चराचरं पुष्णाति, इष्टप्राप्त्यनिष्टपरिहारेण हितानुशासनेन सर्वतो रक्षति च। **जीवेम शरदः शतमि**त्यादि तदनुशासनामृतं यथा स्वस्थसर्वेन्द्रियं लोकजीवनं दिशति, **अदीनाः स्याम**ेति तत्रादैन्यं सञ्चारयति, नैष्कर्म्यं निवारयत् **कुर्वन्नेवेह कर्माणी**ति यावज्जीवं विहितानुष्ठाने प्रवर्त्तयति यथा, तथैवात्मविद्यया तत्रानासक्तिं जनयन्त्या

निर्वाणञ्चान्त उपलम्भयति। तदित्थमयमकुण्ठितशासनोऽपि न केवलं वर्णाश्रमव्यवस्थानिर्देशमुखेनेतिकर्त्तव्यतां चिन्तयति, भौतिकविज्ञानपराणि गणितविज्ञाननिदर्शनानि प्रेय:श्रेय:साधनानि वा समक्षयन् उन्निनीषति, अनादिवासनावशंवदतया लोकमुत्पथङ्गतं वा नियमयति अपितु याथात्म्यावेदनेन स्वात्माभिमुखीकुर्वन् अखिलमापामरं विश्वमेव क्रोडीकरोति। युक्तमेवात्र यज्ञसन्धात्री काचिद्वागेवमाम्नायते-

**चोदयित्री सूनृतानां चेतन्ती सुमतीनाम्।**
**यज्ञं दधे सरस्वती॥**
**महो अर्णः सरस्वती प्रचेतयति केतुना।**
**धियो विश्वा विराजति॥**

न हि स्वकर्त्तव्यमुज्झित्वा कश्चिन्मानवो भवति **मत्वा कर्माणि सीव्यती**ति निरुक्ते:। अयमिहैकतो **तेजोऽसि तेजो मयि धेही**त्यादिना वीर्यवत्तरां तेजस्वितामासादयितुमुपदिशति, अपरतो **व्रतेन दीक्षामाप्नोती**त्यादिना व्रतानुष्ठानेन स्पृहणीयगुणसङ्ग्रहणे प्रेरयति, यद्येतको **मा गृधः कस्य स्विद्धन**मित्यनिष्टसाधनाद्वारयति, अपरतोऽ**नृतात्सत्यमुपैमी**ति लक्ष्यमवधारयति। यश्च तथाविधमवेद्यमपि परमपुरुषं वेद स वेदो **वेदाहमेतं पुरुषं महान्तमि**ति साभिमानमभिधातुमर्हति, स एवार्हति तत्त्वतो हितमहितं वोपदेष्टुम्, स एव निरुपाधिक: प्रजापति**रनृतेऽश्रद्धां सत्ये श्रद्धां** विधातुमादिशति, स एव मानवसमाजमभूत्यै स्वप्नं भूत्यै जागरणं चावधार्य फलभेदमुखेनोद्बोधयति। अयमेव स्वार्थविमूढं प्रसुप्तलोकं दायित्वानुसन्धानगर्भेण कर्त्तव्यप्रबोधनेन कराग्रेणेव विमर्दयन् साभिनिवेशमान्दोलयन्निव जागरयति- **वयं राष्ट्रे जागृयाम पुरोहिता** इति। अन्ते च **तमेव विदित्वातिमृत्युमेती**त्यादिना तत्त्वज्ञानमाहात्म्य-प्रकाशेनानाद्यविद्याप्रयुक्तमृत्युसन्तरणसाधनं निर्दिशति।

इदञ्चैचौकमनुभूतिसिद्धं तथ्यं यदद्य समग्रमपि विश्वं स्वात्मनि भयभीतमिवास्ते, प्रतिदेशमहमहमिकया वैभवनाम्ना विनाशसाधनाकलने व्यस्तमिवालक्ष्यते, न केनापि शान्तिरनुभूयते न च कश्चिदात्मानं सुरक्षितं मन्यते, एतादृशे विषमसमये जनकवसिष्ठादिमहनीयजनजन्मदायिकायां भारतवसुन्धरायां नित्यं परिस्फुरतो वेदस्यानुस्मरणं नास्वाभाविकम्, यश्च सम्पूर्णं विश्वं हितानुचिन्तन आकारयति– **आ नो भद्राः क्रतवो यन्त्वि**ति, तत्र विश्वजनहिताय आविर्भूत इव यजुर्वेदः प्रथमां कामपि वैदिकीं संस्कृतिं वरणीयतमामवतारयति– **सा प्रथमा संस्कृतिर्विश्ववारे**ति, या न केवलं वैश्विकचिन्तनदृष्ट्या प्रथमा किन्तु विकासदृष्ट्या प्रौढा च, या च वैश्विकं सर्वविधमाभ्यन्तरं बाह्यञ्च स्वरूपं परिष्कर्तुं प्रभवति। नायं **भोगाद्द्वेषं** शिक्षयति, अपितु **तेन त्यक्तेन भुञ्जीथा** इति त्यागपूर्वकं तं व्यवस्थापयति, नूनं विद्या बहुमता प्रतितन्त्रं किन्त्वत्र बहुधा विगर्हिताप्यविद्या मृत्युसन्तरणे हेतुतया समादृता वेद्यतया परिगणिता च–

**अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इति।** अत्राविद्यापदेन वर्णाश्रमविहितं कर्मैव विवक्षितम्। अत्र ज्ञानक्रिययोराचारविचारयोश्च सामञ्जस्यं सर्वत्र प्रतिष्ठाप्यते। ज्ञानं विना हि कर्म अन्धम्, कर्मणा विना ज्ञानं पङ्गु, भक्त्या विना च ज्ञानं हृदयहीनं कर्म च निष्करुणं भवति, तन्मा भूदित्येतत्त्रितयस्यानुगुणसामञ्जस्यं मानवताजीवातवे सम्पद्यत इत्यवसाने प्रार्थ्यते–

**अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्।**
**युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम॥**

अत्र सुपथा नयेति विहितं कर्म, वयुनानि विद्वानिति ज्ञानम्, भूयिष्ठां नम उक्तिं विधेमेति भक्तिश्च यथायथं निर्दिश्यते। मनसि शिवसङ्कल्पतामाधातुं भूम्ना प्रार्थ्यते– **तन्मे मनः शिवसङ्कल्पमस्त्वि**ति।

एवमयं यजुर्वेदो विश्वजनीनमङ्गल- भावानामाकरः, समन्वयसूत्रं विप्रतिपन्नानाम्, समाधानं सर्वविधानां वैश्विकसमस्यानाम्, अमृतस्नपनं मोहमूर्च्छितानाम्, किमधिकम्, समुज्जीवनं मानवताया विद्यत इति न तिरोहितं विपश्चिताम्। यायजूकानां द्रढीयानयं प्रत्ययो यत्सम्पूर्णमिदं विश्वमीशव्याप्तम्, न तद्व्यतिरिक्तं किञ्चिद्वर्तत इति सर्वैकात्मताबोध एव सकलानर्थनिवृत्तिनिदानम्। शोकस्य मोहस्य च मूलं भेदज्ञानम्, तस्मिंश्च निरस्ते कुतः शोकः कुतो वा मोहः ? यथाभ्यस्यते मान्त्रिकैः -

**तत्र को मोहः कः शोक एकत्वमनुपश्यत** इति।

एवं वैश्विकीनां सर्वसमस्यानां निवारणमन्त्राऽद्वैतप्रत्यय एवेति किमधिकं विज्ञेषु।

एवं यजुर्वेदगतमेतदनुबन्धिप्रमेयजातं मनीषानिकषोपले सम्परीक्ष्य यथायथं व्यवस्थाप्य च **यजुर्वेदे वैश्विकचिन्तनमि**ति नाम्नाऽधिजिगांसमानेष्वनुजिघृक्षया महता वैदग्ध्येनोपन्यस्यन्ति आम्नायविद्याचणा अस्मदीयविश्वविद्यालयीयवेदविभागीयाचार्याः श्रमक्रमाभ्यामधिगतवेदतत्त्वा विद्यावाचस्पतयः पण्डित- **श्रीदेवेन्द्रप्रसादमिश्र**महाभागाः। एतदीयोपस्थापना सुधीजनस्य मनस्तोषाय जिज्ञासूनां प्रतिपत्तयेऽन्तेवासिनां बोधाय च कल्पिष्यत इति सुदृढं भावयामि। अहन्तदीयं सर्वविधमुत्कर्षं समीहमानो ग्रन्थमिमं विदुषां करकमलयोः समर्पयन्नमन्दमानन्दं विन्दामि, अभ्यर्थये च **स्वाश्रितवत्सलं परममङ्गलविग्रहं सर्वविपद्विरामं श्रीतुलसीमञ्जरीललामं दिव्यानन्तकल्याणगुणग्रामं श्रीशालग्रामं** यदयं विपश्चिदपश्चिमः स्वसारस्वतसपर्यया वेदश्रियमेवमेवानुदितं समेधयेदिति।

वि.सं. २०७८ वसन्तपञ्चम्याम्।

**( प्रो. मुरलीमनोहरपाठकः )**

**प्रो. श्रीनिवास वरखेड़ी**
कुलपतिः
**केन्द्रीयसंस्कृतविश्वविद्यालयः**
संसदः अधिनियमेन स्थापितः
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्,
भारतसर्वकारस्य शिक्षामन्त्रालयाधीनम्)

**Prof. Shrinivasa Varakhedi**
Vice-Chancellor
**Central Sanskrit University**
Established by an Act of Parliament
(Formerly Rashtriya Sanskrit Sansthan,
Under Ministry of Education, Govt. of India

**के.सं.वि./कुलपतिः/१०१/२०२२-२३/१७४** **दिनाङ्कः १४-०६-२०२२**

# नान्दीवाक्

**तस्माच्छास्त्रं प्रमाणन्ते कार्याकार्यव्यवस्थितौ** इति भगवद्गीतामृतवचनं वेदादिशास्त्राणां सार्वत्रिकीं सार्वकालिकीमुपादेयतां प्रकाशयति। कर्तव्याकर्तव्यमतित्वं हि पुंसस्तदितरचेतनेभ्यो व्यावर्तयति। तदेव शास्त्रवर्त्मनासाद्यम्। तदुक्तञ्च- **विश्वेदेवाः समनसः सकेता एकं क्रतुमभि वियन्ति साधु** महीयस्याः श्रुतेः निर्देशः विश्वे समे देवाः समानमनाः तेजोधराः सन्तोऽद्वितीयमेकं यागम् (सृष्ट्यादीनां कर्मणां कर्तारं परमात्मानमभिलक्ष्य) आभिमुख्येन विविधमुपयान्तीति। अखिलानां शुभकर्तृधर्माणां मूलं वेद एव। तच्च **वेदोऽखिलो धर्ममूलम्**।

वेदादीनि शास्त्राणि संस्कृतभाषयोपनिबद्धानि महर्षिभिः। **साक्षात्कृतधर्माण ऋषयो बभूवुरिति** नैरुक्तवचः। शास्त्रशब्दं परिभाषयन् भट्टकुमारिल आह–

**प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।**
**पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते॥**

पुरुषसुकृतासुकृतप्रवृत्तिनिवृत्तिज्ञापकत्वं शास्त्रत्वमित्यनेन वेदानामपि शास्त्रैकपदवाच्यत्वं व्यज्यते। स्मृत्युपस्मृतिग्रन्थविषयकाणां वेदोत्तरकालिकप्रणयनानां समेषामपि वेदतात्पर्यार्थोन्मीलनमेव प्रयोजनं

भवति। धेनुमनुगच्छद्दिलीपमनुगतायाः सुदक्षिणाया व्रजनं श्रुत्यर्थानुसारिण्याः स्मृतेरिव प्रोक्तम्। तद्यथा– **श्रुतेरिवार्थं स्मृतिरन्वगच्छत्।**

तस्मात् वेदादुत्तरप्रवर्तितरचनालेखनमपि वेदार्थप्रतिपादनमात्रकं सञ्जातम्। तद्दिशि **आचार्यश्रीदेवेन्द्रप्रसादमिश्र**कृतोऽयं ग्रन्थो **यजुर्वेदे वैश्विकचिन्तनमि**त्याख्यः शुक्लयजुःसंहितारूपश्रुतिमनुसरतीति ग्रन्थकर्त्रा महता श्रमेण चत्वारिंशदध्यायेषु ग्रन्थनिधिं संविभज्य **समाधिमास्थाय तपोभिरात्मन** इति नयेन वैश्विकानां पृथिवीजलतेजोवाय्वाकाशानां तत्त्वानां यथायथं वैज्ञानिकरीत्या निरूपणं व्यधायि। ये श्रोतारः स्मार्त्ता यतयश्च ते समेऽपि अमुना ग्रन्थेन यज्ञयागादिप्रपञ्चं सयुक्तिं सविशदं ज्ञातुं प्रभविष्यन्तीति यतोहि ग्रन्थकारेण **फलोदयान्ताय तपः समाधये** इति नियममनुपाल्य विचारसिन्धौ निमज्य ग्रन्थरत्नमुन्नीतं लोकाद्बहिरिति अमन्दं हर्षमहमनुभवामि। ग्रन्थेनानेन तोषँल्लप्स्यन्ते वेदविज्ञाः सुधियोऽध्येतारश्च इत्यहं विश्वसिमि। एतदीयोऽनवद्यः प्रबन्धो बुधेषु प्रभूतसमादरं विन्दतामिति भगवन्तं विश्वाधारं प्रार्थयमानो ग्रन्थकृतो नैरोग्यमयं जीवनं यशःपरां वैदुषीञ्च कामये।

**( प्रो. श्रीनिवास वरखेड़ी )**

**कुलपतिः**

**आचार्यो जयकान्तसिंहशर्मा**
आचार्यो व्याकरणविभागे,
अध्यक्षो वेदवेदाङ्गपीठस्य

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
(केन्द्रीयविश्वविद्यालयः) 'ए' ग्रेड (नैक)
बी–४ कुतुबसंस्थानिकक्षेत्रम्, नवदेहली–११००१६
मो. ९८१८७५५४२२

---

॥श्रीजानकीजानिर्जयति॥

# स्वस्तिवाक्

को न जानाति यद्भारतीयप्रज्ञानाद्यनेहसः सर्वतोमुखसाधना- जन्यायां सुदृढायामृषिचेतनालब्धतत्त्वानुभूतिभित्तौ प्रतिष्ठिता विलसतीति। या स्वयंप्रकाशा तत्त्वानुभूती रागद्वेषादिशून्ये समाहितचेतसि प्रतिकल्पं यथेश्वरसङ्कल्पमनाद्यक्षरकदम्बात्मना प्रतिफलति। या च व्रतनियमविशेषोपदेशैश्च नित्यं श्रूयमाणतया स्वोच्चारण- सजातीयोच्चारणसापेक्षोच्चारणविषयतयाऽद्याप्यविच्छिन्नपरम्परयाऽविकल- मधिगम्यते यथासम्प्रदायम्। मातापितृसहस्रेभ्योऽपि वत्सलतराया- स्तस्याऽनन्यादृशं वैभवं ध्यायंध्यायं प्राचीकशद् **वेदोऽखिलो धर्ममूलमि**त्यादिभिर्भगवान् मनुः। किमधिकम्? तथाविधे जगत्कारणेऽपि सर्वेश्वरे जीवति निःश्वसितमिव यदेकं प्रमाणमिति शास्त्रयोनित्वादिति चमत्कारव्यञ्जकयोनिपदघटितसूत्रेण समसूसुचद् भगवान् पाराशर्यः। तदेवं परब्रह्मणो व्यूहचतुष्टय इव तस्याम्नायस्यर्गादौ यजुर्वेदस्य यागादिप्रबोधकतया कश्चिदनाक्रान्तपूर्वो महिमा।

रहस्यबहुलतयाऽपरिमितस्यापि चत्वारिंशदध्यायात्मकस्य कर्मकाण्डानुरोधेन प्रथमेऽध्याये दर्शपूर्णमासौ, द्वितीये पिण्डपितृयज्ञस्तृतीये चाग्निहोत्रं चातुर्मास्येष्टिश्चतुर्थादारभ्याष्टमाध्यायपर्यन्तमग्निष्टोमविधानं सोमयागः, नवमे वाजपेयो राजसूयश्च, दशमे सौत्रामणिः,

एकादशादष्टादशपर्यन्तमग्निचयनप्रकरणम् उखाभरणं चितयो रुद्रः शतरुद्रीयं वसोर्धारा राष्ट्रभृच्च, एकोनविंशतित आरभ्यमाणे परिशिष्टे सोमसम्पादनविधिरश्वमेधप्रसङ्गः, शेषे च पुरुषमेध-सर्वमेध-पितृमेधादिविवरणं सर्वान्त ईशावास्योपनिषदिति वस्तुसङ्क्षेपः।

प्रथमन्तावदिदमेव विचार्यं किमिदं विश्वं यद्विषयकं चिन्तनं चिकीर्षितम्। कश्च प्रभवतीह कात्स्न्र्येनेदमिदमित्थन्तया निर्भ्रान्तं निश्चेतुम्? नूनं स एव, यदुत्सङ्गेऽस्य सम्भवः स्फूर्तिः, प्रवृत्तिः, प्रसृतिरन्ते संहृतिश्च भवति। स च सर्वाधिष्ठानं शब्दतत्त्वम्, तस्मिन्नेव परिकल्पितं विलसितञ्च सर्वम्। **विशति व्याप्नोतीति विश्वं** सर्वपर्यायम्, अतः सर्वात्मा भगवानप्यनेनाभिधीयते **विश्वं विष्णुर्वषट्कार** इति। सर्वज्ञानमयत्वाद्वेद एव तथाविधः साक्षी, यश्चाविकलमीक्षतेऽस्य स्वरूपं प्रवृत्तिं विकासञ्च, न किमपि यदत्र न चिन्तितम्, आविर्भावः स्थेमा, प्रलयो वास्तु सक्रममस्य न निरूपितो नाभूत्, न किमपि क्षरमक्षरं वा स्थूलं सूक्ष्मं वा कारणात्मना कार्यात्मना वा विकृतमविकृतं वाऽस्य जगतः, यदयं नेक्षते। अयं न केवलं तत्त्वमेवापितु हितमप्यनुशास्ति। विधिनिषेधमुखेन कार्यमकार्यञ्चोपदिशति मानवमात्रम्। परिष्कृतं कर्मैव लोकमुन्नयति, तच्च यज्ञ एव **यज्ञो वै श्रेष्ठतमं कर्मे**त्युक्तेः। यज्ञो मानवस्य बाह्यमाभ्यन्तरञ्चाङ्गं पुष्णाति, न तद्विना कश्चित्स्पन्दितुमप्यर्हति। स एव सृष्टिं सन्दधाति समेधयति च, समुज्जीवकत्वादेव यज्ञो विष्णुरिति श्रूयते, नान्तरेण यज्ञं जीवनकल्पनाऽपि कर्तुं शक्या। यज्ञदृष्टिरेव वैश्विकी दृष्टिः, परस्परं सहास्तित्वभावस्य मिथः समादरस्यान्यहितचिन्तनस्य समर्पणस्य, प्राप्तवस्तुवितरणेन संविभज्य समुपभोगस्य च भाव एव यज्ञः, देवपूजासङ्गतिकरणदानानि हि यज्धात्वर्थाः। अर्जनं सङ्ग्रहो वा दानाय, अतश्च **त्यागाय सम्भृतार्थानामि**त्युक्त्वा यजनशीलानिक्ष्वाकून् प्रशंसति कविकुलगुरुः। अत्रात्ममात्रपर्यवसायी भोगो भृशं गर्हितः। यद्येकत **एष वोऽस्त्विष्टकामधुगि**ति यज्ञस्य सर्वार्थसाधकत्वेन कामधुक्त्वमुच्यतेऽपरतो

यज्ञविरहितो जनः कुत्स्यते **मोघं पार्थ स जीवती**ति। यज्ञार्थतया कर्मणि क्रियमाण आराधितः परमपुरुषोऽनादिवासनामुच्छिद्यात्मसाक्षात्कार-मुपलम्भयति। अत उच्यते स एव प्रीतः प्रीणाति तस्मादितः प्रदानं देवता उपजीवन्तीति च। स एव यज्ञमूर्तिरनेकधाऽऽराध्यते, यदीयपञ्चविधत्वमैतरेयक उच्यते- स **एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोम** इति। स एव पुनः पञ्चभिर्यजुर्भिः सुपूज्यते, तथा च श्रुतिः - **आश्रावयेति चतुरक्षरम्, अस्तु श्रौषडिति चतुरक्षरम्, यजेति द्व्यक्षरं ये यजामह इति पञ्चाक्षरं द्व्यक्षरो वषट्कार** इति। स्मृतिश्च-

**चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च।**
**हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु,** इति

न होमेन केवलमग्निः समिध्यतेऽपितु देवीत्रयं विद्या भूमिर्भारती चेति। कस्यापि जनस्यैतत्त्रयमेव वर्धनीयं ज्ञानमाधार आचारश्चेति, तच्च यज्ञेन सुतरां समेधत इति भावः।

**तिस्रो देवीर्हविषा वर्धमाना इन्द्रञ्जुषाणा जनयो न पत्नीः।**
**अच्छिन्नन्तन्तुम्पयसा सरस्वतीडा देवी भारती विश्वतूर्तिः॥**इति॥

नासंस्कृतमनसा लोकहितं कर्तुमर्हतीति पूर्वं मनसि शिवत्वमानेतुं प्राथ्र्यते- **तन्मे मनः शिवसङ्कल्पमस्तु,** तदनु देवतोद्देश्यकद्रव्यत्यागः फलति। निष्कर्मतां निन्दन् फलसङ्गकर्तृत्वादित्यागयुक्तं विद्याङ्गभूतं कर्म यावज्जीवमनुष्ठेयमित्यादिशति- **कुर्वन्नेवेह कर्माणी**ति। यथोक्तम्- **अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शना**दिति वेदान्तवित्सम्मतम्। सर्वस्य ब्रह्मात्मकत्वमुक्त्वा विश्वस्य सर्वसमस्यानां मूलं भेदमूलको विद्वेषोऽनात्मीयभावश्च, तत्र समाधानं निर्दिशति-

**यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।**
**सर्वभूतेषु चात्मानं ततो न विजुगुप्सते॥** इति॥

लोकजीवने परस्परं सौमनस्यमुपदिशति **पुमान् पुमांसं परिपातु विश्वत** इति **मित्रस्य चक्षुषा समीक्षन्ता**मिति च। जगद्विषयिणीं दृष्टिं परिष्कुर्वन्नाह– **ईशावास्यमिदमि**ति। तत्सेवनप्रकारं शोधयति – **त्यक्तेन भुञ्जीथाः**, प्रकृतिसुलभां लिप्साञ्च वारयति– **मा गृध** इति। परिष्कृते चेतस्येव ज्ञानोदयस्तेनामृतत्वं तेन चात्मलाभः – **तमेव विदित्वाति–मृत्युमेती**ति मन्त्रः साध्यसाधनभावं निर्दिशति। इत्थं यजुर्वेदः सन्ततं विश्वस्य स्वस्तिवाचनं कुर्वन् लक्ष्यते, लोकमङ्गलं तदनुगुणमाचारमुपदिशँश्च बहुधा विलोक्यते। यद्येकतो **भद्रं कर्णेभिरि**ति जीवनपद्धतिं निर्दिशति, भैषजविज्ञानं प्रदर्श्य दीर्घायुष्ट्वं लोकस्य कामयते। किम्बहुना, आ ब्रह्मन्नित्यादिना सकलं विश्वमेव समर्थं मङ्गलमयमीहमानो विलोक्यते। **यथेमां वाचं कल्याणीमावदानि जनेभ्य** इति मानवमात्रमेव लक्ष्यीकृत्य प्रवृत्तोऽयमिति गम्यते।

अतिमात्रं सन्तुष्यामि यदस्मद्विश्वविद्यालयस्य वेदवेदाङ्गपीठक्रोडीकृते वेदविभागे तस्मि**न्नभिजनविद्यासमुदेतं समाहितं संस्कर्तारमभीप्सेदि**त्यापस्तम्बवचनानुरूपसत्सन्तानप्रसूतसदाचारनिष्ठात्म–गुणोपेतः सम्यगाहितवेदविद्यो **यावज्जीवमधीते विप्र** इत्यनुसन्दधान आचार्य**श्रीदेवेन्द्रप्रसादमिश्रो** निरन्तरं श्रद्धया वेदमुपास्ते। तदिदं समुपासनासुफलमिव तदुन्नीतं **यजुर्वेदे वैश्विकचिन्तनमि**ति ग्रन्थरत्नं नामानुगुणमेवापेक्ष्यमाणसामग्रीसम्भृतं यथावस्थितवेदतात्पर्यगर्भमधिजि–गमिषूणां समक्षमानीयते। एतदीया मानवतासमुज्जीवनदिशि वैदिकामोदमातन्वाना सारस्वतस्थापना विद्वन्मानसप्रीतये फलेग्रहिः स्यादिति विस्रब्धमाकलयामि, अनुनयामि चैत**दभीष्टसिद्धयेऽखिल–जगन्मातरं कल्याणगुणाकरं करुणामृतसन्धुक्षणपरिपालयच्चराचरं श्रीरघुनन्दनजीवितं** स्वेष्टदैवतम्।

वि.सं. **२०७८** वसन्तपञ्चम्याम्।



**(प्रो.जयकान्तसिंहशर्मा)**

**प्रो. बिहारीलालशर्मा**
आचार्यो ज्यौतिषविभागे,
**निदेशकः**(आई. क्यू.ए.सी.), **कुलानुशासकश्च**,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
(केन्द्रीयविश्वविद्यालयः)
बी-४, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली - ११००१६
दूरभाषः–०११४६०६०६५१(कार्या.)
मो. न. ९९१११७४८९

**Prof. Bihari Lal Sharma**
Professor, Deptt. Of Jyotish
**Director** IQAC**& Proctor**
Shri Lal Bhadur Shastri National Sanskrit University.
**Residence**-Type IV/12, University Campus, B-4, Qutub Institutional Area, New Delhi- 110016, INDIA
**Resi.**- 01146060412, Mov.- 09911117489
**Home**-Vill Bhadol, P.O. Rohal, Teh. Jhandutta. Distt. Bilaspur. (H.P)
Email- dblsharma@gmail.com

# कामधुग्वाक्

**सर्वज्ञानमयो हि स** इत्याप्तोक्तेर्लब्धप्रतिष्ठो **वेदो** नः सर्वस्वम्। अनादिकालात् कृतोपयोगस्सन्नपि सः साम्प्रतमपि लोकोपकाराय अलम्भूष्णुः, अत एव महाकविः शिशुपालवधे वदति–

**कृतः प्रजाक्षेमकृता प्रजासृजा सुपात्रनिक्षेपनिराकुलात्मना।**
**सदोपयोगेऽपि गुरुस्त्वमक्षयो निधिः श्रुतीनां धनसम्पदामिव॥**

तमुद्दिश्य छन्दोव्याकरणादीनि षडङ्गानि प्रवृत्तानि, तदर्थस्फोरणाय यास्कादयश्च आचार्याः स्वग्रन्थग्रथने रणरणकत्वरिता दृश्यन्ते। राजशेखरस्तु काव्यशास्त्रमपि सप्तममङ्गत्वेन अजीगणत्।

**विना वेदं विना गीतां विना रामायणीं कथाम्।**
**विना कविं कालिदासं भारतं भारतं न हि॥**

नाट्योत्पत्तिप्रसङ्गे भरताचार्येणापि वेदानामाधमर्ण्यमङ्गीकृतम्–

**जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च।**
**यजुर्वेदादभिनयान् रसानाथर्वणादपि॥**

सर्वविद्यानामुत्सो **वेदः**, सर्वशास्त्राणां मूलं वेदे समुपलभ्यत एव, यद्यपि शिक्षाकल्पव्याकरणनिरुक्तप्रभृतीनामिव साक्षान्नाम काव्यशास्त्रस्य

तदङ्गत्वेन न गृह्यते तथापि **देवस्य काव्यमिति** निर्देशस्तत्र प्राप्यत एव यथा **देवस्य पश्य काव्यं न ममार न जीर्यति**। अतो वेदः स्वयं काव्यरूपः, तस्मिन् सम्पूर्णस्य काव्यसौन्दर्यस्य दर्शनं भवति। उपमादीनां मन्त्रेषु बाहुल्येन दर्शनं भवति। तत्रोपमा यथा–

**उत त्वः पश्यन् न ददर्श वाचमुत त्वः शृण्वन् न शृणोत्येनाम्।**
**उतो त्व स्मै तन्वं विसस्रे जायेव पत्ये उषती सुवासाः॥**

तथा

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**
**तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति॥**

मन्त्रेऽस्मिन् न केवलं रूपकानुप्रासविभावनाविशेषोक्ति-प्रभृतीनामलङ्काराणां सद्भावः प्रत्युत **सयुजा** इति तथा **सखाया** इति पदद्योत्यध्वनेर्निदर्शनम् । तदित्थं काव्यशास्त्रस्यापि मूलं **वेद** एव।

वेदस्य प्रवृत्तिस्तु यज्ञार्थं जाता, तदुक्तं **वेदा हि यज्ञार्थमभिप्रवृत्ता** इति। महाकविकालिदासस्य नाटकमहाकाव्यादौ वेदानां वैदिकसिद्धान्तानाञ्च सर्वत्र वर्णनं मिलति। तद्यथा कविकुलगुरुपदधोरणी–

**तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा।**
**पत्नी सुदक्षिणेत्यासीदध्वरस्यैव दक्षिणा॥**
**तस्या खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्तनीया।**
**मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत्॥**
**सहजं किल यद्विनिन्दितं न खलु तत्कर्म विवर्जनीयम्।**
**पशुमारणकर्मदारुणोऽनुकम्पामृदुरेव श्रोत्रियः॥**

भगवद्गीतायामपि द्रव्ययज्ञतपोयज्ञादीनां सविस्तरं विवेचनं वर्तते। तत्र भगवता यज्ञातिरिक्तानां कर्मणां बन्धनकर्तृत्वमुक्तम्–

**यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।**
**तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर॥**

आचार्यमहीधरेण यजुर्वेदस्य व्याख्यानावसरे कथितम्–

**चतुर्विधं कर्म**– अप्रशस्तं प्रशस्तं श्रेष्ठं श्रेष्ठतमञ्चेति। लोकविरुद्धं वधबन्धनचौर्यादिकमप्रशस्तम्। लोकैः श्लाघनीयं बन्धुवर्गपोषणादिकं प्रशस्तम्। स्मृत्युक्तं वापीकूपतडागादिकं श्रेष्ठम्। वेदोक्तं यज्ञरूपं श्रेष्ठतममिति तल्लक्षणम्। **यज्ञो वै श्रेष्ठतमं कर्म** इति श्रुतेः।

वेदेषु पर्वतनदनदीप्रभृतितः मनुष्यपशुपक्षिप्रभृतीनां सर्वेषां कल्याणाय पन्थानो विद्यन्ते, को न जानाति वेदानां महत्त्वम्? संस्कृतवाङ्मये दर्शनानां यद् आस्तिकनास्तिकभेदेन द्वैविध्यं तस्य भेदकत्वेन वेदः स्वीकृतः, तत्र **नास्तिको वेदनिन्दक** इत्यादिरूपेण नास्तिकदर्शनानि संविभक्तानि। तेषां प्रासङ्गिता च सार्वकालिकी वर्तते।

अतः श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य वेदविभागीयाः स्वाध्यायप्रवचनपटवः, शिष्यसंक्रान्तवेदराशयः, साधका विद्यावाचस्पतयः पण्डिता महामहोपाध्यायाः श्रीदेवेन्द्रप्रसादमिश्रमहाशया **यजुर्वेदे वैश्विकचिन्तनमिति** ग्रन्थं स्वलोकोत्तरया प्रतिभया व्यरीरचन्। अयं ग्रन्थः समाजकल्याणाय विदुषां मनस्तोषाय भवत्विति शब्दमूर्तिधरन्तं भगवन्तं शिवाकान्तं सम्प्रार्थये।

वि.सं.**२०७९** गङ्गा दशहरा।

बिहारी लाल शर्मा

**( प्रो. बिहारीलालशर्मा )**

**प्रो.रामसलाही द्विवेदी**
आचार्यो व्याकरणविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः,
(केन्द्रीय-विश्वविद्यालयः)
बी-४, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-११००१६

**आवास-सङ्केतः**
२०५, हिलव्यू अपार्टमेंट,
वार्ड नं. ७, महरौली,
नई दिल्ली-११००३०
मो.- ९८७३३०६८०६
ई-मेल Ramsalahi17@gmail.com
दूरभाषः- ०११-४६०६०६६३(कार्या.)

**।।श्रीपरमात्मने नमः, राधामणिर्जयति कापि निकुञ्ज सीम्नि।।**

# हृत्प्रतिपत्तिः

शब्दोऽयमुरुक्रमस्तदेव स्वीयविलक्षणवयुनमहिम्नाप्रमाणान्तरावेद्य-तत्त्वजातस्य निर्भ्रान्तप्रतिपत्तयेऽनादित एव स्वोपज्ञातचित्प्रज्ञानघनब्रह्मण आपामरं प्रख्यापनायाधिप्राणि स्वस्वरूपतामाधत्ते न तु स्थूलप्रतीतिनिमित्तमस्य प्रयत्नः। तदेव वाक्यम् -

**ज्ञाने स्वाभाविके नार्थः शास्त्रैः कश्चन विद्यते।**
**धर्मो ज्ञानस्य हेतुश्चेत्तस्याम्नायोनिबन्धनम।**

अतः सर्वस्यापि ज्ञानातिशयस्य धर्मानुग्रह एव हेतुः, किं वा देवतामहर्षिपितृणामप्यवधारितं ज्ञानं वेदमूलकमेव। तदेवाह- **ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम्।** आगमानामप्यवस्थानं वेदाधीनमेव सर्वैः प्रकल्पितम्, अत एव ज्ञानमात्रस्य लयस्थानं वेद एव भवति। तदेव वृषभाचार्योऽपि -

**तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।**
**तस्य प्रवृत्तितत्त्वज्ञस्तद्ब्रह्मामृतमश्नुते।।**

इत्यस्याः कारिकायाव्याख्यानावसरे वेदानां सर्वप्रकृतिकत्वमुपस्थापितम्। तदेवाक्षराण्युद्ध्रियन्ते- **सोऽव्यतिकीर्णा**

**वागवस्थामधिगम्य वाग्विकाराणां प्रकृतिं प्रतिभामनुपरैति। तस्माच्च सत्तानुगुण्यमात्रात्प्रतिभाख्याच्छब्दपूर्वयोगभावनाभ्यासापेक्षात्प्रत्यस्तमितसर्वविकारोल्लेखमात्रां परां प्रकृतिं प्रतिपद्यते।**

तेन वेदानामपहारोऽपि कुत्रापि नोल्लिखितः न चाप्तोपदेशेषु परिगीतः। अत्रापि कारिकाद्वयं प्रमाणं भवति–

**न जात्वकर्तृकं कश्चिदागमं प्रतिपद्यते।**
**बीजं सर्वागमापाये त्रय्येवातो व्यवस्थिता॥**
**अस्तं यातेषु वादेषु कर्तृष्वन्येष्वसत्स्वपि।**
**श्रुतिस्मृत्युदितं कर्म लोको न व्यतिवर्तते॥**

एतेन दर्शनानामुपसंहारो वेदेष्वेवेति परिकल्पितः। इमे च वेदा आनुश्रविका अपौरुषेयाश्च भवन्ति। एतेषामानुपूर्व्याः समानत्वेऽपि यतशक्तित्वंपृथगेव समाम्नातम्। एतेन बहूनां मन्त्राणां समानानुपूर्वीकत्वेऽपि पौनरुक्तयं नापादनीयम्। यतः स्वरूपतः समानत्वेऽपि शक्तिभेदा भवन्त्येव। तदेव गायत्रीमन्त्रमभिलक्ष्याामऽऽचार्यो भर्तृहरिरेवमाह –

**अन्या संस्कारसावित्री कर्मण्यन्या प्रयुज्यते।**
**अन्या जपप्रबन्धेषु सा त्वेकैव प्रतीयते॥**

अतः स्थूलधियस्तर्कपारमपश्यन्त एव बहुविधामविमृष्टां वाचमुदीरयन्ति। तेन तेषामसामर्थ्यमेवाऽऽकलनीयम्। तदेव शब्दरूपमन्यत्र प्रयुज्यमानं भिन्नार्थमेवावसीयतइत्याद्युक्तम्। तदेव वेदानामर्थावधारणोपक्रमएते तर्काआश्रयणीया भवन्ति। यथा –

**सतोऽविवक्षा पारार्थ्यं व्यक्तिरर्थस्य लैङ्गिकी।**
**इति न्यायो बहुविधस्तर्केण प्रविभज्यते॥**

अभिप्रायश्चास्य स्पष्ट एव सतोऽप्यर्थस्याविवक्षा **कर्तुरीप्सिततमं कर्म, तस्यापत्यम्, ग्रहं सम्मार्ष्टि** इत्यादिष्वनुगमश्च भवति यतो नपुंसकत्वमविवक्षितं भवति। अन्यच्चौवम्प्रकारेण दृष्टान्तजातं श्रीवृषभेणोपस्थापितम्। तथा च- **नक्षत्रं दृष्ट्वा वाचं विसृजेदिति कालोपलक्षणार्थं नक्षत्रदर्शनम्। तत्प्रधानस्यान्यथासिद्धौ परार्थत्वाद्दृश्यमानेषु ज्योतिःषु कालविशेषपरिच्छेदे सति तत्क्रियते। काकेभ्यो दधि रक्ष्यतामित्युपघातप्रतिषेधस्य चिकीर्षितत्वात्काकेष्वसत्स्वपि श्वादिभ्यो रक्ष्यते। पात्राणि सम्मृज्यन्तामिति भुजिक्रियाङ्गोपसंहारत्वात्पात्राभावेऽप्यङ्गान्तराण्युप-संह्रियन्ते।**

अत्र सर्वत्र लोकशास्त्रानुगतबोधमाधृत्य पदार्थोपस्थितेरुपसर्जनत्वमासाद्य शाब्दबोधानुगतसिद्धान्तेन यथायथं तात्पर्यमवधार्यत एव। अत एव चतुर्थ्याः शेषित्वमर्थः, तदेव **प्रासनवन्मैत्रावरुणाय** इत्यत्र दण्डदानं प्रतिपत्तिकर्मैव न त्वर्थाङ्गभूतं कर्म, यतः **उत्पत्तौ येन संयुक्तं तदर्थं श्रुतिहेतुत्वात्तस्यार्थान्तरगमनशेषत्वात्प्रतिपत्तिस्तात्** इति जैमिनीयानुशासनेनेदमेव सर्वं प्रतिपादितमेव। तस्माद् वेदेष्वाम्नातशब्दस्यानुगुण्यमुपकल्पयद्भिरेव प्रवर्तनीयम्। तदेव श्रीमता महामहोपाध्यायेन विद्वत्तल्लजेन **श्रीदेवेन्द्रप्रसादमिश्र**महाभागेन कात्यायनश्रौतसूत्रस्य विवृतिः तथैवोपपादिता येन अद्यतनयुगीनजनानामव्युत्पत्तिमतामपि वेदार्थावग्रह आर्जवेण स्यात्। एतेषां कृतिः चत्वारिंशदध्यायेषु विभक्ता, तेन यजुर्वेदस्य कश्चित्स्वरूपमहिमैवानुश्रुतो भवति। अद्यत्वे समुपस्थितकालवशात् वेदानां

व्याख्यानं प्रासङ्गिकं कथं स्पृशतीति विशेषतोऽनुसन्धित्सूनां किमप्यपेक्षितं तत्सर्वमत्र कृतौ कणेहत्य प्रतिपादितम्। तेन सर्वेषां वेदाध्ययनप्रवृत्तितत्पराणां महानुपकारः प्रकल्पित एव।

इदमपिसुविदितमेव यत्सत्कुलप्रसूतानां हृद्येवकाचिद् वेदानुगुणाभिवृद्धिः परिस्फुरति। तत्रापि गोद्विजदैवमातृपितृप्रसादादत्यन्तमास्तिक्यं भजमानाः वेदार्थप्रतिपत्तौ नितरां साहाय्यमादधते। यतो धर्माधर्मव्यवस्थायां वेदा एव प्रमाणम्। संसारमात्रस्य समुन्नतिर्धर्माधीनैव। स एव धर्मः कर्मफलप्रतिपत्तिरूपेण कारणत्वमाश्रयन्नदृष्टरूपतामापद्यते। तदेव सत्कुलप्रसूतिमद्भिर्यथाऽऽचरणीयं तथैव महामहोपाध्याय-**श्रीदेवेन्द्रप्रसादमिश्रै**रत्यन्तं पूतमाचरितम्। अत एतेषां कृतिरियं देवप्रसादकरी, वंश्यानां मोदकरी, सर्वलोकानां शङ्करी च भवेदित्येव भगवन्तं परमात्मानं सहस्रभास्करप्रकाशोत्तरप्रकाशसमर्थमाश्रये।

वि.सं.**२०७९** गङ्गा दशहरा।

**(प्रो.रामसलाही द्विवेदी)**

राष्ट्रपति-सम्मानित महामहोपाध्याय
**प्रो. केशव राम शर्मा**
**अभिनव कालिदास**
दर्शनाचार्य, एम.ए. (संस्कृत), एम.फिल्,
लब्धस्वर्णपदकत्रय
राज्य प्रशिक्षण एवं अनुसन्धान संस्थान, सोलन, (हि.प्र.)

**वर्तमान निवास** - ए-3 कशिश अपार्टमेंट,
टैंक रोड, सोलन, हिमाचल प्रदेश
दूरभाष 0179-2223008
मो. 9418133268

# शुभाशंसा

महामहोपाध्यायेन कविकेशवशर्मणा।
शुभाशंसाः प्रदीयन्ते देवेन्द्रेभ्यो हिमाचलात्।।

वंशः पयासीत्यभिधोऽवदातः सुदीर्घवैदुष्यपरम्पराढ्यः।
यस्मिन् सहस्रांशुरिवाम्बराङ्के देवेन्द्रमिश्रा अलभन्त जन्म।।१।।
श्रुतिस्मृतिप्रौढपरम्परायाः प्रतिष्ठिते विप्रकुले प्रजाताः।
देवेन्द्रमिश्रा विदुषां धुरीणा वसुन्धराव्यापियशोऽध्यगच्छन्।।२।।
ये सत्यसानातनधर्मधाराप्रवाहपूतान्वयसूर्यकल्पाः।
कलावभिव्याप्ततमो विभिद्य ज्ञानप्रकाशं विकिरन्ति दिक्षु।।३।।
वेदे निगूढं परमार्थतत्त्वं महत्त्वपूर्णं प्रविधाय शोधम्।
अहर्निशं मानवताहितार्थं प्रकाशयन्ति प्रचुरामृतं ये।।४।।
विलुप्यमानां श्रुतिधर्मशास्त्रसृतिं क्षितौ ये महता श्रमेण।
समुद्धरन्ति प्रथयन्ति चाराद् देवेन्द्रमिश्राः खलु ते जयन्ति।।५।।
ये वेदमध्येऽखिलविश्वलोकहितार्थकान् क्षेमकरान् पदार्थान्।
अन्विष्य वीतभ्रमशेमुषीका असाधयन् मानवमात्रभद्रम्।।६।।
विज्ञाय धर्मं मतिवैभवेन प्रयुज्य तं सद्व्यवहारमध्ये।
महात्मतां साधु समभ्यषिञ्चन् स्वस्मिन् जगत्यां खलु तेऽत्र धन्याः।।७।।

अधीत्य बुद्ध्वाऽऽचरणेऽवतार्य प्रचार्य चार्षीमनवद्यविद्याम्।
अशेषमानुश्रविकीं प्रणालीं देवेन्द्रमिश्राः सकलामरक्षन्।।८।।
सदा सदाचारविचारचारुचर्यामयाः सद्व्यवहारवन्तः।
विद्वत्सु सत्सु प्रथिता महत्सु देवेन्द्रमिश्राः सुयशोऽर्जयन्ति।।९।।
पित्रर्षिदेवान् परमेश्वरं च श्रद्धादराभ्यामभिपूजयन्ति।
सनातनं धर्ममतीवसूक्ष्मं व्याचक्षते स्वाचरणेऽवतार्य।।१०।।
व्यतिक्रमं वीक्ष्य चिरत्नशुद्धसनातनाचारपरम्पराणाम्।
क्षुभ्यन्ति ते वाडववह्नितप्तमहार्णवाभाः प्रतिकर्तुकामाः।।११।।
गुणप्रकर्षोऽगुणिनामुपेक्षा गुणज्ञमानो विनयश्च वित्सु।
श्रद्धाऽथ विद्यासु रतिः स्वधर्मे देवेन्द्रमिश्रेषु विशिष्य सन्ति।।१२।।
आपत्तिकालेऽप्युररीकृतं ये त्यजन्ति नैजं न हि कर्मठत्वम्।
महीध्रतुल्याचलदार्ढ्यवन्तो देवेन्द्रमिश्राः कृतिनो जयन्ति।।१३।।
वेदोपदिष्टान् ऋषिवर्गजुष्टान् महाजनैश्चानुगताँश्च धर्मान्।।
अङ्गित्वकृत्याविकलाँश्चरन्तो देवेन्द्रतुल्या विरला नृलोके।।१४।।
हितानि हित्वापि निजानि सद्यः परोपकारं प्रति दत्तचित्ताः।
कर्तव्यकाष्ठां परमां प्रविष्टा देवेन्द्रमिश्रा नरनिर्जराभाः।।१५।।
विनिर्गतान् यन्मुखमञ्जुकञ्जात् परागरम्यान् वचसां प्रवाहान्।
आस्वाद्य केषां न विदां मनांसि भवन्ति मुग्धानि सुधासमानान्।।१६।।
ये शोधपत्रैः शतशः प्रणीतैः श्रुतिस्मृतीनां विषयप्रधानैः।
युगोपयुक्तैर्नरवाङ्मयाङ्गे न्यधुः श्रियं विज्ञजनप्रशस्याम्।।१७।।
अनेकशः शोधकृतां गभीरं ते विश्वविद्यालयवर्तियूनाम्।
निर्देशकत्वेन दिशावबोधमकारयन् शास्त्रविचारदक्षाः।।१८।।
वेदाम्बुधेः प्राप्य महर्घरत्नान्यनेकशश्छात्रगणा उपाधीन्।
यशस्तथा संप्रतिपद्य तेषां छायाश्रिताः श्रैष्ठ्यमवापुरिष्टम्।।१९।।
दैव्या गिरः शीर्षमहामहोपाध्यायप्रधानानगणानुपाधीन्।
प्रपद्य डी.लिट्. प्रभृतीँश्च वित्सु विख्यापयामासुरदभ्रकीर्तिम्।।२०।।

उपाधिराशिव्रजभूषितानां यशः श्रियैषां ककुभः समस्ताः।
चकाशिरे व्योम्नि रविप्रभायाः प्रभावपातादिव भूविभागाः।।२१।।
तातो मुक्तिमवाप्नुयात् पितृगणैः सार्द्धं परब्रह्मणि
कीर्त्याऽलङ्कृतमुज्ज्वलं तव कुलं श्रेयोऽश्नुयाच्छाश्वतम्।
पारे सागरमभ्युपैतु महसा विद्यानवद्या च तद्-
इत्थं भागवती कृपा फलत्वनुपमोत्कर्षं त्रिवेणीतटे।।२२।।
सच्चित्सौख्यमयो मुरासुरहरो विघ्नेश्वरः शङ्कर-
स्त्रिस्रोता भुवनेश्वरी सुरपितृब्रह्मर्षिसिद्धास्तथा।
श्रीदेवेन्द्रविपश्चिते हि भगवत्सत्सङ्गपुण्याध्वरे
दद्युर्मङ्गलमुत्तमं वितरतीत्याशीर्वचः केशवः।।२३।।
दीर्घं वयः पुष्टशरीरसौख्यमनन्तकीर्तिं सपुमर्थसार्थम्।
सम्यग् लभन्तामिति केशवोक्तास्तेभ्यो महामङ्गलकामनाः स्युः।।२४।।

वि.सं.२०७८ वसन्तपञ्चम्याम्।



(प्रो. केशव राम शर्मा)

# कृतज्ञताज्ञापनम्

**नमः शिवाय शान्ताय सत्त्वाय प्रमृडाय च।**
**रजोजुषेऽप्यघोराय नमस्तुभ्यं तमोजुषे ॥१॥**

**गिरीश्वरसुतावरः स्मरहरः फणिस्रग्धरः**
**सुरोत्करधुरन्धरो विजयते स गङ्गाधरः।**
**चिता भुवनभूतये निजविभूतये येन वा**
**चितानलसमुज्ज्वला वसतये ध्रुवं काशिका॥२॥**

**मिश्रश्रीशिवपालनामविदुषो योऽभूत् प्रपौत्रः कृती,**
**श्रीमत्पण्डितवासुदेवविबुधस्याऽभूत् सुपौत्रश्च यः।**
**यश्चासीत् प्रभुनाथमिश्रसुधियः पुत्रो मनस्वी महान्**
**तस्मै नन्दकुमारमिश्रविदुषे ब्रूमो नमः सादरम् ॥३॥**

अथेदं **'यजुर्वेदे वैश्विकचिन्तनम्'** इत्याख्यमनुसन्धानफलं विमलमतीनां निरवद्यवेदविद्याचणानां करकमलेषु सादरमुपहारीकुर्वतां नो मानसममन्दमानन्दमनुभवति। अनेन जनेन 'यजुर्वेदे वैश्विकचिन्तनम्' इति विषयमधिकृत्य छात्राणाम्, वेदाध्ययनशीलानां, शोधार्थिनाञ्च प्रयोजनाय स्वधिया ग्रन्थोऽयं ग्रथितः। **यजुर्वेदे वैश्विकचिन्तनस्य समीक्षणम्** इत्यभिख्यं ग्रन्थं समुद्भाव्य अवधेशप्रतापसिंहविश्वविद्यालयतः डी.लिट्. इत्युपाधिर्मयाधिगतः, परं तच्चिन्तनसमाहितं किञ्चन नूतनमाविष्कर्तुं मम मानसं नितान्तं वशीकरोति, तदेवाहं ग्रन्थस्यास्य परिष्कारं विधाय संशोध्यापूर्वतया विरचयामि अपरां कृतिम्।

अत्रावसरे साक्षात् परम्परया वा एतत्कार्यसम्पादनरूपप्रयोजनभाजो ये भवन्ति तेषामभिवादनं स्मरणं

कार्तज्ञ्यविनिवेदनञ्च विधेयमेव इति शिष्टसम्मतव्यवहारः। सम्पूर्णेऽस्मिन् ग्रन्थेऽतितरां हृष्यमाण अस्य पूर्त्यर्थं कृतोपकाराणां कृतज्ञताविष्करणं स्वीयं कर्तव्यमिति बुद्ध्या तत्रोपकर्तृणामुपकारं स्मरामि। प्रथमं तदहं तांस्तान् प्राथमिकान् वेदमन्त्रद्रष्टॄन् ऋषींश्च, तदनु तांस्तान् पदकारान्, निघण्टुकारांश्च यजुर्वेदाङ्गोपज्ञानप्रकाशन–सुगमितनिगमार्थसुकीर्तीन् याज्ञवल्क्य–कात्यायन–यास्क–पाणिनि–पतञ्जलि–जैमिनि–कण्व–वत्स – प्रभृतीनाचार्यवरांश्च भूयो भूयो नमामि। अथाभिवादयेऽहं तांस्तानपि सर्वान् वैदिकभाष्यकारान् तांस्तानपि च सर्वानर्वाचः स्वीयाऽजस्रमहापरिश्रमसंप्रवर्तितस्वोपज्ञसम्प्रदायविशेषान् सतो वैदिकान् गवेषकांश्चाऽनुवादकांश्चाऽऽलोचकांश्च भाषामीमांसकांश्च।

महनीयस्यास्य ग्रन्थस्य लेखने मम किञ्चिद् बुद्धिकौशलं नास्ति, एतत्सर्वं स्नेहमूर्त्तीनां भक्तिभावपूरितानां यासामुत्सङ्गस्नेहपूरितभावनाभिः पालितः तथा यासां शुभाशीर्वचांसि गृहीत्वा जीवनस्यापि उत्तरोत्तरमवर्धयं तासां स्वकीयजननीनां **श्रीमतीनां फूलकुमारीदेवीनाम्,** एवञ्च सन्ध्योपासनधर्माचरणेषु तत्पराणां श्रीरामचरितमानसमर्मज्ञानां श्रीमद्राघवपादपङ्कजचञ्चरीकाणां ज्ञानभक्तिवैराग्यमूर्त्तीनां महापुरुषाणां मम तातपादानां साकेतवासिनां **श्रीनन्दकुमारमिश्र**पादानाञ्चाशीर्वचोभिर्ग्रन्थोऽयं सम्पूर्णतामुपगतः। तेषां मातृपितृचरणानां स्नेहं स्मारं स्मारमहं पारेशतं प्रणामाञ्जलीन् उपहरे तयोः चरणारविन्देषु।

अतः परं वेदादिशास्त्रधुरीणानां शिष्यजनवत्सलानां मन्दस्मितसुललितश्रीमुखानां सरलस्वभावानां विविधविद्यावदातान्तःकरणानां पवित्राचरणानां श्रोत्रियकुलोत्पन्नानां श्रीशालग्रामपादपङ्कजचञ्चरीकाणां श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्य **कुलपतीनां श्रीमतां म.म.प्रो.मुरलीमनोहरपाठक**गुरुवर्याणां चरणेषु प्रणतिततीः विनिवेद्य

कृतज्ञतां ज्ञापयामि, कुलपतिमहोदयानां स्नेहमयी प्रकृतिर्बहुधा मयान्वभावि।

अतः परं निखिलशास्त्रपारङ्गतानां श्रीमज्जनकजारघुनन्दनपाद-पङ्कजचञ्चरीकाणां लब्धयशसां श्रौतस्मार्तकर्मनिष्णातानां ब्रह्मविद्याद्योतितान्तःकरणानां छात्रवत्सलानां ज्ञानमूर्त्तीनां श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्य वेदवेदाङ्गपीठाध्यक्ष-पदमलङ्कुर्वाणानां महतां वैयाकरणानां **श्रीमतां प्रो. जयकान्तशर्म**गुरुवर्याणां चरणारविन्दयोः प्रणामाञ्जलिं निवेदयामि। येषां मदीयविषयनिर्धारणे तत्स्पष्टीकरणे च महद्योगदानं साहाय्यं चाविस्मरणीयमस्ति।

धर्मचक्रवर्तिनां पद्मविभूषणाद्यनेकविरुदभाजां महामहोपाध्यायानां कविकुलरत्नानां प्रस्थानत्रयीभाष्यकाराणां संस्थापितविश्वविद्यालयानां वाचस्पतीनां श्रीचित्रकूटतुलसीपीठाधीश्वराणां जगद्गुरुश्रीरामानन्दाचार्य-**स्वामिश्रीरामभद्राचार्यमहाराजानां** चरणारविन्देषु प्रणामाञ्जलिं समर्पयामि, येषामाशीर्वाद एव जीवनस्यामूल्यनिधिरस्ति।

तथैवाहं ज्ञानभक्तिवैराग्यमूर्त्तिधराणां, तपःपूतहृदयानां सर्वतन्त्रस्वतन्त्राणां, निखिलशास्त्रपारङ्गतानां, निरन्तरश्रीललितामहात्रिपुर-सुन्दरीसमाराधनसक्तमानसानामस्मद्दीक्षागुरूणां परमहंसपरिव्राजका-चार्याणां **स्वामिश्रीपरानन्दतीर्थपादानां** चरणारविन्देषु प्रणामाञ्जलिं समर्पयामि, येषामनुग्रह एव मम सर्वसौख्योदयनिदानमस्ति।

अतः परं शिष्यजनवत्सलानां सरलस्वभावानां विविधविद्यावदातान्तःकरणानां पवित्राचरणानां केन्द्रीयसंस्कृत-विश्वविद्यालयस्य **कुलपतीनां श्रीमतां प्रो.श्रीनिवासवरखेडी**महाशयानां प्रणतिततीः विनिवेद्य कृतज्ञतां ज्ञापयामि।

यैरहं शुक्लयजुर्वेदः क्रमान्तो गुरुपरम्परया पाठितः, तेषां सुप्रसिद्धवैदिकशिरोमणिगुरुवराणां नैपुण्ययशसां बहुविधभाषामर्मज्ञानां श्रौतस्मार्तविद्यावरिष्ठानां सलेमपुरदेवरियास्थधनौतीरायग्रामटिकावास्तव्यानां मध्यप्रदेशसीधीभितरीस्थशासकीयसंस्कृतमहाविद्यालयस्य वेदाचार्याणां **श्रीकेदारनाथद्विवेदीति** प्रख्यातनाम्नां चरणसरोरुहयोः सादरं प्रणतिं विदधामि। एतेषां प्रेरणया ग्रन्थस्यास्य प्रणयनं मया विहितम्।

अस्मिन्नवसरे श्रीमतां तत्रभवतां प्राच्यप्रतीच्यविद्यासम्पन्नानां विद्वन्मणीनां परमोदारचरितानां महापुरुषाणां श्रीलालबहादुरशास्त्रिराष्ट्रिय-संस्कृतविद्यापीठस्य कुलपतिचराणां वैकुण्ठवासिनां **प्रो.वाचस्पति उपाध्याय**गुरुवर्याणां चरणकमलयोः प्रणामाञ्जलिं श्रद्धासुमनांसि च समर्पयामि।

अस्मिन्नेव क्रमे विविधविद्याप्रचारप्रसारकार्येषु सततं प्रयतमानानां वाणीकलाकुशलानां महनीययशसां श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलपतिचराणां **प्रो.रमेशकुमारपाण्डेय**-महोदयानामभिनन्दनं करोमि, येषां कुलपतित्वे ग्रन्थोऽयम् उपाध्यर्हतामगात्।

परमोदारचरितानां विप्रवंशमणीनां विद्वद्वराणां हिमाचलप्रदेशवास्तव्यानां महाकवीनां श्रीमन्महामहोपाध्यायाभिनव-कालिदासोपाधिप्रथिताचार्य**केशवरामशर्म**गुरुवर्याणां चरणेषु वन्दनपूर्विकां कृतज्ञतां ज्ञापयामि।

ग्रन्थप्रकाशनं यज्ञ इव भवतीति नात्र कस्यापि विमतिः तत्रापि निगूढार्थस्य **'यजुर्वेदस्य वैश्विकचिन्तनम्'** नैव सुकरं परन्तु भाग्यगौरवात् प्रस्तुतस्य ग्रन्थस्य कृते वेदपुराणादिनिखिलशास्त्र-मन्थनमन्दरायमाणानां लब्धयशसां श्रीपराम्बापादारविन्दपरिचर्यालाल-समानसानां सहृदयसाधकवरेण्यानां श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृत-

विश्वविद्यालयस्य व्याकरणविभागे आचार्यपदमलङ्कुर्वतां **श्रीमतां प्रो. रामसलाही द्विवेदि**महोदयानां मित्रवर्याणां स्नेहमयं प्रेरणाप्रदञ्च साहाय्यं मया समासादितम्। अस्य प्रयासस्य सफलतायामेतेषां सफला सत्प्रेरणा अनुपमं स्थानमावहति। अतस्तान् प्रत्यहं हृदयेन कृतज्ञतां ज्ञापयन् नमोवाकं समर्पयामि।

ज्यौतिषशास्त्रमर्मज्ञानां परमवैभवशालिनां परमोदारचरितानां राजनेतृशिरोधार्यपरामर्शकाणां कुलानुशासकपदमलङ्कुर्वाणानां पण्डित-प्रवराणां **श्रीमतां प्रो.बिहारीलालशर्म**महोदयानां प्रणामाञ्जलिं निवेदयामि।

वेदादिशास्त्रपारङ्गतानां सुप्रसिद्धवैदिकशिरोमणिवर्याणां श्रौतस्मार्तविद्यावरिष्ठानां विद्वन्मूर्धन्यानां **श्रीमतां प्रो.गोपालप्रसादशर्म**-महाशयानां प्रणामाञ्जलिं समर्पयामि।

तदनु परमादरणीयानां विविधविधासु पारङ्गतानां शोधविभागाध्यक्षपदमलङ्कुर्वतां श्रीमतां **प्रो.शिवशङ्करमिश्र**महाशयानां कृते हृदयेन वन्दनं विदधामि।

सहैव परमोदारचरितानां शोधसहायकपदमलङ्कुर्वतां श्रीमतां **डॉ. ज्ञानधरपाठक**वर्याणां कृते प्रणामाञ्जलिं समर्पयामि। तथैव शोधप्रकाशनविभागोऽपि कार्तज्ञ्येन सभाज्यते येन प्रकाशनपूर्वकमस्याः कृतेः सर्वजनप्रयोगार्हता साधिता।

अस्मिन्नेव क्रमे संस्कृतप्रचारप्रसारकार्येषु सततं प्रयतमानानां महनीययशसाम् अवधेशप्रतापसिंहविश्वविद्यालये संस्कृतविभागीयाध्ययन-मण्डलाध्यक्षपदमलङ्कुर्वाणानां पण्डितप्रवराणां श्रीमतां **प्रो. राजेन्द्रप्रसादचतुर्वेदि**महोदयानां चरणारविन्दयोः प्रणतिततिं निवेदयामि।

एवमेव वेदादिशास्त्रेषु कृतभूरिपरिश्रमाणां जगदम्बोपासकानां श्रीमतां **प्रो.प्रभाकरप्रसाद**महोदयानां, श्रीमतां **प्रो.प्रेमकुमारशर्म**वर्याणां, **श्रीमतां प्रो.शीतलाप्रसादशुक्ल**महोदयानां, **श्रीमतां प्रो.केदारप्रसादपरौहा**महाशयानां, **प्रो.दिवाकरदत्तशर्म**महोदयानां, **प्रो.विष्णुपदमहापात्र**महोदयानां, **प्रो.सतीश के.एस.**महोदयानां, **प्रो.रामचन्द्रशर्म**वर्याणां, **प्रो.सौरभदुबेमहोदयानां, प्रो.अनमोलशर्म** महोदयानां, **प्रो.सुदर्शनएस.**महोदयानाञ्च नमस्कृतिपूर्विकां कृतज्ञतामावहामि।

एवमेव चिरायुषं वेदाचार्यं **डॉ.सन्नीकुमार**महं शुभाशिषा स्नेहेन च सहस्रं धन्यवादैश्च सभाजयामि। एवमेव सङ्गणकतन्त्रतन्त्रीकुशलान् ग्रन्थटङ्कणक्रियाकारिणः **श्रीमतो विक्रमसिंह**महाशयान् प्रति भूयोभूयः कृतज्ञतां ज्ञापयामि।

एवमेव अग्रजानां पूज्यप्रवराणां परमोदारचरितानां सामाजिकसांस्कृतिककार्येषु संलग्नानां श्रीमतां **ज्ञानेन्द्रप्रसादमिश्र**-महोदयानां, श्रीमतां **राजेन्द्रप्रसादमिश्र**महाशयानां, श्रीमतां **वीरेन्द्रकुमारमिश्र**वर्याणाञ्च चरणकमलेषु प्रणतिवचांसि व्याहरामि, यत्तैः गार्हस्थ्यप्रपञ्चतो हिरुग् ग्रन्थकर्मार्थमवसरोऽयं मह्यं प्रदत्तः। स्वकीयलघुभ्रातृभ्यां **श्रीशिवेन्द्रप्रसादमिश्राय**, **श्रीब्रह्मेन्द्रकुमारमिश्राय** च अहं धन्यवादसहस्रं वितनोमि।

अस्मिन् मङ्गलावसरे आत्मनो धर्मपत्नीं श्रीमतीं **गायत्रीदेवीं** प्रीत्या सस्नेहं पौनःपुन्येन स्नपयामि। तथैव **अजितापराजितार्पितामृगाक्षी**प्रभृतयो ममात्मजाः वात्सल्यामृतपूरेण स्नेहौघोनाभिषिञ्चामि, यदीयसमयमासाद्य मयैतत्कार्यमकारीत्यत्रैतदीय-त्यागोऽत्र कथं विस्मर्तव्य इति।

एवमेव श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य पुस्तकालयाध्यक्षाणाम्, अवधेशप्रतापसिंह- विश्वविद्यालयस्य पुस्तकालयाध्यक्षाणाञ्च कृते कृतज्ञतां प्रकटयामि। अन्येषामपि येषां साहाय्यं लब्धं तेषां समेषां कृतज्ञतां व्याहृत्य विरमति एष जनः। विरमामो रमां रामं च स्मरन्तः- श्रीमद्भगवद्गीताया भाष्यकाराणां श्रीमधुसूदनसरस्वतीनामियं भणितिः स्मृतिपथमायाति-

**इहेतरेषां कुमतं समस्तं श्रुतिस्मृतिन्यायबलान्निरस्तम्।**
**पुनः पुनर्भाष्यकृताऽतियत्नादतो न तत्कर्तुमहं प्रवृत्तः॥**
**भाष्यकारमतसारदर्शिना ग्रन्थमात्रमिह योज्यते मया।**
**आशयो भगवतः प्रकाश्यते केवलं स्ववचसो विशुद्धये॥**
**सो सुधारि हरिजन जिमि लेहीं। दलि दुःख दोष बिमल जसु देहीं॥**

भारतम्, विपश्चितां विधेयः

विक्रमाब्दः **२०७८**, **( विद्यावाचस्पतिः डॉ.देवेन्द्रप्रसादमिश्रः )**

वसन्तपञ्चम्याम्, शनिवासरः श्रीला.ब.शा.रा.संकृतविश्वविद्यालयः, दिल्ली

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

**बलं विष्णोः प्रवर्धताम्**

# भूमिका

**ईशानः सर्वविद्यानां भूतानामीश्वरः परः।**
**पुनातु सर्वदा चास्मान् शब्दब्रह्मतनुः शिवः॥**

सृष्टिस्थितिविनाशक्षमां भगवतीं श्रुतिमधिकृत्य यत् किमपि विवक्षुरस्मि तत्र जन्मजन्मान्तराणां कापि सुकृतपरम्परा एव हेतुभूता प्रतीयते। तां विना न कोऽपि तत्र प्रसरत्पदो दृश्यते, न वा कस्यापि तत्र प्रवृत्तिरेव भवति। मदीयपूर्वजानां महर्षिवत्सगोत्रीयाणां कुलपरम्परा धन्या यत्र अद्यावधिं भगवान् वेदः ईश्वररूपेण सर्वदा कायेन वचसा मनसा परिषेव्यते। तत्रैव लब्धजन्मना मया प्रणमाञ्जलिरूप एषो ग्रन्थः श्रुत्या पादपाथोजयोः सश्रद्धं समर्प्यते।

यजुर्वेदस्य शाखाप्रशाखासु भगवदाराधनाया बहवः प्रकाराः सन्ति। तत्र ये यजुर्वेदाध्यायिनस्तेषां सुकृतपरम्परां किं वच्मो वयम्, ते तु सर्वकालं सर्वेषां सम्मानार्हाः। कृत्स्नस्यापि यजुर्वेदस्य स्वाध्याये जपे ध्याने च सामान्यविनियोगो बोध्यः। अयमेव यजुर्वेदानुसन्धानपराणामस्माकमपेक्षणीयः। तां देवतां साक्षात्कर्तुं वेदमन्त्रार्थानुसन्धानबलभूयिष्ठेन जपध्यानपरायणात्मक अनुष्ठाने मन्त्राणां सामान्यविनियोगो द्रष्टव्यः।

**को नाम वेदः?** अपौरुषेयस्तावद् एक एव वेदशब्दाभिधेयो ग्रन्थराशिः स वेदः। जनान् कालतो युगे प्रवृत्तानधर्मतः क्षीणायुषः अल्पायुष्कान् क्षीणसत्त्वान् धैर्यबलादिहीनान् दुर्मेधान् मन्दमतीन् वीक्ष्य हृदिस्थेनाच्युतेन चोदिता ब्रह्मर्षयो वेदान् विभक्तवन्तः। तथा हि श्रीमद्भागवतद्वादशस्कन्धे षष्ठाध्याये उक्तं वर्तते –

**क्षीणायुषः क्षीणसत्त्वान्दुर्मेधान्वीक्ष्य कालतः।**
**वेदान्ब्रह्मर्षयो व्यस्यन्हृदिस्थाच्युतचोदिताः॥**[1]

श्रुतिशब्देन बोध्यमानाः वेदा मान्याः सन्ति। वेदस्य विचारपरत्वेन श्रीवेदव्यासेन वेदानां विभागाः कृताः। तथा हि परीक्षितस्य मोक्षः, तत्पुत्रस्य च सर्पसत्रं व्यासेन वेदविभागावसरे श्रीमद्भागवतमहापुराण-द्वादशस्कन्धषष्ठाध्याये कथितम् -

**पराशरात्सत्यवत्यामंशांशकलया विभुः।**
**अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम्॥**
**ऋगथर्वयजुःसाम्नां राशीनुद्धृत्य वर्गशः।**
**चतस्रः संहिताश्चक्रे मन्त्रैर्मणिगणा इव॥**
**तासां स चतुरः शिष्यानुपाहूय महामतिः।**
**एकैकां संहितां ब्रह्मन्नेकैकस्मै ददौ विभुः॥**
**पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह।**
**वैशम्पायनसंज्ञाय निगदाख्यं यजुर्गणम्॥**
**साम्नां जैमिनये प्राह तथा छन्दोगसंहिताम्।**
**अथर्वाङ्गिरसीं नाम स्वशिष्याय सुमन्तवे॥**[2]

अत्राऽऽह सायणाचार्यः - **इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः।** अलौकिकपदेन प्रत्यक्षानुमाने व्यावर्त्येते। अत एवोक्तम् -

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।**
**एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता॥**[3]

---

[1] श्रीमद्भागवतम् - १२.६.४७
[2] श्रीमद्भागवतम् - १२.६.४९-५३
[3] सायणाचार्यकृता तै०सं०भा०भू०पृ०२

इति। स एवोपायो वेदस्य विषयः। तद्बोध एव प्रयोजनम्, तेन सहोपकार्योपकारकभावः सम्बन्धः। वेदाः परमात्मनः निःश्वसिताः विद्यन्ते। तथाहि–

**अरेऽस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति।**[1]

**यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।**
**निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥**[2] इति।

अस्य मतस्य पुष्टिं महात्मा तुलसीदासोऽपि चकार –

**जाकी सहज श्वास श्रुति चारी। सो हरि पढ़ यह कौतुक भारी॥**[3]

अपौरुषेयो वेदश्चतुर्विधः – **ऋग्वेदो यजुर्वेदः सामवेदो-ऽथर्ववेदश्च**[4]**।** तापनीयोपनिषद्यपि–

**ऋग्यजुस्सामाथर्वाणश्चत्वारो वेदाः, साङ्गाः सशाखाश्चतुष्पादाः भवन्ति।**[5]

तत्र छन्दोबद्धा मन्त्रा ऋचः, छन्दोहीना गद्यात्मका अर्थवशेन विभज्यमाना मन्त्राः यजुष्पदवाच्याः। ऋक्षु गीयमानो गानविशेषः सामपदाभिधेयः, छन्दोबद्धा ऋग्विशेषा एव अथर्वाङ्गिरसमन्त्राः। ऋङ्मन्त्राणां यस्मिन्वेदे बाहुल्यं स ऋग्वेदः, यजुषां मन्त्राणां प्राधान्यं यस्मिन् स यजुर्वेदः, साममन्त्राणां बाहुल्यं यस्मिन्वेदे स सामवेदः। एवमथर्वाङ्गिरसां मन्त्राणां यत्र बाहुल्यं स मन्त्रब्राह्मणात्मकः

---

[1] **बृ०उ०४.५.११**

[2] **सायणीयकृष्णयजुर्वेदीयतैत्तिरीयसंहितायाः भाष्यभूमिकायां मङ्गलाचरणे**

[3] **श्रीरामचरितमानसम्, बालकाण्डम् २०४**

[4] **मु०उ०१.१.५**

[5] **तापनीयोपनिषद् १.२**

शब्दराशिरथर्ववेदः। कल्पसूत्रादिकाराः मन्त्रब्राह्मणयोरुभयोरपि वेदत्वम् अभिदधति। भगवता आपस्तम्बेन कात्यायनेन च- **"मन्त्रब्राह्मणयोर्वेदनामधेयम्"** [१] इत्युभयोरपि भागयोर्वेदत्वमभ्युपगतम्। भगवता जैमिनिनापि आचष्टं स्वकीये मीमांसादर्शने। तथाहि - **"त्रयी विद्याख्या च तद्विदि"** [२] इत्यत्रार्थेन सार्धं यस्त्रीन् वेदानधीते स त्रयीविद्यः। त्रयीशब्देन ऋक्सामयजूंषि इति त्रयो वेदा उच्यन्ते। तद्वति त्रयीविद्याख्या युज्यते इति भाष्येण ऋगादिपदानां मन्त्रब्राह्मणात्मकवेदपरत्वमेव स्पष्टं ज्ञायते। यदि त्रयीशब्दस्य मन्त्रमात्रपरत्वं स्याद्यदि च **"त्रयो वेदा अजायन्त"** इति ब्राह्मणस्थवेदशब्दस्य च मन्त्रमात्रपरत्वं सूत्रभाष्यकाराभ्यामभिप्रेतं स्यात्तर्हि सिद्धान्ते ऋग्वेदादिविहितकर्ममात्राङ्गत्वमुच्चैस्त्वादीनां ताभ्यां सिद्धान्तितं कथं संगच्छेत? किमर्थं वेदो वेदाङ्गानि च प्रवृत्तानि? सर्वकामप्राप्त्यादिर्मोक्षान्तः पुरुषार्थो वक्तव्य इति वेदः प्रवृत्तः [३] । तत्परिज्ञानाय वेदाङ्गानि प्रवृत्तानि, यद्यपि वेदेषु बहुभिर्वैज्ञानिकैर्लोकोपकारका अर्था आनुषङ्गिकतया प्रतिपादितास्तथापि ऐहिकामुष्मिकाभ्युदयपरमनिःश्रेयसौपायिकतया धर्मब्रह्मप्रतिपादनमेव वेदानां मुख्यं तात्पर्यम्।

**मन्त्रस्यानेकेऽर्थाः** -

वेदमन्त्रेषु प्रत्येकं मन्त्रेऽनेके गूढार्था वर्तन्ते। मनीषिभिः तेषामाविष्कारः कार्यः, तथा चाग्नीन्द्रसूर्यब्रह्मणस्पतिरुद्रविष्णुप्रभृतिदेवान् उद्दिश्य दृष्टेषु मन्त्रेषु चत्वारस्ततोऽप्यधिका वा अर्था भवन्ति। यथा (क) आधिदैविकः (प्रकृतिविषयकः), (ख) आध्यात्मिकः

---

[१] **आप०यज्ञप०२४.१.३१ एवम् कात्या०प्रतिज्ञाप०१.१**

[२] **जैमिनिसूत्रम् ३.३.५**

[३] **दुर्गाचार्यः निरुक्तभाष्यभूमिकायाम्**

(मनुष्यविषयकः), (ग) आधिभौतिकः (प्राणिसमाजविषयकः), (घ) आधियज्ञीयश्च (यज्ञविषयकः)। अस्य मतस्य पुष्टिं निरुक्तभाष्यभूमिकायां दुर्गाचार्योऽपि चकार -

**क्वचिच्चाध्यात्मिकाधिदैविकाधियज्ञोपदर्शनार्थम्। तस्मादेतेषु यावन्तोऽर्था उपपद्येरन्नधिदैवाध्यात्माधियज्ञाश्रयाः सर्वमेव ते योज्याः। नात्रापराधोऽस्ति** [१], **"मन्त्रब्राह्मणार्थपरिज्ञानबद्धश्चाध्यात्माधि-दैवाधिभूतपरिज्ञानद्वारेण धर्मार्थकाममोक्षाख्याखिलपुरुषार्थः"** [२] इति। शतपथब्राह्मणश्रुतिश्च वदति - **"आध्यात्मिकोऽर्थः श्रेयान्, आत्मयाजी श्रेयान् देवयाजी।"** [३] यास्कोऽपि निरुक्ते भणति - **"तास्त्रिविधा ऋचः, परोक्षकृताः, प्रत्यक्षकृताः, आध्यात्मिक्यश्च"** [४] इति। केषाञ्चिद्देवानां चत्वारस्ततोऽप्यधिका अर्थाः प्रस्तूयन्ते। यथा -

अग्निः - अग्निः, सङ्कल्पशक्तिः, ब्राह्मणाः, नेतारः, मन्त्रिणो वा।

इन्द्रः - इन्द्रः, वृष्टिदेवः, विद्युत्, जीवात्मा, क्षत्रियः, राजा, प्रधानसेनापतिर्वा।

सूर्यः - सूर्यः, ऋषयः, प्राप्तज्योतिर्जीवात्मा, सरति गच्छति यः सूर्यः।

ब्रह्मणस्पतिः - दर्शनानि, अश्रूयमाणमेघरवः। आचार्या दार्शनिका वा।

विष्णुः - अग्रे गच्छन् सूर्यदेवः, समाजसुधारकाः, उन्नतिभावना।

रुद्रः - रोदसी, नीलरोहितवर्णः प्रकृतिः। सर्वशक्तिमान् परमात्मा। मनुष्यस्य सम्पूर्णं व्यक्तित्वम्, भयङ्करः, शिवः।

---

[१] **दु०नि०२.८**

[२] **दुर्गाचार्यः निरुक्तभाष्यभूमिकायाम्**

[३] **श०प०ब्रा० ११.२.२.१३**

[४] **नि०दै० ७.१.४**

सोमः – ओषधिरूपः, सोमः, सोमलता वा। दिव्यानन्दः, दिव्यानन्दमयः, योगिनः। चन्द्रः।

ऋषिः यस्यां कस्याञ्चिद् देवतायामार्थापत्यमर्थस्वामित्वं वेच्छन् स्तुतिं प्रयुङ्क्ते तद्देवतायाः स मन्त्रो भवति। कति देवताः? **“तिस्र एव देवता”** इति निरुक्तम्। **“अग्निः पृथिवीस्थानः वायुर्वेन्द्रो वान्तरिक्षस्थानः। सूर्यो द्युस्थानः”**[१], **“तासां महाभाग्यादेकैकस्या अपि बहूनि नामधेयानि भवन्ति”**[२] इति। तिसृणामग्न्यादीनामैश्वर्ययोगादेकात्मनामनेकधा विकुर्वन्तीनामेकैकस्याः प्रतिविकारं जातवेदाः, वैश्वानरः, वरुणः, रुद्रः, अश्विनौ, उषा इत्येवमादीनि बहूनि नामधेयानि भवन्ति। निरुक्ते महामुनिर्यास्क आह – **“देवो दानाद्वा। दीपनाद्वा। द्योतनाद्वा। द्युस्थानो भवति इति वा। यो देवः सा देवता”**[३] इति। वेदेषु देवानां संख्या महती वर्तते। यथा –

**अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवताऽऽदित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता**[४] इति।

**देवतानाम् आकारचिन्तनम् –**

यद्यपि महाभाग्याद् देवताया एक आत्मा बहुधा स्तूयते तथापि मनुष्यवत् ताः देवता निखिलं व्यापारं विदधति। यथा मानवेषु परस्परं वार्तालापो भवति तद्वत् देवेष्वपि दृश्यते। मन्त्रेषु देवानां स्वरूपदर्शनं मनुष्या इव, तेषां शरीरस्य विविधानामङ्गानां स्तुतय उपलभ्यन्ते। यथा –

---

[१] **निरुक्ते ७.२**

[२] **निरुक्ते ७.२**

[३] **निरुक्तम् ७.४.२**

[४] **शु०य०१४.२०**

**"ऋष्वा त इन्द्र स्थविरस्य बाहू"**[१] इति। मन्त्रेऽस्मिन् इन्द्रस्य भुजबलस्य प्रशंसा विद्यते। यजुर्वेदश्रुतिर्वदति – **नमस्ते रुद्र मन्यव उतो त इषवे नमः। बाहुभ्यामुत ते नमः**[२] इति। अत्र रुद्रस्य बाहवो मन्यव इषोश्च नमस्कारः विद्यते। हे रुद्र! मङ्गलविधायकं तव शरीरमघोरमविषमं पुण्यप्रदर्शि च विद्यते। तथा तन्वा अस्मभ्यं सुखं देहि। स्वमतं प्रस्तुवन्नाह यास्कः –

**अपि वा पुरुषविधानामेव सतां कर्मात्मान एते स्युः। यथा यज्ञो यजमानस्य**[३]**, एष चाख्यानसमयः**[४] इति। श्रीमद्वाल्मीकिरामायण एष एव सिद्धान्तो देव्याः सीताया अग्निपरीक्षाप्रसङ्गे प्रदर्शितः। हुताशने प्रविष्टां साध्वीं जानकीं गृहीत्वा अग्निस्स्वयमुत्तस्थौ, सः कर्मसाक्षी करुणावरुणालयं श्रीरामं सम्बोध्येदमवदत् –

**एष ते राम वैदेही पापमस्यां न विद्यते।**
**नैव वाचा न मनसा नैव बुद्ध्या न चक्षुषा॥**
**सुवृत्ता वृत्तशौटीर्यं न त्वामत्यचरच्छुभा।**
**विशुद्धभावां निष्पापां प्रतिगृह्णीष्वमैथिलीम्।**
**न किञ्चिदभिधातव्या अहमाज्ञापयामि ते॥**[५]

अस्य मतस्य पुष्टिर्महात्मना तुलसीदासेनापि श्रीरामचरितमानसे इत्त्थं कृता –

**धरि रूप पावक पानि गहि श्री सत्य श्रुति जग बिदित जो।**
**जिमि छीरसागर इन्दिरा रामहिं समर्पी आनि सो॥**

---

[१] ऋ० ६.४७.८

[२] शु०य० १६.१

[३] निरुक्तम् ७.२

[४] निरुक्तम् ७.२

[५] वा०रा०६.११८, ६-१०

**सो राम बाम विभाग राजति रुचिर अति शोभा भली।**
**नव नील नीरज निकट मानहुँ कनक पंकज की कली।।**[१]

मनुष्यवद् देवानां वर्णनं शौनकीयबृहद्देवतायामपि समुपलभ्यते।[२] अत एव देवतानामाकारविषये चत्वारि मतानि भवन्ति – (क) पुरुषाकार:, (ख) अपुरुषाकार:, (ग) कर्मार्थोभयाकार:, (घ) सदा उभयाकारश्च। यास्कानुसारेण देवता कर्मार्थं पुरुषाकारा अपुरुषाकारा च सम्पद्यते। चतुर्थमते देवता अधिष्ठातृरूपेण सर्वदा पुरुषाकारस्तिष्ठति, अग्निवायुप्रभृतिकर्मरूपेण च सर्वदा अपुरुषाकारस्तिष्ठति।

ननु कोऽयं यज्ञो नाम? अत्राऽऽह कात्यायन: **"यज्ञं व्याख्यास्याम:"**[३] इति, किं तद्यज्ञस्वरूपमत आह – **"द्रव्यं देवता त्याग:"** [४] इति। अर्थात् दधिसोमव्रीहियवादि- अग्नीन्द्राद्युद्देश्येन क्रियमाण: स्वत्वनिवृत्त्यनुकूलो व्यापार एव यागस्वरूप:। देवतोद्देश्येन द्रव्यत्यागरूपस्य यागपदार्थस्य पूर्वाचार्यैर्निरूपितत्वात्। तत्सन्नियोगेन चोद्दिष्टदेवतानामस्मरणपुर:सरं स्वत्वाधिकारं मनुष्य: त्यजति। अस्या यज्ञप्रक्रियाया: सम्पादनाय स वेदवाणीमाश्रयति। द्रव्यदेवताकर्मणां स्मारकत्वाद् मन्त्रा अप्यनुष्ठीयमानकर्मणामङ्गान्युद्घोष्यन्ते श्रोत्रियै:। यज्ञ: सर्वस्य प्रतिष्ठापको वर्तते, ब्रह्मतत्त्वज्ञाने प्रवृत्तिर्यज्ञेन भवति। यज्ञानां प्राधान्यं सर्वैरङ्गीकृतम्। श्रौतयज्ञानां स्वरूपज्ञानं मन्त्रब्राह्मणात्मकवेदादेव भवति। प्रथमो मानवधर्मोपदेष्टा मनुर्यज्ञस्य महत्त्वमुद्घाटयन्निदं कथयति–

**महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनु:।**[५]

---

[१] **श्रीरामचरितमानसम् ६.१०९**

[२] **शौनकीयबृहद्देवता ८.१२६**

[३] **का०श्रौ०१.२.१**

[४] **का०श्रौ०१.२.२**

[५] **म०स्मृ० २.२८**

अर्थात् पञ्चमहायज्ञानामनुष्ठानेन इयं तनुः - एतत्तन्ववच्छिन्न आत्मा, ब्राह्मी, ब्रह्मप्राप्तियोग्यः क्रियते। अनेनेदं स्पष्टं यद्यज्ञः जीवस्य ब्रह्मत्वप्रापकः। अत एव श्रुतिः **"यज्ञो वै श्रेष्ठतमं कर्म"**[1] इति प्रतिपादयति। जगद्गुरुणा भगवता वासुदेवेनापि अयं वैदिको यज्ञो मनुष्याणां सर्वकामदोहने समर्था धेनुरिति उपदिष्टम्। यथा -

**सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।**
**अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्।।**[2]

**यज्ञो द्विविधः** - श्रौतः स्मार्तश्च। श्रौतयागः श्रुतिविधानानुकूलो वैदिकयाग इत्यपरनाम्ना व्यवह्रियते। एकविंशतिविधो यज्ञो भवति। सप्तपाकसंस्थाः, सप्तहविःसंस्थाः, सप्तसोमसंस्थाश्च, यज्ञात्मनस्तस्य परमेश्वरस्य यज्ञेनैव यजनीयत्वात् यज्ञेषु अस्ति यजुर्वेदस्य वैशिष्ट्यम्। यज्ञानुष्ठानेनाचारपरिपालनम् आचारपरिपालनेन च धर्मवृद्धिः, धर्मेण शान्तिः चैतत् सर्वं धर्ममूलमेव। अत एव **"यागादिरेव धर्मः"**[3] कथ्यते।

**यजुर्वेदः** -

यजुर्वेदः साक्षाद् यज्ञानुष्ठानेन सम्बध्यते। यजुर्वेदः कृष्णशुक्लभेदेन द्विविधः। तत्र कृष्णयजुर्वेदस्य मन्त्राणां संहितायाश्चतस्त्रः शाखा उपलभ्यन्ते। तैत्तिरीय-मैत्रायणीय-काठक-कठकपिष्ठलभेदात्। शुक्लयजुर्वेदस्य सम्प्रति द्वे शाखे स्तः, तयोश्चेकैकसंहिते एवोपलभ्येते, माध्यन्दिनकाण्वभेदात्। शुक्लयजुर्वेदमन्त्राणां संहिता वाजसनेयिमाध्यन्दिनीसंहितानाम्ना वाजसनेयिकाण्वनाम्ना वा भाष्यते।

**शुक्लकृष्णभेदयोः कारणम्** -

---

[1] **श०ब्रा० १.७.१.५**

[2] **भ०गी० ३.१०**

[3] **अर्थसंग्रहादौ**

यजुर्वेदस्तु शुक्लकृष्णभेदेन द्विविधः। महर्षिवैशम्पायनस्य याज्ञवल्क्यादयः शिष्या यजुर्वेदमधीयाना आसन्। केनचित् कारणेन गुरोः किञ्चित् पापं संलग्नं तदपनोदनार्थं गुरुणा मदर्थं व्रतं चरतेत्याज्ञप्ताः[1]। याज्ञवल्क्येन तु गुरो! किमेभिर्वराकैरहमेव व्रतं चरिष्यामीत्युक्तम्[2]। ततश्चान्यशिष्यावमानजनकेनाभिमानपूर्णकथनेन रुष्टो गुरुर्मत्तोऽधीतं त्यजेत्युक्तवान्[3]। याज्ञवल्क्यस्तु ततोऽधीतं यजुरुद्गीर्य भगवन्तमादित्यं तपसा सन्तोष्य वाजिरूपधरेण तेनोपदिष्टान्ययातयामानि नित्यान्येव यजूंषि महर्षिवैशम्पायनसम्प्रदायेऽनुपलब्धानि लब्धवान्। लब्ध्वा च शिष्यानध्यापयामास, शतपथब्राह्मणश्रुतिर्वदति –

**आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते**[4] इति। श्रीमद्भागवतेऽपि सूत उवाच –

**एवं स्तुतः स भगवान्वाजिरूपधरो हरिः।**
**यजूंष्ययातयामानि मुनयेऽदात्प्रसादितः॥**
**यजुर्भिरकरोच्छाखा दशपञ्चशतैर्विभुः।**
**जगृहुर्वाजसन्यस्ताः काण्वमाध्यन्दिनादयः॥**[5]

याज्ञवल्क्येन वान्तानि कृष्णानि तानि तित्तिरा भूत्वा ऋषयो जगृहुस्तेन तैत्तिरीयाणि च प्रसिद्ध्यन्ति –

**देवरातसुतः सोऽपि छर्दित्वा यजुषां गणम्।**
**ततो गतोऽथ मुनयो ददृशुस्तान् यजुर्गणान्॥**

---

[१] **श्रीमद्भागवतम् १२.६.६१**

[२] **श्रीमद्भागवतम् १२.६.६२**

[३] **श्रीमद्भागवतम् १२.६.६३**

[४] **श०ब्रा० १४.७.५.३३**

[५] **श्रीमद्भागवतम् १२.६.७२-७३**

**यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाऽऽददुः।**
**तैत्तिरीया इति यजुः शाखा आसन्सुपेशलाः॥**[१]

अन्ये तु मन्त्रब्राह्मणयोः सङ्कीर्णत्वात् कृष्णत्वं विविक्तत्वात् शुक्लयजुर्वेदस्य शुक्लत्वमिति मन्यन्ते।

**वेदाध्ययनस्य प्रयोजनम्** –

**ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्याꣳ शूद्राय चार्याय च स्वाय चारणाय च**[२] **। ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व। विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः**[३]**॥**

**वेदमेव सदाभ्यस्येत्तपस्तप्स्यन्द्विजोत्तमः।**
**वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते॥**[४]
**योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।**
**स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥**[५]

**यजुर्वेदे वैश्विकचिन्तनस्य समीक्षणम्** इत्यभिख्यं ग्रन्थः समुद्भाव्य अवधेशप्रतापसिंहविश्वविद्यालयतः डी.लिट्. इत्युपाधिर्मयाधिगतः, परं तच्चिन्तनसमाहितं किञ्चन नूतनमाविष्कर्तुं मम मानसं नितान्तं वशीकरोति, तदेवाहं ग्रन्थस्यास्य परिष्कारं विधाय संशोध्यापूर्वतया विरचयामि अपरां कृतिम्। प्रकृत अष्टाध्यायोपपन्नो

---

[१] श्रीमद्भागवतम् १२.६.६४-६५

[२] शु०य० २६.२

[३] शु०य० ३४.५८

[४] म०स्मृ० २.१६६

[५] म.स्मृ.२.१६८

विद्यावाचस्पत्युपाध्यर्थं सङ्घटितः शोधप्रबन्धः मया पाठकजनसौकर्याय विषयविवेचनसौलभ्याय चत्वारिंशदध्यायेषु निम्नरूपेण प्रकाश्यते –

**प्रथमाध्याये** वेदपदार्थ इत्यध्यायमादाय वेदपदपर्यायाः, वेदपदनिर्वचनम्, वेदपदस्य परिभाषेत्यादिविषया निरूपिताः। **द्वितीयाध्याये** वेदस्यैतिह्यम् इत्यध्यायमुद्दिश्य वेदनामाविर्भावादिविषया वर्णिताः। **तृतीयाध्याये** आधुनिकसन्दर्भे यजुर्वेदानुसारं कीदृशं वैश्विकं तच्चिन्तनमिति प्रस्तुतम्। **चतुर्थाऽध्याये** विश्वोत्पत्तिः कथं केभ्यः कारणेभ्य ईश्वरो विश्वं सिसृक्षतीत्यादि चर्चितम्। **पञ्चमाध्याये** मानवजातेः सर्जना तद्विकास इत्यादिविषयः सविशदं प्रकाशितः। **षष्ठाध्याये** वर्णाश्रमाः कति, तदीया धर्माः क इति विषयोपस्थापनं कृतम्। **सप्तमाध्याये** लोकजनजीवने वैदिकसंस्काराणां कथम्भूतः प्रभाव इत्यादिविषया उपनिबद्धाः। **अष्टमाध्याये** वैश्विकदृष्ट्या वैदिकसमाजस्य समीक्षणमिति विषयः प्रतिपादितः। **नवमाध्याये** पाञ्चभौतिकतत्त्वान्यतमस्य पृथिवीतत्त्वस्य विचारः कृतः। **दशमाध्याये** जलतत्त्वस्य सूक्ष्मविचारः कृतः। **एकादशाध्याये** सूक्ष्मेक्षिकया अग्नितत्त्वं विमृष्टम्। **द्वादशाध्याये** वायुतत्त्वोऽपरि वैचारिकदृष्ट्या बलं दत्तमस्ति। **त्रयोदशाध्याये** भौतिकसृष्टिविचारावसरे आकाशतत्त्वस्य विमर्शः कृतः। **चतुर्दशाध्याये** यजुर्वेदानुगुणं प्रकृतितत्त्वचिन्तनस्य समीक्षा विहिता। **पञ्चदशाध्याये** पुरुषसूक्तस्य समीक्षणं कृतम्। **षोडशाध्याये** रुद्रसूक्तद्वारा रुद्रस्वरूपं तत्पर्यायाः तन्निमित्तमन्त्रविनयोगश्चेत्यादिनां विषयाणां विचारः कृतः। **सप्तदशाध्याये** ब्रह्मसूक्तगतैर्मन्त्रैर्ब्रह्मतत्त्वविचारः कृतः। **अष्टादशाध्याये** यजुर्वेदालोके मेधासूक्तविचारणा कृता। **एकोनविंशाध्याये** यजुर्वेदमाश्रित्य यमसूक्तसमालोचना कृता। **विंशाध्याये** वैश्विकदृष्ट्या यजुर्वेदे पञ्चसूक्तानां समीक्षा सम्पादिता। **एकविंशाध्याये** यजुर्वेदधिया भौतिकविज्ञानमिति विषय अनुसंहितः। **द्वाविंशाध्याये** रसायनविज्ञानमिति

प्रसिद्धो विषयः सस्पष्टं विचारितः। **त्रयोविंशाध्याये** यजुर्वेदे जीवविज्ञानम् इत्ययं महत्त्वपूर्णविषयः शोधदृष्ट्या प्रस्तुतः। **चतुर्विंशाध्याये** आयुर्विज्ञानमित्युपरि बलं दत्तम्। **पञ्चविंशाध्याये** ज्योतिर्विज्ञानमिति विषयमुद्दिश्य ज्यौतिषशास्त्रस्य गूढार्थो विचारितः। **षड्विंशाध्याये** वैश्विकदृष्ट्या यजुर्वेदे वैज्ञानिकपरिकल्पनायाः समीक्षा कृता। **सप्तविंशाध्याये** यज्ञयागादेः निरूपणावसरे श्रौतयज्ञानां वैश्विकचिन्तने योगदानं विवेचितम्। **अष्टाविंशाध्याये** स्मार्तयज्ञानां वैश्विकचिन्तने योगदानम् इत्याख्यो विषयो निरूपितः। **एकोनत्रिंशाध्याये** यजुर्वेदानुसारं उपासनापद्धतिः कीदृशी, तत्र के नियमा इत्येते विषया विचारिताः। **त्रिंशाध्याये** सामाजिकजीवने वैदिकदेवतानां वैश्विकदृष्ट्या समीक्षा कृता। **एकत्रिंशाध्याये** यजुर्वेदानुसारं नीतिलक्षणम्, धर्मनीतिश्चेत्यादि विषया विचारिताः। **द्वात्रिंशाध्याये** अर्थनीतेः स्वरूपम्, उद्देश्यम्, अर्थनीतिर्नाम का चेति विषया गुम्फिताः। **त्रयस्त्रिंशाध्याये** दण्डनीतिविचारः कृतः। **चतुस्त्रिंशाध्याये** राजनीतिविषयकविचारः प्रतिपादितः। **पञ्चत्रिंशाध्याये** वैश्विकदृष्ट्या नीतीनां वैदिकाख्यानानां च समीक्षा कृता। **षट्त्रिंशाध्याये** यजुर्वेदानुसारं पुरुषार्थचतुष्टये धर्मविषयको विचारः प्रतिपादितः। **सप्तत्रिंशाध्याये** अर्थविषयको विचारो विहितः। **अष्टात्रिंशाध्याये** पुरुषार्थचतुष्टयान्यतमः कामपुरुषार्थ उपवर्णितः। **एकोनचत्वारिंशाध्याये** मोक्षप्राप्तिः कथमिति यजुर्वेदधिया विषयः प्रस्तुतः। **चत्वारिंशाध्याये** वैश्विकदृष्ट्या पुरुषार्थचतुष्टयधर्मार्थकाममोक्षाश्चेति विषयः प्रकाशितः।

ग्रन्थप्रकाशनकार्येऽस्मिन् येषां साहाय्यं लब्धं तेभ्यः मातृपितृगुरुसहयोगिभ्यो नमः। अनेन लब्धज्ञानेन भगवान् वेदनारायणः प्रीयताम्। निगूढार्था वेदमन्त्रा मननेनैव बुध्यन्ते, अन्ते यजुर्वेदे वैश्विकचिन्तनम् प्रस्तूय रमां रामं च पौनःपुन्येन स्मरन्तः सप्रश्रयं प्रणम्य

च विरमामीति शम्।। श्रीमद्भगवद्गीताया भाष्यकाराणां श्रीमधुसूदनसरस्वतीनामियं भणितिः स्मृतिपथमायाति–

**इहेतरेषां कुमतं समस्तं श्रुतिस्मृतिन्यायबलान्निरस्तम्।**
**पुनः पुनर्भाष्यकृताऽतियत्नादतो न तत्कर्तुमहं प्रवृत्तः।।**
**भाष्यकारमतसारदर्शिना ग्रन्थमात्रमिह योज्यते मया।**
**आशयो भगवतः प्रकाश्यते केवलं स्ववचसो विशुद्धये।।**
**सो सुधारि हरिजन जिमि लेहीं। दलि दुःख दोष बिमल जसु देहीं।।**

विपश्चितां विधेयः
**( म.म. डॉ.देवेन्द्रप्रसादमिश्रः )**
श्रीला.ब.शा.रा.संकृतविश्वविद्यालयः
(केन्द्रीयविश्वविद्यालयः)

भारतम्,
विक्रमाब्दः **२०७८,**
वसन्तपञ्चम्याम्, शनिवासरः

**।। प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ।।**

**बलं विष्णोः प्रवर्धताम्**

# 卐 शुक्लयजुर्वेदीया शतरुद्री 卐

॥ हरिःॐ ॥

नमस्ते रुद्र मन्यवऽउतो तऽइषवे नमः । बाहुभ्यामुत ते नमः ॥१॥
या ते रुद्र शिवा तनूरघोरापापकाशिनी ।
तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥२॥
यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ।
शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं जगत् ॥३॥
शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।
यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमनाऽअसत् ॥४॥
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः परासुव ॥५॥
असौ यस्ताम्रोऽअरुणऽउत बभ्रुः सुमङ्गलः ।
ये चैनꣳ रुद्राऽअभितो दिक्षु श्रिताः सहस्रशोऽवैषाꣳ हेडऽईमहे ॥६॥
असौ योऽवसर्पति नीलग्रीवो विलोहितः ।
उतैनं गोपाऽअदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः ॥७॥
नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो येऽअस्य सत्वानोऽहन्तेभ्योऽकरन्नमः ॥८॥
प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् । याश्च ते हस्तऽइषवः परा ता भगवो वप ॥९॥
विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ२ऽउत ।
अनेशन्नस्य याऽइषवऽआभुरस्य निषङ्गधिः ॥१०॥
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ।
तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज ॥११॥
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।
अथो यऽइषुधिस्तवारेऽअस्मन्निधेहि तम् ॥१२॥

अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे ।
निशीर्य्य शल्यानाम्मुखा शिवो नः सुमना भव ॥१३॥
नमस्तऽआयुधायानातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यान्तव धन्वने ॥१४॥
मा नो महान्तमुत मा नोऽअर्भकम्मा नऽउक्षन्तमुत मा नऽउक्षितम् ।
मा नो वधीः पितरम्मोत मातरम्मा नः प्प्रियास्तन्वो रुद्र रीरिषः ॥१५॥
मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः ।
मा नो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥१६॥

नमो हिरण्ण्यबाहवे सेनान्न्ये दिशाञ्च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनाम्पतये नमो नमः शष्प्पिञ्जराय त्त्विषीमते पथीनाम्पतये नमो नमो हरिकेशायोपवीतिने पुष्टानाम्पतये नमो नमो बभ्लुशाय ॥१७॥
नमो बभ्लुशाय व्याधिनेन्नानाम्पतये नमो नमो भवस्य हेत्यै जगताम्पतये नमो नमो रुद्रायाततायिने क्षेत्राणाम्पतये नमो नमः सूतायाहन्त्यै वनानाम्पतये नमो नमो रोहिताय ॥१८॥
नमो रोहिताय स्थपतये वृक्षाणाम्पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनाम्पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणाम्पतये नमो नमऽउच्चैर्घोषायाक्रन्दयते पत्तीनाम्पतये नमो नमः कृत्स्नायतया ॥१९॥
नमः कृत्स्नायतया धावते सत्त्वनाम्पतये नमो नमः सहमानाय निव्याधिनऽआव्याधिनीनाम्पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानाम्पतये नमो नमो निचेरवे परिचरायारण्ण्यानाम्पतये नमो नमो वञ्चते ॥२०॥
नमो वञ्चते परिवञ्चते स्तायूनाम्पतये नमो नमो निषङ्गिणऽइषुधिमते तस्कराणाम्पतये नमो नमः सृकायिभ्यो जिघाꣳसद्भ्यो मुष्णताम्पतये नमो नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्तानाम्पतये नमः ॥२१॥
नमऽउष्णीषिणे गिरिचराय कुलुञ्चानाम्पतये नमो नमऽइषुमद्भ्यो धन्वायिभ्यश्च वो नमो नमऽआतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नमऽआयच्छद्भ्योऽस्यद्भ्यश्च वो नमो नमो विसृजद्भ्यः ॥२२॥
नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमः शयानेभ्यऽआसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः सभाभ्यः ॥२३॥

नमः॑ स॒भाभ्यः॑ स॒भाप॑तिभ्यश्च वो॒ नमो॒ नमोऽश्वे॑भ्योऽश्व॑पतिभ्यश्च वो॒ नमो॒ नम॑ऽ
आव्या॒धिनी॑भ्यो वि॒विध्य॑न्तीभ्यश्च वो॒ नमो॒ नम॒ऽउग॑णाभ्यस्तृꣳह॒तीभ्य॑श्च वो॒ नमो॒
नमो॑ ग॒णेभ्यः॑ ॥२४॥

नमो॑ ग॒णेभ्यो॑ ग॒णप॑तिभ्यश्च वो॒ नमो॒ नमो॒ व्राते॑भ्यो॒ व्रात॑पतिभ्यश्च वो॒ नमो॒ नमो॒
गृत्से॑भ्यो॒ गृत्स॑पतिभ्यश्च वो॒ नमो॒ नमो॒ विरू॑पेभ्यो वि॒श्वरू॑पेभ्यश्च वो॒ नमो॒
नमः॒ सेना॑भ्यः ॥२५॥

नमः॒ सेना॑भ्यः सेना॒निभ्य॑श्च वो॒ नमो॒ नमो॑ र॒थिभ्यो॑ऽअर॒थेभ्य॑श्च वो॒ नमो॒ नमः॑
क्ष॒त्तृभ्यः॑ सङ्ग्रही॒तृभ्य॑श्च वो॒ नमो॒ नमो॑ म॒हद्भ्यो॑ऽअर्भ॒केभ्य॑श्च वो॒ नमः॑ ॥२६॥

नम॒स्तक्ष॑भ्यो रथका॒रेभ्य॑श्च वो॒ नमो॒ नमः॒ कुला॑लेभ्यः क॒र्मारे॑भ्यश्च वो॒ नमो॒
नमो॑ नि॒षादे॑भ्यः पु॒ञ्जिष्टे॑भ्यश्च वो॒ नमो॒ नमः॑ श्व॒निभ्यो॑ मृग॒युभ्य॑श्च वो॒ नमो॒
नमः॒ श्वभ्यः॑ ॥२७॥

नमः॒ श्वभ्यः॒ श्वप॑तिभ्यश्च वो॒ नमो॒ नमो॑ भ॒वाय॑ च रु॒द्राय॑ च॒ नमः॑ श॒र्वाय॑
च पशु॒पत॑ये च॒ नमो॒ नील॑ग्रीवाय च शिति॒कण्ठा॑य च॒ नमः॑ कप॒र्दिने॑ ॥२८॥

नमः॑ कप॒र्दिने॑ च॒ व्यु॑प्तकेशाय च॒ नमः॑ सहस्रा॒क्षाय॑ च श॒तध॑न्वने च॒ नमो॑
गिरिश॒याय॑ च शिपिवि॒ष्टाय॑ च॒ नमो॑ मी॒ढुष्ट॑माय॒ चेषु॑मते च॒ नमो॑ ह्र॒स्वाय॑ ॥२९॥

नमो॑ ह्र॒स्वाय॑ च वाम॒नाय॑ च॒ नमो॑ बृह॒ते च॒ वर्षी॑यसे च॒ नमो॑ वृ॒द्धाय॑ च स॒वृधे॑ च॒
नमोऽग्र्या॑य च प्रथ॒माय॑ च॒ नम॑ऽआ॒शवे॑ ॥३०॥

नम॑ऽआ॒शवे॑ चाजि॒राय॑ च॒ नमः॒ शीघ्र्या॑य च॒ शीभ्या॑य च॒ नम॒ऽऊर्म्या॑य चाव-
स्व॒न्या॑य च॒ नमो॑ ना॒देया॑य च॒ द्वीप्या॑य च ॥३१॥

नमो॑ ज्ये॒ष्ठाय॑ च कनि॒ष्ठाय॑ च॒ नमः॑ पूर्व॒जाय॑ चापर॒जाय॑ च॒ नमो॑ मध्य॒माय॑ चाप-
ग॒ल्भाय॑ च॒ नमो॑ जघ॒न्या॑य च बु॒ध्न्या॑य च॒ नमः॒ सोभ्या॑य ॥३२॥

नमः॒ सोभ्या॑य च प्रतिस॒र्या॑य च॒ नमो॒ याम्या॑य च॒ क्षेम्या॑य च॒ नमः॒
श्लोक्या॑य चावसा॒न्या॑य च॒ नम॑ऽउर्व॒र्या॑य च॒ खल्या॑य च॒ नमो॒ वन्या॑य ॥३३॥

नमो॒ वन्या॑य च॒ कक्ष्या॑य च॒ नमः॑ श्र॒वाय॑ च प्रतिश्र॒वाय॑ च॒ नम॑ऽआ॒शुषे॑णाय
चा॒शुर॑थाय च॒ नमः॒ शूरा॑य चावभे॒दिने॑ च॒ नमो॑ बि॒ल्मिने॑ ॥३४॥

नमो॑ बि॒ल्मिने॑ च कव॒चिने॑ च॒ नमो॑ व॒र्म्मिणे॑ च वरू॒थिने॑ च॒ नमः॑ श्रु॒ताय॑ च
श्रुतसे॒नाय॑ च॒ नमो॑ दुन्दु॒भ्या॑य चाहन॒न्या॑य च॒ नमो॑ धृ॒ष्णवे॑ ॥३५॥

नमो॑ धृ॒ष्णवे॑ च प्रमृ॒शाय॑ च॒ नमो॑ निष॒ङ्गिणे॑ चेषुधि॒मते॑ च॒ नम॑स्तीक्ष्णेष॑वे
चायु॒धिने॑ च॒ नमः॑ स्वायु॒धाय॑ च सु॒धन्व॑ने च ॥३६॥

नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः कुल्याय च सरस्याय च नमो नादेयाय च वैशन्ताय च नमः कूप्याय ॥३७॥
नमः कूप्याय चावट्याय च नमो वीध्र्याय चातप्याय च नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च नमो वात्याय ॥३८॥
नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गवे ॥३९॥
नमः शङ्गवे च पशुपतये च नमऽउग्राय च भीमाय च नमोऽग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय ॥४०॥
नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥४१॥
नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च नमः सिकत्याय ॥४२॥
नमः सिकत्याय च प्रवाह्याय च नमः किꣳशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नमऽइरिण्याय च प्रपथ्याय च नमो व्रज्याय ॥४३॥
नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च नमो हृदय्याय च निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च नमः शुष्क्याय ॥४४॥

नमः शुष्क्याय च हरित्याय च नमः पाꣳसव्याय च रजस्याय च नमो लोप्याय चोलप्याय च नमऽऊर्व्याय च सूर्म्याय च नमः पर्ण्याय ॥४५॥
नमः पर्ण्याय च पर्णशदाय च नमऽउद्गुरमाणाय चाभिघ्नते च नमऽआखिदते च प्रखिदते च नमऽइषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नमऽआनिर्हतेभ्यः ॥४६॥

द्रापेऽअन्धसस्पते दरिद्र नीललोहित ।
आसाम्प्रजानामेषाम्पशूनाम्मा भेर्म्मा रोङ्मो च नः किञ्चनाममत् ॥४७॥
इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः ।
यथा शमसद्द्विपदे चतुष्पदे विश्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥४८॥
या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी ।
शिवा रुतस्य भेषजी तया नो मृड जीवसे ॥४९॥

परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड ॥५०॥
मीढुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्षऽआयुधन्निधाय कृत्तिं वसानऽआचर पिनाकम्बिभ्रदागहि ॥५१॥
विकिरिद्र विलोहित नमस्तेऽअस्तु भगवः ।
यास्ते सहस्रꣳ हेतयोन्यमस्मन्निवपन्तु ताः ॥५२॥
सहस्राणि सहस्रशो बाह्वोस्तव हेतयः ।
तासामीशानो भगवः पराचीना मुखा कृधि ॥५३॥
असङ्ख्याता सहस्राणि ये रुद्राऽअधि भूम्याम् ।
तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ॥५४॥
अस्मिन्महत्यर्णवेन्तरिक्षे भवाऽअधि ।
तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ॥५५॥
नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्राऽउपश्रिताः ।
तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ॥५६॥
नीलग्रीवाः शितिकण्ठाः शर्वाऽअधः क्षमाचराः ।
तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ॥५७॥
ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः ।
तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ॥५८॥
ये भूतानामधिपतयो विशिखासः कपर्दिनः ।
तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ॥५९॥
ये पथाम्पथिरक्षयऽऐलबृदाऽआयुर्युधः ।
तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ॥६०॥
ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः ।
तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ॥६१॥
येन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ।
तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ॥६२॥
यऽएतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे ।
तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ॥६३॥

नमोस्त्तु रुद्रेब्भ्यो ये दिवि येषाँव्वर्षमिषवः। तेब्भ्यो दश प्प्राचीर्दश दक्षिणा दश
प्प्रतीचीर्दशोदीचीर्दशोद्ध्वाः। तेब्भ्यो नमोऽअस्त्तु ते नोवन्तु ते नो मृडयन्तु ते
यन्द्विष्म्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दद्ध्मः ॥६४॥
नमोस्त्तु रुद्रेब्भ्यो येन्तरिक्षे येषाँव्वातऽइषवः। तेब्भ्यो दश प्प्राचीर्दश दक्षिणा
दश प्प्रतीचीर्दशोदीचीर्दशोद्ध्वाः। तेब्भ्यो नमोऽअस्त्तु ते नोवन्तु ते नो मृडयन्तु ते
यन्द्विष्म्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दद्ध्मः ॥६५॥
नमोस्त्तु रुद्रेब्भ्यो ये पृथिव्याँय्येषामन्नमिषवः। तेब्भ्यो दश प्प्राचीर्दश दक्षिणा
दश प्प्रतीचीर्दशोदीचीर्दशोद्ध्वाः। तेब्भ्यो नमोऽअस्त्तु ते नोवन्तु ते नो मृडयन्तु ते
यन्द्विष्म्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दद्ध्मः ॥६६॥
नमस्ते रुद्र मन्न्यवऽउतो तऽइषवे नमः। बाहुब्भ्यामुत ते नमः ॥६७॥
या ते रुद्र शिवा तनूरघोरापापकाशिनी।
तया नस्तन्न्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥६८॥
यामिषुङ्गिरिशन्त हस्त्ते बिभर्ष्ष्यस्त्तवे।
शिवाङ्गिरित्र ताङ्कुरु मा हिँसीः पुरुषञ्जगत् ॥६९॥
शिवेन व्वचसा त्त्वा गिरिशाच्छा व्वदामसि।
यथा नः सर्व्वमिज्जगदयक्ष्मँ सुमनाऽअसत् ॥७०॥
अद्ध्यवोचदधिवक्ता प्प्रथमो दैव्व्यो भिषक्।
अहीँश्च सर्व्वाञ्जम्भयन्त्सर्व्वाश्च यातुधान्न्योधराचीः परासुव ॥७१॥
असौ यस्ताम्म्रोऽअरुणऽउत बब्भ्रुः सुमङ्गलः।
ये चैनँ रुद्राऽअभितो दिक्षु श्श्रिताः सहस्रशोवैषाँ हेडऽईमहे ॥७२॥
असौ योवसर्प्पति नीलग्ग्रीवो विलोहितः।
उतैनङ्गोपाऽअदृश्श्रन्नदृश्श्रन्नुदहार्य्यः स दृष्ट्टो मृडयाति नः ॥७३॥


नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो येऽअस्य सत्वानोऽहन्तेभ्योऽकरन्नमः ॥७४॥
प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् । याश्च ते हस्तऽइषवः परा ता भगवो वप॥७५॥
विज्यन्धनुः कपर्दिनो विशल्यो बाणवाँ२॥ऽउत ।
अनेशन्नस्य याऽइषवऽआभुरस्य निषङ्गधिः ॥७६॥
या ते हेतिर्म्मीढुष्टम हस्ते बभूव ते धनुः ।
तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज ॥७७॥
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।
अथो यऽइषुधिस्तवारेऽअस्मन्निधेहि तम् ॥७८॥
अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे ।
निशीर्य्य शल्यानाम्मुखा शिवो नः सुमना भव ॥७९॥
नमस्तऽआयुधायानातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यान्तव धन्वने ॥८०॥
मा नो महान्तमुत मा नोऽअर्भकम्मा नऽउक्षन्तमुत मा नऽउक्षितम् ।
मा नो वधीः पितरम्मोत मातरम्मा नः प्प्रियास्तन्वो रुद्र रीरिषः ॥८१॥
मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः ।
मा नो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥८२॥
एष ते रुद्र भागः सह स्वस्राम्बिकया तञ्जुषस्व
स्वाहैष ते रुद्र भागऽआखुस्ते पशुः ॥८३॥
अव रुद्रमदीमह्यव देवन्त्र्यम्बकम् । यथा नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा
नो व्यवसाययात् ॥८४॥
अग्नेस्तनूरसि विष्णवे त्वा सोमस्य तनूरसि विष्णवे त्वातिथेरातिथ्यमसि विष्णवे
त्वा श्येनाय त्वा सोमभृते विष्णवे त्वाग्नये त्वा रायस्पोषदे विष्णवे त्वा ॥८५॥
अग्नेर्जनित्रमसि वृषणौ स्थऽउर्वश्यस्यायुरसि पुरूरवाऽअसि । गायत्रेण त्वा
च्छन्दसा मन्थामि त्रैष्टुभेन त्वा च्छन्दसा मन्थामि जागतेन त्वा च्छन्दसा
मन्थामि ॥८६॥
न तँविदाथ यऽइमा जजानान्यद्युष्माकमन्तरम्बभूव ।
नीहारेण प्रावृता जल्प्या चासुतृपऽउक्थशासश्चरन्ति ॥८७॥
विश्वकर्म्मा ह्यजनिष्ट देवऽआदिद्गन्धर्वोऽअभवद्द्वितीयः ।
तृतीयः पिता जनितौषधीनामपाङ्गर्भँव्यदधात्पुरुत्रा ॥८८॥

मीढुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्षऽआयुधन्निधाय कृत्तिं वसानऽआचर पिनाकम्बिभ्रदागहि ॥८९॥
विकिरिद्र विलोहित नमस्तेऽअस्तु भगवः ।
यास्ते सहस्रꣳ हेतयोन्यमस्मन्निवपन्तु ताः ॥९०॥
सहस्राणि सहस्रशो बाह्वोस्तव हेतयः ।
तासामीशानो भगवः पराचीना मुखा कृधि ॥९१॥
असङ्ख्याता सहस्राणि ये रुद्राऽअधि भूम्याम् ।
तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ॥९२॥
वयꣳ सोम व्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥९३॥
एष ते रुद्र भागः सह स्वस्राम्बिकया तञ्जुषस्व
स्वाहैष ते रुद्र भागऽआखुस्ते पशुः ॥९४॥
अव रुद्रमदीमह्यव देवन्त्र्यम्बकम् । यथा नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा
नो व्यवसाययात् ॥९५॥
भेषजमसि भेषजङ्गवेश्वाय पुरुषाय भेषजम् । सुखम्मेषाय मेष्यै ॥९६॥
त्र्यम्बकँय्यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ।
उर्व्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीय माऽमृतात् ।
त्र्यम्बकँय्यजामहे सुगन्धिम्पतिवेदनम् ।
उर्व्वारुकमिव बन्धनादितो मुक्षीय मामुतः ॥९७॥
एतत्ते रुद्रावसन्तेन परो मूजवतोतीहि । अवततधन्वा पिनाकावसः कृत्तिवासा
ऽअहिꣳसन्नः शिवोतीहि ॥९८॥
त्र्यायुषञ्जमदग्नेः कश्यपस्य त्र्यायुषम् ।
यद्देवेषु त्र्यायुषन्तन्नोऽअस्तु त्र्यायुषम् ॥९९॥
शिवो नामासि स्वधितिस्ते पिता नमस्तेऽअस्तु मा मा हिꣳसीः । निवर्त्तयाम्यायुषे-
न्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥१००॥

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

**बलं विष्णोः प्रवर्धताम्**

हेमाद्रिकृतचतुर्वर्गचिंतामणिस्थव्रतखंडोक्तविश्वकर्मशास्त्रवचनानुसारेण शिक्षासहितवेद स्वरूपाणि.






卐 ॐ स्वस्तिश्रीमन्महागणाधिपतये नमः। श्रीवेदपुरुषाय नमः॥ 卐

# अथ प्रथमोऽध्यायः

## वेदपदार्थः

नमोऽस्तु रामाय सलक्ष्मणाय दैव्यै च तस्यै जनकात्मजायै।
नमोऽस्तु रुद्रेन्द्रयमानिलेभ्यो नमोऽस्तु चन्द्रार्कमरुद्गणेभ्यः॥[१]

गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनं पद्मपद्भ्यां प्रियायाः
पाणिस्पर्शाक्षमाभ्यां मृजितपथिरुजो यो हरीन्द्रानुजाभ्याम्।
वैरूप्याच्छूर्पणख्याः प्रियविरहरुषाऽऽरोपितभ्रूविजृम्भ-
त्रस्ताब्धिर्बद्धसेतुः खलदवदहनः कोसलेन्द्रोऽवतान्नः॥[२]

यो ददाति सतां शम्भुः कैवल्यमपि दुर्लभम्।
खलानां दण्डकृद्योऽसौ शङ्करः शं तनोतु मे॥[३]

त्वा वन्दामह इत्युवाच निगमस्त्वद्भूतिमुल्लासयन्
पापिष्ठेष्वपि ते दयेति कथयद्रामायणं जीवति।
हे सीते जगदम्ब पुण्यचरिते पाहीति शब्दापयन्
मातस्त्वत्सुकुमारमञ्जुचरणच्छायाश्रितः स्यां कदा॥
यत्सन्धुक्षणमापयद्विविषदो लोकाधिपत्यं पुरा
यल्लब्ध्वा विहरन्ति धाम्नि परमे भक्तास्त्वदेकाश्रयाः।

---

[१] श्रीमद्वाल्मीकीयरामायणे ५.१३.५७

[२] श्रीमद्भागवते ९.१०.४

[३] श्रीमद्रामचरितमानसं लङ्काकाण्डस्य मङ्गलपद्यम्

**ध्यायन्तीह पदारविन्दमनिशं सन्तश्च यद्वाञ्छया**
**नित्यं ते करुणामृतं स्नपयतु त्वज्जीवनानम्ब नः॥**
**श्रुत्या चेतनचेतनेति भगवानात्मात्मनां नूयते**
**योऽभूद्रम्यगुणाकरः प्रथमतो वाल्मीकिवागास्पदम्।**
**ध्येयं यं पुरुषं महान्तमसकृत्प्रोवाच पाराशरः**
**हित्वा तं रघुनन्दनं क्व नु पतेत्प्रीत्या प्रणामाञ्जलिः॥**[१]

**गिरीश्वरसुतावरः स्मरहरः फणिस्रग्धरः**
**सुरोत्करधुरन्धरो विजयते स गङ्गाधरः।**
**चिता भुवनभूतये निजविभूतये येन वा**
**चितानलसमुज्ज्वला वसतये ध्रुवं काशिका॥**[२]

**यो गोवर्धनधारी, दुरितविदारी मनस्तमोहारी।**
**वृन्दाविपिनविहारी नन्दकुमारः स जयति कंसारिः॥१॥**[३]

**श्रीगणेशाय नमः। श्रीविश्वेश्वरो विजयते। ॐ नमः परमहंसास्वादितचरणकमलचिन्मकरन्दाय भक्तजनमानसनिवासाय श्रीरामचन्द्राय॥**[४] वेदार्थज्ञानं विना भारतीयविज्ञानवैशिष्ट्यं ज्ञातुं न शक्यते। मन्त्राणामृग्यजुः साम्नां स्वरूपाणि सूत्रितानि भगवता जैमिनिना **तेषामृग् यत्रार्थवशेन पादव्यवस्था। गीतिषु समाख्या, शेषे यजुः शब्दः"**। ऋचो गेयाः सामानि, शिष्टाः गद्यरूपाः मन्त्राः यजूंषीति त्रिधा वेदव्यवस्थितेर्वेदत्रयं त्रयीशब्दवाच्यतां भजते। ऋचां समुदायः ऋग्वेदसंहिता, यजुषां यजुस्संहिता, साम्नां च सामवेदसंहितेति व्यवहारः। चतुर्थी अथर्ववेदसंहिता अन्या च वर्तते, तत्र ऋचो यजूंषि च सन्ति।

---

[१] **प्रो. जयकान्तशर्मविरचितं मङ्गलपद्यम् १-३**

[२] **नन्दकुमारचरितम् १.१**

[3] **पद्मश्रीःडॉ.रमाकान्तशुक्लविरचितं 'नन्दकाव्याभिनन्दम्' १**

[४] **श्रीधरस्वामिकृतभागवतव्याख्यायाः मङ्गलपद्यम्**

**“अस्य महतो भूतस्य ब्रह्मणो निःश्वसितं वेदाः”** इति श्रूयते। ऐतरेयब्राह्मणशतपथादिब्राह्मणेभ्यः इदमवगम्यते यद् भूर्भुवः स्वराख्यव्याहृतित्रितयलक्षितत्रैलोक्यस्याध्यक्षैरग्निवाय्वादित्यैः क्रमश ऋग्यजुःसाम्नां प्रादुर्भावः सम्पादित इति। द्यावापृथिव्योस्तदध्यक्षयोरग्निसूर्ययोरन्तरे अन्तरिक्षपतिर्वायुः क्रियाध्यक्षो यजुर्भिर्यजनकार्यं साध्नोति। स एवाध्वर्युः देवानाम्। अत एव यजुषां प्राधान्यं याज्ञे कर्मणि। ऋग्भिः प्रज्ञाभिर्वाग्भिः अर्चनं विधीयते, सामभिः यजमानः परं स्वरं उद्गीथाख्यं भजनीयसम्मदपदम् उन्नीयते, यजुर्भिः कर्मणा यजनं निर्वर्त्यते। अर्थज्ञानं विना वेदानां कण्ठस्थीकरणं कुर्वन् स्थाणुरयं भारहारः योऽधीत्य वेदान्न विजानात्यर्थान्निति निरुक्तकारेण निन्दितो दृश्यते। यदि कश्चिद्वेदार्थं ज्ञातुं न प्रभवति तर्हि तत्र न वेदोऽपराधी। न हि स्थाणुरपराधः यदेनमन्धो न पश्यति इति महर्षियास्कोक्तं स्मृतिपथमायाति। अतो वेदाः साङ्गाः अर्थज्ञानपूर्वकमेवाध्येया इति सिध्यति। वेदाः **‘‘परोक्षवादाः’’** इत्यतः तेषामर्थः क्लेशं विना न सुगमः। प्रकरणादिज्ञानादिनैव प्रकृतार्थो निर्णेतुं शक्यते। वेदो न केवलशब्दराशिः अपि तु परिच्छिन्नानि सर्वाण्यपि वस्तूनि वेद एव। वेदनं वेद इति वेदशब्दो यदि निरुच्यते तर्हि वेदशब्दार्थो ब्रह्मतत्त्वं भवेत्। वेदनमित्यस्य ज्ञानमित्यर्थः वेदयतीति वेदः इति वेदशब्दनिरुक्त्या सगुणावस्थायां वर्तमानाः सर्वेऽपि पदार्थाः वेदाः भवेयुः। लोकेऽस्मिन् सर्वाण्यपि वस्तूनि येन केनापि प्रकारेण धर्माधर्मप्रबोधनप्रक्रियायां सहकारीणि भवन्ति। अतः सगुणावस्थायां वर्तमानाः सर्वेऽपि पदार्थाः वेद एव।

**चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।**
**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ२ आविवेश॥**[१]

---

[१] **शुक्लयजुर्वेदः १७.९१**

मन्त्रवर्णस्याभिप्रायोऽयमस्ति – चत्वारि शृङ्गाणि चत्वारो वेदाः, त्रयः पादाः त्रीणि सवनानि, द्वे शीर्षे प्रायणीयमुदयनीयमिति इष्टिद्वयम्, सप्तहस्ताः गायत्र्यनुष्टुभादीनि सप्त छन्दांसि, त्रयो बन्धास्तथा मन्त्रब्राह्मणकल्पाश्च भवन्ति। सर्वाभीष्टप्रदो यज्ञ इत्येतत् प्रसिद्धम्। यज्ञस्य हि मरणशीलैरनुष्ठीयमानत्वादयं मरणशीलांस्तानाश्रित्यास्ति इत्युच्यते। विद् धातोः घञ् प्रत्यये कृते सति वेदशब्दो निष्पद्यते। विद् धातुः चतुर्षु अर्थेषु प्रयुज्यते। विद् ज्ञाने इति धातोः निष्पन्नत्वात् वेदशब्दस्यार्थः ज्ञानमिति। विद् सत्तायाम् धातोः निष्पन्नत्वात् वेदशब्दस्यार्थः विद्यन्ते भवन्ति वा। विद्लृ लाभे धातोः निष्पन्नत्वात् वेदशब्दस्यार्थः लाभः। विद् विचारणे धातोः निष्पन्नत्वात् वेदशब्दस्यार्थः विचारश्च भवति। अस्मादेव विद् धातोः विद्या शब्दोऽपि निष्पद्यते तेन विद्याविद्ययोः समानोऽर्थः प्रतीयते। वेदशब्दस्य विशिष्टोऽर्थस्तत्र वेदः अलौकिकतां गमयति। ऋग्वेदभाष्यभूमिकायां सायणाचार्येणोक्तम्– **इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः** इति वेदस्य वेदत्वमधिकृत्य सायणाचार्येणैव श्लोकोद्धृतः –

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।**
**एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता॥**

तेन वेदस्य पारलौकिकदृष्ट्याऽपि परमं प्रामाण्यं समर्थितं भवति। परमप्रमाणभूतस्य वेदस्य विषये आपस्तम्बप्रभृतिभिः सूत्रकारैः **मन्त्रब्राह्मणयोर्वेदनामधेयम्**[१] इति उच्यते। **इष्टप्राप्त्यनिष्टपरिहारयोर-लौकिकमुपायं यो ग्रन्थो वेदयति स वेदः** इति कृष्णयजुर्वेदीय भाष्यभूमिकायामपि सायणाचार्यैः प्रतिपादितम्।

**अपौरुषेयं वाक्यं वेदः** इति सायणाचार्येणास्य लक्षणं व्यधायि। वेदविषये जनानामेतादृशो विमर्शो वर्तते यदत्र

---

[१] **आप०यज्ञपरि० २४.१.३१**

ऐहिकपारलौकिकादिसमस्तविषयेष्वस्माकं मार्गदर्शको वेद एव। वेदेषु तावद् आध्यात्मिका आधिभौतिका आधिदैविकाश्च विषया यत्र तत्र प्रकीर्णाः समुपलभ्यन्ते। निगूढार्था वेदमन्त्रा मननेनैव बुध्यन्ते, यथा –

**ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः।**
**यस्तन्न वेद किमृचा करिष्यति य इत् तद् विदुस्त इमे समासते॥**[1]
**हृदा तष्टेषु मनसो जवेषु यद् ब्राह्मणाः संयजन्ते सखायः।**
**अत्रा ह त्वं विजहुर्वेद्यामिरोहब्रह्माणो विचरन्त्यु त्वे॥**[2]

अत्र दुर्गाचार्यः– **यस्मात् वेदो विधिप्रतिषेधप्रसवनियमपरिसंख्यानपुनर्वचनपरार्थवादगहनोऽर्थवादाश्च यथाश्रुतप्रमाणग्राहिणो विदुषोऽपि परमभ्रान्तिहेतवस्तस्मात् परमदुर्विज्ञानवेदनीयत्वाद् वेदवाक्यानामिमां विद्यामन्तरेण सम्यगर्थावगमो न भवति।**[3]

मन्त्रस्यानेकेऽर्थाः– बहुषु वेदमन्त्रेषु तत्र तत्रानेके गूढार्थाः सन्ति तेषामाविष्कारो मनीषिभिः कार्यः, तथा चाग्नीन्द्रसूर्यविष्णुबृहस्पतिप्रभृतिदेवान् उद्दिश्य पठितेषु मन्त्रेषु देहात्मजीवात्मनोरन्यान्यजीवात्मनः परमार्थिकं रूपमस्ति तदत्रोच्यते।

ऋचः अक्षरे– अत्र ऋक् शब्देन ऋक्प्रधानभूताः साङ्गापरविद्यात्मकाश्चत्वारो वेदाः उच्यन्ते। ऋगादीनामपरविद्यात्वं मुण्डकोपनिषदि श्रूयते **द्वे विद्ये वेदितव्ये**[4] इति प्रतिज्ञाय **तत्रापरो ऋग्वेदो यजुर्वेदः सामवेदः**[5]

---

[1] **श्वेताश्वतरोपनिषद् ४.८**

[2] **ऋ० १०.७१.८**

[3] **नि० १३.१३**

[4] **मु०उ० १.१५**

[5] **मु०उ० १.१५**

तस्याः सम्बन्धिन्यक्षरेऽदृश्यादिगुणके क्षरणरहितेऽनश्वरे नित्ये सर्वत्र व्याप्ते ब्रह्मणि।। अक्षरशब्दस्य ब्रह्मवाचकत्वम् **एतस्य अक्षरस्य प्रशासने गार्गिसूर्याचन्द्रमसौ विधृतौ तिष्ठत.**[१] **यमा तदक्षरमधिगम्यते**[२] **येनाक्षरं पुरुषं वेद सत्यम्**[३] इत्यादिश्रुतिषु प्रसिद्धम्। ऋगक्षरः यः प्रतिपाद्यप्रतिपादकभाव सम्बन्धः।। सर्ववेदैः खलु ब्रह्म अधिगम्यते **तं त्वौपनिषदं पृच्छामि**[४] इत्यादिश्रुतेः। ननूपनिषद्भागानां तथास्तु इतरेषां तु कथं ब्रह्म विषयत्वमिति उच्यते। यद्यपि इतरभागानां यज्ञादिविषयत्वं तथा बुद्धिशुद्धिव्युत्पादनद्वारा वेदनसाधनत्वेन ब्रह्मविषयत्वं भविष्यति **वेदानुवचनेन ब्राह्मणा विविदिषन्ति**[५] इत्यादिश्रुतेः। तदेव विशिष्यते परमे उत्कृष्टे निरतिशये व्योम्निसदृशे अलेपत्वनीलरूपत्वव्यापित्वादिसादृश्येन व्योमेत्युक्तम्, यद्वा विशेषेण सर्वस्य रक्षके स्वाध्यायस्तस्य सर्वस्याधिष्ठानत्वेन रक्षकत्वम्। तादृशे तत्वे सर्वमध्यस्तमित्यर्थः। पुनस्तदेव विशिष्यते। यस्मिन् परमात्मनि विश्वे सर्वे देवाः अधिनिषेदुः निषीदन्ति, आश्रित्य तिष्ठन्ति तस्मिन्। यद्वा उक्तलक्षणे वस्तूनि ऋगुपलक्षिता सर्वे साङ्गाः, वेदाः पर्यवसिता इत्यर्थः। यः यो मर्त्यः तत् तादृशं देवादीनां स्वरूपनामास्पदं कृत्स्नवेदतात्पर्यप्रतिपाद्यं यद् वस्तु न वेद न जानाति स मर्त्यः। ऋचा पूर्वोक्तेन ऋगादिशब्दजालेन किं करिष्यति। वेदनसाधनेन वेदेन वेद्यमविदित्वा किं साधयतीत्यर्थः। प्रयोजनाभवात् सर्वस्यापि वेदस्य नैष्फल्यादिति भावः।

यद्वा योऽक्षरमविदित्वा कर्मणां कर्ता भवति। यागादिमनुतिष्ठति तेन किञ्चिदपि कर्म कृतं न भवतीत्यर्थः। य इत ये एव तत् तत्त्वं

---

[१] **बृ०उ० ३.८.९**

[२] **मु०उ० १.१५**

[३] **मु०उ० १.२.१३**

[४] **मु०उ० ३.९.२८**

[५] **बृ०उ० ४.४.२२**

विदुः जानन्ति त इमे समासते ते एव इमे ज्ञातारः समासते सम्यक् तिष्ठन्ति। अपुनरावृत्या स्वरूपावस्थानं समासनम्। अनेन मन्त्रेण स्पष्टमेव ऋचां प्रतिपाद्यत्वेन ब्रह्मपदार्थः स्वीक्रियते। अतः मन्त्रे **ऋचोऽक्षरे** इति पदविन्यासः सार्थकतां याति। अस्मिन् पदन्यासे ऋचः इति षष्ठ्यन्तं पदं यस्यार्थः ऋगुपलक्षिता सर्वे वेदास्तस्य च ऋक्पदार्थस्य एव प्रतिपाद्यत्वसम्बन्धेनाक्षरपदार्थेऽन्वयः।

ऋगुपलक्षितनिखिलवेदप्रतिपाद्यमक्षरमिति अर्थः निर्गच्छति। अक्षरपदार्थे सायणभाष्ये ब्रह्म एव उपनिषत्प्रमाणेन निर्धारितम्। यया तदक्षरमधिगम्यते। **येनाक्षरं पुरुषं वेद सत्यम्**[1] सर्वेषां वेदानां प्रतिपाद्यं वस्तु ब्रह्मैवेति मानवानां परमं लक्ष्यं यज्ञयागादयः त एव स्वर्गं लम्भयन्ति। ऋगुपलक्षितसर्ववेदप्रतिपाद्यभूतस्य ब्रह्मात्मनस्स्वरूपसाक्षात्कार एव। यतस्ततोऽप्यधिका वा अर्था भवन्ति। तेषु मुख्याः –

१. आधिदैविकः (प्रकृतिविषयकः)

२. आध्यात्मिकः (मनुष्यविषयकः)

३. आधिभौतिकः (प्राणिसमाजविषयकः)

४. आधियज्ञीयः (यज्ञविषयकः)

विभवो ह्यनुपक्षीणशक्तयो मन्त्रशब्दाः प्रदर्शनमात्रमयं क्रियते। **सर्वथैव मन्त्रशब्दानां योऽर्थ उपपद्यते स योज्यो यथासम्भवम्**[2] इति।

**प्रकरणत एव तु मन्त्रा निर्वक्तव्याः। नैकपदानि निर्ब्रूयादित्यादि**[3]

यास्केन शब्दार्थकरणे नियमनिर्धारणात् पदानामर्थनिर्धारणं तथैव क्रियते। अथ सर्वे सर्वार्थवाचकाः इति कामदोग्धृत्वाच्छब्दानां

[1] **मु०उ० १.१.१३**

[2] **दु०नि० २.२४**

[3] **निरु० २.३**

व्याकरणकोषादिबलाच्चानेके विलक्षणाश्च वेदपदार्थास्सम्भवन्ति तथाऽपि योगाद् रूढिर्बलीयसी इति न्यायेन योगरूढार्थ एव ग्राह्यो भवति। विनोदाय गृह्यतां यथायथमन्येप्यर्थाः परन्तु प्राकरणिकोऽर्थः सदैवङ्गीकर्तव्यः। यथा –

एक एव वेदशब्दः स्वरभेदात् भिन्नार्थमादधाति। तत्राद्युदात्तो वेदशब्दः शब्दराशेर्बोधकः, ग्रन्थवाचकः। अपरस्तु अन्त्योदात्तः कुशमुष्टेर्बोधकः। वेदं कृत्वा वेदिं करोतीति श्रौतवचनात्। वेदशब्दाभिधेयस्य कुशमुष्टेर्बन्धनानन्तरं दर्शपूर्णमासवेदे निर्माणं करोत्यध्वर्युः। यथा –

**वेदोऽसि येन त्वं देव वेद देवेभ्यो वेदोऽभवस्तेन मह्यं वेदो भूयाः।**
**देवा गातु विदो गातुं वित्वा गातुमित॥**
**मनसस्पत इमन्देव यज्ञꣳ स्वाहा वाते धाः॥**[१]

हे कुशमुष्टिनिर्मित हे वेदपदार्थ त्वं ऋग्वेदादिरूपमसि। हे प्रकाशक देव यथा त्वं इन्द्रादिदेवानां बोधकः असि तद्वत् मम बोधको भव। हे यज्ञवेत्तारः देवगणाः अस्माकं यज्ञस्य आरम्भोऽस्ति एतद् ज्ञाते सति यूयं सर्वे यज्ञे आगच्छत। मम यज्ञेन सन्तुष्टे सति स्वमार्गेण तृप्तो भूत्वा गच्छत। हे मनसस्पते परमेश्वरः अनुष्ठितमिमं यज्ञं युष्माकमधीनं करोमि। यूयं तं वायुरूपदेवतासु स्थापयत।

येन विज्ञानेन वेदेन वा विद्वद्भ्यः पदार्थानां वेदयिता भवसि। तेन विज्ञानप्रकाशनेन विज्ञानजिज्ञासवे मह्यं वेदयिता भूयाः। हे गातुविदो स्तुतिवेत्तारो देवाः येन वेदेन मनुष्याः सर्वाः विद्याः जानन्ति तेन यूयं गातुं विशेषविज्ञानं विदित्वोपगम्य गातुं प्रशंसायोग्यं वेदं प्राप्नुत।

---

[१] **शुक्लयजु० २.२१**

हे सर्वव्यापक परमेश्वर भवानिमं प्रत्यक्षानुष्ठानयोग्यं यज्ञं क्रियाकाण्डेन सिद्धं यज्ञरूपसंसारं स्वाहाक्रियानुकल्पे इव वाते पवने स्थापय। देवास्तं विज्ञानदातारं परमेश्वरमुपागतम्। हे मनुष्याः सर्वत्वेन वेदविद्या प्रकाशिता। तमेवोपास्यं विदित्वा क्रियाकाण्डमनुष्ठाय सर्वहितं सम्पादय। मैवं वेदविज्ञानेन तत्रोक्तविधानानुकूलस्यानुष्ठानेन च विना मनुष्याणां कदाचित् सुखं भवति। वेदविद्यया सर्वसाक्षिणं सर्वतो व्यापकं मत्वैव नित्यं धर्मस्यानुष्ठातारो भवत इति।

**अरेऽस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः॥**[1]

वेदस्य पर्यायभूताः बहवः शब्दाः वर्तन्ते यथा श्रुतिपरम्परया सन्धारणात् वेदः श्रुतिरिति कथ्यते। ऋग्यजुस्साम्नां त्रयाणां समूहस्त्रयीति नाम्ना वेदः प्रसिद्धः।

**ऋतं च स्वााध्याय प्रवचने च।**[2] **स्वाध्यायान्मा प्रमदः**[3] इत्यादिवाक्येषु स्वाध्यायो वेदस्य पर्यायवाचकः। वेदः छन्दश्शब्देनापि ज्ञायते यथा मन्त्रात्मको वेद स्थिरस्वभावादाम्नायः शब्देनापि वेदः पठ्यते। धर्ममूलकत्वाद्वेद आगमः शब्देनापि उच्यते।

प्रधानतया वेदो द्विविधः- मन्त्ररूपो ब्राह्मणरूपश्च। मन्त्रसमुदाय एव संहिता शब्देन व्यवहृतः। ब्राह्मणरूपो वेदभागस्तु संहिताभागस्य व्याख्यानरूप एव। स चायं ब्राह्मणभागो यागस्वरूपबोधकतया प्रथितः। ब्राह्मणग्रन्थोऽपि त्रिधा विभक्तो भवति।

ब्राह्मणारण्यकोपनिषदः। यज्ञस्वरूपप्रतिपादको ब्राह्मणभागः। अरण्ये पठिताः यज्ञस्याध्यात्मिकं रूपं विवेचयन्तो वेदभागा आरण्यकानि।

---

[1] **बृ०आ० २.४.१०**

[2] **तै०उ० १.९.१**

[3] **तै०उ० १.११.२**

उपनिषदो ब्रह्मबोधिका मोक्षसाधकानि। अयमेव भागो वेदस्यान्तरूपतया वेदान्त इत्युच्यते। ब्राह्मणभागे गृहस्थानामुपयोगीनि तत्त्वानि विलसन्ति। आरण्यकभागो वानप्रस्थमाश्रितानामुपनिषद्भागश्च सन्यस्तानामुपयोगीत्यपि कथयितुं शक्यते। **मन्त्रब्राह्मणयोर्वेदनामधेयम्** [१] इति वचनमापस्तम्बश्रौतसूत्रे। कात्यायनपरिशिष्टप्रतिज्ञासूत्रे च समायाति। एवं पारस्करगृह्यसूत्रे **वेदꣳ समाप्य स्नायात्॥** [२] एवं **विधिर्विधेयस्तर्कश्च वेदः** [३] इत्युक्तम्। अत्र विधेयो मन्त्रः, विधिस्तर्कश्च ब्राह्मणम्। एवमृग्वेदीये कौशिकगृह्यसूत्रे **मन्त्रब्राह्मणयोर्वेदशब्दः** [४] अथर्ववेदीये कौशिकसूत्रे च **आम्नायः पुनर्मन्त्राश्च ब्राह्मणानि च** [५] इत्युक्तम्। एवं शुक्लयजुर्वेदीयप्रातिशाख्ये **स्वरसंस्कारयोश्छन्दसि नियमः** [६] इति सूत्रे उक्तम्। ब्राह्मणेऽपि स्वरविधानात् ब्राह्मणभागस्य मन्त्रत्वम्। प्रातिशाख्यप्रतिज्ञासूत्रे **ब्राह्मणे उदात्तानुदात्तौ भाषिकः स्वरौ** [७] इति सूत्रेण। ब्राह्मणेऽपि स्वरविधानात्। ब्राह्मणानां वेदत्वम्। सायणेनापि मन्त्रब्राह्मणत्वं तावत् वेदस्यादुष्टं लक्षणमिति वदता मन्त्रब्राह्मणयोर्वेदत्वमङ्गीकृतम्।। षड्गुरुशिष्येणाऽप्युक्तम् – **मन्त्रब्राह्मणयोराहुर्वेदशब्दं महर्षयः॥** [८] कौटिल्येनापि **ब्राह्मणानामाम्नायत्वम्** [९] अंगीकृतम्।। शुक्रनीतावप्युक्तम्

---

[१] **आप०श्रौ०सू० २४.१.३१**

[२] **पारस्करगृह्यसूत्रम् २.६.१**

[३] **पारस्करगृह्यसूत्रम् २.६.५**

[४] **ऋ०कौशिकगृह्य० ३.१८.२३**

[५] **अथर्व०कौ०गृ०सू० ३.१२.२३**

[६] **शु०य०प्रा० ३.१२.२**

[७] **शु०य०प्रा० १.१.२**

[८] **षड्गुरुशिष्यः**

[९] **कौटिल्यः**

**मन्त्रब्राह्मणयोर्वेदनामप्रोक्तमृगादिषु**[१] पूर्वमीमांसायामुक्तम् **तच्चोदकेषु मन्त्राख्या**[२] **शेषे ब्राह्मणशब्दः**[३] अत्र शेषे मन्त्रभागादवशिष्टे वेदैकदेशे ब्राह्मणशब्द इत्युक्तम्। उभयोर्वेदत्वानङ्गीकारे शेषशब्दस्य वैयर्थ्यम्। अत्र अङ्गार्थे शेषशब्दं व्याचक्षाणां मते **शेषे यजुः शब्द** इति सूत्रानुसारं यजुर्मन्त्राणामपि मन्त्रत्वाभावः प्रसज्येत।

विधिमन्त्रयोरैकार्थ्यम् **एकशब्दात्**[४] इत्यत्र विधिब्राह्मणानां, तेन विधिमन्त्रयोरैकार्थ्यम्[५] सिद्धम्।। आम्नायशब्देन मन्त्रब्राह्मणात्मकं सम्पूर्णवेदराशिरेव गृहीतः। **शेषे ब्राह्मणशब्दः**[६] इति जैमिनिसूत्रभाष्ये शास्त्रतात्पर्यविदां शबरस्वामिनामप्ययमेवार्थोऽभिप्रेतः। भट्टपादेन कुमारिलेनापि तन्त्रवार्तिके **मन्त्रब्राह्मणयोर्वेदनामधेयम्** उक्तम्। वेदशब्देन ऋग्यजुस्सामानि ब्राह्मणसंहितानीत्युच्यन्ते मेधातिथिः। **वेदोऽखिलोधर्ममूलम्** इत्यत्र ब्राह्मणां वेदत्वप्रतिपादनायैव अखिलेति विशेषणम्।। मनुस्मृतेर्वचनान्तराण्यपि ब्राह्मणानां वेदत्वं प्रमापयन्ति।।

**विद्यन्ते ज्ञायन्ते लभ्यन्ते वा एभिर्धर्मादिपुरुषार्था इति वेदः**[७]

पादेनार्थेन चोपेतावृत्तबद्धा मन्त्रा ऋचः। गीयमानमन्त्राः सामानि, वृत्तगीतिवर्जितत्वेन प्रश्लिष्टपठितमन्त्रा यजूंषि शेषं यजुश्शब्दः। महर्षिजैमिनिरपि वेदानां त्रैविध्यं दर्शितवान्– **तेषामृग् यत्रार्थवशेन पादव्यवस्था**[८]**। गीतिषु सामाख्या।**[१] **शेषे यजुः शब्दः।**[२]

---

[१] **शुक्रनीतिः ४.२७१**

[२] **पूर्वमीमांसासू० २.१.३२**

[३] **पू०मी०सू० २.१.३३**

[४] **पू०मी०सू० २.१.३०**

[५] **पू०मी०सू० १.२.१**

[६] **पू०मी०सू० २.१.३३**

[७] **सायणाचार्यकृतवेदभाष्यभूमिकासंग्रहः पृ. ३८**

[८] **जै०सू० २.१.३५**

अत एव मन्त्रावान्तरविशेषमुपजीव्यवेदानामृग्वेदो यजुर्वेदस्सामवेदाः इति त्रैविध्यं वर्तते। **ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात्।**[३] **ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदम्, अथर्वणं चतुर्थम्।**[४] इत्यादिवाक्यं प्रमाणभूतम्। **वेद्यन्ते ज्ञाप्यन्ते धर्मादिपुरुषार्थचतुष्टयोपाया येन स वेदः**[५] इति।

**यजुर्वेदपदार्थः**- यजुषां प्राधान्यं याज्ञे कर्मणि। यजुश्शब्दः यज् धातोर्निष्पन्नो भवति। यजुर्वेदेन यज्ञानां स्वरूपनिर्धारणं भवति। **यज्ञस्य मात्रां विमिमीत उ त्वः**[६]**।** अत एव याज्ञिकदृष्ट्या यजुर्वेदस्यापरनाम अध्वर्युवेदः अपि शास्त्रे विश्रुतः। सम्प्रदायानुसारं यजुर्वेदः द्विधा विभक्तः -शुक्लयजुर्वेदः कृष्णयजुर्वेदश्चेति।

**शुक्लयजुर्वेदपदार्थः**- आदित्यपरम्परया प्राप्तमन्त्रसमुदायः शुक्लयजुर्वेद इति कथ्यते।[7] आदित्याद् याज्ञवल्क्यः शुक्लयजुषामध्ययनं कृतवान्। महर्षियाज्ञवल्क्योऽपि सूर्यस्याराधनया प्राप्तानि शुक्लयजूंषि कण्वादि पञ्चदश स्वशिष्यान् पाठयामास। तेऽपि स्वशिष्यानध्यापयामास। शाखापाठस्यादिप्रवचनकर्तृत्वात् ते पंचदशशिष्याः स्वस्वनामभिः पृथक् पृथक् शाखां चक्रुः। ता एव पञ्चदशशाखाः शुक्लयजुषा नाम्ना प्रसिद्धाः सन्ति। यथा-

---

[१] **जै०सू० २.१.३६**

[२] **जै०सू० २.१.३७**

[३] **ऐ०ब्रा० ५.३२**

[४] **छा०उ० ७.१.२**

[५] **का०श्रौ०भू०पृ० ४**

[६] **ऋक्० १०.७१.११**

[७] **आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते।। (श.प.ब्रा. १४.४.३३)**

**याज्ञवल्क्यस्य शिष्यास्ते कण्ववैधेयशालिनः।**
**माध्यन्दिनश्च शापेयी विदग्धश्चाप्य चोद्दलः।।**

**ताम्रायणश्च वात्स्यश्च तथा गालवशैषिरौ।**
**आटवी च तथा पर्णी वीरणी सपरायणः।**
**इत्येते वाजिनः प्रोक्ता दशपञ्च च संस्मृताः।।**[1]

**वाजसनेयपदार्थः**- वाजस्यान्नस्य सनिः-दानं यस्य महर्षेरस्ति सोऽयं वाजसनिः, तस्य पुत्रो वाजसनेयः तस्य यज्ञवाल्क्य इति नामधेयम्। (वाजसनि-ढक्)। तेन याज्ञवल्क्यैनैतानि शुक्लयजूंषि महर्षिभ्यः पञ्चदशभ्य आख्यायन्ते अत एव शुक्लयजुर्वेदस्य दश पञ्चशाखानामध्येतारः सर्वेऽपि वाजसनेयिन इति कथ्यन्ते। सायणाचार्यो वाजसनेयपदमेवं व्याचष्टे। वाज इत्यन्नस्य नामधेयम्।[2] **"अन्नं वै वाज"** इति श्रुतेः।

**श्रीमद्भागवतेऽपि-**

**एवं स्तुतः स भगवान् वाजिरूपधरो हरिः।**
**यजूंष्ययातयामानि मुनयेऽदात्प्रसादितः।।**
**यजुर्भिरकरोच्छाखा दशपञ्चशतैर्विभुः।**
**जगृहुर्वाजसन्यस्ताः काण्वमाध्यन्दिनादयः।।**[3]

एवं स्तुतः प्रसादितः स भगवान् हरिः रविः विभुर्याज्ञवल्क्यः शतैरपरिमितैर्यजुभिद्रश पञ्च च शाखा अकरोत्। रविणाऽश्वरूपेण वाजेभ्यः केसरेभ्यः वाजेन वेगेन वा सन्यस्तास्त्यक्ताः शाखाः। अथवा वाजेभ्यः सम्यक् नयन्तीति वाजसनीसंज्ञाः ताः शाखाः काण्वादयो जगृहुः अधीतवन्तः। सम्प्रति वाजसनेयशाखासु शाखाद्वयमेव प्राप्यते। तत्रैका

---

[1] **वा०पु०अ० ६१**

[2] **काण्वसंहिताभाष्योपक्रमणिकायां पृ.१०४**

[3] **श्रीमद्भागवते १२.६.७३-७४**

माध्यन्दिनीया द्वितीया च काण्वनामाख्या। महर्षियाज्ञवल्क्यान्माध्यन्दिनमहर्षिणा प्राप्तस्तेन चाध्यापितो वेदभागो माध्यन्दिनीयशाखारूपः। शुक्लयजुर्वेदे विनियोगवाक्यरहिताः केवला मन्त्राः वर्तन्ते। अतोऽमिश्रितरूपतया शुक्लयजुर्वेद इति संज्ञा वर्तते। कण्वनामाख्येनाचार्येणाधीतोऽध्यापितः प्रचारितो वेदभागो काण्वशाखारूपेण प्रसिद्धः।

**कृष्णयजुर्वेदपदार्थः-** यजुषां शुक्लकृष्णत्वविचारश्च ब्रह्मपरम्परया प्राप्तमन्त्रसमुदायः कृष्णयजुर्वेद इति कथ्यते। कृष्णयजुर्वेदे विनियोगवाक्यानि मन्त्राश्च सन्ति। अतो सम्मिश्रितरूपतया कृष्णयजुर्वेद इति संज्ञा जातेत्यपि लोकाः कथयन्ति। कृष्णयजुर्वेदे मन्त्रब्राह्मणारण्यकानि सहैव पठ्यन्ते। उच्चारणाकर्षणहेतुत्वाद् यजुषां कृष्णत्वं भ्वादिगणपठितात् कृषधातोर्युज्यते। त्रीणि मन्त्रब्राह्मणारण्यकानि यस्मिन् वेदशब्दराशौ सहसरन्ति पठ्यन्ते, असौ तित्तिरिः कृष्णयजुर्वेद इत्येवं व्युत्पत्तिः त्रि+तिर+इ इति विग्रहेण कर्तुं शक्यते। कल्पादौ भगवता विष्णुना हयग्रीवदैत्यं व्यापाद्य तदाहतो वेदो तत आनीय ब्रह्मणे प्रादीयत। ब्रह्मा च तं द्वेधा विभज्यैकं भागं सूर्ये स्थापितवान्। अपरं द्वापरान्ते भगवान् व्यासो वेदं चतुर्धा विभज्य ऋग्यजुस्सामाथर्वाख्यान् वेदमन्त्रान् क्रमात् पैलवैशम्पायनजैमिनिसुमन्तुभ्यः स्वशिष्येभ्यः पाठितवान्। ततश्च व्यासशिष्याद् महर्षिवैशम्पायनाद् याज्ञवल्क्यादयः शिष्या यजुर्वेदं पठितवन्तः। कदाचित् केनापि कारणेन कुपितो महर्षिः वैशम्पायनो याज्ञवल्क्यं प्रत्युवाच-

**इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया।**
**विप्रावमन्त्रा शिष्येण मदधीतं त्यजाश्विति॥**[१]

---

[१] **श्रीमद्भागवते १२.६.६३**

कुपितो गुरुरपि यतो विनीतानप्येतानल्पसारान् वदसि अतः विप्राणामवमन्त्रा अवज्ञाकर्त्रा शिष्येण त्वया अलं किमपि प्रयोजनमतो मत् मत्तो यदधीतं तदाशु त्यज इति याहि गच्छेत्याह स्म। एवं गुरुणा आदिष्टो याज्ञवल्क्यो योगबलेन तां वेदविद्यां मूर्तां विधाय उद्गमनेन त्यक्तवान् **'देवरातसुतः सोऽपिच्छर्दित्वा यजुषां गणम्'**[1] सोऽपि देवरातसुतो याज्ञवल्क्यः यजुषां गणं छर्दित्वा उद्गार्य ततः स्थानाद्गतः। अथानन्तरं मुनयस्तान् यजुर्गणान् ददृशुः। मुनयश्च तल्लोलुपतया यजुःषु अतिलुब्धतया छर्दितस्यादानं विप्ररूपेणानुचितं मत्वा तित्तिरः पक्षिविशेषो भूत्वा यजूंष्याददुर्गृहीतवन्तः। अत एव सुपेशलाः अतिरम्याः यजुः शाखाः तैत्तिरीया इति प्रसिद्धा आसन्–

**ततो गतोऽथ मुनयो ददृशुस्तान् यजुर्गणान्।**
**यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाऽददुः॥**
**तैत्तिरीया इति यजुः शाखा आसन् सुपेशलाः॥**[2]

ततो दुःखितो महर्षियाज्ञवल्क्यः सूर्यमाराध्य शुक्लानि यजूंषि प्राप्तवान्। याज्ञवल्क्यो सूर्यात् चतुरो वेदान् ऋग्यजुस्सामथर्वाख्यान् चाधीतवान्। यथा–

**स तथेति प्रतिज्ञाय प्रविश्यादित्यवाजिनः।**
**कर्णेऽपठत्ततो वेदांश्चतुरोऽपि च तन्मुखात्॥**[3]

ते वेदमन्त्रा आदित्यसम्प्रदायान्तर्गता ब्रह्मसम्प्रदायान्तर्गताश्च पुत्रशिष्यादिभिः सम्प्राप्ताः सन्तः अनेकशाखासम्पन्ना अभवन्।

**ब्राह्मणपदार्थः– आम्नायः पुनर्मन्त्राश्च ब्राह्मणानि**[1] इति। ब्राह्मणशब्दः ब्रह्मन्शब्देनाण् प्रत्यये कृते सति नपुंसकलिङ्गे वेदराशेः

---

[1] **श्रीमद्भागवते १२.६.६४**

[2] **श्रीमद्भागवते १२.६.६४-६५**

[3] **स्कन्दपुराणे ना०ख०अ० २७८**

अविधायकार्थे सिद्ध्यति। मन्त्रातिरिक्तो वेदभागः ब्राह्मणपदेन अभिहितो भवति। भगवाञ्जैमिनिः ब्राह्मणपदस्य लक्षणं कुर्वन्नुक्तवान् यत् **मन्त्रातिरिक्तो वेदभागः ब्राह्मणशब्देन व्यवह्रियते**[2]**।** चतुर्णां वेदानां मन्त्राणां कर्मसु विनियोजकः, कर्मविधायकः, नानाविधानादिसमन्वित इतिहासाख्यानबहुलः ज्ञानविज्ञानपूर्णं वेदभागं ब्राह्मणमिति – **वेदचतुष्टयमन्त्राणां कर्मसु विनियोजकः कर्मविधायको नानाविधानादीतिहासाख्यानबहुलो ज्ञानविज्ञानपूर्णो भागो ब्राह्मणभागः॥**[3]

ब्राह्मणग्रन्थस्य भागद्वयं वर्तते। विधिः अर्थवादश्च। आचार्यापस्तम्बः द्वयोर्भेदं प्रदर्शयन्नुक्तवान् **कर्मसु प्रेरकं विधिभागं ब्राह्मणमिति, शेषभागः अर्थवादः**[4] इति। आचार्यलौगाक्षिमतेनाज्ञातार्थमवबोधयितुं समर्थो वेदभागः विधिरिति।[5] सर्वेषु ब्राह्मणग्रन्थेषु सर्वाधिकं महत्त्वपूर्णं विपुलकायं यज्ञानुष्ठानस्य सर्वोत्तमप्रतिपादकं शुक्लयजुर्वेदीयशतपथब्राह्मणं विद्यते। शुक्लयजुर्वेदस्य काण्वमाध्यन्दिनद्वयोः शाखयोः शतपथब्राह्मणं विद्यते। शतपथपदस्यार्थः **शतं पन्थानो यस्य तच्छतपथम्। अर्थात् शतं पन्थानो मार्गा नामाध्याया यस्य तत् शतपथम्**[6]**।**

**कल्पपदार्थः**– ''कल्प्यते समर्थ्यते यागप्रयोगोऽत्र इति कल्पः'' यद्वा वैदिकयज्ञयागादीनां यथार्थरूपेण प्रतिपादको ग्रन्थः कल्पः। वेदाङ्गसाहित्ये कल्पशास्त्रस्य द्वितीयं स्थानमस्ति। यथा –

---

[1] **कौ०सू० १.३**

[2] **शेषे ब्राह्मणशब्दः ( मी० २.११.३३ )**

[3] **श०ब्रा०भू०पृ० २**

[4] **कर्मचोदना ब्राह्मणानि। ब्राह्मणशेषोऽर्थवादः ( आप०परि० ३४.३५ )**

[5] **तत्राज्ञातार्थज्ञापको वेदभागो विधिः ( अ०सं०पृ० ३६ )**

[6] **मा०श०ब्रा०भू०पृ० ३१, व्या. प्रो. युगलकिशोरमिश्रः।**

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**[१]

वैदिकसाहित्ये कल्पशास्त्रस्य महत्त्वपूर्णं स्थानं विद्यते। ऋग्वेदप्रातिशाख्यग्रन्थस्य वार्गद्वयवृत्तौ कल्पस्य विषये कथितमस्ति **कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पना शास्त्रम्** अर्थात् कल्पः वेदविहितकर्मणां यथाविधिप्रतिपादकं शास्त्रं वर्तते।

**आरण्यकपदार्थः- अरण्येऽनूच्यमानत्वादरण्यकम्**[२]**, अरण्ये-ऽध्ययनादेव आरण्यकमुदाहृतम्**[३]। कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये कथितमस्ति यत्-

**होतृन् प्रवर्ग्यकाण्डे च याश्चोपनिषदो विदुः।**
**अरुणाम्नायविधी चैव काठकपरिकीर्तिताः।।**
**रुद्रनारायणश्चैव मेधो यश्चैव पित्रियः**
**एतदारण्यकं सर्वं नाव्रती श्रोतुमर्हति।।**[४]

यथा दध्नः नवनीतः यथा मलयाचलपर्वताच्चन्दनं यथा औषधिभ्योऽमृतमुत्पद्यते तथैव वेदेभ्यः आरण्यकं जायते। आचार्यसायणः ऐतरेयब्राह्मणभाष्यस्य प्राक्कथने उक्तवान्- **अरण्य एव पाठ्यत्वादारण्यकमितीर्यते** अर्थात् आध्यात्मिकविद्याया अध्ययनमरण्ये एव भवति। अत एव एतच्छास्त्रमारण्यकमुच्यते।

---

[१] **निरुक्ते भू०पृ० १५ एवं पा.शि.**

[२] **बृहदारण्यकम्**

[३] **सं०हि०शब्दको० वामनशिवराम आप्टे पृ.१५७**

[४] **तै०आर०भा०पृ० १**

**उपनिषद्पदार्थः**- उपनिषच्छब्दः (उप+नि+सद्+क्विप्) उप एवं नि उपसर्गद्वयपूर्वकं **षद्लृ** धातोः क्विप् प्रत्ययस्य योगेन उपनिषच्छब्दः सिद्ध्यति। उप उपसर्गस्य समीपमर्थः। तथा च निषच्छब्दस्यार्थः निवासः भवति। उपनिषीदति सर्वानर्थकरं संसारं विनाशयति, संसारकारणभूतामविद्यां च शिथिलयति, ब्रह्म च गमयतीति उपनिषद्।।[१]

य इमां ब्रह्मविद्यामुपयान्त्यात्मभावेन श्रद्धाभक्तिपुरःसरः सन्तः तेषां गर्भजन्मजरारोगादिवर्गं विनाशयति परं वा ब्रह्म गमयति, अविद्यासंसारकारणं चात्यन्तमवसादयति विनाशयति, इत्युपनिषदुपनिपूर्वस्य सदेरेवमर्थं संस्मरणात्।[२] वेदानामन्त इति वेदान्तः अनया व्युत्पत्त्या वेदान्तशब्दस्य प्रयोगः वेदानामन्तिमो भाग उपनिषदर्थे कृतमिति।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे '**वेदपदार्थः**' नाम प्रथमोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

---

[१] **ईशा०उप०भू०**

[२] **कठोप०भू०**

# अथ द्वितीयोऽध्यायः

## वेदस्यैतिह्यम्

**चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।**
**त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥**[1]

सूक्ष्मातिसूक्ष्मज्ञानमेव परावाक्। तत् ज्ञानमेव वेदः ऋषय एव वेदवाण्या, साक्षात्कर्तारः। तेन ते ऋषयः कथ्यन्ते। यथा –

**ऋषयो मन्त्रद्रष्टारः। ऋषिः दर्शनात्।**[2]

परमेश्वरस्य मुखारविन्दात् निर्गतशब्दराशिरेव वेदः। यथा –

**यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।**
**निर्ममे तमहं वन्दे विद्यातीर्थं महेश्वरम्॥**[3]

पुराणेषु उल्लिखितं ब्रह्मैव वेदेषु प्रजापतिः इति। संस्कृतसाहित्ये वेदानां स्थानं सर्वोपरि वर्तते। भारतीयदर्शनस्य धर्मस्य संस्कृतेश्च जीवनं वेदा एव सन्ति। आर्याणां सभ्यता संस्कृतिश्च वेदानेवाधारीकृत्य विराजते। वेदाः न केवलं भारतीयैरपि तु वैदेशिकैः विद्वद्भिरपि स्वीकृता अवलोकितास्सन्ति। तस्यानुसन्धातृभिर्महर्षिभिरनुभूतस्य परमतत्त्वस्य बोधयितारो भूत्वा भुवि ते विभान्ति। भारतीयपरम्परानुसारेण वेदास्त्वपौरुषेयाः सन्त्येव। अतिप्राचीनकालादेवेष्टप्राप्तिरनिष्ट–

---

[1] **ऋ०सं० १.१६४.४५**

[2] **निरुक्तम् १.६**

[3] **सायणाचार्यकृत–ऋग्वेदभाष्यभूमिकायाः मङ्गलाचरणे**

परिहृतेश्चालौकिका उपायास्तेभ्य एव विदिता जायन्ते। वेदेषु ज्ञानविज्ञानधर्मदर्शनसदाचारसंस्कृतिनैतिकसामाजिकराजनैतिकप्रभृतीनां जीवनोपयोगिविषयाणां सन्निवेशोऽस्ति। प्रत्यक्षस्य न चानुमानस्य प्रवेशस्तत्रापि ते प्रविशन्ति। स्मृतिपुराणादीनां मान्यत्वं तदनुगामित्वमेवावतिष्ठते।

एतान् विश्वकोष एव मन्यन्ते विद्वांसः। वेदास्त्वस्माकं श्रेयःप्रेयःप्रभृतीनां साधनमस्ति। प्राचीनानि धर्मसमाजव्यवहारप्रभृतीनि वस्तुजातानि बोधयितुं श्रुतयः एव क्षमन्ते। वेदास्तु धर्ममूलतायैव सर्वथा समादृताः सन्ति। अतिप्राचीनमिदं वैदिकवाङ्मयं तथाऽपि आधुनिका इतिहासविदः देशिकाः वैदेशिकाश्च तेषां कालनिर्धारणे बद्धादराः। यथा– लोकमान्यतिलकमहोदयो यद्गणिताधारेण वेदानां ६००० ई.पू. निर्मितत्वम्, ततोऽपि वा पूर्वकालिकत्वं निर्धारितवांस्तत्र नास्ति सन्देहस्यावकाशः, वेदानां रचनायां जातायां तद्व्याख्यानभूता ब्राह्मणग्रन्थाः अरच्यन्त। ब्राह्मणग्रन्थेभ्यः पश्चात् आरण्यकानि तदनन्तरमुपनिषदस्ततो रामायणमहाभारतादिकं लौकिकसाहित्यानि चेति।

अतिव्यापकं विस्तृतञ्चेति वैदिकवाङ्मयम्। स चापौरुषेयो वेदश्चतुर्विधः – ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्च। तत्र छन्दोबद्धा मन्त्रा ऋचः। छन्दोहीना गद्यात्मका अर्थवशेन विभज्यमाना मन्त्राः यजुष्पदवाच्याः। ऋक्षु गीयमानो गानविशेषः सामपदाभिधेयः। छन्दोबद्धा ऋग्विशेषा एव अथर्वाङ्गिरसमन्त्राः। इदं सर्वाङ्गपूर्णम्, यतोऽत्र मानवजीवनोद्देश्यभूताः धर्मार्थकाममोक्षाख्याश्चत्वारोऽपि पुरुषार्थाः विवेचिताः। अस्य हि वाङ्मयस्य वयोवर्षिष्ठत्वेन महामहीखण्डमण्डलव्यापित्वेन दुष्परिच्छेदेन परिमाणेन निरतिशयेन वैभवेन अनन्यतुल्यत्वेन सौन्दर्यप्रकर्षेण संस्कृतातिव्रतोपयोगिना गुणेन च महति मौलिकपुरातने च वैदिकवाङ्मयेऽस्मिन् अस्मदभिनिवेशः सर्वथा

खलु समर्थ्यते। भारतीयसाहित्येतिवृत्तं तावत् वैदिककालः लौकिकसंस्कृतकालश्चेतिकालद्वयेन द्विधा विभज्यते।

पाणिनेः प्राक् प्रथमः कालः परतश्चापरः कालः गण्यते। आद्ये हि वेदाः ब्राह्मणानि आरण्यकग्रन्थाः उपनिषदः कल्पाश्चेति सारस्वतं समावेश्यते। विलक्षणया खलु सातत्यगतिरार्यसभ्यतायाः दरीदृश्यतेऽस्मिन् वैदिकवाङ्मये। प्रार्थनोपासनामन्त्रजपजननीजठरे शरीरग्रहणमारभ्याऽऽशरीरत्यागादार्यजीवनं विशिंषन्तः षोडशसंस्काराः अरणिभ्यां हव्यवाहो जननं श्रौतगृह्याणि बहूनि विध्यन्तराण्यपि च खीष्टात् बहुसहस्रवर्षपूर्वमेव विधिमनतिक्रम्यैव यावदद्य प्रवर्तन्ते। वेदास्त्वामूलमूलं धर्म्यप्रवृत्तिकम्। वेदानां परमोपादेयत्वात् अतिशयमहत्वशालित्वाच्च महर्षयस्तान् रक्षितुमपि पूर्वमुपायञ्चक्रुः। वेदा एतावद्दीर्घकालानन्तरमपि लोके समवाप्ताः सन्तीत्यत्र कारणमेव महर्षिकृतः प्रयत्नः एवास्ति। महर्षयो हि वेदरक्षणार्थमष्टविकृतीनां व्यवस्थां चक्रुः। ता विकृतयोऽधोलिखितेन श्लोकेनाभिव्यक्तः –

**जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः।**
**अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वाः महर्षिभिः॥**[१]

प्राचीनवैदिकशास्त्रमतेन वेदानां रचनाकालः–

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥**[२]

कदैषा अनादिनिधना दैवीवाक् जगतीतले आगता तन्निश्चेतुं न कोऽपि समर्थः। शास्त्राणामवलोकनेन ज्ञायते लोकव्यवहारार्थं परमात्मनः श्वासेन सह निर्गतः न कोऽपि अस्या कर्ता धर्ता रचयिता च।

---

[१] **चरणव्यूहपरि०पृ० ६६**

[२] **ब्रह्मसूत्रशांकरभाष्ये उधृतम् (१.३.८२)**

**तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।**
**छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत॥**[१]

**चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहृतं विप्रकृष्टमित्येवं जातीयकमर्थं शक्नोत्यवगमयितुम्॥**[२]

**''वाग्वै पराच्यव्याकृतावदत्ते देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुर्विति। सोऽब्रवीत् वरं वृणै मह्यं चैवैष वायवे च सह गृह्याता इति तस्माद् ऐन्द्रवायवः सह गृह्यते। तामिन्द्रो मध्यतो अवक्रम्य व्याकरोत्। तस्मादिदं व्याकृता वागुद्यते॥''**[३]

अतः को निश्चेतुं समर्थः कदा एषा वाणी समागता पृथिवीतले इति।

**त्रयो वेदा अजायन्त ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात्॥**[४]

**यदा ह वै ब्रह्माणं पुष्करे ससृजे। स खलु ब्रह्मा सृष्टश्चिन्तां आपेदे। तेनाहमेकेनाक्षरेण सर्वांश्च कामान् सर्वांश्च लोकान् सर्वांश्च देवान् सर्वांश्च वेदान् सर्वांश्च यज्ञान् सर्वांश्च शब्दान् सर्वांश्च वृष्टीः सर्वाणि च भूतानि स्थावरजंगमान्यनुभवेयमिति। स ब्रह्मचर्यमरचयत् स ओमित्येतदक्षरमपश्यत् त्रिवर्णचतुर्मासं सर्वस्यापीत्यादि॥**[५]

सृष्टेः रचनाकाल एव वेदानां प्रादुर्भावकालः।

---

[१] **शु०यजु० ३१.७**

[२] **शा०भा० १.१.२**

[३] **तै०सं० ६.४.७.३**

[४] **ए०ब्रा० ५.३२**

[५] **ग०ब्रा० १.१६**

**पाश्चात्यविदुषां मतेन वेदानां रचना कालः-**

प्रतीच्यानां मनीषिणां वैदिकसाहित्यव्याख्याविषयकं स्वतन्त्रमपि कार्यं स्तुत्यमासीत्। डॉ.मैकडानलकीथयोः वैदिकइण्डेक्स इत्येतन्नामधेयविश्वकोषः दृक्पथमवतरति। मैक्समूलरमहोदयस्य मतेन ऋग्वेदरचनाकालः ११५० ई.पू. इति। बुद्धधर्मोदयात् प्रागेव ब्राह्मणग्रन्था अपि व्यरचन्त। बुद्धेन ब्राह्मणग्रन्थेषु विवेचितानामेव यागविधीनां कट्वालोचना क्रियते स्म। अपि चोपनिषत्समर्थितकतिपयतत्व एव ब्राह्मणोपनिषद्भागा सम्भवन्ति। वैदिकसाहित्ये चत्वारि युगानि-छन्दोयुगम्, मन्त्रयुगम्, ब्राह्मणयुगम्, सूत्रयुगञ्चेति। प्रत्येकयुगविकासे तेन वर्षशतद्वयस्य काल कल्पितः। तदनुसारं बुद्धात् ६०० वर्षतः पूर्वं छन्दोयुगस्यास्तित्वं समायाति अतः ऋग्वेदस्य रचनाकालं ११५० ई.पू. समायात्।

डॉ. अविनाशचन्द्रदासमहानुभावो वेदे निर्दिष्टानि अनेकानि भूगर्भशास्त्रीयतत्वानि विशेषतः आर्यावर्ततश्चतुर्दिक्षु चतुस्समुद्रस्थितिमाधारीकृत्य गणनाद्वारा वेदस्य कालः २५ सहस्रसम्वत्सरपूर्वं मन्यते। इदं मतं ''ऋग्वैदिकइण्डिया'' इति नामके पुस्तके व्यक्ततया अनेन प्रतिपादितम्।। वैदिकसंहितासु नक्षत्रनिर्देशकानि बहूनि वर्णनानि सन्ति। यथा-

**एकं द्वे त्रीणि चत्वारि वा अन्यानि नक्षत्राणि अथैता एव भूयिष्ठा यत् कृत्तिका तदभूमानमेव एतदुपैति तस्मात् कृत्तिकास्वादधीत। एतद् वै प्राच्या दिशो न च्यवन्ते सर्वाणि ह वा अन्यानि नक्षत्राणि प्राच्या दिशश्च्यवन्ते।।**[१]

शंकरबालकृष्णदीक्षितेनेदमुक्तं भवति यत् शतपथब्राह्मणरचनाकाले कृत्तिकानियमेन प्राच्यामासन्। सम्प्रत्येता पूर्वदिग्

---

[१] **श०ब्रा०२.७.२**

बिन्दुत ईषदुत्तरस्यां दिश्युदयं यान्ति। दीक्षितमहोदयस्य गणनया तादृशीग्रहस्थितिः १००० ई. पूर्वकाले सम्भवति।

अतः स एव शतपथस्य निर्णयकालः। तैत्तिरीयसंहिता शतपथात् प्राचीना ऋग्वेदः तैत्तिरीयसंहिताया अपि प्राचीनः ऋग्वेदः ३५००ई.पू. कालेन प्रणीत इति सम्भवति एवं च सम्प्रति ऋग्वेद ५५०० ई.पू. वर्षप्राचीनः इति निश्चीयते।

बालगङ्गाधरतिलकमतेन वेदकालः किञ्चिदितोऽपि प्राचीनः सिद्ध्यति। मृगशिरानक्षत्रे वसन्तसम्पातस्य साधकानि बहूनि वेदवाक्यानि गृहीतानि। तैत्तिरीयंसहितायामुच्यते फाल्गुनी पूर्णिमा वर्षादिः। तिलकमतमिदमनुकूलं यतो पूर्णचन्द्रः फाल्गुन्यां तदा सूर्येण मृगशिरसि भवितव्यमेव तदेव च वसन्तसम्पातो भवति।

मृगशिरसि वसन्तसम्पातस्य कालः कृत्तिकाकालात् २००० वर्षपूर्वं सम्भवति। यतो मृगशिरसः कृत्तिकापर्यन्तमिति पश्चात् सर्पणे सहस्रद्वयाब्दः अपेक्ष्यते। एकस्मान्नक्षत्रान्तरात् सर्पणे ९७० वर्षाणि लगन्तीति। अतो येषु मन्त्रेषु मृगशिरसि वसन्तसम्पातस्योल्लेखो विद्यते ते ग्रन्था ४५ वर्ष ई.पू. समयतो अर्वाचीना न सम्भवन्ति। तिलकेन मृगशिरसोऽपि पूर्वं पुनर्वसौ वसन्तसम्पातस्य बोधकानि वेदवचनानि प्राप्तानि। ततस्ततोऽपि पूर्वतनः कालो वेदमन्त्राणां साधयितुं शक्यते। सर्वमिदं विचार्य तिलकमहोदयेन वैदिककालः चतुर्धा विभक्तः -

१. अदितिकालः- ६००० ई. पूर्वतः ५००० ई. पू पर्यन्तम्। अस्मिन्काले गद्यपद्यमया मन्त्राः रचिताः। ये प्रायः यज्ञेषु प्रयुज्यन्ते।

२.मृगशिरः कालः ४००० ई. पूर्वतः २५०० वर्षपर्यन्तमासीत्। अस्मिन् काले बहवो मन्त्राः विरचिताः।

३. कृत्तिकाकालः- २५०० ई. पूर्वतः १४०० ई. पूर्वपर्यन्तम्। अस्मिन् काले ब्राह्मणग्रन्थानां रचना जाता।

४. अन्तिमकालः– १४०० ई. वर्षपूर्वतः ५०० ई. पू. वर्षपर्यन्तम्। अत्र काले श्रौतगृह्यधर्मदर्शनशुल्वसूत्रग्रन्थानां रचना जाता।

आधुनिकाः शोधपरकविद्वांसः तिलकमहोदयस्य मतं पुष्टं कुर्वन्ति। अत्रत्यविषये विदुषां मतमेव प्रमाणम्।

**ऋग्वेदसंहिता – अग्निमीडे पुरोहितमिति आरभ्य यथा वः सुसहासति** इत्यन्तमष्टकाण्डैर्दशमण्डलैश्चतुष्षष्ट्यध्यायैश्चतुष्षष्टिप्रपाठकैः पञ्चाशीत्यनुवाकैः ईषदधिकसहस्रसूक्तैः ईषदधिकद्विसहस्रवर्गैः ईषदधिकाभिर्दशसहस्रसंख्याभिः ऋग्भिश्चोपेता। सेयं शाकली संहिता ब्राह्मणग्रन्थचास्य न लभ्यते। आश्वलायनीया संहिता अप्राप्ता। आश्वलायनीय–शाखाया ऐतरेयब्राह्मणमारण्यकञ्च साम्प्रतं प्राप्तं वर्तते। शाङ्खायनीयशाखाऽपि साम्प्रतमप्राप्ता किन्तु अस्य ब्राह्मणं शाङ्खायनब्राह्मणमुपलभ्यते। सम्प्रति ऋग्वेदस्य शाकलीसंहितैव पठनपाठने वर्तते। वैदिककर्मकाण्डपद्धतिषु वाष्कलसंहितायाः केचनमन्त्राः दरीदृश्यन्ते। आरण्यकम् – ऐतरेयारण्यकम्, शाङ्खायनारण्यकं चेति। उपनिषद् – ऐतरेयोपनिषद्, कौषीतक्युपनिषद्, बाष्कलोपनिषद् चेति। कल्पसूत्राणि – आश्वलायनश्रौतसूत्रम्, शाङ्खायनश्रौतसूत्रम्, आश्वलायनशुल्बसूत्रम्, आश्वलायनगृह्यसूत्रम्, शाङ्खायनगृह्यसूत्रम्, कौषीतकिगृह्यसूत्रमिति। ऋग्वेदस्योपवेदः आयुर्वेदोऽस्ति।

**यजुर्वेदसंहिता** – यजुर्वेदस्तु कृष्णशुक्लभेदेन द्विविधः। केनापि कारणेन गुरोः किञ्चित् पापं संलग्नं तदपनोदनार्थं गुरुणा मदर्थं यूयं व्रतं चरतेत्यादिष्टाः। महर्षियाज्ञवल्क्येन तु गुरोः किम् एभिः वराकैरहमेव व्रतं चरिष्यामीति कथितम्। ततः परमन्यशिष्यावमानजनकेनाभिमानपूर्णकथनेन रुष्टो गुरुः मत्तोऽधीतं त्यजेत्युक्तवान्। महर्षियाज्ञवल्यस्तु गुरोऽधीतं यजुरुद्गीर्य आदित्यनारायणं तपसा सन्तोष्य वाजिरूपधरेण

तेनोपदिष्टान्ययातयामानि नित्यान्येव यजूंषि महर्षि वैशम्पायनसम्प्रदायेऽनुपलब्धानि प्राप्तवान्।[१] प्राप्तानि च स्वशिष्यान् पाठयामास। याज्ञवल्क्येन वान्तानि कृष्णानि तानि तित्तिरा भूत्वा ऋषयो जगृहुस्तेन तैत्तिरीयाणि च प्रसिद्ध्यन्ति।

**( क ) कृष्णयजुर्वेदसंहिता** – कृष्णयजुर्वेदे तिस्रः शाखा उपलभ्यन्ते – तैत्तिरीयशाखा, मैत्रायणीयशाखा, कठशाखा चेति। एतासु मन्त्रब्राह्मणयोर्विभागो न दृश्यते। मन्त्रसंहितामेव प्रथमं मन्त्राम्नायस्तस्मिन्नेव प्रपाठके ब्राह्मणमप्याम्नातम्। प्रपाठकान्तरे काण्डान्तरे च क्वचिदाम्नातम्। तैत्तिरीयशाखायां यद्यपि संहिता ब्राह्मणमिति भागद्वयं वर्तते तथापि मन्त्रब्राह्मणविभागो नास्ति। मैत्रायणीयशाखायाः कठशाखायाश्च संहिता उपलभ्यते, ब्राह्मणभागः नोपलभ्यते। तैत्तिरीयसंहितायां सप्तकाण्डानि ब्राह्मणे काण्डत्रयम्। तैत्तिरीयसंहितायां चतुश्चत्वारिंशत् प्रपाठकाः अनुवाकाश्च एकपञ्चाशदुत्तरषट्शतानि। ब्राह्मणग्रन्थे पञ्चविंशतिप्रपाठकाः, अष्टोत्तरत्रिंशतानि अनुवाकाः। काठकसंहितायां तं तं विषयमवलम्ब्य स्थानकनाम्ना विभागः। मैत्रायणीशाखायां चत्वारि काण्डानि, चतुःपञ्चाशत् प्रपाठकाश्च सन्ति। तैत्तिरीयशाखायाः तैत्तिरीयारण्यकमुपलभ्यते। उपनिषद् – तैत्तिरीयोपनिषद्, कठोपनिषद्, श्वेताश्वतरोपनिषद्, मैत्रायणीयोपनिषद्, महानारायणोपनिषद् चेति। कल्पसूत्राणि – बोधायनश्रौतसूत्रम्, मानवश्रौतसूत्रम्, वाधूलश्रौतसूत्रम्, आपस्तम्बश्रौतसूत्रम्, भारद्वाजश्रौतसूत्रम्, वैखानसश्रौतसूत्रम्, काठकश्रौतसूत्रम्, सत्याषाढश्रौतसूत्रम्, वाराहश्रौतसूत्रञ्चेति श्रौतसूत्राणि सन्ति। बौधायनगृहसूत्रम्, भारद्वाजगृह्यसूत्रम्, मानवगृह्यसूत्रम्, काठकगृह्यसूत्रम्, आपस्तम्बगृह्यसूत्रम्, वैजवायगृह्यसूत्रम्,

---

[१] **"आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते" ( शतपथब्रा० १४.७.५.३३ )**

चारणीयगृह्यसूत्रम्, अग्निवेश्यगृह्यसूत्रम्, हिरण्यकेशिगृह्यसूत्रम्, वाराहगृह्यसूत्रम्, वैखानसगृह्यसूत्रञ्चेति।

**( ख ) शुक्लयजुर्वेदसंहिता** - शुक्लयजुर्वेदे काण्वी माध्यन्दिनीति भेदेन शाखाद्वयमुपलभ्यते। उभयोरपि शतपथसंज्ञकं ब्राह्मणं पृथक् उपलभ्यते। आरण्यकम् - बृहदारण्यकम्। उपनिषद् - बृहदारण्यकोपनिषद्, ईशोपनिषद् चेति। कल्पसूत्राणि - कात्यायनश्रौतसूत्रम्, पारस्करगृह्यसूत्रम्, बौधायनशुल्बसूत्रम्, मानवशुल्बसूत्रम्, आपस्तम्बशुल्बसूत्रम्, मैत्रायणीयशुल्बसूत्रम्, हिरण्यकेशिशुल्बसूत्रम्, वाराहशुल्बसूत्रम्, कात्यायनशुल्बसूत्रञ्चेति। यजुर्वेदोपवेदः धनुर्वेदोऽस्ति।

**सामवेदसंहिता** - साम्प्रतं सामवेदस्य तिस्रः शाखाः कौथुमी, जैमिनी, राणायनी चोपलभ्यन्ते। सामवेदे चतुर्विंशत्युत्तरमष्टादशशतं मन्त्राः वर्तन्ते। सामवेदे ताण्ड्यमहाब्राह्मणम्, षड्विंशब्राह्मणम्, सामविधानब्राह्मणम्, संहितोपनिषद्ब्राह्मणम्, वंशब्राह्मणम्, देवताध्यायब्राह्मणम्, जैमिनीयब्राह्मणं चेति। उपनिषद् - छान्दोग्योपनिषद्, केनोपनिषद् चोपलभ्येते। कल्पसूत्राणि - जैमिनीयश्रौतसूत्रम्, आर्षेयश्रौतसूत्रम्, क्षुत्रकल्पश्रौतसूत्रम्, लाट्यायनश्रौतसूत्रम्, द्राह्यायणश्रौतसूत्रम्, उपनिदानश्रौतसूत्रम्, निदानश्रौतसूत्रञ्चेति। गृह्यसूत्राणि- कौथुमगृह्यसूत्रम्, खादिरगृह्यसूत्रम्, गोभिलगृह्यसूत्रम्, द्राह्यायणगृह्यसूत्रम्, जैमिनीयगृह्यसूत्रम्, छन्दोगृह्यसूत्रम्, गौतमगृह्यसूत्रम्, छान्दोग्यगृह्यसूत्रञ्चेति। सामवेदस्योपवेदः गान्धर्ववेदो वर्तते।

**अथर्ववेदसंहिता** - अथर्वेदे पैप्पलादसंहिता, शौनकसंहिता चोपलभ्यते। शौनकसंहितायां विंशतिः काण्डानि सन्ति। सप्तसप्तत्युत्तरमेकोनषष्टिशं मन्त्रा, एकोनषष्ट्युत्तरसप्तशतं सूक्तानि सन्ति। ब्राह्मणम् - गोपथाभिधानं नामकं ब्राह्मणमेकमेवास्ति। उपनिषद् - प्रश्न-मुण्डक-माण्डूक्योपनिषदोपलभ्यन्ते। वैतानश्रौतसूत्रं कौशिकगृह्यसूत्रं

चोपलभ्यते। अथर्ववेदस्योपवेदाः - पुराणम्, इतिहासः, स्थापत्यम्, सर्पवेदः, असुरवेदः, पिशाचवेदश्चेति।

**यजुर्वेदस्य भाष्यकाराः -**

**सायणाचार्यः -**

आचार्यसायणः विजयनगरसंस्थापकः महाराजबुक्कस्य महाराजहरिहरस्य चामात्यः सेनानीश्चासीत्। महाराजबुक्कस्य प्रधानामात्यपदमेव १३६४ खीष्टाब्दतः १३७८ खीष्टाब्दवर्षपर्यन्तमलंचकार। तदनन्तरं १३७९ खीष्टाब्दतः १३८७ खीष्टाब्दपर्यन्तं महाराजहरिहरद्वितीयस्यामात्यपदं मृत्युपर्यन्तमलञ्चकार। निजज्येष्ठभ्रात्रा प्रेरितो भूत्वा वेदानां व्याख्याकार्ये प्रवृत्तोऽभवत्।

सम्पूर्णकाण्वसंहितायामुपरि स्वभाष्यमलेखि। सम्पूर्णायामथर्वसंहितायामुपरिभाष्यमलिखत्। प्रकाशितग्रन्थानां मध्ये द्वादशकाण्डपर्यन्तमस्य भाष्यमुपलब्धं वर्तते। सामवेदस्याथर्ववेदस्योपरि च ब्राह्मणानां सम्यक् विद्वत्तापूर्णं भाष्यं चकार। अस्य विदुषः वैदिकभाष्यान्तराणां ग्रन्थानामपि विद्वत्तापूर्णं भाष्यं वर्तते। ब्राह्मणानां भाष्यन्तु प्राञ्जलविद्वत्तापूर्णं विशुद्धरूपेण कर्मकाण्डभागस्य समर्थकमस्ति।

**सायणप्रणीतग्रन्थाः** - **१.** ऋग्वेदसंहिताभाष्यम्, **२.** तैत्तिरीयसंहिताभाष्यम्, **३.** सामवेदसंहिताभाष्यम्, **४.** अथर्ववेदसंहिताभाष्यम्, **५.** काण्वसंहिताभाष्यम्। एते पञ्चसंहिताभाष्यग्रन्थाः सायणप्रणीताः सन्ति। ब्राह्मणारण्यकग्रन्थानां संख्या त्रयोदश सन्ति येषां भाष्यं सायणेन कृतम्। यज्ञतन्त्रसुधानिधिप्रभृतयोऽस्य रचिता ग्रन्थाः सन्ति।

**श्रीमदुव्वटाचार्यः -**

उव्वटः काश्मीरको विद्वान् आसीत्। एतेन शुक्लयजुर्वेदमाध्यन्दिन-संहितायाः सर्वप्रथमभाष्यं प्रणीतम्। तद् भाष्यं साम्प्रतमुपलब्धं पठनपाठने विद्यमानं वर्तते। अस्य महानुभावस्य पितुर्नाम वज्रट इत्यासीत्। यजुर्वेदसंहिताभाष्ये पद्यमेकमुपलभ्यते-

**आनन्दपुरवास्तव्यवज्रटाख्यस्य सूनुना**
**उव्वटेन कृतं भाष्यं पदवाक्यैः सुनिश्चितैः।**
**ऋष्यादींश्च नमस्कृत्य अवन्त्यामुव्वटोऽवसन्**
**मन्त्राणां कृतवान् भाष्यं महीं भोजे प्रशासति॥**[1]

महाराजः भोजः धारानगरशासकः परमारवंश्यश्चासीत्। स हि १०१८ ईशवीये सिंहासनारूढो भूत्वा १०६३ वर्षपर्यन्तं राज्यं कृतवान्। तेन उव्वटस्य कालोऽयमेव भवितुं शक्नोति। राजधानीपरिवर्तनमपि सम्भवम्। अस्य भाष्यं लघ्वक्षरमपि अतीव प्रोज्ज्वलिताम् वर्तते। भाष्ये मन्त्राणां दार्शनिककोऽपि अर्थः प्रदर्शितः। तस्य युगस्य वैदिकशास्त्रस्य प्रौढवेदज्ञश्चासीत्। अस्य विद्वद्वरेण्यस्य अन्याः कृतयः, यथा १. ऋक्प्रातिशाख्यस्य टीका, २. यजुः प्रातिशाख्यस्य टीका, ३. ऋक्सर्वानुक्रमणीभाष्यम्, ४. ईशावास्योपनिषद्भाष्यम् इति चत्वारो ग्रन्थाः पूर्णरूपेण प्रौढाः प्रसिद्धाः प्रकाशिताः उपलब्धाः पठनपाठने वर्तमानाश्च सन्ति।

**आचार्यो महीधरः -**

आचार्यमहीधरस्य जन्म विद्वज्जनसेवितायां काश्यां नगर्यामेवाभवत्। नागरब्राह्मणवंशीयोऽयं विद्वानासीत्। तत्रैवाध्यापनं विधाय लब्धविद्वज्जनप्रतिष्ठो विरचितकतिपयग्रन्थो महीधरः काशीनगरपतेः शरणं

[1] **शु०य० उव्वटभाष्यम् ४०.१७**

गतवान्। वेददीपनामकं तस्य शुक्लयजुर्वेदमाध्यन्दिनशाखायाः संहितायाः भाष्यं मनोहरमस्ति। भाष्यमिदमर्थस्य विशदताया दृष्ट्या नितान्तमुपादेयमस्ति। अस्य पाण्डुलिपिः सरस्वतीभवनपुस्तकालये सङ्गृहीतास्ति। अस्य भाष्यस्योपरि उव्वटस्य स्पष्टरूपेण प्रभावो दृश्यते। निरुक्तप्रभृतिश्रौतसूत्रादिग्रन्थेभ्यः उद्धरणानि दत्वा याज्ञिकक्रियायाः विधानं बोधगम्यतां नीतम्। काशीनिवासी महीधरोऽयं वैष्णवाचार्यत्तन्त्ररहस्यज्ञः वैदिकसाहित्यस्य पारङ्गतश्चासीत्। तन्त्रादिषु रहस्यमयेषु शास्त्रान्तरेष्वपि सम्यगधीतिविनयेन भक्त्या च गुरुजनान् प्रीतवान्। परमविदुषे अस्मै सर्वविद्यापारंग आचार्यः इति विरुदमुपाहरत्। अनेन तन्त्ररहस्यविवेचको मन्त्रमहोदधिनामा एकः ग्रन्थः विक्रमस्य १६४५ (१५८०) ई. प्रणीतः। अन्यग्रन्थास्यान्ते भाष्यकारेण लिखितमिदम्।

**अब्दे विक्रमतो जाते बाणवेदनृपैर्मिते।**
**ज्येष्ठाष्टम्यां शिवस्याग्रे पूर्णो मन्त्रमहोदधिः॥**[१]

अतः भाष्यकारस्यास्य समयः षोडशशतकस्योत्तरार्द्ध इति निश्चीयते। उव्वटाचार्यात् पञ्चाशतवर्षान्तरसमयः अभवत्।

**आचार्यः हलायुधः** –

सायणात् पूर्ववर्तिषु प्रधानाचार्येषु हलायुध एव शुक्लयजुर्वेदकाण्वसंहिताया भाष्यं रचितवान्। भाष्यमेतदतिविशिष्टमस्ति, भाष्यस्य नाम "**ब्राह्मणसर्वस्वम्**"। अनेन विदुषा स्वविषये किञ्चिद्वृत्तं लिखितम्। अयं महर्षिवत्सगोत्रीयः ब्राह्मण आसीत्। हलायुधस्य पितुर्नाम श्रीधनञ्जय आसीत्। ततः ज्ञायते यतोऽयं महाविभूतिः बंगप्रदेशस्यान्तिमहिन्दुभूपतेः सुप्रसिद्धलक्ष्मणसेनस्य व्यवहारमण्डले धर्माधिकारिणः गौरवपूर्णपदोऽयं प्रतिष्ठापित आसीत्। बाल्ये अयं

[१] **वैदिकवाङ्मयस्येतिहास– आचार्यजगदीशचन्द्रमिश्रः**

राजपण्डितोऽभवत्। नवयौवने श्वेतच्छत्रधारणस्याधिकारः प्राप्तः। वार्द्धक्ये नृपलक्ष्मणसेनस्य धर्माधिकारीति पदे प्रतिष्ठापितः।

**बाल्ये ख्यापितराजपण्डितपदं श्वेतार्चिविम्बोज्वलः**
**च्छत्रोत्सिक्तमहामहस्तमुपदं दत्त्वा नवे यौवने।**
**यस्मै यौवनशेषयोग्यमखिलक्ष्मापाल नारायणः**
**श्रीमान् लक्ष्मणसेनदेवनृपतिः धर्माधिकारं ददौ।।**

खीस्ताब्दसप्तत्यधिकैकादशाब्दे अयं राज्यसिंहासनारुढो अभवत्। त्रिंशद्वर्षपर्यन्तमयं राज्यं चकार। सुप्रसिद्धसंवत्सरप्रतिष्ठापकोऽयम्। लक्ष्मणसेनस्य कृत्याकृत्यविवेकता आसीत्। तद्राजमन्दिरे कश्चिदपि मलिनच्छिन्नवस्त्रो निर्हेमभूषणो बालपरिच्छन्नो न व्यलोकि। सः आर्तेभ्यो मुक्तहस्तेन दानं ददौ। स पराक्रमे इन्द्रतुल्यः। असौ त्रिंशद्वर्षपर्यन्तं शासनं चकार। लक्ष्मणसेनस्य समयः ई.व. ११७० वर्षतः १२०० वर्षपर्यन्तम्। स्वसमयस्य हलायुधप्रतिष्ठितो वैदिको विद्वान् आसीत्। यः वैदिकधर्मस्य पूर्णप्रकर्षः एव मूर्तो भूत्वा हलायुधात्मना प्रकटीभूतः।

अयं हलायुधशैवदर्शनाचार्यः वेदमीमांसामर्मज्ञः आगमपारङ्गतश्च आसीत्। विशेषतः शैवसर्वस्वम्, ब्राह्मणसर्वस्वम्, मीमांसासर्वस्वम्, वैष्णवसर्वस्वम्, पण्डितसर्वस्वञ्च पञ्चग्रन्थाः हलायुधाचार्यप्रणीताः सन्ति। अयं स्वयोग्यताबलेन गौडराज्याधिपतेः लक्ष्मणसेनस्य सभापण्डितः धर्माध्यक्षश्चासीत्।

**अनन्ताचार्यः** -

अनन्ताचार्यनामा वैदिकविद्वान् काशीनगरे जातः। सः काण्वशाखीयो विप्र आसीत्, षोडशशतकोत्तरार्द्धेऽस्य विदुषः कालो निर्धारितः। अनेन काण्वसंहिताया उत्तरार्द्धोपरि स्वभाष्यं रचितम्। अस्य भाष्यस्योपरि महीधराचार्यस्य स्पष्टतश्छाया प्रतीता भवति। तस्मादुत्तरकालीनोऽयं भाष्यकारः।

**आनन्दबोधभट्टोपाध्यायः -**

वाराणसेयसंस्कृतविश्वविद्यालयतः प्रकाशितायां सारस्वतसुषमापत्रिकायामानन्दबोधभट्टोपाध्यायस्य काण्वसंहिताया एकत्रिंशदध्यायादारभ्य चत्वारिंशदध्यायपर्यन्तभाष्यं क्रमशः प्रकाशितमस्ति। ग्रन्थान्तपुष्पिकानुसारेण वासुदेवपुरीनिवासी चतुर्वेदीयजातवेदभट्टोपाध्यायस्यायं विद्वान् पुत्र आसीत्। तस्य विदुषः सम्बन्धे एतावदेव सूचना उपलब्धास्ति। आनन्दबोधभट्टोपाध्यायेन स्वभाष्ये देवता ऋषिछन्दःप्रभृतीनां निवेशः कृतः। यज्ञपरकमन्त्राणां विनियोगोऽपि यथास्थानं निविष्ट एवेति। अस्य भाषापि बोधगम्या अस्ति। भाष्यस्य शैल्यपि सरला स्वच्छा। शैली गुणेनैव ग्रन्थोऽयं लोकप्रियतामनयत्। ब्राह्मणग्रन्थानामप्युद्धरणानि अनेन स्वकीयग्रन्थे दत्तानि। अस्य भाष्योपरि उव्वटस्य प्रभावः विशेषरूपेण परिलक्षितो भवति। तत्रापि भाष्येऽस्मिन् भाष्यकारेण स्वीया मौलिकताऽपि यत्र तत्र प्रदर्शिता।

**कुण्डिनाचार्यः -**

आचार्यकुण्डिनस्तैत्तिरीयसंहिताया वृत्तिमरचयत। अनुक्रमण्याम् अर्द्धश्लोकात् ज्ञातं भवति। यस्या पदकृदात्रेयो वृत्तिकारस्तु कुण्डिनोऽस्या शाखायाः पदपाठकर्ता आत्रेयः कश्चिदत्रिगोत्रीयब्राह्मणः वृत्तिकारकुण्डिनाचार्यः आसीत्। सम्भवतः वृत्तिकारः, गुप्तकालीनो विद्वान् तस्य वृत्तेः रचनायाः एष एव कालः।

**आचार्यभवस्वामी -**

आचार्यभवस्वामिना तैत्तिरीयसंहिताया भाष्यग्रन्थः रचितः। भवस्वामिनः परिचयादिबोधः स्वकृतबौधायनप्रयोगसारनामक-ग्रन्थस्यारम्भिकभागे केशवस्वामिना कृतः। केशवस्वामिमतेन सिद्धं भवति, यदयं महानुभावः, तैत्तिरीयसंहितायाः भाष्यकार आसीत्।

**आचार्यगुहदेवः -**

गुहदेवनामा कश्चित् विद्वान् तैत्तिरीयसंहितायाः भाष्यं चकार। अस्य भाष्यस्योद्धरणं प्रतिष्ठितैराचार्यैः कृतमतोऽस्य प्रामाणिकता प्रमातुं शक्यते। सर्वाधिकनिश्चितप्रमाणमस्य भाष्यस्य सद्भावे देवराजयज्वनः निघण्टुभाष्ये समुपलब्धो भवति। देवराजयज्वा स्वभाष्यारम्भे एव गुहदेवं भाष्यकारत्वेन स्मृतवान्। तैत्तिरीयारण्यकस्य **''रश्मयश्च देवामरगिरः''** इति मन्त्रगतगरगिर इति पदस्य गुहदेवकृतव्याख्यां समुद्धृतमेव। तद्यथा- **''तथा च रश्मयश्च देवा गरगिरः''** इत्यत्र गुहदेवः **"गरमुदकं गिरन्ति पिबन्तीति गरगिरः"** इति भाष्यं कृतवान्। अयमपि प्राचीनभाष्यकारः एवास्ति। आचार्यरामानुजो वेदार्थसंग्रहाख्ये स्वग्रन्थे गुहदेवं स्मरति। तद्यथा-

**यथोचितक्रमपरिणतभवत्ये तस्य च भगवद्बोधायनटङ्कद्रमिडगुहदेवकुण्डिनभारुचिप्रभृत्यविगीतशिष्ट-परिगृहीतपुरातनवेदवेदान्तव्याख्यानसुव्यतार्थश्रुतिनिकरनिर्दर्शितोऽयं पन्थाः॥''**[१] अतोऽस्य कालः विक्रमाष्टकशतकं नवमशतकं वा इति अनेके विद्वांसः कल्पयन्ति॥

**आचार्यक्षुरः -**

आचार्यक्षुरोऽपि तैत्तिरीयसंहितायामुपरि किमपि भाष्यं प्रणीतवान्। आचार्यक्षुरस्य विषये सायणाचार्यस्य माधवीयधातुवृत्तौ प्रदत्तेन निर्देशेन ज्ञातो भवति। अस्मिन् निर्देशे क्षुराचार्यस्य नाम भट्टभास्करस्य नाम्ना पूर्वमेवोल्लिखितोऽस्ति। यथा - **''त्रय एनां महिमानः सचन्ते''**[२] इत्यत्र क्षुरभट्टभास्करीययो सचन्ते समन्ते इति, अतः अयं क्षुराचार्यः भट्टभास्करः पूर्ववर्तीति सम्भाव्यते।

---

[१] **रामानुजाचार्यविरचितवेदार्थसंग्रहाख्यग्रन्थः**

[२] **तै०सं० ४.३.१**

**आचार्यभट्टभास्करमिश्रः –**

आचार्यभट्टभास्करसमयनिर्धारणं वैदिकभाष्यकारा–णामितिहासार्थं नितान्तमावश्यकमस्ति। सायणाचार्यः स्वभाष्ये आचार्यभट्टभास्करमिश्रं स्मरति। एतेन विक्रमस्य पञ्चदशशतकपूर्ववर्तित्वमायाति। सायणपूर्ववर्ती लक्ष्मणापरनामको वेदाचार्यः स्वीये भाष्ये सुदर्शनमीमांसायां न केवलमाचार्यभट्टभास्करमिश्रस्य नामोल्लेखं कृतवानपि तु तस्य ज्ञानयज्ञनामकभाष्यग्रन्थस्याप्युल्लेखं कृतवान्। तथा चात्र प्रमाणम् –

**तत्र भाष्यकृता भास्करमिश्रेण ज्ञानयज्ञाख्ये भाष्ये एतत्प्रमाणव्याख्यानसमये चरणमिति देवताविशेष इति तदनुगुणमेव व्याख्यातम्**[१] आचार्यदेवराजयज्वा स्वग्रन्थेऽस्य भाष्यम् उदाहरत्। प्रसिद्धवैदिकेन आचार्यहरदत्तेन एकाग्निकाण्डे स्वभाष्ये भास्करकृतभाष्यात् साहाय्यं गृहीतवान्। अतः भास्करस्य समयः विक्रमस्यैकादशशतकं कथयितुं शक्यते। अनेन स्वभाष्ये आर्यभट्टीयामरकोषकाशिकाप्रभृतिग्रन्थानां नामोल्लेखः कृतः। एतदपि पूर्वकल्पितसमयकत्वमस्य साधयति। भट्टभास्करः तैत्तिरीयसंहितायामुपरि ज्ञानयज्ञनामकं भाष्यं लिलेख। भाष्यमेतदतीव विद्वत्तापूर्णमस्ति। अस्य आध्यात्मिकाधिदैविकपक्षार्थस्य प्रदर्शनं कृतमनेन। अस्य भाष्यं वैदिकसाहित्येऽतिमहत्त्वपूर्णमस्ति।

**स्वामिदयानन्दः –**

स्वामिनः दयानन्दस्य जन्म गुर्जरप्रदेशस्य टङ्काराग्रामे वि.सं. **१८८७** तमे औदीच्यब्राह्मणकुले अभूत्। तेन शुक्लयजुर्वेदस्य वाजसनेयशाखायाः भाष्यमाविष्कृतम्। स्वामिदयानन्दमहोदयः चतुर्वेदभाष्यभूमिकामरचयत्। आंग्लीयानां शासनकाले तेन भारतीयान्

---

[१] **सुदर्शनमीमांसा पृ० 4**

वेदसन्देशेन एकीकृत्य स्वतन्त्रतासङ्ग्रामे स्वयोगदानं दत्तम्। स्वामिदयानन्दमहोदयस्य संवत् **१९४०** तमे विक्रमसंवत्सरे निधनमभवत्।

**अनन्तश्रीस्वामिकरपात्रमहाराजाः –**

**यो दण्डिवर्योऽतियतीन्द्रचार्यः श्रौताऽध्वनोऽभूद्भुवनेषु धुर्यः।**
**श्रेयो भृतां शश्वदपीह चार्यो धार्यः स चित्ते करपात्र आर्यः॥**[1]

**अत्यद्भुतमिदं भाष्यं करपात्रविनिर्मितम्।**
**ईशावास्योपनिषदः श्रुतीनां हृदयं स्फुटम्॥**
**सायणाचार्यवर्याणामुव्वटस्य च यन्मतम्।**
**महीधरस्य यच्चापि तदप्यत्र समर्थितम्॥**[2]

स्वामिकरपात्रमहाराजाः शुक्लयजुर्वेदसंहितायाः भाष्यं रचितवन्तः। तत्र निगूढवेदमन्त्राणां तत्त्वं तैरुद्घाटितम्। स्वामिचरणानां विषये नाधिकमहं ब्रवीमि। लोकविश्रुतास्ते त्यागशीला अपि "**ह्रासदर्शनतो ह्रासः**" इति न्यायेनानुकूलं क्षीयमाणस्य सनातनधर्मस्य समुज्जीवनाय प्रतिश्वासं यतमाना आ च हिमवतः, आ च कुमारिकायाः, बहुवारं समग्रभारतं परिभ्रम्य लोकहिताय उपदिशन्तो जनानां मनांस्यावर्जयन्तश्च तान् सनातनधर्मोन्मुखान् विदधतीति न तिरोहितमिदं भारतीयानां जनानाम्। वेदरक्षणाय स्वामिकरपात्रपादैः विचारात्मकं प्रयोगात्मकं च साहित्यमाविष्कृतम्। श्रीहरिहरानन्दसरस्वतीस्वामिकरपात्रचरणस्य जन्म ई. **१९०७** तमे वर्षे उत्तरप्रदेशस्य प्रतापगढजनपदे भटनीग्रामे ब्राह्मणकुले अभूत्।

आधुनिके युगे वेदोद्धारकमहापुरुषेषु स्वामिकरपात्रचरणान्यतमाः आसन्। वेदप्रमाणविषये आस्तिकानां

---

[1] **श्रीकरपात्राष्टकम् म०म०श्रीशशिधरशर्मा ८**

[2] **शु०य०भा०भू० शङ्कराचार्यश्रीनिरञ्जदेवतीर्थः १,१२**

नास्तिकानां च या या विप्रतिपत्तय: ता: निष्पक्षपातया दृशा विवेचिता:। ब्राह्मणग्रन्थानां प्रामाण्ये य: कलहो सामाजिकानां स्वामिदयानन्दानुयायिनां मध्ये वर्तते तस्य निराकरणं विशेषरूपेण कृतम्। अस्मिन्नेव प्रसङ्गे वेदस्य स्वरूपं तदपौरुषेयत्त्वं तत्प्रामाण्यं च कीदृशमिति विस्तरेण निरूप्य दयानन्दमतं सप्रमाणं सुपरीक्षितम्। ब्राह्मणभागानां सत्यपि संहिताभाष्यरूपत्वे यथा तदपौरुषेयत्वं प्रसिद्ध्यति तथा मनोहर: मार्ग: प्रकटित:। तत्र दयानन्द: किमभिप्रैति? तस्य समाधानं किम्? तदनुयायिन: किं लिखन्ति? तदुत्तरं किम्? इत्यादयो विषया: विशेषरूपेण परिशीलिता:। स्वामिकरपात्रचरणै: "वेदार्थपारिजातम्", "वेदभाष्यभूमिका", "शुक्लयजुर्वेदभाष्यम्", "रामायणमीमांसा", "श्रीविद्यारत्नाकर:" इत्यादयो बहव: ग्रन्था: प्रणीता:। श्रीहरिहरानन्दसरस्वती स्वामिकरपात्रचरणा: सन् **१९८२** तमे ई.वर्षे काश्यां केदारखण्डे निर्वाणं प्राप्तवन्त:।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिन: श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनि:श्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'वेदस्यैतिह्यम्'** नाम द्वितीयोऽध्याय:।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

# अथ तृतीयोऽध्यायः

# आधुनिकसन्दर्भे यजुर्वेदे वैश्विकचिन्तनस्य प्रयोजनम्

वेदः शब्दमयब्रह्मणः मूर्तस्वरूपमस्ति, तस्मादेव सर्वेषु शास्त्रेषु वेदशब्दस्यापरपर्यायः ब्रह्म प्रसिद्धमस्ति। वेदः ज्ञानरूपिरत्नाकरोऽस्ति। वेदस्य अमृतसदृशकणिकानामवगाहनं कृत्वा मनुष्याः कृतकृत्याः भवन्ति। वेदे यत्र तत्र आख्यानमयाः [१] अनेके मुक्तामणयः विद्यन्ते, यत्र व्यक्तीनामभीष्टकार्यसिद्ध्यर्थमुपादानकारणं निहितं वर्तते, निष्ठा एवं आस्था द्वारा व्यक्तिः स्वस्य विविधकामनानां पूर्तिकरणे अनेन माध्यमेन समर्थो भवति। यजुर्वेदे प्रमुखाख्यानां सूक्तानां स्वरूपज्ञानम्, प्रयोजनज्ञानम्, तत्त्वज्ञानं विना तेषामध्ययने जपे एवं तत्प्रतिपादितानुष्ठाने च प्रवृत्तिर्न भवति।

स्वरूपज्ञानमेवं प्रयोजनज्ञानमेव प्रवृत्तिप्रयोजकज्ञानस्याधारमस्ति। कस्मिन् अपि कार्ये व्यक्तीनां प्रवृत्तिः तदैव भवति यदा प्रमाणसम्मतरूपेण ज्ञानमुदेति अनेनास्माकमिष्टस्य सिद्धिर्भवति। एवञ्च

---

[१] **आख्यानशब्दस्यार्थो वर्तते यत् पूर्वज्ञातघटनायाः अथवा अवस्थितेः ज्ञानस्य क्रिया। ख्याशब्दस्यार्थो भवति प्रकटीकरणम्, आशब्दयोजने तस्यार्थो भवति सम्यक् रूपेण प्रकटीकरणम्। वैदिकाख्यानस्य संहिताभागे, ब्राह्मणग्रन्थे, आरण्यके, उपनिषदि च विशेषमहत्त्वं वर्तते। अख्यानं क्रियायाः अभिव्यक्तिं स्पष्टमकरोत्। एतदाख्यानं कुत्रचित् सादृश्यमूलकम्, कुत्रचित् प्रतीकात्मकम्, कुत्रचिदन्योक्तिपरकम्, कुत्रचित् कार्यविशेषे घटितानां घटनानां देशातीतं कालातीतञ्च प्रदर्शयति।**

एतदपि ज्ञानमावश्यमेतत् कार्यं मत्कृतिसाध्यम्, अन्यच्च अहमस्य कार्यस्याधिकारी।

वेदशब्दः विद्सत्तायाम्, विद्ज्ञाने, विद्विचारणे एवं विद्लृलाभे इति चतुर्भिः धातुभिः निष्पन्नो भवति। यस्यार्थो भवति यस्य सदैव सत्ता वर्तते, यः अपूर्वज्ञानप्रदः वर्तते, यः ऐहिकामुष्मिकोभयविधविचाराणां कोशः, यः लौकिकः तथा लोकोत्तरलाभप्रदश्च एतादृशग्रन्थरत्न एव वेदपदेनोच्यते। वेदे सत्ता, ज्ञानम्, विचारः, लाभश्च चत्वारि गुणानि विद्यमानानि सन्ति। वेदः प्रत्यक्षानुमानोपमानानां सीमपर्यन्तं सीमतानां लौकिकज्ञानानां निधिरस्ति, एवमेव प्रत्यक्षानुमानोपमानादिभिः सर्वदा सर्वथा अज्ञेयः, अतीन्द्रियः, अवाङ्मनसगोचरः, लोकोत्तरज्ञानस्य एकमात्रं साधनं वर्तते। यजुर्वेदे उच्चकोटिकविज्ञानं निहितं वर्तते, वेदे प्रतिपादितेन हिमविज्ञानेन, अश्वत्थविज्ञानेन शङ्खध्वनिविज्ञानेन रोगादीनां विनाशविज्ञानं भवति। एवं भारतीयविज्ञानवेत्तृणां चिरकालानुसन्धानस्योपरान्तं वेदः अभारतीयवैज्ञानिकपर्यन्तमंशतः प्राप्तो वर्तते।

**अग्नीषोमात्मकं जगत्** अस्य वैदिकघोषणायाः तथ्यज्ञानार्थं वैज्ञानिकेषु यजुर्वेदोक्तविज्ञानस्य अध्ययनमवश्यं कर्तव्यम्। परमाणुविज्ञानं विज्ञानस्य चरमसीमात्वेन ज्ञायते परन्तु तद्विज्ञानस्य इति नास्ति अपितु प्रारम्भकालोऽस्ति। वैज्ञानिकोक्त नाइट्रोन एवं प्रोटोननामकः परमाणोः विश्लिष्टः अन्तिमः अंशः वेदोक्ताग्निसोमतत्त्वयोः स्थूलतमप्रतिनिधिरस्ति। ययोः तत्त्वांशयोः अन्तिमं ज्ञात्वा अद्य भौतिकविज्ञानवादिनः केवलमनिर्वचनीयशान्तिपुञ्जमात्रमिति कथयन्ति, एवमेव तत्संश्लिष्टापरांशमच्छेद्येन सह अस्तित्त्वशाली आवरणं कथयन्ति।

वास्तवरूपेण ते तु केवलमग्निसोमयोः स्थूलतमाणु वर्तते। यजुर्वेदे भौतिकविज्ञानमपि एतादृशोच्चकोटिकं वर्णितमस्ति यस्य

सूक्ष्मस्वरूपपर्यन्तं ज्ञानार्थमनुसन्धानकर्तृणां चिरकालपर्यन्तं परिश्रमं कर्तव्यम्। यदा लोकोत्तरपरोक्षविषये मानवबुद्धिः कुण्ठितः पङ्गुः वा भवेत् तदा विषयस्य परिज्ञानार्थमेकमेव मार्गदर्शकं भवितुं शक्यते वेदः। तस्मादेव महाभाष्यकारस्य शब्देषु भारतीयानामृषीणां गौरवपूर्णोद्घोषमद्यापि दिग्दिगान्तेषु प्रतिध्वनितमस्ति – **शब्दप्रमाणकाः वयम्** इति।

अर्थात् वयं वेदप्रमाणमेव सर्वोपरि मन्वामहे, अनेन स्पष्टमस्ति यत् विद्ज्ञाने इत्यस्माद्धातोः निष्पन्नः वेदशब्दः धात्वर्थानुसारेण लौकिकपारलौकिकोभयविधज्ञानस्य कोशोऽस्ति। वेदं भगवद्वाणी नोक्तमपि तु भगवतः निःश्वास इति कथितमस्ति। तद्यथा – **अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः**[1]

सृष्टिकर्त्रा सृष्टेः प्रारम्भे सृष्टेः सुव्यवस्थार्थं सर्वथा धर्मबोधस्य आवश्यकता ज्ञाता, तदर्थमेव प्रथमतः सृष्टिकर्त्रा ब्रह्माणं वेदधारणं कारितम्। भगवती श्रुतिरपि वदति –

**यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै**[2]

वेदस्याभावे ब्रह्माणमपि धर्मस्य बोधो न स्यात्, अन्यस्य तु का कथा। वेदानुसन्धानस्यावश्यकतां स्वयं श्रुतिरपि प्रतिपादयति –

**ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व।**
**विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः॥**[3]

अस्यार्थः – हे ब्रह्मणस्पते! त्वमस्य जगतः नियन्ता असि, अस्माकं स्तुतिं स्वीकृत्यास्माकं सन्तानेषु प्रीतिं कुरु, देवगणाः यं कल्याणं

---

[1] **बृहदारण्यकम्, २.४.१०**

[2] **श्वेताश्वतर० ६.१८**

[3] **शुक्लयजुर्वेदः ३४.५८**

प्राप्नुवन्तु सम्पूर्णमपि कल्याणमस्माभिरपि प्राप्तव्यम्, एवञ्च कल्याणयुक्ताः पुत्रयुक्ताश्च वयं यज्ञे बहुप्रवचनार्हाः भवेम। वेदस्याध्ययनं यदि विधिपूर्वकं गुरुमुखात् क्रियते तदैव सः स्वार्थं बोधयति, अभीष्टफलं च प्रददाति। नियमानुसारेण अधीतवेदादेव अर्थज्ञानं कृत्वा कर्मणामनुष्ठानं कर्तव्यम्। विधिविधानेन गुरुमुखात् अधीतमन्त्राणामेव कर्मषु प्रयोगः कर्तव्यः। एवं प्रकारेण यदि क्रियते चेत् तदैव कर्मद्वारापि फलं प्राप्यते, अन्यथा तु न प्राप्यते। तदर्थमेव सर्वविधप्रकारेण कल्याणकारिणः वेदस्य विधिपूर्वकमध्ययनम्, अनुसन्धानञ्च कृत्वा नियमानुसारेणैव तस्यार्थं ज्ञात्वा विधिविधानानुसारेण स्वस्वाधिकारानुरूपं तत्तद्विविधकर्मानुष्ठानं कृत्वा साधकैः स्वाभिलषितसुखप्राप्तेः दुःखनिवृत्तेश्च सम्पादनं कर्तव्यम्।

मनुष्यः वेदज्ञानेन धर्माधर्मावासनिवासाचारविचारसभ्यतासंस्कृतीनां निर्णयं कृत्वा गूढात्मतत्त्वानां विवेचनं च कृत्वा ऐहिकामुष्मिकाभ्युदयस्य भागी भवितुं शक्नोति। येन प्रकारेण शब्दादिज्ञानस्य कृते चक्षुरादीन्द्रियस्यापेक्षा भवति तथैव प्रत्यक्षानुमानादिप्रमाणद्वारा अगम्याज्ञाततत्त्वानां ज्ञापनार्थं वेदस्य आवश्यकता भवति। एतस्मिन् सन्दर्भे श्रीमता सायणाचार्यैः भाषितम् –

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।**
**एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता॥**[१]

वचनाशयः – प्रत्यक्षेण अनुमानेन वा यस्य सुखस्य दुःखस्य वा निवृत्तेः उपायानां परिज्ञानं न भवितुं शक्नोति, तज्ज्ञानं जनाः वेदादेव विजानन्ति, तस्मादेव वेदस्य वेदता अपि वर्तते। वेदस्य प्रामाणिकतां ये विश्वसन्ति ते आस्तिकाः, ये वेदस्य प्रामाणिकतां न विश्वसन्ति ते

---

[१] **सायणाचार्यकृता तै०भा०भू०पृ० २**

नास्तिकाः[१] भवन्ति। तस्मादेव आस्तिकैः वेदस्य स्वाध्यायः कृतः, तथा च शतपथश्रुतिः कथयति –

**यावन्तं ह वै इमां पृथिवीं वित्तेन पूर्णां ददल्लोकं जयति, त्रिभिस्तावन्तं जयति, भूयांसञ्च अक्षय्यञ्च य एवं विद्वानहरहः स्वाध्यायमधीते तस्मात् स्वाध्यायोऽध्येतव्यः**[२]

अभिप्रायोऽम् – यः मनुष्यः रत्नयुक्तां सम्पूर्णां पृथिवीं दानं करोति, तद्दानेन उत्पन्नस्य पुण्यस्यापेक्षा वेदस्य स्वाध्यायेन उत्पन्नस्य पुण्यस्य महत्त्वमधिकं भवति। महर्षिपतञ्जलिनापि निगदितम् –

**ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च**[३] अन्यत्रापि "**मातापितरौ चास्य स्वर्गे लोके महीयते** इति श्रुतिः। ब्राह्मणैः निष्कारणः षडङ्गसहितस्य वेदस्याध्ययनं कर्तव्यम्। एवं प्रकारेणाध्ययनं कृत्वा यः शब्दप्रयोगं करोति तस्य मातापितरौ इहलोके परलोके च महीयेते। वैदिककाले आधिकांशसमयः स्वाध्याये अनुसन्धाने च व्यतीतो भवति स्म। तस्मिन् समये प्रजाः सत्त्वगुणसम्पन्ना आसन्, वैदिकशिक्षाव्यवस्थायां विश्वासं कुर्वन्ति स्म, मानवमात्रस्य कृते यजुर्वेदस्य शिक्षा उपादेया वर्तते। यथा –

**भद्रं कर्णेभिः श्रुणुयाम**[४]**, स ओतः प्रोतश्च विभूः प्रजासु**[५]**, मित्रस्य चक्षुषा समीक्षामहे**[६]**, तन्मे मनः शिवसङ्कल्पमस्तु**[७]**, ऋतस्य**

---

[१] **नास्तिको वेदनिन्दकः**

[२] **शतपथब्रा० पञ्चमहायज्ञनिरूपणावसरे**

[३] **महाभाष्यम् १.१.**

[४] **यजुर्वेदः २५.२१**

[५] **यजुर्वेदः ३२.०८**

[६] **यजुर्वेदः ३६.१८**

[७] **यजुर्वेदः ३४.०१**

**पथा प्रेत[1], तमेव विदित्वाति मृत्युमेति[2], मा गृधः कस्य स्विद्धनम्[3]** इत्यादि।

परमं मङ्गलाभिधेयमेतद् यद् सर्वमपि संसारजातं कल्याणास्पदं स्यादितिहेतोः श्रीमद्भगवतो श्रीमन्नारायणस्य प्राणस्पन्दितत्वेन निखिलजीवमभिव्याप्य परमानन्दं विधातुमवतरितोऽयं वेदराशिः, सत्यं वद, धर्मं चर, मा विद्विषावहै इत्यादि सदुपदेशैः परमकरुणया अनुगृह्णाति, तस्माद् स एव अस्माकं सर्वेषां विधेय इति।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'आधुनिकसन्दर्भे यजुर्वेदे वैश्विकचिन्तनस्य प्रयोजनम्'** नाम तृतीयोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

[1] **यजुर्वेदः ७.४५**

[2] **यजुर्वेदः ३१.१८**

[3] **यजुर्वेदः ३६.१८**

# अथ चतुर्थोऽध्यायः

# यजुर्वेदे विश्वस्योद्भवो विकासश्च

यज्ञानुष्ठानेन प्रथममग्निदेवस्योत्पत्तिर्भवति। ततः संवत्सरस्य तथा वाच उत्पत्तिरजायत। ततः परञ्च ऋग्वेदादयस्समुत्पन्ना बभूवुः।[1] बृहदराण्यकोपनिषदि कर्ममये जीवनेऽनुभूतानां रागद्वेषादिभावानां निवृत्तिपूर्वकं स्वहृदये ब्रह्मात्मैक्यप्रतिष्ठायै सविस्तरं सन्मार्गो निर्दिश्यते। अत्र समग्रं ब्रह्माण्डमाधरीकृत्य **ओम् उषा वा अश्वस्य** इति प्रारम्भे ब्राह्ममुहूर्ते यज्ञसम्बन्धिनो यस्य अश्वस्य सूर्यो नेत्रं वायुः प्राणः, वैश्वानरो मुखमित्यादिरूपेण सम्पूर्णस्य विश्वस्य स्वरूपं वर्णितमस्ति। प्रजापतिद्वारा अश्वमेधयज्ञोपासनया अन्ये समे देवासुराः सञ्जाताः अस्माद् यज्ञादेव ज्ञानकर्मणोः प्रतिष्ठा अजायत। प्रजापतिद्वारा मिथुनभावस्य सृष्टिरजायत। तस्मात् हेतोस्सृष्टिप्रपञ्चमुत्तरोत्तरमवर्धत। प्रजाश्च समुत्पन्ना अभूवन्।[2]

इदं जगत् प्रथममव्यक्तमासीत्। नामरूपयोः योगेनैव एतद्व्यक्तं बभूव। यथासि असिकोषे तिष्ठति यथा वाऽग्निः काष्ठमध्येऽव्यक्तरूपे तिष्ठति बहिरयं नैव परिलक्ष्यते। तथैव जगदिदं प्रथममव्यक्तमासीदनन्तरं नामरूपमाध्यमेन एकैकशः सकलानि दृश्यवस्तूनि व्यक्तानि बभूवुः प्राणनक्रियाहेतोः प्राणो नाम, वचनाद् वाणीति नाम, दर्शनकारणात् चक्षुर्नाम, श्रवणात् श्रोत्रं नाम निगदितं बभूव। अत एतानि सकलानि कर्मानुसारीणि नामयुक्तानि सन्ति। व्यक्तरूपतामायान्ति। एवमेव प्रथममात्मा एक एवास्ति। भगवती श्रुतिर्वदतीति। यथा–

---

[1] **बृहदारण्यकोपनिषद् १.२**

[2] **बृ०उ० १.३**

**हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।**
**स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।।**[१]

सृष्टेरुत्पत्तेः पूर्वं प्रजापतिः हिरण्यगर्भे हिरण्यपुरुषरूपेऽस्मिन् ब्रह्माण्डे गर्भरूपेणावस्थितः। सः निखिलस्य ब्रह्माण्डस्य रचयिता सकलजीवनिकायस्य पतिः पालकः रक्षक आसीत्। इमां पृथिवीं भूमिम् अन्तरिक्षम् उत द्यां द्युलोकं च दाधार धृतवान्। यथा एते विचलिता न भवेयुः। अतः वयं कस्मै प्रजापतये देवाय देदीप्यमानाय हविषा विधेम – आहुतिभिस्तर्पयामः इति।

**हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्।**
**नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्।।**[२]

सः प्रजापतिः नानारूपैः सर्वत्र वर्तमानः यानि यानि रूपाणि तेन धृतानि तानि तानि सर्वाणि रचयामास। जगतः परिपालनाय सूर्यरूपेण आकाशे विभाति। वायुरूपेण अन्तरिक्षे निवसति स इन्द्रादिदेवानां यज्ञेष्वाहुता ऋत्विक् भूत्वा प्रजापतिर्वा।

अग्निरूपेण यज्ञेषु वेदीषु वा निवसति, सूर्यरूपेण अतिथिवत् सर्वैः पूजनीयः आहवनीयादिरूपैः यज्ञमण्डपे वर्तमानः प्राणादिरूपैः जनेषु स्थितः, उत्कृष्टे देशे राजगृहे वा नृपो भूत्वा विराजमानः, ऋत वेदवाणीषु ब्रह्मरूपेण शोभमानः व्योमसद् सूर्यचन्द्रप्रभृतिरूपैराकाशे प्रकाशमानः वायुरूपेण वा सर्वत्र सञ्चरणशीलः मत्स्यादिरूपेण जले वर्तमानः, गोजा– पृथिव्यां नानारूपैः संचरणशीलः, ऋतजा– वाजपेयादियागेषु नानारूपैः दृश्यमानः, अद्रिजा– पाषाणेभ्यः अग्निरूपेण उत्पद्यमानः ब्रह्म ऋतं सत्ये प्रतिष्ठितम्। बृहत्– सः महतो महीयान् वर्तते। लोककल्याणाय नानारूपसृष्टिं यत्र तत्र सर्वत्र कृतवान्।।

---

[१] **शु०य० १३.४**

[२] **शु०य० १०.२४**

**सूर्य एकाकी चरति चन्द्रमा जायते पुनः।**
**अग्निर्हिमस्य भेषजं भूमिरावपनं महत्॥**[१]

प्रजापतिः अन्धकारात् रक्षणाय सूर्यमोषधीष्वमृतवर्षणाय चन्द्रं, शीतात् प्राणिनः रक्षणाय अग्निं च रचयामास। विविधेभ्यः रोगेभ्यः रक्षणाय बहव्यः ओषधयः पृथिव्यां काले काले उत्पद्यन्ते तस्य प्रजापतेः महिमा इति। सर्वं स्थावरजंगमजगत्परिपालनाय अण्डजस्वेदजपिण्ड-जोद्भिजसकलजीवनीकायानां आबालवृद्धवनितानां सकलप्राणिसमूहानां निवासाय महतीं भूमिं भूलोकं रचयामास।

**किꣳ स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथाऽऽसीत्।**
**यतो भूमिं जनयन्विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः॥**[२]

विश्वकर्मा स्वमहिम्ना निखिलान् लोकान् जनयामास। भूमिं आकाशमन्तरिक्षञ्च सर्वमेकाकी एव स्वमहिम्ना रचयामास।

**किꣳ स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः।**
**मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन्॥**[३]

कुम्भकारादिर्गृहादिकमधिष्ठाय घटादिं करोति। कुम्भकारस्याधिष्ठानं गृहादिकं वर्तते परन्तु प्रजापतिः ऊर्णनाभिवदधिष्ठानरहितोऽपि निखिलं ब्रह्माण्डं विरचितवानित्यर्थः।

**सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।**
**स भूमिꣳ सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥**[४]

---

[१] **शु०य० २३.१०**

[२] **शु०य० १७.१८**

[३] **शु०य० १७.२०**

[४] **शु०य० ३१.१**

विराट्पुरुषस्य परमात्मनोऽसंख्यकानि शिरांसि नेत्राणि च सन्ति। तस्य असङ्ख्याकाः पादाः सन्ति। यथा स सर्वत्र वर्तमानः गमनशीलः सर्वत्र विराजमानश्चास्ति। सर्वद्रष्टा वर्तते। सर्वं ब्रह्माण्डं स्वोदरजाले संस्थाप्य रक्षति पालयति।

एकस्माद् पुरुषाद् ब्रह्मणो वा जगतः सृष्टिविकासं मत्वा तस्मिन् ब्रह्मणि लय एव जीवनोद्देश्यमिति निश्चित्य मुक्तिः सम्भाविता। यज्ञ एव अस्य चराचरात्मकस्य जगतस्सृष्टिस्थित्यादेर्हेतुरिति। तस्मात् सर्वहोमरूपान्मनसा यज्ञात् दधिमिश्रं घृतं सम्पादितम्। तत एव ऋचः सामानि यजूंषि तथा विविधानि छन्दांसि चाजायन्त।[1]

अनेन यज्ञस्य सृष्टिहेतुत्वं स्पष्टमेव। स्यंदनशीला आपः गमनशीलेन मरुद्गणेन प्रेरितस्सन्त्योऽस्यां पृथिव्यां तिर्यक् प्रवहन्ति। सर्वत्र गमनशील इन्द्रो मरुद्गणानां सहायेन तानि जलानि बहुवेगयुक्तानि करोति। अन्तरिक्षे पर्जन्यरूपी इन्द्रो गर्जन्निदं सकलमपि विश्वमद्भिस्सिञ्चति। वृष्टिर्यज्ञाद्भवति–

**अन्नाद्भूतानि जायन्ते जातान्यन्नेन वर्धते।**
**अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधीभ्योऽन्नम्॥**[2]

अनेन विवरणेनेदं स्पष्टं भवति यद् वृष्टिर्यज्ञाद् भवति। वृष्टेस्तु विविधा ओषधयः ओषधीभ्योऽन्नमुत्पद्यते। अन्नाद् भूतानि जायन्ते वर्धन्ते च। जगद्गुरुणा श्रीकृष्णेनाप्ययं वैदिको यज्ञः मानवानां सर्वकामदोहेन समर्था धेनुरिति उपदिष्टम्। यथा–

---

[१] **शुक्लयजुर्वेदीयकाण्वसंहिता अ० ३१.६-७**

[२] **तैत्तिरीयश्रुतिः, एवम् -**

**अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।**
**यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः॥ श्रीमद्भगवद्गीता ३.१४**

**सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।**
**अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्॥**[१]

ईश्वरो यथा जगत् सृजति तत्प्रश्नोत्तराभ्यामाह–

**किꣳ स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित् कथाऽऽसीत्।**
**यतो भूमिं जनयन् विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः॥**[२]

लोके हि घटादिचिकीर्षुः कुम्भकारादिर्गृहादिकं स्थानमधिष्ठाप्य मृत्तिकादिरूपेण आरम्भकद्रव्येण च चक्राद्युपकरणैर्घटादिनिर्माणं करोति। ईश्वरस्य च सृष्टिरचनायां सर्वनिरपेक्षत्वात् तत्सर्वमाक्षिप्यते।

द्यावापृथिव्योरुत्पादनवेलायां परमात्मनोऽधिष्ठानमधि-तिष्ठत्यस्मिन्नित्यधिष्ठानं निवासस्थानं किंस्विदासीत्? अर्थात् आरभ्यतेऽनेनेत्यारम्भणमुपादानकारणं मृदिव घटानाम्, कया क्रियया च किं प्रकारमासीत् निमित्तकारणमपि किमासीदित्यर्थः। दण्डचक्रसलिलसूत्रादिभिर्घटादयो निष्पद्यन्ते तत्स्थानीयं किमासीत्।

यतो यस्मिन् काले विश्वकर्मा भूमिं द्यां स्वर्गञ्च जनयन् सन् महिम्ना स्वसामर्थ्येन और्णोत् सृष्टे द्यावापृथिवी आच्छादितवान्। न किञ्चिदासीदित्यर्थः, द्यावापृथिवीव्यतिरिक्तस्याधिष्ठानत्वासम्भवात्। ईश्वरोऽतीतानागतवर्तमानकालानां युगपद् द्रष्टा सर्वद्रष्टा वर्तते। अत एव विश्वकर्मा यस्मिन् काले भूमिं द्यां नाकं च जनयन् सन् वर्तते तस्मिन् काले स्वमहाभाग्येन स्वसामर्थ्येन साधनान्तरं विनैव विशेषेण और्णोत्। सृष्टेः द्यावापृथिव्यौऽऽच्छादितवानिति।

**विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।**
**सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः॥**[१]

---

[१] **श्रीमद्भवगद्गीता ३.१०**

[२] **शुक्लयजुर्वेदसंहिता–१७.१८**

पूर्वोक्तमन्त्रस्याक्षेपाणां भगवती श्रुतिः समाधानं करोति। अनेन मन्त्रेण द्यावापृथिव्योरुत्पत्तेरुर्ध्वं विश्वरूपः परमेश्वर एव भासते। सर्वात्मकत्त्वेन कुलालादिविलक्षणत्वादधिष्ठानाद्यभावेऽपि निर्मातुं शक्नोतीत्याह विश्वतश्चक्षुः सर्वतो व्याप्तचक्षुः उत अपि विश्वतो मुखः तथा विश्वतो बाहुः, उत अपि विश्वतस्स्पात्।

स एवं विधः ईश्वरः एवास्मिंस्त्रैलोक्यमुत्पादयतीत्यर्थः। कथमिति? बाहुभ्यां दिवं सं धमति-धमतिर्गतिकर्म सम्यक्प्रेरयतीत्यर्थः। तथा पतत्रैः गमनशीलैः पादैः पृथिवीं सं धमतीति। उभयोरेव श्रवणं प्राधान्याभिप्रायं वर्तते।

ईश्वरस्य लोकोत्तरैश्वर्यमेव तादृग् येन स्वे महिम्नि स्थितो दिव्यया मायाख्यशक्त्या सृज्यमानप्राणिधर्माधर्मानुरोधेन पञ्चभूतानि विरच्य तैः सर्वं सृजति। शिवमहिम्नस्तोत्रे पुष्पदन्तेनाप्युक्तम्-

**किमीहः किङ्कायः स खलु किमुपायस्त्रिभुवनं**
**किमाधारो धाता सृजति किमुपादान इति च।**
**अतर्क्यैश्वर्येत्वय्यनवसरदुःस्थो हतधियः**
**कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः।।**
**अजन्मानो लोकाः किमवयववन्तोऽपि जगता-**
**मधिष्ठातारं किं भवविधिरनादृत्य भवति।**
**अनीशो वा कुर्याद् भुवनजनने कः परिकरो**
**यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे।।**[२]

---

[१] **वाजसनेयिशुक्लयजुर्वेदसंहिता-१७.१९**

[२] **शिवमहिम्नः स्तोत्रम् (पुष्पदन्तप्रणीतम्) श्लो० ५-६**

तैत्तिरीयश्रुतिरपि वदति। यथा–

**किꣳ स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः।**
**मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद् भुवनानि धारयन्॥**[1]

तद्वनं किमास बभूव, उ अपि च स वृक्षः क आस। यतो वनाद्वृक्षाच्च विश्वकर्मा द्यावापृथिवी निष्टतक्षुः निस्ततक्ष निस्तक्ष्यालंकृतवान्। न हि तादृशं वनं वृक्षो वा सम्भवति।

लोके हि गृहादिनिर्माणमिच्छन् कस्मिंश्चिद्वने कञ्चिद्वृक्षं छित्त्वा लक्षणादिना स्तम्भादिकं करोतीह तन्नास्तीत्यर्थः। किञ्च हे विद्वांसः मनसा पर्यालोच्य तत् इत् उ तदपि यूयं पृच्छत। तत्किम्? भुवनानि धारयन् सन् विश्वकर्मा यदध्यतिष्ठत् यत् स्थानमधिष्ठितवान् तदपि पृच्छत। कुलालादिर्गृहादिकमधिष्ठाय घटादि करोति तदधिष्ठानमपि पृच्छत, ऊर्णनाभिवदयमात्मारम्भण इत्यर्थः।

**या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा।**
**शिक्षा सखिभ्यो हविषि स्वधा वः स्वयं यजस्व तन्वः वृधानः॥**[2]

अर्थात् हे विश्वकर्मन् विश्वस्रष्टः सर्वाभीष्टान्नादिमन् परमेश्वर, ते त्वदीयानि यानि स्थानान्युत्तममध्यमकनिष्ठान्युत इमानि प्रत्यक्षत् उपलब्धानि, तानि सखिभ्यो जीवेभ्यो यथायोग्यां शिक्षां देहि। तवोपकारं कर्तुं यद्यपि नास्ति सामर्थ्यम् तव सर्वज्ञसर्वशक्तित्त्वात्, तेषामल्पज्ञाल्पशक्तित्वात् तथापि तेषां तेषां तनुः स्वरूपभूता वर्धयन् अर्थात् तत्सामर्थ्यं जनयन् स्वयं यजस्व स्वयं सामर्थ्यप्रदानेन तैरात्मानं याजयस्व। त्वदनुग्रहेणैव जनाः त्वां भजन्ति यजन्ति च।

[1] **शुक्लयजुर्वेदसंहिता– १७.२०**

[2] **ऋग्वेदः १०.८१.५**

**सोऽहं तवाङ्घ्र्युपगतोऽस्म्यसतां दुरापं**
**तच्चाप्यहं भवदनुग्रह ईश मन्ये।**
**पुंसो भवेद्यर्हि संसरणापवर्ग**
**स्त्वय्यब्जनाभ सदुपासनया मतिः स्यात्॥**[1]

हे ईश सः इन्द्रियपरतन्त्रोऽहम् असतां विषयाकृष्टमनसां दुरापं तवाङ्घ्रि–तवाङ्घ्रिं ''सुपां सुलुग्'' इति छान्दसोऽमो लुक्। उपगतः शरणं प्राप्तोऽस्मि तच्चाप्युपगमनं भवेदनुग्रह एवेत्यहं मन्ये। इतिशब्दाब्याहारेण कथञ्चित्प्रथमा समर्थनीया। अनुग्रहे सत्येवेति वा यतः यर्हि पुंसः संसारिणः संसरणस्यापवर्गः समाप्तिः सम्भाविता स्यात्।

तदा हे अब्जनाभ सतां त्वद्भक्तानामुपासनया तस्य तद्विषयिका मतिः स्यात् भवति त्वत्कृपयैव सदुपासना तयैव त्वयि मतिर्भवेत्। त्वत्कृपां विना न सत्सेवा नतरां त्वन्मतिः नतमां मुक्तिः तेन सत्कृपासंसारनाशारम्भः सदुपासनात् कृष्णे मतिरिति क्रमोऽप्युक्तः मम तु दर्शनादिलाभान्मोक्षे कः सन्देहः।

**वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम।**
**स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा॥**[2]

विश्वानि सर्वाणि जगदुत्पत्यादीनि यस्य तं वाचस्पतिं वेदलक्षणानां पालयितरम् –

**तस्मादाहुरिन्द्रो वाक्** इति श्रुतेः। तथा मनोजुवं मानसो जूरिव जव इव जवो यस्य स मनोजुस्तं तथोक्तम्। स इन्द्रो अस्माकं सर्वाणि हवनान्याह्वानानि अन्नायान्नसमृद्धौ जुषतामस्मदाह्वानं साध्विति सेवताम्।

---

[1] **श्रीमद्भागवते १०.४०.२८**

[2] **श्रीमद्वाजसनेयिशुक्लयजुर्वेदसंहिता- १७.२३**

विश्वस्य सुखं भवत्यस्मादिति विश्वशम्भूः, साधुकर्मा शोभनकर्मकर्ता। हे ग्रह! विश्वकर्मणे इन्द्राय त्वां गृह्णामि। यं च विश्वकर्माणं विश्वस्य सर्वस्य कर्तारं विश्वं सर्वं कर्म यस्य तं यं च ऊतये अवनाय रक्षणाय वा मनोजुवं मनोगतिं यं चान्नेऽस्मिन् महाव्रतीयलक्षणान्नविषये दिने हुवेम आह्वयामः। स आहुतो अस्माकं विश्वानि हवनानि आह्वानानि जोषद् जुषतां सेवताम्। माध्यन्दिनशतपथब्राह्मणे च भवगती श्रुतिर्वदति–

**अथो विश्वकर्मणे विश्वं वै तेषां कर्म कृतꣳ सर्वं जितं भवति ये संवत्सरमासते तस्माविश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम। स नो विश्वानि हवनानि जोषद्विशम्भूरवसे साधुकर्मा। उपयामगृहीतोसीन्द्राय त्वां विश्वकर्मण एष ते योनिरिन्द्राय त्वा विश्वकर्मण इति॥**[१]

अतो विश्वकर्मणे समस्तकर्मसाधनायेन्द्राय शिल्पक्रियाकुशलतयोत्तमैश्वर्यवन्तं त्वां सेवेमहि इति। तैत्तिरीयभगवतीश्रुतिः कथयति–

**चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने।**
**यदेदन्ता अददृँहन्त पूर्व आदिद्यावापृथिवी अप्रथेताम्॥**[२]

चक्षुरादेः प्राणसमुदायस्य पितोत्पादको धीरो धैर्यवान् विश्वकर्मा परमेश्वरो मनसा स्वेच्छया घृतं घृतवत्त्वात् प्राणिनामुपभोगसाधनभृते एते द्यावापृथिव्यौ नम्नमाने परस्परानुकूल्येन नमनोपेते अजनयद् उत्पादितवान्। यदा यदैव पूर्वे प्रथमोत्पन्नावशिष्ठादयः अन्ता अन्तान् विभक्तिव्यत्ययः द्यावापृथिव्योरन्तप्रदेशान् अद्दृहन्त।

---

[१] **माध्यन्दिनशतपथब्राह्मणम्- ४.६.४.५**

[२] **कृष्णयजुर्वेदीयतैत्तिरीयसंहिता, कां० ४ प्र० ६ अनु० २**

द्यावापृथिव्योर्द्रढिमानन्तरमेव द्यावापृथिव्यौ अप्रथेतां विस्तृते अभूताम्। आचार्य उव्वटरीत्या तु चक्षुर्नाम ऋषिः, तस्य पिता प्राणः प्रजया स्तूयते। मनसा हि धीरो हि निश्चितं यथा स्यात् तथा मनसा धीमान्, एते द्यावापृथिव्यौ प्रतिघृतमुदकमजनज्जगदनुग्रहायाजनयत्।

**ततो विराडजायत विराजो अधिपूरुषः।।**
**स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः।।**[१]

आदिपुरुषात् विराट् ब्रह्माण्डदेहोऽजायत। विराट् देहस्योपरि तमेव देहमधिकरणं कृत्वा पुरुषः तद्देहाभिमानी एक एव पुमानजायत। सर्ववेदान्तवेद्यः परमात्मा स्वमायया विराट् देहं ब्रह्माण्डरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवत्।

स जातः विराट् पुरुषः अत्यरिच्यत अतिरिक्तो देवमनुष्यतिर्यगादिरूपोऽभूत्। तत्पश्चात् देवादिजीवभावादूर्ध्वं भूमिं ससर्ज। ततः भूमेः सृष्टेरनन्तरं जीवानां पुरः शरीराणि ससर्ज।

**तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम्।**
**पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये।।**[२]

ततः स यज्ञपुरुषः परमात्मा प्राणिनां जीवननिर्वाहाय पृषदाज्यम्-पृषदाज्यप्रभृति विविधान् खाद्यपदार्थान् सृष्टवान्। तदनन्तरं वायव्यान् वायुदेवाताकानारण्यान् हरिणादयः पशून् ग्राम्यान् गवादीन् पशून् ससर्ज।

**तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे।**
**छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत।।**
**तस्मादश्वा अजायन्त ये के चोभयादतः।**

---

[१] **शु०यजु० ३१.५**

[२] **शु०यजु० ३१.६**

**गवो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः॥** [1]

**ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।**
**ऊरू तदस्य यद्वैश्यः पद्भ्याँ शूद्रो अजायत॥** [2]

प्रजापतेः मुखात् ब्रह्मत्वजातिविशिष्टाः पुरुषा उत्पन्ना अभवन्। बाहुभ्यां राजन्यः क्षत्रियत्वजातिविशिष्टाः पुरुषा अजायन्त। ऊरुभागात् वैश्यः वैश्यजातिविशिष्टाः पुरुषाः अजायन्त। पद्भ्यां शूद्राः शूद्रत्वजातिविशिष्टा पुरुषा उत्पन्ना अभवन्।

**चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत।**
**श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥** [3]

प्रजापतेः मनसः हृदयभागात् चन्द्रमा चन्द्रोऽजायत। चक्षोः नेत्राभ्यां सूर्योऽजायत। तस्य श्रोत्रात् कर्णभागात् वायुः वायुदेवताः प्राणश्च प्राणीनां जीवोऽजायत। मुखात् मुखभागात् अग्निः अजायत।

**अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्।**
**युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम॥** [4]

हे देव दानादिगुणयुक्त अग्ने! अग्निदेव! अस्मान् यजमानान् सुपथा शोभनमार्गेण देवयानेन राये शुभपवित्रधनाय मोक्षाय वा नय प्रापय। त्वं भवान् विश्वानि सर्वाणि निखिलानि वयुनानि कर्माणि प्रज्ञानानि विद्वान् प्रज्ञावानसि शुभमशुभं सर्वं जानासि।

अस्मदस्माकं सकाशाज्जुहुराणं कौटिल्ययुक्तं कुटिलतासहितं एनं पापं दुष्कीर्तिं वा युयोधि पृथक्कुरु अस्माकं पापं विनाशय। ते तव

---

[1] **शु०यजु० ३१.७.८**

[2] **शु०यजु० ३१.११**

[3] **शु०यजु० ३१.१२**

[4] **शु०यजु० ५.३६**

अग्नेः भूयिष्ठां बहुप्रकारां विपुलां नम उक्तिं नमस्कारवचनं विधेम कुर्याम। पापनाशं गते सति शुद्धाः वयं बृहद्रूपेण तव परिचर्यां कुर्याम।

**दिवं गच्छ सुवः पतरूपेण वो रूपमभ्यैमि वयसा वयः।**
**तुथो वो विश्ववेदा विभजतु वर्षिष्ठे अधि नाके॥**[1]

हे हिरण्य हिरण्यरूपदक्षिणे दिवं देदीप्यमानं द्युलोकं गच्छ प्राप्नुहि सुवः सूर्यं भगवन्तमादित्यं पत प्राप्नुहि। तव रूपेण स्वरूपेण रूपं स्वरूपमभ्यैमि प्राप्नोमि।

तव सदृशः अहमपि प्रकाशितो भवेयं तव वयसा आयुषा वयः आयुष्मान् स्याम् जरारहितो भूयासम्। तुथनामकः विश्ववेदा सर्वज्ञ निखिलज्ञानविज्ञानयुक्तः त्वं विभजतु अपारं धनं कीर्तिं वा स्वर्गं वा विभजतु विभागं कृत्वा ददातु कर्मानुसारं फलं मह्यं देहि। वर्षिष्ठे श्रेष्ठतरे उत्कृष्टतरे नाके स्वर्गे वैकुण्ठे वा अधिगमय मदर्थं स्वर्गं प्रापय अत एव त्वां प्रार्थयामहे।

**एतत्ते अग्ने राध एति सोमच्युतं तन्मित्रस्य पथा नयर्तस्य पथा प्रेत।**
**चन्द्रदक्षिणा यज्ञस्य पथा सुविता नयन्तीर्॥**[2]

हे अग्ने अग्निदेव! एतत् पुरोदृश्यमानं ते तव रायः धनं प्रकाशरूपधनमेत्यस्मान् यजमानान् प्रति एत्यागच्छति तव सदृशाः वयं तेजस्विनः भवेम। सोमच्युतं सोमयागद्रव्यमध्यात् च्युतं दक्षिणार्थच्युतं प्राप्तं वर्तते। पथा शोभनमार्गेण नय एनं द्युलोके प्रापय तथा तस्य उत्तममार्गेण अस्मान् यजमानान् प्रापय।

तत् रायः मित्रस्य आदित्यस्य पथा मार्गेण नय। येन मार्गेण आदित्यो नयति तेन मार्गेण प्रापय। चन्द्रदक्षिणा हितरमणं हिरण्यं सुखप्रदं

---

[1] **कृ०यजु० १.४.४३**

[2] **कृ०यजु० १.४.४३**

स्वर्णं दक्षिणा अस्ति। यज्ञस्य पथा यज्ञमार्गेण सविता सर्वप्रेरकभगवान् आदित्यः नयति प्रापयति तेन मार्गेण अस्मान् प्रापय। एषा दक्षिणा अस्मान् समृद्धान् करोतु। स्वर्गं प्रापयतु वा। अथैतानङ्गारान् सते कृण्डे शरावे वा यजमानो गृह्णाति–

**आयुषे वो गृह्णामि तेजसे वो गृह्णामि तपसे वो गृह्णामि वीर्याय वो गृह्णामि ब्रह्मवर्चसाय वो गृह्णामि॥**[१]

अङ्गारान् सत्ते कुण्डे शरावे वा यजमानो गृह्णाति मन्त्रं च पठति–

हे अग्ने आयुषे दीर्घायुःकामनया त्वां गृह्णामि। ब्रह्मतेजःप्राप्त्यर्थं त्वां गृह्णामि, तपसे वो गृह्णामि तपसः फलप्राप्त्यर्थं त्वां गृह्णामि वीर्याय, सामर्थ्यं प्राप्तये त्वां गृह्णामि ब्रह्मवर्चसे ब्रह्मतेजःप्राप्तये च त्वां गृह्णामि। राजनैतिकदृष्ट्यापि वैदिककालिकसमाजः सम्पन्न आसीद्यथा–

**राज्ञोऽश्वमेधः सर्वकामस्य**[२]**॥**

यो राजा अश्वमेधेन यजते सः जनधनवैभवसैन्यशक्तिभिश्च सम्पन्न आसीत्। सैन्यशक्तिः तस्य पार्श्वे महती अभवत्। स्वकीयेच्छातृप्त्यर्थमपि राजा अश्वमेधेन यजते स्म। यज्ञात् राज्ञः राजनैतिकशक्त्याः प्रसारः तस्य यज्ञेन प्रजाप्रेम राज्यं प्रति निष्ठा चारित्रिकपवित्रताास्तिकतायाश्च प्रदर्शनमजायत। प्रजाजनस्य राज्यं प्रति निष्ठा उत्पद्यते स्म। प्रजा अपि राज्ञः सदृशं व्यवहारमाचरन्ति स्म।

राज्ञः सदृशं धर्मं परमार्थं त्यागं पुरुषार्थं लोकहितभावनया च पूरिताः आसन्। राज्ञः प्रजानां च भावनाः भव्याः उदात्ताः उन्नतिशीलाश्च जायन्ते स्म। राजनैतिकदृष्ट्या वैदिककालमुन्नतमासीत्।

---

[१] **आ०श्रौ०सू० २.१३.७**

[२] **का०श्रौ०सू० २०.१.१**

**सांस्कृतिकविकासः** -

वैदिककाले भारतवर्षे सांस्कृतिकजीवनं परमोन्नतमासीत्। वर्णाश्रमधर्मव्यवस्थया भारतवर्षं परिपूर्णमासीत्। मानवीयगुणैः सुशिक्षितशिक्षा चारित्रिकविकासनैतिकता गर्भाधानादिसंस्कारैश्च जनाः सुखिनः संस्कृताश्चासन्। आत्मिकभौतिकनैतिकप्रभृतीनि सुखानि स्वयमेव आगच्छन्ति स्म। बालकानां शिक्षाभारं समाजस्योपरि वैदिककाले आसीत्।

तदा सर्वे बालकाः सुशिक्षिताः आसन्। साम्प्रतं शिक्षाया भारं मातृणां पितृणां चोपरि वर्तते। बहुव्ययशीलाः शिक्षाः सन्ति। लक्षं लक्षं धनव्ययेन बालकाः शिक्षां लभन्ते। बहवो जनाः शिक्षायाः भारं वोढुमसमर्थाः अपि च बहवो बालका स्वतंत्रे भारते वर्षे अशिक्षिताः संस्कारहीनाः दरिद्रता प्रभृतिदुर्गुणैः इतस्ततः अनाथा इव भ्रमन्ति इति।

**सामाजिकविकासः** -

अथैनौ समञ्जयति-

**समञ्जन्तु विश्वेदेवा समापो हृदयानि नौ।**
**सम्मातरिश्वा सन्धाता समु देष्ट्री दधातु नौ इति॥**[1]

कन्यायाः पिता कन्यावरयोः परस्परं सम्मुखीकरणं कुर्यात् कन्या वरस्य सम्मुखी भवति, वरः कन्यायाः सम्मुखो भवति कथयति च हे कन्ये! आवयोः द्वयोः हृदयानि विश्वेदेवाः, जलाभिमानी देवः वरुणश्च मनोगतभावानि विचाराणि एकीकुर्वन्तु। आवयोः विचारेषु भिन्नता मा भवतु। मातरिश्वा वायुः प्रजापतिः धर्मादीनामुपदेशिका वाणीच आवयोः हृदयानि हृदयगतविचाराणि एकीकुर्वन्तु। साम्प्रतं देवेभ्यः एतादृशीं शक्ति प्राप्नुयावः यतः भिन्नता आवयोः मा भवेत्।

---

[1] **पा०गृ०सू० १.४.१४**

श्रुतिर्वदति–

**आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधीमहारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्॥**[१] इति शम्।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे विश्वस्योद्भवो विकासश्च'** नाम चतुर्थोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

[१] **शु०यजु० २२.२२**

# अथ पञ्चमोऽध्यायः

# यजुर्वेदे मानवजातेरुद्भवो विकासश्च

मानवस्य स्वाज्जीवितादृते न किमप्यज्ञेयं निगूढं च वस्तु विद्यते। आसृष्टेर्मनुष्येण मानवस्य जीवनस्य रहस्यं ज्ञातुं प्रयत्नः क्रियमाण एवास्ति। कदाचिन्महर्षयोप्येकत्र सम्भूयामुं कठिनं प्रश्नमधिकृत्य चर्चां चक्रुर्यत् मानवस्तत्तत्कार्येषु तस्यानिष्टेष्वपि का वा शक्तिर्बलान्नियोजयतीति? यथा–

**अधिष्ठितः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम्**[1] अस्य प्रश्नस्य समाधानं कुर्वन् श्रीरामचन्द्रो लक्ष्मणाय वदति–

**सुखदुःखे भयक्रोधौ लाभालाभौ भवाभवौ।**
**यच्च किञ्चित्तथाभूतं ननु दैवस्य कर्म तत्॥**[2]
**असङ्कल्पितमेवेह यदकस्मात् प्रवर्तते।**
**निवर्त्यारब्धमारम्भैर्ननु दैवस्य कर्म तत्॥**[3]

सर्वतो दैवमेव प्रबलं पौरुषं तु काकतालीयमित्याह भवाभवौ बन्धमोक्षौ। एषां मध्ये यस्य यत्तथाभूतमचिन्त्यकारणकं किञ्चित्कार्यं तन्ननु निश्चयेन दैवस्य कर्मणः फलम्। आरम्भैः यन्नैरारब्धमुपक्रान्तं कार्यं निवर्त्य यदसंकल्पितमेवाचिन्तित एवाकस्मादृष्टहेतुं विना प्रवर्तते तद्दैवस्य कर्म ननु।

---

[1] **श्वे०उ० १.१**

[2] **श्रीमद्वाल्मीकीयरामायणे २.२२.२२**

[3] **श्रीमद्वाल्मीकीयरामायणे २.२२.२४**

श्वेताश्वतरोपनिषदः प्रथमाध्याये जिज्ञासवः मनीषिणः परस्परमध्यात्मविषये चर्चां कुर्वाणाः महर्षिप्रवरान् पृच्छन्ति यत् भो महर्षयः! कृपया कथ्यन्तां किं तावत् ब्रह्म? वयं कुतः समुत्पन्नाः? प्राणिनां मूलोत्पत्तिस्रोतः किम्? कस्योपरि प्राणिजगत् निर्भरं तिष्ठति? एवं कस्तावत् प्राणिजगत् सञ्चालयति, येन वयं समे जीवदशायां सुखदुःखादीनां भोगं कुर्मः। केचिद् कथयन्ति कालो हि प्राणिनां नियन्त्रणकर्ता भवति। केचिदाहुः स्वयंभुवः प्राणिनः सञ्जाताः इति। केऽपि वदन्ति त्रिगुणमयी प्रकृतिः हि जगतः उत्पत्तिहेतुरस्तीति। वस्तुतः परमात्मशक्त्या मनुष्यः जननमरणचक्रे भ्राम्यन्नास्ते। स्वकीयकर्मफलानुसारं च सुखदुःखयोः फलं भुङ्क्ते चेति। यस्य परमेश्वरस्य सकाशादयं जीवात्मा वारं वारं जायते तथा म्रियते एवं यस्य कृपाकटाक्षेण जीवोऽयं सञ्चालितो भवति, तस्यैव कृपया जीवस्यास्य मोक्षः सम्भवन्ति। साधारणतया ब्रह्मणः स्वरूपत्वेन त्रयमेतत् ख्यायन्ते– ईश्वरः सर्वज्ञः तथा सर्वशक्तिमान्। जीवात्मा अल्पज्ञः तथा स्वल्पशक्तिमान् भवति। तृतीया जडप्रकृतिः क्षररूपाऽस्ति, या भोक्तुः जीवात्मनः कृते भोगसामग्रीसञ्चयं कुर्वाणा वर्तते। एतत् त्रयमनादि तथा अजन्म वेति उच्यते। किन्त्वीश्वरः कश्चन विलक्षणः कर्ता चास्ति। जीवः प्रकृतिश्च परमेश्वरस्य प्रकृतिद्वयी भवति।[१] क्षररूपेयमपरा प्रकृतिः परिणामधर्मिणी तथा विनाशशीला इत्युच्यते। परन्तु चेतनरूपो जीवात्मसमुदायः (परा प्रकृतिः)। यः मुमुक्षुः साधकः एतयोः पराऽपराप्रकृत्योः तत्त्वं सम्यगवबुध्य निरन्तरं तमेकं सर्वचालकत्वेन स्थितं

---

[१] **द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।**
**क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥**
**उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।**
**यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥ (श्रीमद्भवगद्गीतायाम् १५. १६-१७)**

विलक्षणं परमेशपरमात्मानं ध्यायन् स्वहृदये तदीयं रहस्यमनुभूय एकाकाराकारितः सन् तत्र लीनो भवति। स एव जननमरणरूपचक्रान्मोक्षं लभते। ब्रह्मविद्यासम्बन्धे जिज्ञासुना एतदेवावधार्य यदिदं शरीरं भवत्येकमश्वत्थवृक्षसदृशम्। अत्र जीवः परमेश्वरश्च एतौ द्वौ नित्यं सम्बन्धशीलं पक्षिद्वयमिव पारस्परिकमित्रतासूत्रेण वृक्षतुल्यशरीरस्य नीडसदृशे हृदये वासं कुर्वन्तौ स्तः। जीवात्मा यदा शरीरासक्तः सन् देहेन्द्रियैरुपार्जितं पापपुण्यरूपं कर्मफलं भुञ्जानः सुखं दुःखं चानुभवति। तदेतरपक्षवत् परमेश्वरः शरीरतुल्ये वृक्षे वर्तमानोऽपि निर्लिप्तः साक्षीव केवलं सर्वं किञ्चित् पश्यन् विभाति। परन्तु पापपुण्यरूपं कर्मफलं न जातु भुङ्क्ते।[१] यद्यपि जीवस्येश्वरेण सह यथा तत्तद्दार्शनिकसम्प्रदायमवयवविभागादयः पृथक् पृथक् सम्बन्धाः सन्ति तथापि ऋग्वेदस्तेषु न तथा बद्धादरो यथा जीवस्येश्वरेण साकं तादात्म्यलक्षणे सम्बन्धे। अत एव अस्य वामीये सूक्ते दैर्घतमसेन महर्षिणा जीवस्य स एव सम्बन्धः स्वीकृतः। यथा–

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**
**तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति॥**[२]

अत्र लौकिकपक्षिद्वयदृष्टान्तेन जीवपरमात्मानौ स्तूयेते। कर्मफलासक्तः जीवात्मासौ यदा भोगेष्वासक्तो मुह्यति, तदा दुःखमेवाप्नोति। स्वकीयां दीनतामनुभूय भोगाशक्तिजनितेन दुःखेन अनुतप्तो भवति। तदाऽसौ स्वमित्रस्य परमेश्वरस्य आश्चर्यमयं महिमानं प्रत्यक्षीकृत्य वीतशोको भवति। एवं स्वसुहृदा परमात्मना समं साम्यसौख्यं ह्यनुभूय परमानन्दं

[१] **मुण्डकोपनिषद् १.१३**

[२] **मुण्डकोपनिषद् ३.१**

भुङ्क्ते।[१] ब्रह्मणः सृष्टौ मनुष्यः सर्वोत्कृष्टजीवोऽस्ति[२] तच्चेत्थं प्रतिपाद्यते–

**सृष्ट्वा पुराणि विविधान्यजयाऽऽत्मशक्त्या-**
**वृक्षान् सरीसृपशून् खगदंशमत्स्यान्।**
**तैस्तैरतुष्टहृदयः पुरुषं विधाय**
**ब्रह्मावलोकधिषणं मुदमाप देवः॥[३]**

बृहदारण्यकेऽपि –

**स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छत्। स हैतावानास यथा स्त्रीपुमाꣳसौ सम्परिष्वक्तौ स इममेवात्मानं द्वेधापातयत्ततः पतिश्च पत्नी चाभवतां तस्मादिदमर्धबृगलमिव स्व इति ह स्माह याज्ञवल्क्यस्तस्मादयमाकाशः स्त्रिया पूर्यत एव ताꣳ समभवत्ततो मनुष्या अजायन्त॥[४]**

स परमात्मा एकाकित्वात् न हि रेमे नहि रमणं चकार। तदा द्वितीयमपरमैच्छत् यथा लोके स्त्रीपुरुषौ एकीभूत्वा रमणं कुरुतः। हुतः स आत्मानं द्विधा विभज्य स्त्रीपुरुषो रचयामास ततः द्वौ रमणं चक्रतुः, तदनन्तरं मनुष्याः अजायन्त।

**ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेत्। अहं ब्रह्मास्मीति। तस्मात्तत्सर्वमभवत्तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणां तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवꣳ सूर्यश्चेति॥[५]**

---

[१] मु०उ० ३.१.३

[२] मनुस्मृ० १.९६-९७

[३] श्रीमद्भागवते ११.९.२८

[४] बृहदारण्यकोपनिषद् १.४.३

[५] बृहदारण्यकोपनिषद् १.४.१०

सृष्टेः पूर्वं ब्रह्मैवासीत्। तदा सः ज्ञातवानहं ब्रह्मास्मि। ज्ञानानन्तरमेव सः सर्वं निखिलं भूतजातमभवत्। देवेषु यः तमवबुध्यत तदा परमात्मा तद्रूपं धृतवान्। अतः ऋषिषु मनुष्येषु च ये ये तमवबुध्यन् तदा स परमात्मा तद्रूपं धृत्वा देवा ऋषयः मनुष्याश्चाभवन्। तथा च–

**ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः।**
**ऊरू तदस्य यद्वैश्यः पद्भ्याꣳ शूद्रो अजायत॥**[1]

ब्रह्मत्वजातिविशिष्टपुरुषः परमात्मनः मुखादुत्पन्नः। स बाहुभ्यां भुजाभ्यां क्षत्रियजातित्वविशिष्टं पुरुषं जनयामास। अस्य परमात्मनः ऊरू ऊरुभागात् वैश्यत्वजातिविशिष्टपुरुषः अजायत। सः स्वीयोरूभागात् वैश्यानुत्पादयत। तथा तस्य पद्भ्यां चरणकमलाभ्यां शुद्रा अजायन्त तेनैव सर्वेषां मनुष्याणां सृष्टिरभवत्।

**तदेतद्ब्रह्म क्षत्रं विट्शूद्रस्तदग्निनैव देवेषु ब्रह्माभवद् ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्रस्तस्मादग्नावेव देवेषु लोकमिच्छन्ते ब्राह्मणे मनुष्येष्वेताभ्याँ हि रूपाभ्यां ब्रह्माभवत्॥**[2]

ब्राह्मणः क्षत्रियः वैश्यः शूद्रश्च चत्वारो वर्णाः सन्ति। एषामुत्पादकब्रह्माग्निरूपेण देवानां मध्ये ब्राह्मणः मनुष्याणां मध्ये ब्राह्मणरूपेण ब्राह्मणः क्षत्रियरूपेण क्षत्रियः वैश्यरूपेण वैश्यः, शूद्ररूपेण शूद्रोऽभवत्।

**विश्वकर्मा ह्यजनिष्ट देव आदिद्गन्धर्वो अभवद् द्वितीयः।**
**तृतीयः पिता जनितौषधीनामपां गर्भं व्यदधात्पुरुत्रा॥**[3]

---

[1] **शु०य० ३१.११**

[2] **बृ०आ० १.४.१५**

[3] **शु०य०काण्व० १८.२१.३२**

ब्रह्माण्डमध्ये प्रथमं विश्वकर्मा देवतिर्यगादि जगद् भेदकर्ता सत्यलोकवासी चतुर्मुखो देवः अजनिष्ट आदित्यान्तरपुरुषरूपेण जातः। तदनन्तरं स एव द्वितीयगन्धर्वरूपेणाऽभवदुत्पन्नः। गां वाचं पृथिवीं वा धारयिता देवोऽभवत्। औषधीनां पिता ब्रह्माद्यौषधिना जनिता उत्पादकः पिता पालकः मेघरूपेणाभवत्। सः तृतीयरूपमदधात् सन्नपामाहुतिपरिणामभूतानां गर्भं व्यदधात् धारयति करोति वा।

**समिधाग्निन्दुवस्यत घृतैर्बोधयतातिथिम्। आस्मिन् हव्या जुहोतन॥**[१]

हे ऋत्विजः अग्निं यज्ञियाग्निं समिधा अश्वत्थादिवृक्षाणां समिधया दुवस्यत- परिचर्यां कुरुताग्निं देदीप्यमानं कुरुत होमार्थम्। अतिथिम्- अतिथिवत् सत्कारयोग्यमग्निं घृतैराज्यादिभिर्बोधयत- प्रज्वालयत। अस्मिन्नग्नौ हव्या आहुतिभिः जुहोतन- होमं कुरुत। उत्पद्यमानः पुरुषः विद्यां चाविद्यां च ज्ञात्वा अग्निहोत्रादिः होमानि करोति।

**आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम्। प्रजापतेः प्रजा अभूम स्वर्देवा अगन्मामृता अभूम॥**[२]

अहं यजमानः आयुः जीवनं यज्ञेन वाजपेयप्रभृतियज्ञेन कल्पतां क्लृप्तं भवतु शतवर्षपर्यन्तं पूर्णायुः प्राप्नुयामः। प्राणः यज्ञेन कल्पताम्, वाजपेयेन आत्मबलं मयि समागच्छतु चक्षुः यज्ञेन कल्पताम्, अनेन यज्ञेन पश्येम शरदः शतम्। श्रोत्रं यज्ञेन कल्पतां यज्ञेन शतवर्षपर्यन्तं श्रवणशक्तिः मयि समायातु। पृष्ठं यज्ञेन कल्पतां मम शरीरं यज्ञेन वाजपेयेन सामर्थ्यशाली निरोगश्च भवतु। यज्ञो यज्ञेन कल्पतां यज्ञपुरुषनारायणो यज्ञेन प्रसन्नो भवतु प्रजापतेः सर्वोत्पादकस्य परमात्मनः

---

[१] **शु०य० ३.१**

[२] **शु०य० ९.२१**

प्रजाः सन्ततयः पुरुत्रा बहुप्रकारकैः रूपैः विराजमानः स नानाविधसृष्टिश्चकार बहुप्रकारकान् प्राणिनः सृष्टवानित्यर्थः।

**विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह।**
**अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते।।**[१]

यः पुरुषः विद्यां ब्रह्मज्ञानं वेदान्तज्ञानं वा तथा अविद्यां कर्मकाण्डज्ञानं समानरूपेणोभयज्ञानं वेत्ति स ज्ञानीपुरुष अविद्यया दर्शपूर्णमासाग्निहोत्रादिकर्मकाण्डेन जरामरणधर्मरहितो भूत्वा शुद्धः कृतकृत्यो भूत्वा विद्यया ब्रह्मविषयकवेदान्तज्ञानेनामृतं परमात्मानं ब्रह्मसुखमश्नुते अनुभूयते मोक्षं लभते।

**वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम्।**
**ॐ३ क्रतो स्मर। क्लीबे स्मर। कृतꣳ स्मर।।**[२]

कृतोपासनो योग्यन्तकाले स्मरति – वायुः सप्तदशात्मकलिंगरूपप्राणोऽध्यात्मपरिच्छेदं हित्वाधिदैवतरूपं सर्वात्मकममृतं सूत्रात्मानं वायुं पञ्चभूतनिर्मितशरीरं वा पुरोदृश्यमानं देहं भस्मान्तं मृत्योः पश्चादग्निदाहेन भस्मरूपमापद्यते। अतः जीवनकालम् ॐ ब्रह्मस्वरूपमवगमः कथं कर्तव्यः अस्ति, एतत्स्मरणं कुर्यात्। क्रतो संकल्पात्मकस्मरपुरुषार्थस्य स्मरणं कुर्यात्, क्लींब स्मरशुभमशुभं वा मया किं कृतमिति स्मरणं कुर्यादतः सर्वात्मना पूर्णरूपेण विचार्य ओमिति स्मरणं सततं कुर्यात्। कृतं स्मर यन्मया बाल्यप्रभृत्यनुष्ठितं कर्म तच्च स्मर।

**तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः।**
**तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः।।**[१]

---

[१] **शु०य० ४०.१४**

[२] **शु०य० ४०.१५**

सः परमात्मपुरुष एवाग्निः स एव सर्वत्र प्रकाशक आदित्यरूपेण आकाशे वर्तमानः, स एव निखिलभुवनजगतः प्राणदाता वायुः स एवामृतप्रदाता चन्द्रमाः वर्तते। नानारूपेण जगत उपकारकं ब्रह्म एव। स एव शुक्रं सर्वभावेन विश्वरूपेण विराजमानः। स एव जगन्नियन्ता ब्रह्म परमात्मा प्रजापतिर्वा त्रयीलक्षणं ब्रह्म एव आपो नदीसरोवरसमुद्ररूपेण यत्र तत्र वर्तमानः स एव प्रजापतिः प्रजाजनानामाबालवृद्धवनितासकलजीवनिकायानां पालको रक्षकश्चास्ति।

**यो देवेभ्य आतपति यो देवानां पुरोहितः।**
**पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये॥**[2]

यः परमात्मा देवेभ्य इन्द्रादिदेवानां मध्ये आदित्यरूपेण आतपति सर्वतोभावेन द्योतते प्रकाशयति। यः परमात्मा देवानां इन्द्रादिदेवानां दानशीलानां मध्ये पुरोहितः अग्रे हितसम्पादकः। सर्वेभ्यो देवेभ्यः पूर्वः देवेभ्यः ब्रह्मरूपेण प्रजापतिरूपेण वा जातः- उत्पद्यमानः उत्पन्नो जातः। अतः एतस्मै रुचाय - देदीप्यमानाय प्रकाशशीलाय ब्राह्मये ब्रह्मरूपाय नमः वारं वारं प्रणमामि नमस्करोमि वा।

**अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्।**
**युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम॥**[3]

हे अग्ने दानादिगुणयुक्तदेव? अस्मान् यजमानान् सुपथा शोभनमार्गेण देवयानेन वा नय-ब्रह्म परमात्मानं प्रापय। राये- ब्रह्मानन्दरूपधनप्राप्तये प्रापय। अस्मत्-अस्मत्तः यजमानानां पार्श्वतः जुहुराणः कौटिल्यपूर्णं कुटिलतया पूर्णमेनः पापं युयोधि दूरीकुरु विनाशय

---

[1] **शु०य० ३२.१**

[2] **शु०य०मा० ३१.२०**

[3] **शु०य०मा०सं० ५.३६**

इत्यर्थः। ते तव यज्ञेन कर्मणा भूयिष्ठां बहुतरां नम उक्तिं नमस्कारपूर्वकं प्रार्थनां विधेम कुर्याम।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे मानवजातेरुद्भवो विकासश्च'** नाम पञ्चमोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

# अथ षष्ठोऽध्यायः

# यजुर्वेदे वर्णाश्रमधर्मसमीक्षणम्

समाजव्यवस्था महता कौशलेन कृतास्ति। भारतीया वर्णाश्रमव्यवस्था कियती वैज्ञानिकी उपादेया च वर्तते इत्यस्य सोपपत्तिकं विवेचनमारण्यकग्रन्थेषु पुराणेषु च कृतं विद्यते। अतः विचारशीला जनाः अस्य तथ्यस्य संरक्षणाय निरन्तरं प्रयतन्ते। वर्णाश्रमधर्मो श्रुतिस्मृतिविहितत्वात् शिष्टाचारो गृहीतत्वात् साधुसम्मतत्वाच्च सर्वोत्कृष्टो धर्मो वर्तते। यावत्कालपर्यन्तं पवित्रतमे भारतवर्षे वर्णाश्रमव्यवस्था सुरक्षितां भवति तावत्कालपर्यन्तमाध्यात्मिकलक्ष्योपेता धर्मपरायणार्यजातीनां पतनं न हि भविष्यति। अनेन देवानां मानवानां च कल्याणं सततं सम्पत्स्यते। यदा वर्णसाङ्कर्येण वर्णव्यवस्था विनश्यति तदैवार्यजातेः पतनं समागमिष्यति। वर्णाश्रमव्यवस्थायां नारीणां पातिव्रत्यं सुरक्षितमस्ति। यदैषा व्यवस्था पतनमेष्यति तदा वर्णसंकरा भारतीयसंस्कृतेराचारविचाराणाञ्च विनाशकाः भविष्यन्ति। वर्णाश्रमधर्मह्रासेनैव पातिव्रत्यधर्मस्य ह्रासः सम्भवति।

लोकव्यवस्थापालकानां सनातनधर्मिणाां सकलं कर्मकदम्बं चिरकालस्थायित्वात् वर्णाश्रमधर्ममूलकमेवासीत्। वर्णाश्रमव्यवस्थाया रजोवीर्यशुद्धिः प्रधाना वर्तते। सवर्णविवाहः प्रशस्तः धर्मसंगतश्च। असवर्णविवाहः कामजः पापमयश्च दृश्यते। असवर्णविवाहः साम्प्रतं नहि स्थायी दृश्यते। पतिपत्नीनां मध्ये विश्वासहानिरवलोक्यते। वर्णाश्रमधर्मस्य मौलिकं दार्शनिकं च रहस्यमवलम्ब्यार्यजातिः अस्मिन् विकराले काले

स्थिरा वर्तते। जातेः पवित्रतायाः रक्षणाय वर्णाश्रमव्यवस्था पालनीया वर्तते। समाजव्यवस्थाया आधारः वर्णाश्रमव्यवस्था इति। वैदिकयुगे ब्राह्मणक्षत्रियवैश्यः शूद्रश्च स्वस्वकर्तव्यपालनत्सन्तुष्टाः प्रसन्नाश्चासन्। केनाऽपि सह कस्यापि स्पर्धा नास्ति सर्वतोभावेन सर्वे सुखिन आसन्। परमात्मन चतुर्वर्णान् समुत्पाद्याश्रमव्यवस्थायामुक्तवान् यथा –

**ब्राह्मणोऽस्य मुखमासीद्बाहूराजन्यः कृतः।**
**ऊरू तदस्य यद्वैश्यः पद्भ्याꣳ शूद्रो अजायत॥**[1]

सृष्ट्यादौ केवलमेकमेव ब्रह्म आसीत्। ब्राह्मणजातेः अभिमानत्वात् तद् ब्रह्म। एकोऽहं बहु स्याम इति भावनया स तपस्तप्यत। स तपस्तप्त्वा इदं सर्वं यच्छ्रेयो रूपमत्यसृजत। अहं ब्रह्मास्मि ब्राह्मणत्वजातिविशिष्टगुणमुक्तः सृष्टेः पालनाय श्रेयो रूपं सृजामि तच्क्षत्रं क्षत्रियजातिः यथा क्षत्रियरूपं इन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरिशानश्च एते देवा सृष्टेः पालयितारः सन्ति एतत् प्रशस्तरूपं क्षत्रियजातिः तस्याः सृष्टिरभवत्। इन्द्रो देवानां राजा वरुणो जीवानां सोमो ब्राह्मणानां रुद्रः पशूनां पर्जन्यो विद्युदादीनां यमः पितृणां मृत्यू रोगादीनामीशानो भासां राजा इति एवमादीनि देवेषु क्षत्रियाणि सोमसूर्यवंश्यानि पुरुरवा प्रभृतीनि सृष्टान्येव द्रष्टव्यानि। तदर्थ देवक्षत्रसर्गः प्रस्तुतः।

यस्मात् ब्राह्मणातिशयेन सृष्टं क्षत्रं तस्मात् क्षत्रात्परं नास्ति ब्राह्मणजातेरपि नियन्तुः। तस्मात् ब्राह्मणः कारणभूतोऽपि क्षत्रियस्याधस्तात् व्यवस्थितः यथा राजसूये। सैषा प्रकृता क्षत्रस्य जातेः ब्राह्मणयोनिरिति। यद्यपि राजा राजसूयाभिषेके परमतां प्राप्नोति। ब्रह्मैव कर्मसमाप्तिजाते सति राजसूयाभिषेकं पूर्णतां प्राप्तिं गते सति क्षत्रियो राजा स्वां योनिमासाद्याधस्तिष्ठति। पुरोहितो ब्राह्मण उपरि आसने आसीनो भवति।

---

[1] **शु०य०मा० ३१.११**

अतः ब्राह्मणः श्रेष्ठस्तदनन्तरं क्षत्रियः। तयोः सृष्टिरभवता अत एव ब्राह्मणस्य निन्दकः पापीयान् भवति। यथा–

**ब्रह्म वा इदमग्र आसीदेकमेव तदेकꣳ सन्न व्यभवत्। तच्छ्रेयो रूपमत्यसृजत क्षत्रं यान्येतानि। देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति। तस्मात्क्षत्रात्परं नास्ति तस्माद् ब्राह्मणः क्षत्रियमधस्तादुपासते राजसूये क्षत्र एव तद्यशो दधाति। सैषा क्षत्रस्य योनिर्यद्ब्रह्म। तस्माद्यद्यपि राजा परमतां गच्छति ब्रह्मैवान्तत उपनिश्रयति स्वां योनिं य उ एनꣳ हिनस्ति स्वाꣳ स योनिमृच्छति स पापीयान्भवति यथा श्रेयाꣳ सꣳ हिꣳसित्वा॥**[1]

धनोपार्जनकर्तुरभावत्वात् तद् ब्रह्म कर्माणि कर्तुमसमर्थं ततः तत् कर्मणः साधनभूतस्य धनस्योपार्जनार्थं वैश्यजातिमसृजत्। गणप्रायाः हि वैश्याः प्रायेण गणे वर्तमाना वैश्या धनोपार्जने समर्थाः। वसवः रुद्राः आदित्या विश्वेदेवा एते गणेषु वर्तमना निवसन्ति। यथा अष्टौ संख्याकाः वसवः एकादशसंख्याका रुद्राः द्वादशसंख्यका आदित्याः त्रयोदश संख्यकाः विश्वेदेवाः एकोनपञ्चाशत् संख्यकाः मरुतः सन्ति। सर्वे देवगणाः मिलित्वा त्रिनवतिसंख्याका देवगणा सन्ति। एते सर्वे वैश्वत्वजातिविशिष्टगुणयुक्ता देवाः सन्ति।

**स नैव व्यभवत्स विशमसृजत यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वेदेवा मरुत इति॥**[2]

एतेषां सृष्टिरचनानन्तरं परिचारकाभावात् स नहि सन्तुष्टः। स शूद्रजातित्वविशिष्टगुणयुक्तं नरमसृजत। जायमानः पुरुषः कः? उत्तरम्– पूषा एव इयं पृथिवी पूषा इति पुष्णाति इति पूषा। इयं हि सर्वं पुष्णाति।

---

[1] **बृ०आ०उ० १.४.११**

[2] **बृ०आ०उ० १.४.१२**

**स नैव व्यभवत्स शौद्रं वर्णमसृजत पूषणमियं वै पूषेयꣳ हीदꣳ सर्वं पुष्यति यदिदं किञ्च॥**[१]

एतादृशी वर्णव्यवस्था प्रजापतिना कृता या साम्प्रतमपि विद्यमाना एव स्वकर्मणि वर्तमाना निवसन्ति। यथा देवेषु एषा व्यवस्था विद्यते तादृशी व्यवस्था मनुष्येष्वपि विद्यते नरा स्वस्वकर्मणि वर्तमाना सन्तः समाजं सेवन्ते। एषा वर्णव्यवस्था विद्यते।

**आश्रमव्यवस्था** –

मानवजीवनशतवार्षिकमिति। ततः चतुर्षु भागेषु शतवार्षिकजीवनशैल्या विभागो विहितः, प्रथमभागपञ्चविंशतिवर्षाणां भागः ब्रह्मचर्याश्रमः अस्मिन् जीवनस्य प्रथमे भागे जीवनस्य साफल्याय सततश्रमेणात्मनः सर्वोच्चसुखमभ्युदयञ्च साधयति। तस्य श्रमः पञ्चविधः यथा– अध्ययनात्मकः, अर्जनात्मकः, तपस्यात्मकः, सेवात्मकः, योगात्मकश्च। इमा श्रमप्रवृत्तीरधिकृत्य तस्य जीवनस्य चत्वारो भागा कल्पिता। प्राप्तस्य ज्ञानालोकस्य प्रकाशे जीवनयात्रा अतिरमणीया भवति। जीवनस्य साफल्याय तस्यार्जितज्ञानस्य मात्रयैव परिमिता। ज्ञानस्य सर्वाधिकं फलमिति एतदुद्दिश्यैव सर्वत्र मानवसमाजे बाल्यशिक्षणाय कल्पितम्।

**ब्रह्मचर्याश्रमः** –

जीवनस्य प्रथमभागः पञ्चविंशतिवर्षात्मकः ब्रह्मचर्याश्रमः। अस्मिन्नाश्रमे जीवनाय शिक्षणं प्रशिक्षणं च आवश्यकमिति। भारतीयकल्पनानुसारं ज्ञानाधीनं हि देवत्वम्। ब्रह्मचर्यरहितास्तु ब्रह्मबन्धव इति तिरस्कृताः सन्ति सर्वत्र विदुषां मध्ये धनस्य प्रतिष्ठा महत्त्वञ्च तृणवदिति। दिग्विजयिनो राजानोऽपि विदुषां चरणरजसाऽऽत्मानं

---

[१] **बृ०आ०उ० १.४.१३**

पावयन्ति। लोक वैभवस्य काचिदपि प्रशंसा नास्ति जनपदे। पुरा राजानः विदुषामाश्रया एव सम्मानार्थमाहारादिकं गृहं धनं वेतनञ्च ददति स्म। राज्ञां समक्षमपि कतिपयकवयश्छत्रधारणाधिकृता बभूवुः। बहवो राजानोऽपि सिंहासनं परित्यज्य आचार्यचरणमुपजग्मुरित्यतोऽधिकं नास्ति ज्ञानाय प्रतिष्ठाया अपरं परं प्रमाणमिति। वैदिके युगे द्वादशवर्षाद्वेदाध्ययनं प्रारब्धं प्रायशः चतुर्विंशतिवर्षपर्यन्तं वेदाध्ययनं कालम्। कतिपयब्रह्मचारिणस्तु समस्तजीवनमेवाध्ययनाय विनियोजितवन्तः। स्वशाखायाः वेदस्याध्ययनाय द्वादशवर्षावधिर्निश्चितः। सर्वेषां वेदानामध्ययनायाष्टचत्वारिंशद्वर्षपर्यन्तकालो निश्चितः। ब्रह्मचर्यव्रताय उपनिषद्युगे गृहस्था अपि स्वीकृता। यदा कदा पिता स्वपुत्रेण सह कस्यचिदाचार्यस्य शिष्यो भूत्वा ब्रह्मचर्यमुवास। योग्यविद्यार्थिनां समागमाय गुरवः सदैव प्रयत्नशीला अभवन्। प्रतिभाशालिन्या शिष्यपरम्परया आचार्यः परिश्रमेण परिश्रमेणार्जितस्वज्ञानविज्ञानं शिष्याय दातुं यतन्ते स्म।

वैदिककाले विद्याप्राप्तिसामर्थ्यं प्रतिभां च दृष्ट्वा आचार्याः विद्यार्थिनः स्वीकुर्वन्ति स्म। निष्प्रतिभास्तु गुरुगृहं परित्यज्य कृषिकर्मणि यत्र तत्र वा परिभ्रमन्ति। विद्यार्थिनां मनोवृत्तिं परीक्ष्यैव व्यवसायनियोजनं कुर्वन्ति स्म।

**अधः शाय्यक्षारालवणासी स्यात्।। दण्डधारणमग्निपरिचरणं गुरुशुश्रूषा भिक्षाचर्या।। मधुमाꣳसमज्जनोपर्यासन-स्त्रीगमनानृतादत्तादानानि वर्जयेत्।। अष्टाचत्वारिꣳशद्वर्षाणि वेदब्रह्मचर्यं चरेत्।। द्वादश द्वादश वा प्रतिवेदम्।। यावद् ग्रहणं वा।।**[1]

[1] पा०गृ०सू० २.५.१०-१५

**ब्रह्मवेत्तुर्गतिः – एनान् ब्रह्म गमयत्येव देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्तन्ते॥**[1]

सः देवयानेन गत्वा ब्रह्म गमयति पुनः अस्मिन् संसारे न हि आगच्छति।

**गृहस्थाश्रमः –**

विवाहसंस्कारानन्तरं स्नातका गृहपतयः गृहस्था बभूवुः। वैदिककालतः एव गृहस्थानां जीवनविधिर्विविधप्रकारा दृश्यते। अस्मिन् आश्रमे पञ्चमहायज्ञानां परिपालनमस्ति। गृहस्थाः देवतां मानवतां च प्रति कर्तव्यं निष्पादयन्ति। महायज्ञेषु सर्वेषां पोषणाय विविधप्रकाराणां त्यागादीनां विधानमस्ति। एतस्मै प्रयोजनाय ब्रह्मचर्याश्रमे गृहीतानि विद्या आचारः स्वास्थ्यबलं चोपयोगानि बभूवुः। एभिरेव गृहस्थोऽधिकाधिकं धनं प्राप्नुवन्ति। ततस्ते यज्ञादिकं कर्म कुर्वन्ति स्म।

**अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।**
**होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥**[2]

**ब्रह्मयज्ञः** – ब्रह्मचर्याश्रमप्रकरणे स्पष्टं प्रतिभाति यत् सदैवाचार्याः निःशुल्कमेव वेदवेदाङ्गानां शिक्षां ददुः। तेषां ब्रह्मयज्ञस्याध्यापनपरं स्वरूपं वर्णितम्। स्वाध्यायपरा एव आचार्या आसन्। अनेन प्रकारेण दीनहीनानामपि विद्यार्थिनां शिक्षा अभवत्। ब्रह्मयज्ञसम्पादनाय एव आचार्याः विद्यार्थिसमूहं समीहन्ते स्म। ब्रह्मयज्ञेन स्वर्गप्राप्तिर्भवति। सर्वोच्चोऽयं यज्ञः। देवाः ब्रह्मयज्ञेन प्रीताः स्वाध्यायिभ्यो विविधानभ्युदयान् ददतिस्म। स्वाध्यायविषयास्तु वेदवेदाङ्गेतिहास–पुराणादयोऽऽसन् ब्रह्मयज्ञेन व्यक्तिगताभ्युदयः समष्टिकल्याणञ्च भवति।

---

[1] **ब्र.सू.श.भा. १.१.५३९**

[2] **मनुस्मृतिः ३.७०**

**दैवयज्ञः** –

दैवयज्ञे देवप्रीतये स्तुतिर्हवनादिको यज्ञश्च सम्पाद्यन्ते। भारतीया विद्वांसः देवानामाराधनया एव मानवस्याभ्युदयं भवतीति मन्यन्ते। यज्ञमुखेन ते देवानां सान्निध्यमनुभूतवन्तः। देवसान्निध्येन मानवानां व्यक्तिविकासस्य सम्भावनासीत्। वैदिकधारणानुसारं देवास्तु कर्मण्याः उदाराः सत्यपरायणा पराक्रमसम्पन्नाः सहायशीलाश्च सन्ति। वैदिकगृहेषु सायं प्रातः अग्निहोत्रादिकार्याणि भवन्ति एव। हवने प्रायशो अग्नेः स्तुतिरभवत्। मध्याह्ने सोमयज्ञं सम्पदयन्त्यन्येभ्यो देवेभ्यो विविधाः पूजाः अभवन्।

**पितृयज्ञः** –

पितरस्तु देवा इव परमोदाराः। तेभ्यः तर्पणस्य विधानं वर्तते। पितृणां तृप्तये स्वधया सह पिण्डदानमपि भवति, तृप्तिप्राप्ते सति पितृणां सर्वाः क्रियाः पूजाश्च पूर्णाः भवन्ति। पितृणां पूजनेन स्वर्गलाभस्य सर्वविधकल्याणस्य च सम्भावना भवति।

**भूतयज्ञः** –

सर्वे सुखिनः सन्तु इति आर्याणां सनातनी धारणा वर्तते। भूतयज्ञेन सर्वेषां प्राणिनां तृप्तये नित्यमेव बलिर्भवति। जपनियमाग्निहोत्रमुखेन सर्वेषां प्राणिनां बलिविधानं वर्तते।

**अतिथियज्ञः** –

वैदिककालादेव सर्वेषां सदैवलोकप्रियोऽतिथिसत्कारोऽस्ति। लोकाः अतिथिपूजनेनोत्कृष्टतां लभन्ते। गृहस्थस्तु रात्रेः अन्तिमप्रहरे ब्राह्ममुहूर्ते वा जागरणं चकार। उदपानावेक्षणवृक्षारोहणफल–प्रतपनसन्धिसर्पणविवृतस्नानविषमलङ्घनशुष्कवदनसन्ध्याआदिन्यप्रेक्षण–भैक्षणानि च न कुर्यात्।

**न ह वै स्नात्वा भिक्षेतापह वै स्नात्वा भिक्षां जयतीति श्रुतेः।।**[1]

गृहस्थाणां नियमानि विशेषतः पालनीयानि सन्ति –

कूपस्यावेक्षणमुपरिस्थित्वाऽधोमुखीभूयावलोकनन्न कुर्यात्। वृक्षस्योपरिगमनं कृत्वा फलानां त्रोटनं न कुर्यात्। सन्ध्याकाले गमनागमनं न कुर्यात्। नग्नो भूत्वा स्नानं न कुर्यात्। पर्वतगतादेरतिक्रमणं न कुर्यात्। श्लीलभाषणं लज्जाकरं दुःखकरणममंगलकरं वाक्यं न वदेत्। प्रातः सायंकाले वा सूर्यममण्डलस्य दर्शनं न कुर्यात्। गृहस्थो भूत्वा भिक्षाटनं न कुर्यात्। एतानि गृहस्थस्य मुख्यानि नियमानि तानि सम्यक् परिपालनीयानि।।

**वानप्रस्थाश्रमः** –

गृहस्था आर्यपथे समुपस्थिते सर्वस्वं ब्राह्मणसात् कृत्वा वानप्रस्था बभूवुः। इदं तु जीवनस्य परमं सार्थक्यमिति। गृहस्थाश्रमस्य श्रेष्ठत्वे सति कथं तस्य त्यागो विधेयः। इति साम्प्रतिकोऽयं प्रश्नः। मानवजीवनस्योद्देश्यं मोक्ष एव। गृहस्थाश्रमस्य सार्थकत्वं वर्तते यन्मनीषिभिः प्रतिपादितं गृहस्थाश्रमः श्रेष्ठः। किन्तु एष आश्रमः आत्मविकासाय श्रेष्ठतमः विद्यते। बुद्धमतानुसारं स्वभावत एव क्रोधस्य आगमनम्। मिथ्याभाषणं वचनं परुषवचन–मित्रद्रोह–अभिमान–ईर्ष्या–तृष्णा–विचिकित्सा–परपीडा–लोभ–मोह–क्रोध– मदप्रभृतीनि दुर्गाणानि त्याज्यानि सन्ति। तेषां परित्यागेनैव परमो लाभः। वानप्रस्थे यज्ञः, यागः पारमार्थिकं कार्यं सर्वं भवति। शोभनोऽयमाश्रमः।

**सन्यासाश्रमः** – पुरुषः सन्यासाश्रमे सर्वविधिना स्वतन्त्रो भूत्वा महान् विचारको अभवत्। यावत्कालपर्यन्तं मानवः कुटुम्बग्रामदेशराजनीति–

[1] **पा०गृ०सू० २.७.६**

प्रभृतिभिर्विचारैर्व्यवसायप्रभृतिभिः कार्यैश्च सम्बन्धितो भवति तावत्कालपर्यन्तं तस्य बौद्धिकविकाससीमित आसीत्। कुटुम्बपालने भरणे पोषणे च व्यस्तोऽभवत्। सन्यासस्य विधानैरस्याः सीमायाः पारं भूत्वा मानवस्य सर्वातिशयस्य विकासस्य ब्रह्मचिन्तनस्य चावसरो लभते। सन्यासिनो भूत्वा मानवाः संकुचितसीमायाः परे भूत्वा गृहस्थसमाजेऽपि विचरन्ति तेषां सन्मार्गं प्रदर्शयितुं शिक्षयन्ति च। वानप्रस्थे ब्रह्मसम्बन्धिविचाराणां मननं चिन्तनं स्वाध्यायतपोभिश्चैव ब्रह्मज्ञानं लभन्ते। ततः परं तपस्याया आवश्यकता च विद्यते, मुनिर्ब्रह्मसंस्थो भवति। ईदृशो मुनिः वनवासकामनया यतते। वानप्रस्थस्यानिवार्यत्वं नास्ति वैदिकयुगे। तदा ब्रह्मचर्याश्रमाद् गृहस्थाश्रमाद्वा सन्यासाश्रमं प्रविशन्ति।

**असुर्या नाम ते लोका अन्धेन तमसावृताः।**
**ताꣳस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः।।**[१]

अन्यच्च - **विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह।**
**अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते।।**[२]

यदेच्छा भवेत् तदा प्रव्रजेत्। सन्यासी गृहं सुखं सुरक्षां च परित्यज्य मौनवमवलम्ब्य निवसति स्म। नास्ति लोकपरलोकस्य चिन्ता केवलब्रह्मविषयकचिन्ता तस्य पार्श्वे भवति। स वस्त्रं धारयति दिगम्बरो वा भवति।

**समीक्षणम्** - यदा कश्चित् पुरुषः शेते तदा स इन्द्रियाणामकरणात् सकलपरिग्रहेभ्यः मुक्त एव सानन्दो भवति। तथैव समाधौ पुरुषः अधिकतरमानन्दं लभते तत्रेन्द्रियाणां परमार्थतो विषयेभ्यो विरमणादिति समाधिस्थस्तु परिग्रहेभ्यः सम्यक् मुक्तः एवात्मसुखं लभते। ब्रह्मज्ञानं

---

[१] **शु०य० ४०.३**

[२] **शु०य० ४०.१४**

जातेऽसत्यज्ञानविद्याजनितक्लेशाः स्वयं विनश्यन्ति क्लेशानां नाशे सति जरामृत्युतः निवृत्तिः ततः आप्तकामो जनः कैवल्यपदं लभते।

**ज्ञात्वा देवं सर्वपाशापहानिःक्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः।**
**तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः॥**[१]

अमृतत्वसाधनमात्मज्ञानप्रियायै भार्यायै मैत्रेय्यै उक्त्वा महर्षिर्याज्ञवल्क्यो प्रतिज्ञातं सन्यासं गृहीतवान्। परिसमाप्ता ब्रह्मविद्या सन्यासं पर्यवसाना। एतावानुपदेशः एतद् वेदानुशासनमेषा परमनिष्ठा, एषः पुरुषार्थकर्तव्यतान्त इति॥[२]

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे वर्णाश्रमधर्मसमीक्षणम्'** नाम षष्ठोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

---

[१] **श्वे०उ०अ० १.११**

[२] **बृ०उ० ४.५.१५ भाष्यम्**

# अथ सप्तमोऽध्यायः

# यजुर्वेदे वैदिकसंस्कारस्य जनजीवने प्रभावः

द्विविध एव संस्कारो भवति ब्राह्मो दैवश्च। गर्भाधानादिः स्मार्तो ब्राह्मः, पाकयज्ञा हविर्यज्ञश्च दैवः। "ब्राह्मेण संस्कारेण संस्कृतः ऋषीणां सलोकतां गच्छति। दैवोत्तरेण संस्कृतो देवानां समानतां सलोकतां गच्छति" इति श्रुतेः।[1] "गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्म-नामकरणान्नप्राशनचौलोपनयनानि चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणीसंयोगः पञ्चानां यज्ञानामनुष्ठानमष्टका-पार्वणः श्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजीति सप्त पाकयज्ञसंस्था अग्न्याधेयमग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यान्याग्रयणेष्टिर्निरूढपशुबन्धः सौत्रामणीति सप्त हविर्यज्ञसंस्था अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमसंस्था इत्येते चत्वारिंशत्संस्काराः" इति। "यस्यैते चत्वारिंशत्संस्कारा अष्टावात्मगुणाश्च स ब्राह्मणो ब्रह्मणः सायुज्यमाप्नोति" इति। पार्वणः स्थालीपाकः। श्रावणी तत्र क्रियमाणं श्रवणाकर्म। आग्रहायणी तत्र क्रियमाणं प्रत्यवरोहणम्। चैत्री तत्र क्रियमाणः शूलगवः आश्वयुजी तत्र क्रियमाणमाश्वयुजीकर्म। अष्टावात्मगुणाः। दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गल्यमकार्पण्यमस्पृहा" इति[2]।

वैदिकसंस्कारे राजतः रङ्कपर्यन्तं सर्वेषां परम्परागतरूपेण श्रद्धा भवति स्म। अनेन संस्कारेणैव संस्कृतत्वात् भारतस्य धर्मप्राणरूपिणः

---

[1] **भगवन्तभास्करः पृ० ११**

[2] **भ०भा०पृ० ११**

मनुष्याः एकतायामाबद्धाः आसन्। वैदिककाले हृदयान्तःग्रन्थिसमीकरणे तथा भगवत्प्राप्तये व्यक्तेः जन्मतः मृत्युपर्यन्तं जीवनं संस्कारेण संस्कृतमासीत्। यजुर्वेदस्य गृह्यसूत्रसाहित्यं बहुव्यापकमस्ति। यजुर्वेदस्यान्तर्गतं शुक्लयजुर्वेदस्य पारस्करवैजवापनामके द्वे गृह्यसूत्रे तथा कृष्णयजुर्वेदस्य बौधायनभारद्वाजापस्तम्बहिरण्यकेशीयाग्निवेश्य-वाराहमानवकाठकवराहाणि नव गृह्यसूत्राणि सन्ति। अनेन गृह्यसूत्रेण एव जनाः संस्कारवन्तः भवन्ति। वैदिकसंस्कारः सनातनधर्मावलम्बिनां मेरुदण्डोऽस्ति। एषः अस्माकं जीवने उत्कर्षस्य चरमस्थानमस्ति। वैदिकसंस्कारेण संस्कृताः जनाः स्वधर्मं प्रति गर्वभावनया गौरवभावनया चान्यापेक्षया स्वात्मन एव श्रेष्ठत्वं स्वीकुर्वन्ति। सर्वैः धर्माचार्यैः वैदिकसंस्काराणां प्रशंसा कृता वर्तते। वैदिकसंस्कारः अस्माकं विविधापत्तीनां निराकरणे शक्तिं प्रददाति।

गृह्यसूत्रेषु प्रतिपादितवैदिकसंस्काराणां प्रक्रिया कालक्रमानुसारेण कठिना जाता, यस्य मुख्यकारणं भारतीयशासनव्यवस्थायाः सनातनधर्मं प्रति उदासीनता एवं भारतीयजनेषु विविधजातीनां समये समये आगमनमस्ति। वैदिकसंस्काराणां व्यवस्थितप्रक्रियायाः निरूपणं गृह्यसूत्रेषु उपलब्धमस्ति। गृह्यसूत्रेषु मुख्यरूपेण सनातनधर्मावलम्बिनां दैनिकधार्मिकजीवनेन सह सम्बद्धकृत्यानां वर्णनं कृतं वर्तते, तादृशः संस्कारः गृह्याग्निमाध्यमेन भवति। गृह्यसूत्रेषु प्रतिपादितं कर्मकाण्डं वेदसंहितायाः मन्त्रद्वारा समन्त्रकं कृतं वर्तते। गृह्यकर्म आहिताग्नेः एवं अनाहिताग्नेः कृते अनुष्ठेयं वर्तते। श्रौतकर्म केवलमाहिताग्नये विहितमस्ति। गृह्याग्रायणे केवलं स्थालीपाकस्य विधानमस्ति, परन्तु श्रौताग्रायणे पुरोडाशस्य चरोश्च आहुतिः प्रदीयते। गृह्यकर्म पतिपत्नीद्वारा आचार्यमाध्यमेन स्थालीपाकस्य आहुतिं दत्वा सम्पन्नं भवति, परन्तु श्रौतदर्शपूर्णमासे पुरोडाशस्य प्रयोगः क्रियते, स यागोऽनेकेषामृत्विजां

साहाय्येन दिनद्वयं यावत् प्रचलति। अन्त्येष्टिसंस्कार आहिताग्नेः एवमनाहिताग्नेः कृते विहितोऽस्ति।

यजुर्वेदीयगृह्यविषयाणां प्रतिपादने शतपथब्राह्मणमाधारत्वेन स्वीकृतमस्ति। उदाहरणार्थं पारस्करगृह्यसूत्रे वर्णितोपनयनसंस्कारस्य बीजं शतपथब्राह्मण एव वर्तते। एवम्प्रकारेण पुंसवनजातकर्मेन्द्रयज्ञाः मूलतः शतपथब्राह्मणे एव प्रतिपादिताः सन्ति। पारस्करगृह्यसूत्रेऽपि संस्काराः कर्मकाण्डविधिना सह वर्णिताः सन्ति। मनुष्यस्य नैतिकमानसिकाध्यात्मिकोन्नतये तथा बलवीर्यप्रज्ञादैवीयगुणानां प्रस्फुटने गृह्यसूत्रे निर्दिष्टसंस्कारद्वारा मनुष्याः संस्कारयुक्ताः भवन्तु इति आवश्यकता वर्तते। संस्कारशब्दस्यार्थ एव दोषापनयनमेवं गुणाधानं वर्तते। मनुष्याणां दोषान् दूरीकृत्य ते मनुष्याः धर्मार्थकाममोक्षाख्यपुरुषार्थयोग्याः भवन्तु इति संस्कारस्य मुख्योद्देश्यमस्ति। वैदिकसंस्कारेण नवीनगुणानां प्राप्तिः तथा दोषाणां मार्जनं भवति। यद्यपि वैदिककर्मकाण्डस्य फलमदृष्टमस्ति, अदृष्टविषये त्रिकालज्ञानामृषीणामाप्तवचनमेव प्रमाणं भवति। श्रद्धापूर्वकमृषिवाक्यानां पालनेन विहितफलानां प्राप्तिरवश्यं भवति। भगवता मनुना कथितमस्ति यत् –

**वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम्।**
**कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च॥**[१]

वेदमूलत्वाद्वैदिकैः पुण्यैः शुभैर्मन्त्रयोगादिकर्मभिः द्विजातीनां गर्भाधानादिशरीरसंस्कारः कर्तव्यः। पावनः पापक्षयहेतुः। प्रेत्य परलोके संस्कृतस्य यागादिफलसम्बन्धात्, इह लोके च वेदाध्ययनाद्यधिकारात्। वैदिकसंस्कारस्य विना शरीरं शुद्धं न भवति एवमशुद्धव्यक्तिः देवतानां पितृणां कार्यकरणे अधिकारी न भवति। अत एव

---

[१] **मनुस्मृतिः २.२६**

इहलोकपरलोककल्याणकामनायुक्तब्राह्मणादिवर्णानां परमं कर्तव्यं यत् स्वस्ववर्णव्यवस्थानुसारं प्रयत्नपूर्वकं वैदिकसंस्काराणां यथाविधि सम्पादनं सदैव कर्तव्यम्। वैदिकसंस्काराणामनुष्ठानं नितान्तमपेक्षितमस्ति। अनेन दोषस्य परिमार्जनमेवं गुणानामाधानं भवति।

षोडशसंस्कारेषु प्रारम्भिकाष्टसंस्काराः प्रवृत्तिमार्गीयाः एवं तदनन्तरमष्टसंस्काराः निवृत्तिमार्गीयाः सन्ति। ब्रह्मत्वप्राप्तये योग्यतानिर्माणं वैदिकसंस्कारादेव भवति, तत्रापि द्विजशरीरीराणां संस्कारस्तु वेदोक्तपवित्रविधिद्वारा अवश्यं सम्पादनीयः। गर्भावस्थायाः आधानम्, पुंसवनं तथा सीमन्तोन्नयनं तथा जन्मनः पश्चात् जातकर्म, चूड़ाकरणमेवं उपनयनादिवैदिकसंस्काराणां तस्मिन् तस्मिन् समये हवनादिविधिद्वारा करणेन मातुः गर्भे एवं जन्मदातुः पितुः वीर्यजन्यसमस्तदोषाणां शमनं भवति तथा वेदमन्त्राणां प्रभावेण नवजातशिशोरन्तःकरणे शुभविचाराणां तथा सत्प्रवृत्तीनामुदयो भवति। एवम्प्रकारेण उपनयनस्य प्रयोजनवेदारम्भादिसंस्कारद्वारा विविधहवनीयद्रव्यद्वारा एवं वेदत्रयस्वाध्यायद्वारा च पुरुषार्थचतुष्टयस्य प्राप्तिर्भवति। वैदिकविधानपूर्वकं विवाहसंस्कारकरणानन्तरं गृहस्थाश्रमे पुत्रोत्पादनद्वारा त्रयाणामृणानामपाकरणं तथा पञ्चमहायज्ञानामेवमग्निष्टोमादियज्ञानां यथाविध्यनुष्ठानेन मनुष्यः ब्रह्मप्राप्तेरधिकारी भवति। विश्वशान्तये वैदिकसंस्कार एव अत्यन्तप्रासङ्गिकोऽस्ति, वैदिकसंस्कारपरम्परायाः सम्यङ् निर्वाहाभावेन सर्वत्र सुशिक्षितजनानां संख्या प्रतिदिनं न्यूनतामेतीति सर्वैः सम्प्रत्यवलोक्यते। वैदिकसंस्कारद्वारा परम्पराद्वारा विमुखकारणेन समाजे अनाचारदुराचारकदाचाराः वल्मीकवत् मानवमात्रं संस्कारहीनं करोति, अतः सर्वत्र अशान्तेः वातावरणमस्ति।

महर्षिकृष्णद्वैपायनेन संस्कारस्य अवश्यकरणीयतामालक्ष्य षोडशसंस्काराणां परिगणना कृता अस्ति। तथा हि –

**गर्भाधानं पुंसवनं सीमन्तो जातकर्म च।**
**नामक्रिया निष्क्रमणान्नप्राशनं वपनक्रिया॥**
**कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधिः।**
**केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहः॥**
**त्रेताग्निसंग्रहश्चेति संस्काराः षोडशस्मृताः॥**[१]

व्यासस्मृतौ एतेषां षोडशसंस्काराणां क्रियाविधानमपि विस्तृतरूपेण प्रतिपादितं वर्तते। संस्कारशब्दस्य विभिन्नार्थाः सन्ति। यथा–

**संस्कारव्यवहाराऽसाधारणं कारणं संस्कारः। संस्कारस्त्रिविधो वेगो भावनास्थितिस्थापकश्च।**[२]

**स्नानाचमनादिजन्याः संस्कारा देहे उत्पद्यमानानि तदभिधानानि जीवे कल्प्यन्ते**[३] इति। संस्कार एक आत्मशुद्धिरस्ति तथा पवित्रता शुद्धता एव आत्मसंस्कारोऽस्ति। संस्कारः जीवनस्य महत्त्वमेवं पवित्रताञ्च प्रददाति।

संस्कारशब्दः समुपसर्गपूर्वककृञ्धातोः घञ् प्रत्यये सति निष्पन्नो भवति। संस्कारस्य अनेकव्युत्पत्तिलभ्याः अर्थाः सन्ति। यथा – धार्मिकविधानम्, सांसारिकजीवने दीक्षितः, पवित्रीकृतः, अलङ्कृतः, श्रेष्ठः, द्विजातेः सः मनुष्यः यस्य शुद्धसंस्कारः सम्पन्नः, परिष्कृतः, शुद्धिक्रिया इत्यादयः। तथैव **प्रोक्षणादिजन्यसंस्कारो यज्ञाङ्गपुरोडाशेषु**[४] इति। अत्र संस्कारस्याभिप्रायः शुद्धेः धार्मिकक्रिया तथा दैहिकबौद्धिकपरिष्काराय क्रियमाणानुष्ठानेन वर्तते। सनातनधर्मावलम्बिनां सर्वे संस्काराः जीवनं सन्मार्गे परिष्काराय धार्मिकक्रियारूपेण प्रवर्तन्ते।

---

[१] **व्यासस्मृतिः १.१३-१५**

[२] **तर्कभाषा पृ० ४८३**

[३] **वाचस्पत्यम् भाग - ५, पृ० ५१८८**

[४] **वाचस्पत्यम् भाग - ५ पृ० ५१८८**

एतेषां क्रियाणां सामाजिकधार्मिकसांस्कृतिकमहत्त्वमस्ति। भगवता मनुना निगदितमस्ति यत् –

**स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः।**
**महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः॥**[1]

स्वाध्यायव्रतहोमदेवर्षिणां तर्पणं यज्ञसन्तानोत्पत्तिः, इज्या तथा पञ्चमहायज्ञानामनुष्ठानेन एतच्छरीरं ब्रह्मप्राप्तियोग्यं भवति। संस्काराः मोक्षप्राप्तये साधनानि अपि सन्ति। लोके तु चरित्रनिर्माणमेव संस्काराणां मुख्यं प्रयोजनमस्ति। संस्काराणामुद्देश्यमस्ति संस्कृतजीवनस्य निर्माणम्, संस्कृतजीवनस्याभिप्रायो वर्तते उन्नतोदात्तदिव्यजीवनम्, मानवतायाः परिष्करणम्, दैवीशक्तेः मानवशरीरेऽवतरणम्। शास्त्रविहितकर्मद्वारा शुद्धो भूत्वा मनुष्यः शीघ्रातिशीघ्रं परमनैष्कर्म्यमर्थात् कर्तृत्वकर्मत्वकर्मफलानां निवृत्तिसाधनं ज्ञानं प्राप्नोति। यथा –

**कर्मयोगं वदत नः पुरुषो येन संस्कृतः।**
**विधूयेहाशु कर्माणि नैष्कर्म्यं विन्दते परम्॥**[2]

कर्म (शास्त्रविहितम्), अकर्म (निषिद्धम्) एवं विकर्म (विहितस्योल्लङ्घनम्) एतानि त्रीणि वेदद्वारैव ज्ञातानि भवन्ति, एतेषां व्यवस्था लौकिकरीतिद्वारा न भवति। भगवान् वेदव्यासो वदति –

**कर्माकर्मविकर्मेति वेदवादो न लौकिकः।**
**वेदस्य चेश्वरात्मत्वात् तत्र मुह्यन्ति सूरयः॥**[3]

इतिहासः साक्षी वर्तते यत् संस्कारस्य प्रभावेण मनुष्यः सदैव उन्नतो भवति। आर्यजातिषु संस्काराणां प्रतिष्ठा साधनसोपानरूपेण जाता।

---

[1] **मनुस्मृतिः २.२८**

[2] **श्रीमद्भागवतम् ११.३.४१**

[3] **श्रीमद्भागवतम् ११.३.४३**

विजातीयानां भीषणाक्रमणेष्वपि आर्यजात्या वैदिकसंस्काराणां परित्यागः कदापि न कृतः। ऋषिणा मानवस्य पुरुषार्थचतुष्टयस्य प्राप्तये येषां संस्काराणां कल्पना गृह्यसूत्रेषु धर्मसूत्रेषु च कृता, तेषामाधारशीला अतीवसुदृढ़ा तथा गभीरा वर्तते। जन्मतः पूर्वमेव संस्कारस्य प्रारम्भो भवति।

**षोडशसंस्काराः** -

**१. गर्भाधानम्** - संस्कारयुक्तपितुः मातुश्च विशुद्धवीर्यमेवं रजःद्वारा संस्कृतसन्तानस्य जन्म भवति। अत एव संस्कारस्य प्रारम्भः गर्भाधानेन जातः। शास्त्रकारेण वीर्यं बीजरूपेण स्वीकृतम्, तथा स्त्रियाः रजः (शोणितम्) क्षेत्ररूपेण स्वीकृतम्। सृष्टेः विकासोऽपि एतयोः द्वयोः तत्त्वयोः क्रीड़ाक्षेत्रमस्ति। यदि वयं संस्कृतसन्तानस्य कामनां कुर्मः तदा पितुः शुक्रस्य सात्त्विकतायाः साकं मातुः शोणितस्य सात्त्विकता अपि परमावश्यकी। अस्य कृते अन्नस्य आहारस्य च शुद्धेः साकमाचारशुद्धिरपि आवश्यकी। गर्भाधानसंस्कारे तिथीनां तथा सहवासस्य अन्यनियमाः निश्चिताः सन्ति। सन्ततिः संस्कृता भवतु, धार्मिकभावनया युक्ता भवतु तथा सदाचारयुक्ता भवतु एतादृशमहत्त्वपूर्णोद्देश्यं संस्कारे सन्निहितं वर्तते। तथा हि -

**सा यदि गर्भं न दधीत सिꣳह्याः श्वेतपुष्प्या उपोष्य पुष्येण मूलमुथाप्य चतुर्थेऽहनि स्नातायां निषायामुदपेषं पिष्ट्वा दक्षिणस्यां नासिकायामासिञ्चति।**[१]

**२. पुंसवनम् - अथ पुꣳसवनम्॥**[२] गर्भधारणस्य निश्चयानन्तरं तृतीयमासे गर्भस्थशिशुं पुंसवननामकसंस्कारद्वारा संस्कृतं कर्तुमनुष्ठानं भवति स्म। पुंसवनसंस्कारस्य अभिप्रायः पुरुषस्य जन्म आसीत्। रात्रौ

---

[१] **पा०गृ० १.१३.१**

[२] **पा०गृ० १.१४.१**

गर्भिण्याः स्त्रियाः नासिकायाः दक्षिणरन्ध्रे मन्त्रोच्चारणपूर्वकं विशेषप्रकारेण निर्मितौषधीनां रसः तत्र स्थाप्यते स्म।

**३. सीमन्तोन्नयनम् – अथ सीमन्तोन्नयनम्॥**[1] पारस्करगृह्यसूत्रानुसारेण अस्य संस्कारस्य सम्पादनं षष्ठे मासे कर्तव्यम्। सीमन्तोन्नयनसंस्कारे पतिद्वारा पत्न्याः केशेषु सुगन्धिततैलमर्दनं क्रियते। उदुम्बरस्य अथवा अर्जुनवृक्षस्य शलाकया पत्न्याः केशाः शुद्धाः क्रियन्ते।

**४. जातकर्म – सोष्यन्तीमद्भिरभ्युक्षति-एजतु दशमास्य इति प्राग्यस्यैत इति।**[2] प्रसवानन्तरं जातकर्मसंस्कारः विधीयते। शिशोः बुद्धेः तथा आयुर्वृद्धिकामनया एषः संस्कारः क्रियते। नालच्छेदतः पूर्वं शिशुं सुवर्णपात्रे दधिघृतमधूनां मिश्रणं कृत्वा दीयते तथा मन्त्रोच्चारणपूर्वकं बालकस्य जिह्वायां सुवर्णशलाकया वेद इति लिख्यते।

**५. नामकरणम् – दशम्यामुत्थाप्य ब्राह्मणान् भोजयित्वा पिता नाम करोति।**[3] नामकरणसंस्कारः प्रसवस्य एकादशे दिने भवति। पुत्रस्य पुत्र्याः वा नामक्षरमेतादृशं भवतु येन सात्विकभावं पवित्रभावञ्च द्योतितं भवेत् तथा तेषां कर्त्तव्यानां सूचनां विदधेत्।

**६. निष्क्रमणम्** – नवजातशिशोः सूतिकागृहात् बहि:निस्तारणमेव निष्क्रमणम्। एषः संस्कारः जन्मतः पश्चात् द्वादशदिनतः चतुर्थमासं यावत् कर्तुं शक्यते। प्राणदेवतातः सम्बद्धमन्त्राणामुच्चारणपूर्वकं शिशुं सूर्यचन्द्रमसोः दर्शनं कारयते। शिशुः शारीरिकदृष्ट्या निरोगो भवतु तथा प्राकृतिकभौतिकव्याधितः सुरक्षितो भवतु एवम्कामनया निष्क्रमणसंस्कारः विधीयते।

---

[1] **पा०गृ० १.१५.१**

[2] **पा०गृ० १.१६.१**

[3] **पा०गृ० १.१७.१**

७. **अन्नप्राशनम्** – **षष्ठे मासेऽन्नप्राशनम्।** [१] शिशोः शरीररक्षार्थमन्नप्राशनसंस्कारद्वारा तं दधिमधुपायसान्नादिकं भक्षयते। तथा च आश्वलायनगृह्यसूत्रे कथितमस्ति –

**षष्ठे मास्यन्नप्राशनम्।। घृतोदनं तेजस्काम। दधिमधुघृतमिश्रितान्नप्राशमयेत्।** [२] शिशुः तेजस्वी एवं मेधावियुक्तो भवतु इति कामनया जन्मतः षष्ठे मासे अन्नप्राशनस्य विधानं वर्तते।

**चूड़ाकर्म – सांवत्सरिकस्य चूड़ाकरणम्।।** [३] एषः संस्कारः जन्मतः तृतीये वर्षे अथवा पञ्चमे वर्षे विधीयते। चूडाकर्म इत्यस्य अपरं नाम मुण्डनसंस्कारोऽपि वर्तते। सर्वप्रथमं केशानां वपनसमये यं विधिं स्वीक्रियते तमेव विधिं चूड़ाकर्मसंस्कार इति कथ्यते। अस्मिन् संस्कारे मन्त्रोच्चारणद्वारा सोम–अग्न्यादिदेवतानां प्रार्थना क्रियते यत् शिशवे ता अनुकूलाः भवन्तु, कष्टदायिनः हिंसकाश्च न भवन्तु। आश्वलायनगृह्यसूत्रे चूड़ाकर्मविषये कथितमस्ति –

**येन भूयश्च रात्र्यां ज्योक् च पश्यनि सूर्यम्।**
**तेन त आयुषे वपामि सुश्लोक्या स्वस्तये।।** [४]

येन साधनेन त्वं वारम्वारं रात्रेः ज्योतिं चन्द्रमसं तथा दिनज्योतिं सूर्यं पश्यसि तथैवाहमायुषे कल्याणार्थञ्च केशवपनरूपं कर्म अहं करोमि। आचार्यसुश्रतानुसारेण चरकाचार्यानुसारेण च केशकर्तनं शोभादायकमायुष्करं तथा उत्साहवर्धकमस्ति।

---

[१] **पा०गृ० १.१९.१**

[२] **आश्व०गृ०**

[३] **पा०गृ० २.१.१**

[४] **आ०गृ०सू० १.१७.१२**

९. **कर्णवेधः** – चूड़ाकर्मवदेव तृतीयवर्षे पञ्चमे वर्षे वा कर्णवेधसंस्कारस्य विधानमस्ति। अवस्थानुरूपं शिशोः शरीरे यस्य विकारभावस्योदयो भवति तस्य नाशाय अपि एषः संस्कार उपयोगी वर्तते। अन्त्रवृद्धिनिवारणाय शंखोपरि कर्णस्य अधो भागे वेधनं कर्तव्यम्[1]। व्यक्तित्वविकासे कर्णवेधसंस्कार उपयोगी भवति।

**१०. उपनयनम् – अष्टवर्षं ब्राह्मणमुपनयेद् गर्भाष्टमे वा॥**[2] उपनयनसंस्कारः बालकस्य द्वितीयजन्मनः सूचक इति स्वीक्रियते, यतो हि अनेन संस्कारेण उपनीतः बालकः द्विजातिरूपेण परिगणितो भवति। उपनयनस्यार्थोऽस्ति बालकमाचार्यस्य समीपे नयनम्। गृह्यसूत्रानुसारेण ब्राह्मणबालकमष्टमे वर्षे, क्षत्रियबालकमेकादशे वर्षे तथा वैश्यबालकं द्वादशे वर्षे उपनयनसंस्कारः कर्तव्यः। यद्येतत् संस्कारः न विधीयते तर्हि द्विजत्वप्राप्तिर्न भवति, तस्य च व्रात्यसंज्ञा भवति। तस्मादेव ब्रह्मवर्चसः कामनायुक्तस्य ब्राह्मणबालकस्य निर्धारितसमय एव उपनयनं कर्तव्यम्। गायत्रीमन्त्रस्य उपदेशः बालकस्य द्वितीयजन्मनः द्योतकोऽस्ति। आचार्यः ब्राह्मणबालकं गायत्रीछन्दसि, क्षत्रियं त्रिष्टुप्छन्दसि, वैश्यं जगतीछन्दसि सावित्रेः उपदेशं करोति स्म।

**११. वेदारम्भः** – उपनयनसंस्कारानन्तरमाचार्यः ब्रह्मचारिं स्वशाखायाः अङ्गसहितं स्वस्वरं वेदाध्ययनं कारयति स्म। अनेन संस्कारेणैव ब्राह्मणः श्रौतयज्ञानां सम्पादनाधिकारी भवति। वेदाध्ययनेन विना श्रौतयागादिकर्मणामधिकारी न भवति। वेदाध्ययनं ब्राह्मणस्य मुख्यं कर्म। भगवान् पतञ्जलिः कथयति –

**ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च**

---

[1] **सुश्रुतचिकित्सास्थानम् ९.२१**

[2] **पा०गृ० २.२.१**

**१२. केशान्तः** – यदा लोमानि शरीरे आगच्छन्ति तदा षोडशवर्षात् ब्रह्मचारी तस्य कर्तनारम्भं करोति स्म, एषः संस्कारः प्रथमवारं यदा लोमानि कर्तनं क्रियते तदा क्रियते स्म। तस्मिन् समये मुण्डनसंस्कारस्य विधीनां पालनं भवति स्म।

**१३. समावर्त्तनम् – वेदथ्ं समाप्य स्नायात्॥**[1] एषः संस्कारः साङ्गवेदाध्ययनानन्तरं ब्रह्मचर्याश्रमस्य समाप्तेरेवं गृहस्थाश्रमस्य प्रवेशस्य सूचको वर्तते। अनेन संस्कारेण ब्रह्मचारी स्नातको भूत्वा गृहस्थाश्रमे प्रवेशाय अधिकारी भवति। समावर्त्तनशब्दस्यार्थोऽस्ति वेदाध्ययनानन्तरं गुरुकुलात् गृहं प्रति प्रत्यावर्त्तनम्। तैत्तिरीयोपनिषदः शिक्षावल्यां कथितमस्ति यत्समावर्त्तनसंस्कारेण संस्कृतः व्यक्तिः स्नातक इति उपाधिं प्राप्नोतीति। आचार्यः तं माता, पिता, गुरुः, अतिथिः, देवता इत्यादीनां सेवायाः परिचर्यायाः तथा उपासनायाः मानवतोपयोगिनः उदात्तकर्त्तव्यानां परिपालनाय च उपदेशं करोति।

**१४. विवाहः**[2] – मातुः, पितुः तथा आचार्यस्य आज्ञां स्वीकृत्य बालकः सवर्णकन्यया साकं विवाहं कृत्वा गृहस्थाश्रमे प्रवेशं करोति स्म। विवाहोऽपि एको यज्ञः स्वीक्रियते स्म। विवाहं विना तस्य सामाजिकजीवने किमपि स्थानं न भवति स्म। यस्य यया सह विवाहसंस्कारो भवति तयोः शरीरन्तु भिन्नं सदपि आत्मद्वारा एकमेव इति स्वीक्रियते। अनेन संस्कारेण स्त्रीपुरुषयोः देहप्राणमनसां सम्बन्धः स्थापितो भवति। मनुस्मृतौ विवाहोऽष्टविधः कथितः – ब्राह्मः, दैवः, आर्षः, प्राजापत्यः, आसुरः, गान्धर्वः, राक्षसः पैशाचश्च। आरम्भतः चत्वारः विवाहाः प्रशस्ताः तथा अन्तिमचतुर्विवाहाः निन्दिताः कथिताः।

---

[1] **पा०गृ० २.६.१**

[2] **पा०गृ० १,१ तः ८ काण्डिकापर्यन्तम्**

**१५. अग्न्याधानम्** – विवाहसंस्कारानन्तरं गृहस्थाश्रमे प्रवेशे सति अग्निपरिग्रहसंस्कारस्य विधानमस्ति। गृह्याग्नेः प्रतिष्ठा द्वारा पञ्चमहायज्ञानामनुष्ठानं भवति। अष्टानुव्रतसंस्कारद्वारार्जितकर्मणामधिकारप्राप्त्यर्थमग्निपरिग्रह आवश्यकः। एष एव संस्कारः अग्न्याधानम्।

**१६. अन्त्येष्टिः – अथोदककर्म॥**[१] मृत्युः जीवनस्यानिवार्यमङ्गमस्ति। व्यक्तेः मरणोपरान्तमन्त्येष्टिसंस्कारः क्रियते। एषः मानवजीवनस्यान्तिमः संस्कारः। एषः संस्कारः मृतात्मनः शान्तये क्रियते। आचार्यजातुकर्ण्येन षोडशसंस्कारत्वेन अस्य संज्ञा कृता। यथा – **अन्त्यं चैतानि कर्माणि प्रोच्यन्ते षोडशैव तु** इति। अत्येष्टिसंस्कारद्वारैव व्यक्तिः स्वर्गं जयति। श्मशाने मृतकस्य शवदाहेन साकमन्त्येष्टिक्रिया वेदमन्त्रद्वारा सम्पन्नतां प्राप्नोति स्म। आत्मनः शान्तये यथाविधि श्राद्धकर्म क्रियते स्म।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे वैदिकसंस्कारस्य जनजीवने प्रभावः'** नाम सप्तमोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

[१] **पा०गृ० ३.१०.१**

# अथाष्टमोऽध्यायः

# वैश्विकदृष्ट्या यजुर्वेदे वैदिकसमाजस्य समीक्षणम्

वेदः विश्वबन्धुत्वस्य, विश्वकल्याणस्य, विश्वशान्तेश्च प्रथमोद्घोषको वर्तते। वेदादेव आर्यसंस्कृतेः विकासः जातः, यः विश्वसमाजे धर्मस्य, ज्ञानस्य विज्ञानस्य, आचारविचारस्य एवं सुखशान्तेश्च शिक्षां प्रदाय तस्याः आर्यसंस्कृतेः समुन्नतये मार्गमपि प्रशस्तीकरोति। वेदे सर्वविद्यानां सूत्राणि विद्यमानानि सन्ति[१], यजुर्वेदे समाजशास्त्रस्य सम्बद्धा सामाग्री प्राचुर्येण प्राप्यते, मया प्रयत्नः कृतः यत् समाजशास्त्रात् सम्बद्धानां यजुर्वेदे प्राप्तानां सामग्रीणां क्रमबद्धतया अनुसन्धानं मया क्रियत इति, समाजशास्त्रात् सम्बद्धेषु विषयेषु मया वर्णव्यवस्थायाः, जातेः, वर्णाश्रमव्यवस्थायाः, प्रत्येकमधिकारस्य, कर्तव्यानां प्रतिपादनस्य, विविधसंस्काराणां, परिवारस्य, समाजस्य च वर्णनं कृतम्।

समाजस्य रचना व्यक्तिद्वारा भवति, व्यक्तिसमुदायादेव समाजः निर्मीयते, विश्वसमाजस्य उन्नतये, प्रगतये, विकासाय, उत्कर्षाय च यजुर्वेदे पर्याप्तचिन्तनं वर्तते। यदि यजुर्वेदस्य निर्देशान् स्वीकृत्य कार्यं क्रियते तदा विश्वसमाजः निरन्तरमेव उन्नतिमेव करोति, सङ्गठनभावनायाः उदय एव विश्वसमाजस्य प्रथमा आवश्यकता वर्तते। यदि समाजे संगठनस्य शक्तिरस्ति तर्हि उन्नतिरपि निश्चप्रचमेव। अत एव श्रीरामचरितमानसे विभीषणेन निगदितम्–

---

[१] **सर्वज्ञानमयो हि सः (मनु० २.७)**

**सुमति कुमति सब के उर रहहीं। नाथ पुरान निगम अस कहहीं।।**
**जहाँ सुमति तहँ सम्पत नाना। जहाँ कुमति तहँ बिपति निधाना।।**[१]

भगवती श्रुतिरपि कथयति –

**स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।**
**यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त।।**[२] इति।

अस्माकं सर्वेषां सः परमात्मा भ्राता, जनकः, पोषकश्चास्ति। सः जगतः सर्वेषां स्थानानां ज्ञाता अस्ति, अमरतायाः अनुभवं ये कुर्वन्ति तादृशाः ज्ञानिनः प्रकाशमयानन्दस्थले स्वेच्छया विचरन्ति। समाजे मित्रभावः भवेत्, विचारशीलाः मनुष्याः परस्परं सहयोगं कुर्युरिति श्रुतिरपि वदति –

**सखायः संवः सम्यञ्चमिषꣳ स्तोमं चाग्नये।**
**वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते।।**[३]

सः व्यापकः ईश्वरः सर्वत्र ओतप्रोतोऽस्ति – **स ओतः प्रोतश्च विभूः प्रजासु।।**[४]

मातापितरौ येन प्रकारेण पुत्रं रक्षतः, तथैव अश्विनीकुमारः इन्द्रस्य रक्षां कृत्वा विश्वसमाजस्य सेवां करोति –

**पुत्रमिव पितरावश्विनोभेन्द्रावथुः काव्यैर्दꣳ सनाभिः।**
**यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक्।।**[५]

समाजे भेदभावना न भवेत्, भ्रातृभावः भवेत्, तदैव सौभाग्यस्योदयो भवति। तद्यथा–

---

[१] **श्रीरामचरितमानसम् ५.३९.३**

[२] **यजुर्वेदः ३२.१०**

[३] **शुक्लयजुर्वेदः १५.२९**

[४] **शुक्लयजुर्वेदः ३२.८**

[५] **शुक्लयजुर्वेदः १०.३४**

**अज्येष्ठासो अकनिष्ठास एते, सं भ्रातरो वावृधुः सौभगाय॥** [१] समाजे पारस्परिकः सहयोगः, समवेदनायाः भावः आवश्यकम्। समाजस्याभ्युदयार्थं सहृदयता, सामञ्जस्यमेवं पारस्परिकं प्रेम आवश्यम्। भगवती श्रुतिरपि कथयति –

**दृते दृꣳह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्।**
**मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे।**
**मित्रस्य चक्षुषा समीक्षामहे॥**[२] इति।

हे समर्थ ईश्वर! मां बलवन्त कुरु, सर्वे प्राणिनः मां मित्रस्य भावनया पश्यन्तु, सर्वान् मित्रभावनया अहं पश्येयम्, वयं सर्वे परस्परं मित्रस्य भावनया पश्येम। सामाजिकप्रगतौ नास्तिकता उदारता च बन्धनकारिण्यौ भवतः, यत्र आस्तिकतायाः वातावरणं भवति तत्र सर्वे सुखपूर्वकं जीवन्ति, जीवनं निरापदं भवति। विश्वसमाजस्य अभ्युदयाय धर्मभेदभावनादिबाधकतत्त्वानि त्यक्त्वा मानवमात्रे परिवारभावना कर्तव्या, तथा सदैव सत्यस्य मार्गे चलनीयम् **"ऋतस्य पथा प्रेत"**[३] इत्युक्तत्वात्। यजुर्वेदस्य चतुस्त्रिंशदध्याये उत्तमसङ्कल्पस्य कामना कृता अस्ति। तद्यथा–

**यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।**
**दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु॥**[४]

यन्मनः जागृदवस्थायां दूरं गच्छति, सुप्तावस्थायामपि पुरुषस्य मनः तथैव दूरं गच्छति, स एव निश्चयेन तेजस्विना इन्द्रियमाध्यमेन

---

[१] **ऋग्वेदः ५.६०.५**

[२] **शुक्लयजुर्वेदः ३६.१८**

[३] **शुक्लयजुर्वेदः ७.४५**

[४] **शुक्लयजुर्वेदः ३४.१**

दूरपर्यन्तप्रापणे ज्योतिरस्ति, तथा जीवात्मा एकमात्रं तादृशं दिव्यं साधनमस्ति तस्मात् मम मनः शुभसङ्कल्पयुक्तं भवतु। अस्मिन् ग्रामे सर्वे प्राणिनः पुष्टाः उपद्रवरहिताः भवन्तु इति प्रतिपादयति श्रुतिः –

**इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः।**
**यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्॥**[१]

देवतया पवित्रतायाः कामना कृता वर्तते –

**पुनन्तु मा देवजनाः पुनन्तु मनसा धियः।**
**पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा॥**[२]

विद्वज्जनाः मां पुनन्तु, मनस्सहितबुद्धिः मां पुनातु, सर्वाणि भूतानि मां पुनन्तु, संसारस्य सर्वपदार्थस्य ज्ञाता जातवेदः अग्निः मां पुनातु। वयं दानशीलपुरुषात्, अविश्वासघातपुरुषात्, विवेकविचारज्ञानवतः पुरुषाच्च सत्सङ्गं कुर्मः –

**पुनर्द्ददताघ्नता जानता सं गमेमहि**[३] इति।

वेदे सम्पूर्णसमाजस्य कल्याणकामना वर्तते। यथा –

**भद्रं नो अपि वातय मनो दक्षमुत क्रतुम्**[४] इति।

हे परमेश्वर! सम्पूर्णसमाजस्य कल्याणकारकं मनः, कल्याणकारकं बलमेवं कल्याणकारकं कर्म प्रददातु। तथा च भगवती श्रुतिः –

---

[१] **शुक्लयजुर्वेदः १६.४८**

[२] **शुक्लयजुर्वेदः १९.३९**

[३] **ऋग्वेदः ५.२१.१५**

[४] **ऋग्वेदः १०.२५.१**

**स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः अप नः शोशुचदघम्।**[१] इति।

हे पृथिवि! त्वमस्माकं कृते सुखकारिणी, कण्टकरहिता, वासयोग्या च भव। त्वं सर्वविधप्रकारेण विस्तृता भूत्वा, त्वमस्माकं कृते स्थानं सुखं च प्रदेहि, तथा अस्माकं पापमपि शीघ्रं दग्धं कुरु।

**वर्णजातिव्यवस्था** –

वैदिककाले वर्णव्यवस्था वृत्तिमूलिका आसीत्। अस्या एव विकृतिरूपा जातिप्रथा वर्तते। जातिप्रथायां जन्मना जातिः इति नियमेन यस्मिन् कुले वंशे वा जन्म तस्याधारेण जातिव्यवस्थायाः निर्धारणं भवति। निरुक्तकारः यास्कः वर्णशब्दस्य व्याख्याम् एवं प्रकारेण करोति – "वर्णो वृणोतेः"[2] इति, अर्थात् वरणेन अथवा निर्धारितकार्यकरणेन वर्ण इति संज्ञा भवति। यजुर्वेदस्य एकस्मिन् मन्त्रे चतुर्णामपि वर्णानामुल्लेखः प्राप्यते –

**ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।**
**ऊरू तदस्य यद्वैश्यः पद्भ्याꣳ शूद्रो अजायत॥**[३]

एते चत्वारः वर्णाः विराट्पुरुषस्य विविधाङ्गात् प्रादुर्भूतानि सन्ति, ब्रह्मणः विराट्पुरुषस्य मुखात् प्रादुर्भूतः, क्षत्रियः बाहुभ्यां प्रादुर्भूतः, ऊरूतः वैश्यः प्रादुर्भूतः, पद्भ्यां शूद्रः प्रादुर्भूतः। यजुर्वेदे चतुर्णामपि वर्णानां चर्चा बहुशः प्राप्यते, तत्र एतेषां वर्णानां कर्तव्यान्यपि उल्लिखितानि सन्ति। वर्णव्यवस्थादृष्ट्या चतुर्णां वर्णानां स्पष्टमुल्लेखस्तु

---

[१] **शुक्लयजुर्वेदः ३५.२१**

[२] **निरुक्तम् २.३**

[३] **शुक्लयजुर्वेदः ३१.११**

शतपथब्राह्मणे प्राप्यते। ब्राह्मणग्रन्थे निगदितं यत्, चत्वारः वर्णाः सन्ति ब्राह्मणक्षत्रियवैश्यशूद्रा इति –

**चत्वारो वै वर्णाः। ब्राह्मणो राजन्यो वैश्यः शूद्रः**[1] इति। भगवती श्रुतिः यजुर्वेदे कथयति अस्माकं देशे यज्ञाधिकारिणः वेदाध्ययनशीलाश्च ब्राह्मणाः सर्वत्र प्रादुर्भवन्तु, एवमेव धनुर्वेदविद्यासु निपुणाः, शत्रुशमनकुशलाः शूराः क्षत्रियाः अपि प्रादुर्भवन्तु। तदेवाह–

**आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायताम्**[2] इति। शतपथब्राह्मणे ब्राह्मणस्य गुणकर्मादिविषये पर्याप्तरूपेण प्रतिपादितम्। ब्राह्मणः तपस्विरूपेण जीवनयापनं करोतु, मन्त्राणां मननं चिन्तनं च कुर्यात्। सात्त्विकरूपेण जीवनयापनञ्च कृत्वा ऋषितुल्यो भवेत्। तस्मादेव ब्राह्मणस्यापि अपरपर्यायः ऋषिः वर्तते। तदाह – **"एते वै विप्रा यद् ऋषयः"**[3] इति शतपथश्रुतिः प्रतिपादयति। शतपथब्राह्मणस्य श्रुतिः यो ब्राह्मणः अश्वमेधयज्ञस्य विधिं न जानाति सोऽब्राह्मणः इति –

**यो ब्राह्मणः सन् अश्वमेधस्य तत्वं न वेद, सोऽब्राह्मणः**[4] यज्ञादिकार्यकरणं धर्मार्थं कूपनिर्माणादिकार्यसम्पादनञ्च ब्राह्मणस्य कर्तव्यम्। तदाह – **"इष्टापूर्त्तं वै ब्राह्मणस्य"**[5] इति। ब्राह्मणस्य कृते मनोरञ्जनस्य भोगविलासस्य च वस्तूनि निषिद्धानि सन्ति यतो हि अनेन वस्तुना तपोमयजीवनं प्रभावितं भवति। अत एव ब्राह्मणस्य कृते विधानमस्ति यत् सः न नृत्येत्, न च गायेत्। तदाह – "तस्माद् ब्राह्मणो

---

[1] **शतपथब्राह्मणम् ५.५.४.९**

[2] **शुक्लयजुर्वेदः २२.२२**

[3] **शतपथब्राह्मणम् १.४.२.७**

[4] **शतपथब्राह्मणम् १३.४.२.१७**

[5] **तैत्तिरीयब्राह्मणम् ३.९.१४.३**

नैव गायेत्, न नृत्येत्" इति। ब्राह्मणस्य कृते सुरापानं सर्वथा निषिद्धम्, यतो हि सुरा अपवित्रं वस्तु वर्तते। तदाह –

**आशिव इव वा एष भक्षो यत् सुरा ब्राह्मणस्य**[१] इति। जगद्गुरुणा वासुदेवेन श्रीमद्भगवद्गीतायां निगदितं यत् मया गुणकर्मदृष्ट्या चतुर्णां वर्णानां सृष्टिः कृता। तदाह– **चातुर्वण्यं मया सृष्टं गुणकर्मविभागशः**[२] इति। मनुस्मृतौ, श्रीमद्भगवद्गीतायां, पुराणेषु च ब्राह्मणस्य गुणकर्मणोः विषये विस्तृतरूपेण विवेचनं जातमस्ति। यजुर्वेदे क्षत्रियस्य कृते राजन्यः, क्षत्रः, क्षत्रियः इति शब्दाः प्रायुज्यन्त।[3] क्षत्रियेण यदा कदापि किमपि विशेषकार्यं करणीयमथवा योजना विधातव्या तदा सः ब्राह्मणेन परामर्शम् आकाङ्क्षत। तदाह – **तस्मात् क्षत्रियेण कर्म करिष्यमाणेन उपसर्तव्य एव ब्राह्मणः**[४] इति। अन्यापि श्रुतिः–

**यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरतः सह।**
**तं लोकं पुण्यं प्रज्ञेषं यत्र देवाः सहाग्निना॥**[५]

यस्मिन् ब्रह्मलोके ब्राह्मणः क्षत्रियश्च सहैव चरतः तिष्ठतः, एवमेव यत्र अग्निना सह अन्यान्यदेवा अपि विद्यमानाः सन्ति, अहं तमेव पुण्यलोकं ब्रह्मलोकं जानीयाम्, तमेव पुण्यलोकं प्राप्नुयाम्। यजुर्वेदे विश्वसमाजस्य कल्याणकामनाः वर्तन्ते। भगवती श्रुतिः निगदति –

---

[१] **शतपथब्राह्मणम् १२.८.१.५**
[२] **श्रीमद्भगवद्गीता ४.१३**
[३] **शुक्लयजुर्वेदः २२.२२**
[४] **शतपथब्राह्मणम् ४.१.४.६**
[५] **शुक्लयजुर्वेदः २०.२५**

**सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्।**
**सनिं मेधामयासिषꣳ स्वाहा॥**

**यां मेधां देवगणाः पितरश्चोपासते।**
**तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा॥**

**मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः।**
**मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा॥**

**इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम्।**
**मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा॥**[१]

अर्थात् यज्ञगृहस्य पालकात्, अचिन्त्यशक्तिसम्पन्नात्, परमेश्वरस्य प्रियशक्तिरूपादग्निदेवादहं धनैश्वर्यस्य धारणावत्याः मेधायाः च याचनां करोमि, भवान् एतां श्रेष्ठाहुतिं स्वीकरोतु। एवमेव वरुणदेवः मह्यं तत्त्वज्ञानबोधाय समर्थमेधां प्रददातु, अग्निः प्रजापतिश्च मह्यं मेधां प्रददातु, इन्द्रः वायुश्चापि मह्यं मेधां प्रददातु, हे दातः त्वमपि मह्यं मेधां प्रदेहि, भवन्तः सर्वे मम श्रेष्ठाहुतिं स्वीकुर्वन्तु। ब्राह्मणजातिः क्षत्रियजातिश्च मिलित्वा मम धनस्य उपयोगमश्नुताम्, देवगणाः मह्यं उत्तमां लक्ष्मीं प्रददतु, लक्ष्म्याः निमित्तं मया दत्ताम् आहुतिं भवन्तः स्वीकुर्वन्तु। शतपथब्राह्मणस्य कथनमस्ति यत् राष्ट्रस्य रक्षायाः उत्तरदायित्वं राजोपरि भवति। स एव राजा राष्ट्रस्य रक्षकः –

**राजानो वै राष्ट्रभृतः ते हि राष्ट्राणि बिभ्रति**[२]

ब्रह्मशक्तिः क्षत्रशक्तिश्चान्योन्याश्रिता वर्तते। योजनादिनां चिन्तनं ब्राह्मणस्य कार्यम्, एवं तस्याः योजनायाः कार्यान्वयनं तु क्षत्रियस्योत्तरदायित्वं भवति। ब्राह्मणं नेत्रमस्ति चेत्, क्षत्रियः हस्तम्।

---

[१] **शुक्लयजुर्वेदः ३२.१३-१६**

[२] **शतपथब्राह्मणम् ९.४.१.१**

मार्गदर्शनस्य कृते नेत्रस्यावश्यकता भवति, योजनायाः कार्यान्वयनस्य कृते हस्तस्यावश्यकता भवति। ब्राह्मणः ज्ञानं प्रददाति, क्षत्रियः विघ्नानां निवारणं करोति – **अभिगन्तैव ब्रह्म कर्ता क्षत्रियः**[१] इति। क्षत्रियस्योत्पत्तिः यजुर्वेदाज्जाता, अत एव क्षत्रियाणां गोत्रं यजुर्वेदोऽस्ति। तदाह –

**यजुर्वेदं क्षत्रियस्याहुर्योनिम्**[२] इति। नारायणपुरुषस्य स्तुतेरनन्तरं पुरुषमेधस्य पशूनां देवतानां च वर्णनं भवति। एते सर्वे पशवः यज्ञान्ते त्यक्ताः भवन्ति, अस्मिन् पुरुषमेधयज्ञे ब्रह्मणः कृते ब्राह्मणः, क्षत्रस्य कृते राजन्यः, मरुद्गणस्य कृते वैश्यः, तपसः कृते शूद्रः, तमसः कृते स्तेनः, नरकस्य कृते नष्टाग्निः पापस्य कृते नपुंसकः, आक्रयदेवतायाः कृते अयोगुः, कामस्य कृते व्यभिचारिणी, अतिक्रुष्टस्य कृते मागधः नियुक्तः। तदाह –

**ब्रह्मणे क्षत्राय राजन्यं मरुद्भ्यो वैश्यं तपसे शूद्रं तमसे। तस्करं नारकाय वीरहणं पाप्मने क्लीबमाक्रयाया अयोगूं कामाय।। पुँश्चलूमतिक्रुष्टाय मागधम्”**[३] इति।

यजुर्वेदे चतुर्णामपि वर्णानामुल्लेखः स्पष्टः एव वर्तते। वैश्यस्य कृते मरुत्सदृशः समाजाय शक्तिप्रदानमेवं समाजस्य पोषणस्य उत्तरदायित्वं प्राप्तं वर्तते। **“तुलायै वणिजम्”**[४] इत्युक्त्वा तुलाकार्यमेवं व्यापारः वैश्यस्य कर्तव्यमित्युक्तं वर्तते। यजुर्वेदे क्रयक्रीतपण्यमानशब्दानां प्रयोगः प्राप्यते[५]। सोमादिवस्तुनां क्रयविक्रयस्याप्युल्लेखो वर्तते – **“सोमं**

---

[१] **शतपथब्राह्मणम् ४.१.४.१**

[२] **तैत्तिरीयब्राह्मणम् ३.१२.९.२**

[३] **शुक्लयजुर्वेदः ३०.५**

[४] **शुक्लयजुर्वेदः ३०.१७**

[५] **शुक्लयजुर्वेदः ८.५५**

**ते क्रीणामि"**[१] इति। वैश्यः ग्रामप्रधानः, अथवा ग्रामणीः भवति स्म – **"वैश्यो वै ग्रामणीः"**[२] इति। वैश्यस्योत्पत्तिः ऋग्वेदात् जाता इति ज्ञायते – **"ऋग्भ्यो जातं वैश्यं वर्णमाहुः"**[३] इति।

यजुर्वेदे **"तपसे शूद्रम्"**[४] इत्युक्त्वा श्रमसाध्यकार्यं शूद्रस्य कर्तव्यं निगदितं वर्तते, गुणकर्मानुसारेण अशिक्षितवर्ग एव शूद्रत्वेन स्वीक्रियते, अत एव शूद्रस्य कृते शिल्पकार्यं श्रमसाध्यकार्यञ्च निर्दिष्टं वर्तते। रथकारः, शिल्पकारः, सारथिः शूद्रवर्गात् भवन्ति[५]।

**आश्रमव्यवस्था –**

**"आ श्राम्यन्ति अस्मिन् इति आश्रमः"** इति, अर्थात् एतादृशी जीवनपद्धतिः यत्र मानवैः कठिनपरिश्रमः कर्तव्यः भवति। चत्वारः आश्रमाः भवन्ति, ते च ब्रह्मचर्यगृहस्थवानप्रस्थसन्यासाः। आश्रमशब्दस्य प्रयोगः श्वेताश्वतरोपनिषदि प्राप्यते[6]। आश्रमव्यवस्था एव प्रतिपादयति यन्मानवजीवनस्य लक्ष्यं किमिति। तस्य सोपानानि कानि, केन प्रकारेण मनुष्येण स्वाभिलषितचरमोपायस्य मोक्षस्य प्राप्तये क्रमशः प्रयत्नः कर्तव्यः। मानवजीवनस्य लक्ष्यं वर्तते सांसारिकाभ्युदयेन सह मोक्षप्राप्तिरपि[7]।

अस्य कृते च ब्रह्मचर्याश्रमः आधारशिला वर्तते, गृहस्थाश्रमस्तु व्यावहारिकः पक्षः, गृहस्थाश्रम एव जीवनस्य भौतिकोन्नतेः सूचको

---

[१] **तैत्ति०सं० १.२.७.१**

[२] **शत०प०ब्रा० ५.३.१.६**

[३] **तैत्ति०ब्रा० ३.१२.१.२**

[४] **शुक्लयजुर्वेदः ३०.५**

[५] **शत०प०ब्रा० ३.४.१.७**

[६] **अत्याश्रमिभ्यः परमं पवित्रम्, श्वेताश्वतरोपनिषद् ६.२१**

[७] **योग० २.१८**

भवति। वानप्रस्थस्तु मोक्षप्राप्तेः प्राथमिकी प्रक्रिया वर्तते एवं सन्यासः ब्रह्मतादात्म्यमेवं मुक्तिप्राप्तये सफलोऽध्यवसायोऽस्ति। आश्रमव्यवस्था भारतीयजीवनदर्शनस्य व्यावहारिकः पक्षः वर्तते। तदाह –

**ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा।**
**एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः॥**[१]

**आश्रमदृष्ट्या समीक्षणम्** –

ब्रह्मचारिणः काले समाजनिर्मातार इति तेषां जीवनं तपोमयमासीत्। तपसा त्यागेन च विद्यार्थिनां चित्तवृत्तयोऽध्ययनमुख्य इति भारतीयानां शाश्वतधारणा। सांसारिकबन्धनानि भोगविलासमनोरञ्जनादीनि नाम विद्याप्राप्तिमार्गे बाधा भवतीति। ब्रह्मचर्यशब्दः तपोमयजीवनस्य प्रतीकोऽस्ति। ब्रह्मचर्यं तु वेदविद्याप्राप्तये जीवनविधिः कथ्यते। तपसा ब्रह्मविद्यां विज्ञातस्य सिद्धान्तः ब्रह्मचारिणां कृते ग्रन्थमात्रे मन्त्रे वा ब्राह्मणे वा अधीत्य न स्नानमिच्छन्ति। परन्तु केवलं कल्पशास्त्राध्ययनस्यानुष्ठानायोग्यत्वात् कल्पशास्त्रमधीत्य स्नायादिति **कामं तु याज्ञिकस्य** इति सूत्रेण सिद्ध्यति।

यतः अथातोऽधिकारः, अथातो धर्मजिज्ञासा, अथातो ब्रह्मजिज्ञासा इत्यादिभिरधिकारसूत्रैरधीतसकलवेदस्याग्निहोत्रादिकर्म–स्वधिकार इत्याचार्येण वर्णितम्। **न कल्पमात्रे**[२] अध्वर्यवादियज्ञविद्याकुशलस्य स्नानमिच्छन्ति। मन्त्रब्राह्मणात्मकवेदमधीत्य अवबुध्य च स्नायादिति। साङ्गवेदमधीत्य अवबुध्य च स्नायादिति। ग्रन्थमात्रमधीत्य यज्ञविद्यां चाधीत्य स्नायादिति। यतो वेदाध्ययनं वेदविहितकर्मानुष्ठानज्ञानप्रयोजनमिति। अनेन विधिना ब्रह्मचारी गुरुकुले

---

[१] **मनु०स्मृ० ६.८७**

[२] **पा०गृ०सू० २.६.७**

वसन् गुरुजनानामाचरणं दृष्ट्वैव क्षमाशील: जितेन्द्रिय: विनयी परिश्रमशील: कर्तव्यपरायण: कर्मण्यात्मजयी स्फूर्तिशील: क्रोधरहित ईर्ष्यारहितश्च भवेत्। एतादृशा विद्यार्थिन: स्वस्य वैदिकसमाजनिर्माणे कुशला: भवेयु: एतदेव वैदिकशिक्षाया: उद्देश्यम्।

एतेषां गुणानां ज्ञानादेव स्वस्थसमाजनिर्माणकुशलताविषये अध्ययनप्रयोजनमिति। गृहस्थस्तु रात्रेरन्तिमप्रहरे ब्राह्ममुहूर्त्ते वा जागरञ्चकार। तत: प्रभृति तस्य दिनस्यारम्भोऽजायत। ब्राह्ममुहूर्त्ते सपवित्रविचारै: मानसम्मानसमृद्धिमकरोत्। तत्पश्चात् शौचदन्तधावनस्नानसन्ध्यातर्पणपञ्चमहायज्ञाग्निहोत्राणि कृतवान्। गृहस्थोऽपि निष्कामकर्मयोगेन परं पदं तथैव प्राप्नोति यथा संन्यासी। इदं सर्वश्रेष्ठत्वं सिद्धमस्ति। केवलं तादृशानां गृहस्थानां येषां गृहस्थधर्म: संन्यासादपि कठिनतर:।

गृहमेधिजनानां दु:खात् दु:खतरां स्थितिं दृष्ट्वा बहवो जना: ब्रह्मचर्याश्रमं न त्यक्तुकामा: आसन्। परञ्च नैष्ठिकब्रह्मचर्यव्रतं परिपालयन्ति स्म। गृहस्था भूत्वाऽपि यथाशीघ्रं गृहस्थाश्रमं परित्यज्य पुरा असंख्या विद्वांस: वानप्रस्था एवाऽभवन्।

गृहस्थजीवने वैदिकमहर्षिभि: कोऽपि दोषोऽभावो वा दृष्ट:। यतस्ते यज्ञदर्शनस्यारण्यकभागे नगरे ग्रामे वा न पठन्ति स्म। गृहस्था अपि तेषां स्वाध्यायान्निवारिता:। केवलमरण्यवासिन: एवारण्यकाध्ययनस्याधिकारिणोऽभिमता:।

अनेन प्रकरणेन स्पष्टं प्रतिभाति यत् कस्यापि विशिष्टविषयस्यावगमाय वनवासस्य महत्त्वं स्वीकृतम्। ग्राम्यजीवनस्य हीनत्वं च प्रतिपादितम्। वानप्रस्थजीवने एव राष्ट्रहिताय देशहिताय समाजहिताय च उन्नतेर्भावना जागर्ति तथा वानप्रस्थी समाजाय देशाय राष्ट्राय च लाभाय समर्पितोऽभवत्। स्वर्गादपि गरीयान् मोक्षसाधक:

प्रमाणीकृतः वानप्रस्थः। वैदिककाले स्वर्गकामा जना यज्ञैः स्वाभीप्सितं स्वर्गादिकं फलं लभन्ते स्म।

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानप्रभृतयो गुणाः योगस्था इति यमेनाहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाणां सिद्धिर्भवति। नियमस्तु शौचसन्तोषतपस्स्वाध्यायैश्वर्यप्रणिधानानि सन्ति। आसनं तु साधकस्य स्थिरसंस्थितिः सा सुखप्रदा भवति। धारणया चित्तस्य स्थिरता भवति। प्रत्याहारेणेन्द्रियाणि विषयेभ्यो विनिवर्तन्ते। तानि तदा चित्तरूपमनुसरन्ति। एते संन्यासिनो धर्माः धारणाध्यानसमाधयः संयम एव। धारणया चित्तमेकस्मिन् स्थाने नाभिचक्रे हृदयकमलने मूर्ध्नि नासिकाग्रभागे सूर्ये चन्द्रे वा बध्यते। तस्मिनन्नेव प्रदेशे चित्तस्य स्थिरीकरणं ध्यानम्। ध्यानस्य सा सर्वोच्चावस्था समाधिर्यस्यां जातायां साधकाय ध्येयं विहाय न किञ्चिदपि वर्तत इति।

**ब्रह्मचर्याश्रमः -**

यजुर्वेदे आश्रमव्यवस्थायाः विषये पर्याप्तसामग्री प्राप्यते। कृष्णयजुर्वेदीयतैत्तिरीयसंहितायाः कथनमस्ति यन्जन्मकालादेव ब्राह्मणे ऋणत्रयं भवति, तानि च - ऋषि-ऋणम्, देव-ऋणम्, पितृ-ऋणम् इति। ब्रह्मचर्यपालनेन वेदाध्ययनेन च ऋषि-ऋणात्, यज्ञसम्पादनेन देव-ऋणात्, सन्तानोत्पादनेन च पितृ-ऋणात् मुक्तिर्भवति-

**जायमानो ह वै ब्राह्मणः त्रिभिर्ऋणवान् जायते, ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा ऋनृणः**[१] इति।

तथा च **यदापिपेष मातरं पुत्रः प्रमुदितो धयन्**[२] इति। यज्ञोपवीतधारणानन्तरमेव प्रत्येकं द्विजस्य कर्तव्यं भवति यत् ऋणत्रयात्

[१] **तैत्ति०सं० ६.३.१०.५**

[२] **शुक्लयजुर्वेदः १९.११**

मुक्तो भवतु, ब्रह्मचर्याश्रमस्य प्रारम्भः उपनयनसंस्कारात् भवति, उपनयनस्यार्थो भवति। उप-समीपे अर्थात् गुरोः समीपे नयनं प्रापणम्। बालकस्य ज्ञानप्राप्तये आचार्यसमीपे नयनमेव उपनयनं भवति। आचार्यः बालकस्य परीक्षणार्थं दिनत्रयपर्यन्तं स्वस्य पार्श्वे स्थापयति, तदनन्तरमेव तस्य उपनयनमथवा यज्ञोपवीतसंस्कारं करोति। यज्ञोपवीतधारणेन सह बालकाय गायत्रीमन्त्रस्य दीक्षा अपि प्रदीयते, आचार्यद्वारा दिनत्रयपर्यन्तं परीक्षणमेवं गायत्रीमन्त्रस्य दीक्षाप्रदानं बालकस्य नूतनजन्म जातम् इत्युच्यते[१]।

**गृहस्थाश्रमः -**

यजुर्वेदस्य कथनमस्ति यदस्माकं गृहस्थाश्रमः एकाङ्गी न भवेत्, उभयोरपि समन्वयः सदैव भवेत्, उभौ दीर्घायुवी भूत्वा समन्वितभावेन अमुमाश्रमं सुखमयं कुरुतः, एवञ्च शतायुर्जीविनौ भवेताम्।[2] गृहस्थाश्रमः महत्सौभाग्याय भवतु, अस्याश्रमस्य दम्पती संयमि एवं नियन्त्रितजीवनं च व्ययीकुरुतः। भगवती श्रुतिरपि कथयति -

**अग्ने शर्द्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु।**
**सं जास्पत्यꣳ सुयममाकृणुष्व शत्रूयतामभितिष्ठा महाꣳसि॥**[३]

अस्मिन् मन्त्रे अग्निदेवतायाः प्रार्थना कृता वर्तते यत् भवान् सपत्नीकं यजमानं जितेन्द्रियमेवं परस्परप्रीतियुक्तं कुरु। पत्नी गृहपत्नी, गृहस्वामिनी, गृहलक्ष्मीः शब्देनापि उल्लिखिता वर्तते[४]। वस्तुतः गृहमथवा गृहव्यवस्था स्त्र्योपरि निर्भरा वर्तते, अत एव तस्या नाम गृहमित्युच्यते[५]।

---

[१] **शo.ब्राo ११.५.४.१२**

[२] **शुक्लयजुर्वेदः २.२७**

[३] **शुक्लयजुर्वेदः ३३.१२**

[४] **ऋक्o १०.८५.२६**

[५] **जायेदस्तम्, ऋक्o १०.८५.२६**

केनापि संस्कृतविदुषा कथितं वर्तते – “न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते” इति।

**वानप्रस्थाश्रमः** –

सद्गृहस्थः मनुष्यः यदा समस्तसांसारिकसुखोपभोगद्वारा परितृप्तः सन् गृहस्थाश्रमस्य सर्वविधोत्तरदायित्वं स्वस्य युवपुत्रे विवाहितपुत्रे वा दत्वा स्वयमीश्वरप्राप्तये स्वस्य गृहिण्या सह अरण्ये एकान्तवासं करोति। तदा तस्याः अवस्थायाः नाम वानप्रस्थ इत्युच्यते। अस्यामवस्थायां मनुष्यः सम्पूर्णसांसारिककामनातः विरतो भूत्वा जीवनस्य शेषभागं धर्मार्जने स्थापयति, यस्य पूर्णता तु संन्यासाश्रमे भवति।

**संन्यासाश्रमः** –

संन्यासाश्रमः धर्मजीवनस्यान्तिमा अवस्था वर्तते। विद्वद्भिः काम्यकर्मणां त्याग एव सन्यासः निगदितः। श्रीमद्भगवद्गीतायां जगद्गुरुणा श्रीकृष्णेन प्रतिपादितं यत् – **काम्यानां कर्मणां न्यासं सन्यासं कवयो विदुः**[1] इति। आचार्यसायणेनापि प्रतिपादितं यत् – **यतिभ्यः कर्मसु उपरतेभ्यः, अयजद्भ्यः**[2] इति।

मुनिः सदैव मनने, चिन्तने, स्वाध्याये, धारणायां ध्यानादिषु च लीनो भवति स्म। तस्मादेव “मननात् मुनिः” इति कथितं वर्तते। इन्द्रं मुनेः साखित्वेन प्रतिपादनं कृतं वर्तते – **इन्द्रो मुनीनां सखा**[3] इति। यजुर्वेदीये बृहदारण्यकोपनिषदि कथितमस्ति यन्मुनिः पुत्रैषणां, वित्तैषणां, लोकैषणाञ्च त्यक्त्वा सत्कारासत्कारमपि त्यक्त्वा ब्रह्मचिन्तने मग्नः सन्

---

[1] **श्रीमद्भगवद्गीता १८.२**

[2] **ऋक्० ८.३.९ सायणभाष्यम्**

[3] **ऋक्० ८.१७.१४**

तिष्ठति [1] । मुक्तेरथवा मोक्षस्य कृते निरन्तरप्रयत्नशीलः पुरुष एव मुमुक्षुरिति[2] कथ्यते। जीवनस्य लक्ष्यं मोक्षः, अपवर्गः, निर्वाणं चास्ति।

**संस्कारः** -

वैदिकवाङ्मयमाध्यमेन वैदिकयुगस्य सामाजिकी पारिवारिकी राजनैतिकार्थिकसामाजिकस्थितीनां जीवनानां सर्वेऽपि विषयाः प्रकाशमायान्ति। अस्मदीया पूर्वजाः वैदिकवाङ्मयसाहाय्येन भानुशशिव्योमभूमिप्रभृतितत्त्वानां ज्ञानं सम्यक्तया निदधति स्म। ते समुद्रनदीपर्वतवनादीनामुपादेयतां सर्वाङ्गीणतया विदन्ति स्म। ते दीर्घदीर्घतरां समुद्रयात्रां कुर्वन्ति स्म। तेषां पार्श्वे महान्ति महान्ति जलयानान्यासन्।

तैस्ते सामुद्रिकं व्यापारं चक्रुः। वैदिके वाङ्मये वर्णितानां संस्कारप्रभावानां शिक्षया व्यवस्थानां व्यवस्थया सम्पूर्णसमाजाः एकतायाः सूत्रे बद्धा आसन्। तदा मातृपितृगुरुजनप्रभृतयो श्रेष्ठजनाः सम्मानभाजनाः आसन्। बृद्धानामातुराणां दीनानां च रक्षणाय सम्यग् व्यवस्था तदा आसीत्। यथा-

**इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः।**
**यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्॥**[3]
**देवानां भद्रा सुमतिर्ऋजूयतां देवानाꣳ रातिरभि नो निवर्तताम्।**
**देवानाꣳ सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे॥**[4]

वैदिकसंस्काराणां प्रभावेनव्यक्तित्वनिर्माणमुच्चोच्चतरमासीत्। यथा कुरुपाञ्चालकाश्वकोशलविदेहमगध-अङ्गवङ्गकलिङ्गकाम्पिल-

[1] **बृ०उ० ३.५.१**

[2] **ऋक्० १.१४०.४**

[3] **शु०य०सं० १६.४८**

[4] **शु०य० २५.१५**

प्रभृतिजनपदा एकसूत्रे बद्धा आसन्। तदानीन्तनानां भौगोलिकसामाजिकसांस्कृतिकार्थिकदशां दृष्ट्वा ज्ञायते यत् साक्षादस्माकं देशः भारतं स्वर्ग आसीत्। यथा–

**गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारत भूमिभागे।**
**स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषः सुरत्वात्।।**[1]

धन्या अस्माकं संस्कारा इति।।

**"अथातो गृहस्थालीपाकानां कर्म"**[2], **"संस्करणं सम्यक्करणं वा संस्कारः"** इति। समुपसर्गात् कृञो घञि निष्पन्नोऽयं संस्कारशब्दः स्वलक्षणमभिधत्ते। हारीतेन कथितम् – "द्विविधो हि संस्कारो ब्राह्मो दैवश्च। गर्भाधानादिस्मार्त्तो ब्राह्मः, पाकयज्ञहविर्यज्ञसौम्याश्च दैवः। ब्राह्मेण संस्कारेण ऋषीणां सलोकतां समानतां सायुज्यतां वा गच्छति" इति।

अद्य संस्कारपरम्परायाः सम्यक् निर्वाहस्याभावे राष्ट्रे सुशिक्षितवर्गस्य संख्या न्यूनतमा भवन्ती अस्ति। विज्ञानयुगेऽस्मिन् विधिवत् कर्मसम्पादनेन साकं तस्य महत्त्वस्य बोधनमपि नितान्तमावश्यकम्। द्विजानां संस्कारः समये एव कर्तव्यः, यजुर्वेदे सर्वेषां संस्काराणां मन्त्राः विनियोगपूर्वकं प्रदत्ताः सन्ति। उदाहरणार्थं समिधाधानस्य मन्त्रः द्रष्टुं शक्यते –

**समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम्। आस्मिन्हव्या जुहोतन।।**[3]

---

[1] **विष्णुपुराणस्य प्रसिद्धोऽयं श्लोकः २.३.२४**

[2] **पारस्करगृह्यसूत्रम् १.१**

[3] **शुक्लयजुर्वेदः ३.१**

धर्मशास्त्रे जन्मतः पूर्वं गर्भाधानकालादेव जीवं सुसंस्कृतं कर्तुमुपक्रमः प्रारभ्यते। मुख्यतः षोडश अवश्यकरणीयसंस्काराः ब्राह्मसंस्कारत्वेन अथवा स्मार्त्तसंस्कारत्वेन व्यासस्मृतौ परिगणिताः वर्तन्ते। तानि च –

**गर्भाधानं पुंसवनं सीमन्तो जातकर्म च।**
**नामक्रिया निष्क्रमणोऽन्नाशनं वपनक्रिया॥**
**कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधिः।**
**केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहः॥**
**त्रेताग्निसंग्रहश्चेति संस्काराः षोडश स्मृताः।**[१]

इत्यस्मिन् संसारे द्विजातीनां वेदपठनमेव धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थानां प्राप्तेः कारणमिति वेदशास्त्रसिद्धान्तः। भगवती श्रुतिर्वदति–

**योऽधीतेऽनुब्रूते यजति जुहोति यजते याजयते तस्य ब्रह्म सवीर्यं भवति भद्रमश्नुते॥** इति।

**स्थाणुरयं भारहारः किलाभूत् अधीत्य वेदं न विजानाति योऽर्थम्।**
**योऽर्थज्ञ इत सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा॥**[२]

ये विद्वांसः नानाविधकष्टानि सहमाना अपि वेदानां मन्त्रान् कण्ठस्थीकृतवन्तः ते विद्वांसोऽवश्यमेवास्माकं श्रद्धाभाजनानि वर्तन्ते। मन्त्राणां कण्ठस्थीकरणमेव पर्याप्तं नास्ति। अर्थज्ञा एव सकलं भद्रमश्नुवन्ति। यास्काचार्येण कथितमस्ति यत् वेदज्ञोऽर्थज्ञ स एव सकलं भद्रमश्नुते।

---

[१] **व्यासस्मृतिः १.१३-१५**

[२] **यास्कनिरुक्तम् १.१८**

अस्मिन् संसारे मुक्तिहेतुकानि कार्याणि कुर्वन् शतं वर्षाणि जीवितुमिच्छां कुर्यात्। तदेवं कर्म कुर्वतो पुरुषस्य मुक्तिरस्ति। निष्कामकर्मानुष्ठानेन शुद्धान्तःकरणस्यैव मुक्तिरिति। एवं प्रकारेण जिजीविषति नरे प्रत्यवायपरिहाराय शास्त्रविहितं कर्म कर्तव्यम्। मुक्त्यर्थं क्रियमाणं कर्म मनुष्येण न सम्बध्यते–

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः।**
**एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥**[१]

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'वैश्विकदृष्ट्या यजुर्वेदे वैदिकसमाजस्य समीक्षणम्'** नाम अष्टमोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

[१] **शु०य०का०सं० ४०.२**

# अथ नवमोऽध्यायः

# यजुर्वेदे पृथिवीतत्त्वविमर्शः

यजुर्वेदोक्तबहुषु मन्त्रेषु पृथिवीतत्त्वस्य वर्णनं विद्यते –

**पृथिव्यसि मातरिश्वनो घर्मोऽसि विश्वधा असि॥**[१]

ईश्वरेण कुलालेन वा वस्त्वरिक्ततत्तदन्तानि मण्डलान्यपि निर्मीयन्त इत्यत्र प्रमाणानुभवविरोधेनासिद्धे वस्तुजन्मस्थितिनिरोधवत् तदन्तमण्डलजन्मस्थितिविनाशकल्पनायां गौरवात्। न च दर्शनादर्शनबृहत्वलघुत्वप्रतीतिनिर्वहणाय तदावश्यकमिति वाच्यम्। दृष्टिशक्तिदूरत्वादितारतम्येन तदुपपत्तेः।

**ध्रुवमसि पृथिवीं दृꣳह ब्रह्मवनि त्वा क्षत्रवनि॥**[२]

प्रोक्षणशेषोदकत्वं पृथिव्या विशेषेण क्लेदनमसि। हे दर्भमुष्टिविशेष! त्वं विष्णोः स्तेपोऽसि। वेदिरूपा भूमिः बर्हिषा त्वामाच्छादयामि। देवोपकाराय सुखेनासितुं स्थानभूता स्थीयते। हविर्ग्रहणकाले परिधिभ्यो यद्धविः स्कन्नं तद्भुवपत्यादिभ्यः अग्नेर्भ्रातरो वषट्कारभयात् भूमिं प्राविशंस्तद्दुःखेनाग्निरपि पलास्योदके प्राविशत्ततो देवैरानीय स्वाधिकारे स्थाप्यमानः एवमवद्यदेतैरमरभ्रातृभिर्मापरिधत्तैषां च यज्ञभागः कल्प्यताम्। ततस्तेऽग्नेः भ्रातरः परिधयो जातास्तेषां च स्कन्नं

---

[१] शु०य० १.२

[२] शु०य० १.१७

हविर्भागः। पृथिव्यष्तेजोवाय्वाकाशेषु तेजः अग्निः शब्दस्पर्शरूपगुणैर्युक्तः प्राधान्यं भजते।

**भूर्भुवः स्वर्द्यौरिव भूम्ना पृथिवीव वरिम्णा।**
**तस्यास्ते पृथिवि देवयजनि पृष्ठेऽग्निमन्नादमन्नाद्यादायादधे॥**[1]

गायत्रीसाहित्यस्याग्नेः प्रजापतिमुखादुत्पन्नत्वात्। आधानमन्त्रेषु भू इति प्रथमा व्याहृतिः। एतास्तिस्रो व्याहृतयः पृथिव्यादिलोकत्रयसृष्टत्वात्। अत एव अभिस्थापयन् लोकत्रयमेव स्मरेत्। भूर्भुवःस्वः शब्दे ब्रह्मक्षत्रविशेषा आत्मप्रजापशवो वा सर्वे मत्सदृशा भूयासुः।

हे पृथिवि तस्यास्ते देवसदने सर्वाः ओषधयः जायन्ते। ततः मनुष्याः जीविताः सन्ति। पृथिवी ऊरूत्वेन सर्वेषामाश्रयभूता असि पृथिव्योपरि स्थिता वयं द्यौरिव महिमाशालिनो भूयास्म। यथा पृथिवी सर्वेषां प्राणिनामाश्रयभूता वर्तते तेन तस्याः श्रेष्ठत्वं वर्णितं वर्तते। सर्ववस्तुशोधकत्वरूपेण श्रेष्ठत्वेनोपेतम्।

**आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरञ्च प्रयन्त्स्वः॥**[2]

सार्पराज्ञीः कद्रूः पृथिव्यभिमानिनी देवता आहवनीयमुपतिष्ठते। अयमग्निः पृथिव्या उपरिवर्तमानानामाहवनीयगार्हपत्यदक्षिणाग्नीनां सर्वतः क्रमणं पादविक्षेपं कृतवान्। प्राच्यां दिशि पृथिवीमसदत् आहवनीयरूपेण स्थितः आदित्यरूपेण स्वर्गे संचरन्, सूर्यरूपेण द्युलोकमपि द्योतयति। द्यौः पिता पृथिवी माता असि।

**इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे दशस्या।**
**व्यस्कभ्ना रोदसी विष्णवे ते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा॥**[3]

---

[1] **शु०य० ३.५**

[2] **शु०य० ३.६**

[3] **शु०य० ५.१६**

मर्त्यलोकवासिनः सर्वे जीवाः सर्वाणि जीवनधारकतत्वानि च भूमेः प्रसादादायुः लभन्ते। तेषां जीवने स्वस्वभागानां वस्तुनां पूरयित्री महती भूमिः विद्यते। हिरण्यपशुधान्यादिवस्तुनामुत्पादयित्री भूमिः विद्यते। माता भूमिः स्वैः स्वैर्भागैरस्मदीयं गृहं बिभर्ति। यज्ञसाधनभूतानामाहुतिपदार्थानां दात्री सा माता भूमिः। अत एव भूमेः प्रार्थनायां बहवो मन्त्राः कथिताः सन्ति। भगवान् वराहः इमां पृथिवीं जलमुपरि स्थापितवान्। प्रजापतिः प्रजाभिः सह स्नेहं कुर्वन् अग्निवायुसूर्यलक्षणदृशा ज्योतींषि रचयामास। तेषां भक्षणाय यानि वस्तूनि वर्तन्ते तानि सर्वाणि तेन रचितानि सन्ति।

**मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतान्नो भरीमभिः॥**[१]

पृथिवीलोके ये रुद्रा वर्तन्ते अन्नमेव तेषां बाणाः सन्ति। तृप्तिकरं वस्तु येषामन्नमेव वर्तते तत्सर्वं रुद्रप्रसादात् एव पृथिव्यामुत्पन्नानि निखिलानि वस्तूनि आयुःप्रदानि सन्ति। सर्वस्यां पृथिव्यां सततं रुद्रा विचरन्ति प्राणिनां रक्षणाय। रुद्राः शत्रुभ्यो हिंसकेभ्यो द्वेषकर्तृभ्यः सततमस्मान् रक्षन्तु।

एकाकी एव विश्वकर्मा द्यावापृथिवी अजनयत्। धर्माधर्माभ्यां पृथिव्यां संगच्छते। इमां पृथिवीं पंचभूतरूपोपादानैः निर्मितवान्। साधनानामभावैरपि भूतान्यसृजत्। सः सर्वं पश्यति सर्वत्र गच्छति च। पृथिवीं रक्षितुं सततं प्रतते। पञ्चभूतैः सह द्यावापृथिव्यौ धारयन् उपरिष्टात् निवसन्ति।

**विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।**
**सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन्देव एकः॥**[१]

---

[१] शु०य० ८.३२

पृथिव्यामुत्पन्नाः मानवाः शुभकर्मणा दिवं गच्छन्ति। तत्र परमात्मज्योतिः सम्प्राप्य सुखिनो भवन्ति। स्वर्गं गच्छन्तः ते लौकिकं किञ्चिदपि पदार्थं नेच्छन्ति। परञ्च आदित्यलोकं प्राप्य परमसुखिनो भवन्ति। विद्वान्स एव विश्वस्य धारयितारं यज्ञं सम्पाद्य मोदन्ते। आहुतिदक्षिणान्नानि यज्ञस्य आधारभूतानि वैश्वानरमारुत–पूर्णाहुतिवसोर्धारावाजप्रसवीयानि सर्वाणि वस्तूनि सम्प्राप्य मोदन्ते। एतादृशं यज्ञं सम्पाद्य निखिला भूमिः हर्षत्वं लभते।

**पृथिव्या अहमुदन्तरिक्षमारुहमन्तरिक्षाद्दिवमारुहम्।**
**दिवो नाकस्य पृष्ठात् स्वर्ज्योतिरगामहम्।।**

अत्र भूखण्डेन सह समन्वयो वर्तते। नगरराज्यस्य सम्बन्धः पुरेण सह कृतोऽस्ति "पुरस्याधारभूमिः" आदर्शराज्यस्य भवितारः आसेतुहिमाचलमासीदित्यनुमातुं न शक्यते यतो हि राज्याभिषेकप्रसंगे सर्वासां नदीनां समुद्राणां जलमावश्यकं वर्तते। अत्रैव विचारो वर्तते यद्यत्र राज्ञामधिकारो न स्यात् तत्र स ततः जले काष्ठपल्लवादीनि च कथं लब्धुं शक्नोति। सन्दर्भेऽस्मिन् चतुद्रिक्षु समुद्रपर्यन्तायाः पृथिव्याः एकराड् इति व्यवस्थाया उदाहरणानि यजुर्वेदे वर्तन्ते।

**राजाधिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे। स मे कामान् कामकामाय मह्यं कामेश्वरो वै श्रवणो ददातु।। कुबेराय वैश्रवणाय महाराजाय नमः।**

**ॐ स्वस्ति साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायै स्यात्, सार्वभौमस्सार्वायुषान्तादापराद्धात् पृथिव्यै समुद्रपर्यन्ताया एकराडिति**

---

[१] **शु०य० १७.१९**

**तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुतस्यावसन्गृहे।। आवीक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति।।**[1]

सूचकानां स्थलानां संरक्षणार्थं कृता विविधाः प्रयोगाः सूत्रादिषु लभ्यन्ते। अस्मिन्सन्दर्भे पार्थिवो महाशान्तिभूमिकाम इत्यादिप्रकरणानि विचारणीयानि। लौकिकसूत्रे यदतिक्रम्य उक्तं तद् भूप्रदेशस्य प्रान्तस्य राष्ट्रस्य वा विहितं भौमास्य इति दूतिकर्म किमिदमिति पुष्टिकामव्रीहियवान्नकामः मणिहिरण्यकाम इत्यादिः। राष्ट्रराज्ययोर्भूव्यतिरिक्तः कश्चित् विचारः क्रियते। वस्तुतः राज्यराष्ट्रियतादिविषयाः अन्यान्यमीदृशाः सम्मिश्रिताः। तेषां सुस्पष्टं विश्लेषणं परमावश्यकं वर्तते। यद्यपि वेदोत्तराणां मनुभीष्मकौटिल्यादिप्राचीनानामाधुनिकानां स्वदेशीयानां पाश्चात्यानाञ्चाप्यस्मिन् विषये सुस्पष्टीकरणस्य प्रयत्नः प्रचलति। क्वचित् देशराज्ययोः कृते राष्ट्रस्य प्रयोगः वेदेष्वन्वेषणीयम्। राज्यार्थं राजकीयक्षेत्रार्थं वा राष्ट्रं राज्यं वा उभौ शब्दौ प्रयुज्येते। सोमस्य द्युलोकस्थायाः सोमलतायाः पर्णः आहरणस्य समग्रभूमौ पतितपर्णात् उद्भूतः। श्रूयते हि तृतीयस्याम् इतो दिवि सोम आसीत् तं गायत्र्याहरत्। तस्य पर्णमच्छिनत्। तत् पर्णः अभवत्। ततः पर्णस्य पर्णत्वमिति।

पृथिव्याः महत्त्वं दृश्यते यथा वित्तायनी मेऽशीति पुरस्तादुदीची न कुम्बयाऽन्ततः स्फ्येनोल्लिखति। हे उत्तरवेदित्वं बह्निरूपास्यान्नस्य प्रापिका असि ज्वालारूपतेजसः प्रापिका असि। वह्निवाचकं मां रक्ष व्याधिक्यासुः सम्यया वेदिपरिमाणं विधातुमुच्यते।

**वित्तायनी मेऽसि तिक्तायनी मेऽस्यवतान्मानाथितमवतान्मा व्यथितं विदेरग्निर्नभो नामाग्ने अङ्गिरो योऽस्यां पृथिव्यामस्यायुषा नाम्ने हि यत् तेऽनाधृष्टं नाम यज्ञियं तेन त्वाऽऽदधेऽग्ने अङ्गिरो यो**

---

[1] **ग्रहशान्तिप्रयोगस्य गणपतिपूजने।**

**द्वितीयस्यां तृतीयस्यां पृथिव्यामस्यायुषा नाम्ने हि यत्तेऽनाधृष्टं नाम॥**[1]

एषा वेदिः पृथिव्याः सर्वश्रेष्ठभागः सर्वपृथिवीरूपत्वात्। एषा भूमिः सर्वस्य जगतः कारणम्। पृथिव्यामुत्पन्नः सोमः सर्वेषां प्राणिनां सेचक इति। पृथिव्यामुत्पन्नानां यागादीनां शब्दानां ध्वनिभिः निखिलं ब्रह्माण्डमापूरितं वर्तते।

**इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः।**
**अयꣳ सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम॥**[2]

**को अस्य वेद भुवनस्य नाभिं को द्यावापृथिवी अन्तरिक्षम्।**
**कः सूर्यस्य वेद बृहतो जनित्रं को वेद चन्द्रमसं यतोजाः॥**[3]

भुवनस्य निखिलब्रह्माण्डस्य बन्धनस्थानं कारणं वा को जानाति। द्यावापृथिव्योः अन्तरिक्षस्य च जन्म को जानाति। कः सूर्यस्योत्पत्तिं जानाति। बृहतः महतः स्थावरजंगमजगतः उत्पत्तिं को जानाति। चन्द्रस्योत्पत्तिस्थानं को जानाति। न कोऽपि जानातीत्यर्थः।

**वेदाहमस्य भुवनस्य नाभिं वेद द्यावापृथिवी अन्तरिक्षम्।**
**वेद सूर्यस्य बृहतो जनित्रमथो वेद चन्द्रमसं यतोजाः॥**[4]

अस्य भुवनस्य कारणमहं जानामि। परब्रह्मैव जगत्कारणमिति जानामि। द्यावापृथिवीम् अन्तरिक्षं च ब्रह्मणः विकारभूतमिति निखिलं जगत् जानामि। बृहतः महतः सूर्यस्योत्पत्तिकारणं ब्रह्मैव वर्तत इति जानामि। परमात्मनः जातं चन्द्रमसमिति जानामि।

---

[1] **कृ०य०तै० १.२.१२**

[2] **शु०य० २३.६२**

[3] **शु०य० २३.५९**

[4] **शु०य० २३.६०**

**पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः।**
**पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम।।**[1]

पृथिव्याः परमन्तं कुत्र इति त्वां पृच्छामि। भुवनस्य कारणं नाभि त्वां पृच्छामि। अस्य जगत उत्पादकस्य कारणं त्वा पृच्छामि। वाण्याः परममुत्कृष्टं व्योम स्थानं किमस्ति इति त्वां पृच्छामि।

**तन्नो वातो मयो भुवातु भेषजं तन्माता पृथिवी तत्पिता द्यौः।**
**तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना श्रृणुतं धिष्ण्या युवम्।।**[2]

वायुः अस्मभ्यं भेषजवदुपकारको भूत्वा प्रवहतु। अस्माकं कृते सुखोत्पादको भवेत्। मातापृथिवी जगदुत्पादकर्त्री मातृवत् पालयित्री भूमिः अस्मभ्यं सुखदात्री भवतु पितृवत् पालकः द्युलोकः तस्याभिमानी देव अस्मभ्यं सुखप्रदो भवतु। यतः वयं यत्र कुत्रापि दुःखिनो न भवेम। सोमाभिषवकारिणः ग्रावणोऽप्यस्मभ्यं भेषजवत् सुखदातारो भवन्तु। अश्विनौ देवविशेषौ वातादिभ्यः रोगेभ्यः भेषजप्रार्थनां श्रुत्वा जनान् रोगहीनान् कुरुताम्। यौ यूनः जनान् गृहवत् धृत्वा पितरौ स्तः।

**अग्निश्च पृथिवी च सन्नते ते मे सन्नमतामदो वायुश्चान्तरिक्षं च सन्नते ते मे सन्नमतामद आदित्यश्च द्यौश्च सन्नते ते मे सन्नमतामद आपश्च वरुणश्च सन्नते ते मे सन्नतामदः। सप्त सꣳसदो अष्टमी भूतसाधनी। सकामाँ२।। अध्वनस्कुरु संज्ञानमस्तु मेऽमुना।।**[3]

अग्निः पृथिवीचास्माकं भोगाय नानासाधनसामग्री अदाताम्, तथा च ये पदार्थाः वस्तूनि वा अस्माकमुपयोगाय सन्ति तानि सर्वाणि वशवर्तीनि कुरुताम्। अग्निवाय्वन्तरिक्षादित्यद्युलोकाम्बुवरुणप्रभृतयो देवाः

---

[1] **शु०य० २३.६१**

[2] **शु०य० २५.१७**

[3] **शु०य० २६.१**

तथा भूतसाधनी पृथिवी अस्माकं मनोरथान् पूरयन्तु। येषु मार्गेषु मया गम्यते तत्रास्माकं कामप्राप्तिरस्तु। इष्टेन मम प्रीतिरस्तु इति यस्य तव सप्त संसदः पञ्च बुद्धीन्द्रियाणि मनो बुद्धिश्चेति सप्तायतनानि अष्टमी भूमिः अस्माकमात्मनः कामान् पूरयन्तु। वयं पृथिव्याः सकाशात् सर्वाणि वस्तूनि प्राप्नुयाम।

**प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्ने अह्नाम्।**
**व्यु प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम्।।**[१]

माता भूमिः बहुविधानि रत्नानि अन्नानि ओषधयश्च उत्पाद्य निखिलान् प्राणिनः पोषयति। अस्माकं निवासाय स्थानानि गृहाणि भूमिः ददाति। प्राप्तविविधवस्तुजातैः देवान् पूजयन् वयं सुखिनो भवेम। विविधाभिः सामग्रीभिः वस्तुभिरस्मान् सततमाच्छादयति। देवैः सह समानप्रीतिभाजः वयं स्वर्गीयं सुखं लभामहे।

**दिवः पृथिव्याः पर्योज उद्भृतं वनस्पतिभ्यः पर्याभृतꣳ सहः।**
**अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्रꣳ हविषा रथं यज।।**[२]

पृथिव्याः सकाशात् प्राप्ताः विविधाः रसाः अस्मभ्यं जीवनधारकाः। अमृतवदुपकारकं च भवन्ति। दिवः वनस्पतिभ्यः प्राप्तान् रसान् भेषजमिव उपकारयन्ति। इन्द्रो यथा वृत्राय वज्रं प्रजहार तदा वृत्रशरीरं काठिन्येन प्रतिहतं चतुर्धा जातम्। अपां जलानां ओजमानं तेजःसारभूतं अस्मान् बलिनं विदधति।

**परि द्यावापृथिवी सद्य इत्वा परि लोकान्परि दिशः परि स्वः।**
**ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्तदासीत्।।**[३]

---

[१] **शु०य० २९.२९**

[२] **शु०य० २९.५३**

[३] **शु०य० ३२.१२**

सर्वमेधयाजी ब्रह्म पृथिवीमपश्यत दृष्ट्वा च पृथिवीरूपमेवाभवत्। सः पूर्वं पृथिवीरूपमेव आसीत्। अज्ञाननिवृत्तिरेव ज्ञानम्। पृथिवीं ज्ञात्वा पूर्वादिशः निर्मितवान्। गुह्यतमरूपमादित्यमसृजत। यज्ञस्य विस्ताररूपत्वं कृतवान्। सृष्टेर्निर्माणार्थं मनसि संकल्पं चकार तदेव तत् असृजत। पृथिवी परमात्मनः उत्कृष्टकृतिः इति।

**त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन्॥**[१]

भगवान् विष्णुः त्रीणि त्रिसंख्याकानि पदानि स्थापितवान् तेन त्रयो लोकाः जायन्ते प्रथमा भूमिः सः समस्तस्य जगतः रक्षको वर्तते। नानाविधेभ्यः उपद्रवेभ्यः विपत्तिभ्यः झंझावातेभ्यश्च पृथिवीप्रभृतिलोकान् रक्षति। अस्मादेव पदत्रयात् धर्माणि पुण्यानि लोकानि वा धारयति।

**घृतवती भुवनानामभिश्रियोर्वी पृथिवी मधुदुघे सुपेशसा।**
**द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा॥**[२]

मातापृथिवी भुवनानां भूतजातानां प्राणिसमूहानां मधुरस्वादयुक्तरसदात्री भवति। प्राणिमात्रसमूहानां हेतवे आश्रयभूता वर्तते। भूमिः मधुदुघे मधुराणां रसानामुत्पादयित्री अस्ति। तस्योपरि नानाविधवनस्पतिवृक्षपर्वतनदीनां वर्तमानत्वात् सुन्दरी दृश्यते। अवलोकनानन्तरं यत्र तत्र सर्वत्र मनो रमते। पृथुला पृथिवी द्यौश्च वरुणस्य देवस्य धारणशक्त्या अजरामरवत् वर्तते। भूरिरेतसा बहुविधप्राणिनामुत्पादितशक्तितः पूर्णा वर्तते। अतः आराधनीया एषा भूमिः सततं सेवनीया च इति।

**स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः॥**[३]

---

[१] शु०य० ३४.४३

[२] शु०य० ३४.४५

[३] शु०य०का० ३६.१३

पृथिवी प्राणिभ्यः सुखरूपा वर्तते। किमपि दुःखं पृथिवी सर्वेभ्यः प्राणिभ्य न ददाति। साधुप्रतिष्ठानामभूमिः वर्तते अस्मभ्यं शरणं ददाति। सर्वतः पृथुः भूमिः मंगलं यच्छति। अस्माकं सर्वं पापं दहतु। पृथिव्याः सकाशात् वयं सर्वविधानि सुखानि लभामहे।

**सर्वस्य प्रतिशीवरी भूमिस्त्वोपस्थ आऽधित। स्योनाऽस्मै सुषदा भव यच्छास्मै शर्म सप्रथाः। उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने॥**[१]

भगवान् विष्णुः शत्रून् विनाशयतु। अस्माकं रक्षणार्थं आगच्छतु। सर्वेषामाश्रयदात्री भूमिः विष्णोः रक्षणे वर्तमानासि। सा अस्मभ्यं स्योना सुखरूपा भवतु। सततं शर्म शान्तिं प्रददातु। एषा विस्तृतरूपा वर्तते। विष्णोः उपस्थे उपरितनस्थाने रक्षणे च वर्तमाना विद्यते।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे पृथिवीतत्त्वविमर्शः'** नाम नवमोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

[१] **कृ०य०तै० १.४.४१**

# अथ दशमोऽध्यायः

# यजुर्वेदे जलतत्त्वविमर्शः

**आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु।**
**विश्वꣳहि रिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरा पूत एमि।**
**दीक्षातपसोस्तनूरसि तां त्वा शिवाꣳशग्मां परिदधे भद्रं वर्णं पुष्यन्॥**[1]

जगतः निर्माणकर्त्र्यः आप अस्मान् प्राणिनः पवित्रं कुर्वन्तु। जलदेवाः स्वसारभागेन अस्मान् शुन्धयन्तु। देव्यः आपः अस्माकं शरीराणां मलानि आत्मनः पापानि च प्रवहन्तु। जलेन शुद्धो भूत्वा विचरामि। स्नानेन पवित्रतां प्राप्ताः वयं जलान्निर्गच्छामि।

अस्माकं शरीराणां वस्त्राण्यपि शुद्धानि भूत्वा यागयोग्यं भवन्ति। दीक्षाभिमानिदेवतायास्तपोभिमानि- देवतायाश्च शरीरवत् वयं शुद्धा भवेम। दीक्षातपसोस्तनुं तद्देवताद्वयशरीरभूतां त्वा परिदधे। अत्र स्थापयामि।

**इदमापः प्रवहतावद्यं च मलं च यत्।**
**यच्चाभिदुद्रोहोहानृतं यच्च शेपे अभीरुणम्।**
**आपो मा तस्मादेनसः पवमानश्च मुञ्चतु॥**[2]

यत्पापमसत्यभाषणाभक्ष्यभक्षणजनितपापं विद्यते तत्सर्वमापः दूरीकुर्वन्तु। यत् अवदनीयमभिशापादि यत् शरीरलग्नं पापं विद्यते

---

[1] **शु०य० ४.२**

[2] **शु०य० ६.१७**

तत्सर्वमपनयत। यदनृतमसत्यं वचनं कथितं यच्चान्यैः सह द्रोहः कृतोऽस्ति तत्सर्वमपनयत। अनपराधिने जनाय यः शापः दत्तोऽस्ति तच्छापजनितपापमपनयत। पवित्रं कर्तुं समर्थः वायुः सर्वस्मात् पापान्मुञ्चतु। जलेषु भगवान् नारायणः निवसति। अतः तेषु शोधनशक्तिर्विद्यते। अतः सर्वस्मात् पापात् जलाभिमानिनी देवता पवित्रं करोतु।

**देवीराप एष वो गर्भस्तꣳ सुप्रीतꣳसुभृतं बिभृत।**
**देव सोमैष ते लोकस्तस्मिञ्छं च वक्ष्व परि च वक्ष्व॥**[१]

हे देव्यः आपः! युस्मासु या जीवनदात्री शक्तिः विद्यते तया अस्मान् सुखं ददतु। अस्मत्तः सर्वा आर्तीः परिवह। अस्माकं सर्वाभ्यः आर्तिभ्यः परिपालय। प्रसन्नतया अस्मान् तर्पयत। हे देव्यः आपः! अस्मभ्यं सर्वतः स्वजीवनदात्र्याः शक्त्याः निखिलान् जनान् परिपालयन्तु। शुन्धयन्तु च।

**अपो देवा मधुतीरगृभ्णन्नूर्जस्वती राजस्वश्चितानाः।**
**याभिर्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः॥**[२]

जलदेव्यः मधुरस्वादोपेताः विशिष्टान्नरसवत्यः नृपोत्पादिकाः देवतत्वात् परिदृष्टकारिण्यः। एतादृश्य आपः नृपान् देवान् जनाश्चाभिषेकं कुर्वन्ति। एभिर्जलैर्देवाः मित्रावरुणौ देवावभिषेकं चक्रुः। एभिः अद्रिमः देवाः इन्द्रमभिषिक्तवन्तः। तत इन्द्रः अरातिरहितः अभवत्। जनानां नानाव्याधयः जलानामभिषेकैः विनश्यन्ति। हे आपः! अस्मानपि शुन्धयन्तु।

---

[१] **शु०य० ८.२६**

[२] **शु०य० १०.१**

भगवती श्रुतिर्वदति–

**देवीरापः शुद्धा वोढ्वꣳ सुपरिविष्टा देवेषु सुपरिविष्टा वयं परिवेष्टारो भूयास्म॥**[1]

आपो देव्यः परमपवित्राः सन्ति। अभिषेकेन स्नानेन वा जनानुत्तमलोकेषु प्रापयन्ति, उत्तमलोकान् गमयन्ति च। उत्तमलोकान् प्राप्य मोदन्ते नानाविधसुखं लभन्ते जलदेवैः प्रसादात् शुद्धो भूत्वा वयं नानाविधतृप्तक्रियाभिस्तर्पिताः भवेम। देवैः सह तर्पिता भूत्वा शुद्धाः भूयास्म।

**वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद॥**[2]

हे जलदेव्यः यूयं वरुणस्य वोढयित्र्यः स्थ। वरुणदेवस्य नानाजलचरजीवानां देवानां वा आसन्दीवत् सुखकारिण्यः भवत। यूयं वरुणस्य देवस्य सत्यसदने निवासस्थानस्थः निवासयोग्यस्थाने भवत। लोकानां जीवनदानेन निवासस्थाने स्थतिष्ठत। अस्माकमपि आश्रयभूता भवत। जलानि सर्वेषां पशुपक्षिप्रभृतिजीवविशेषाणां कृते जीवनरक्षका स्थतिष्ठत। ततस्सत्यमेवोक्तम् – **जलमेव जीवनम्** वर्तते।

तस्मात्सर्वप्रयत्नेन रक्षणीया आपोदेव्यः। आपः विष्णोः ऊर्म्यः स्यन्दनशीलाः ओजस्वत्यः सर्वत्र वहनशीलाः जलभ्रमाः सूर्यस्य तेजः स्वरूपाः, सूर्यसदृशप्रकाशवत्यः मोदवत्यः मेघवत्यः कान्तवत्यः वेगवत्यः मधुरस्वादोपेताः बलदात्र्यः जगदुद्धर्तुं शीलाः प्राणिनः भरणपोषणाय समर्थवत्यः मरीचिरूपेण प्रकासवत्यः स्वजलाभिषेकप्रभावेण राज्ञः सम्राजं निर्मातुं समर्थवत्यः मधुमत्यः राक्षसादिभिः पराजयरहिताः सन्ति।

---

[1] **शु०य० ६.१३**

[2] **शु०य० ४.३६**

आपोदेव्यः जलदेव्यः देववदुपकारकर्त्र्यः सन्ति। जलेषु नारायणस्य निवासत्वात् जलानां महिमा बृहद् वर्तते तथा स्थावरजंगमजगतः आपः सुखं जनयन्ति। वाचां स्वामिने हविः जलैः निष्पद्यते। अत एव जलस्य महिमा शास्त्रेषु बहुशः गीयते।

**श्वात्राः पीता भवत यूयमापो अस्माकमन्तरुदरे सुशेवाः। ता अस्मभ्यमयक्ष्मा अनमीवा अनागसः स्वदन्तु देवीरमृता ऋतावृधः।।**[१]

आपः क्षीरवत् उपकारिण्यः सन्ति। सर्वाः ओषधयः जलमिश्रिताः सन्ति। पानेन जनानां शीघ्रं परिणामकारिण्यः सन्ति। पीते सति उदरमध्ये अजीर्णताया मुक्तिर्लभते। सुखरूपा अनपराधाः यक्ष्मासदृशस्य रोगस्यापि विनाशकारिण्यः सन्ति। अमृतवत् स्वास्थ्यस्य रक्षणसमर्थाः सन्ति।

वीररूपा आपः सन्ति, ताः पीत्वा शीघ्रमजीर्णाः रोगात् मुक्तिं लभन्ते। जलानि अस्माकमुपकारार्थं स्वादुत्वयुक्ता भवन्तु। प्रबलरोगराजरहिताः सामान्यरोगरहिताः अपराधहारिण्यः मरणनिवर्तिकाः मधुरस्वादोपेता अस्मभ्यं यक्ष्मरोगहारिण्यः सन्ति।

**देवीरापो अपान्नपाद्यो व उर्मिर्हविष्य इन्द्रियावान्मदिन्तमः।**
**तं देवेभ्यो देवत्रा दत्त शुक्रपेभ्यो येषां भाग स्थ स्वाहा।।**[२]

जलानामूर्मिं अपत्यरूपं आह्लादकारिनीं पीतः सन् इन्द्रियवीर्यवृद्धिकारी अत्यन्त हर्षकारी तर्पयितृतमः वर्तते। स कल्लोलः सोमं पानकर्तृभ्यः देवेभ्यः तर्पयिता वर्तते। इदं हविः तेभ्यः दत्तं स्वाहा।

---

[१] **शु०य० ४.१२**

[२] **शु०य० ६.२७**

**अपो देवीरुप सृज मधुमतीरयक्ष्माय प्रजाभ्यः।**
**तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः॥**[1]

देवनशीला आपः अस्मिन् स्तवनप्रदेशे प्रजाभ्यः मधुरस्वादोपेता रसवत्यः आरोग्यवत्यः भूत्वा प्रजानामारोग्याय यत्र तत्र प्रवहन्ति। जलानां प्रभावेन सिंचनेन वा ओषधयः सर्वत्र फलवत्यः भूत्वा प्राणिनः मोदन्ते। सर्वासु दिक्षु उद्गच्छन्तु। फलपुष्पवत्यः भवन्तु।

**आपो देवीः प्रतिगृभ्णीत भस्मैतत्स्योने कृणुध्वꣳ सुरभा उ लोके।**
**तस्मै नमन्तां जनयः सुपत्नीर्मातेव पुत्रं बिभृताप्स्वेनत्॥**[2]
**अप्स्वग्ने सधिष्ठव सौषधीरनुरुध्यसे। गर्भे सन् जायसे पुनः॥**

बहूनि समाजकल्याणाय स्वास्थ्यलाभाय वा तत्वानि जलेषु मिश्रितानि सन्ति। अपो देव्य इमानि तत्त्वानि सततं धृत्वा प्रवहन्ति, यथा माता स्वगर्भे पुत्रं बिभर्ति। अग्निमुत्पादयन्ति वृक्षोत्त्पत्यादिद्वारा सततं हितं साधयन्ति।

पुष्पधूपादिभिः जलस्याभिमानिनं देवं वरुणं पूजयत। जलेभ्यः विद्युदुत्पन्ना भूत्वा जनकल्याणं साधयते। वडवाग्निर्भूत्वा जीवधारिणां शरीराणि आरोग्यानि विदधति विपरिणमते। पुनः पुनः यज्ञेषु अग्निर्जायते मन्थनेन। भोजनपाचने निर्माणे चोपाकारं वहति। अग्नेः जलमध्य एव निवासस्थानं विद्यते। ओषधिपरिणमनं विपरिणमते। पुनः पुनः यज्ञेषु मन्थनेन अग्निर्जायते।

**अपामिदं न्यायनꣳ समुद्रस्य निवेशनम्।**

**अन्याँस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव॥**[3]

---

[1] शु०य० ११.३८

[2] शु०य० १२.३५

[3] शु०य० १७.७

धातूनां मूर्तिषु देवत्वप्राप्तये अग्निना तापयन्ति। ततः जलेनाभिषेचनं कृत्वा देवत्वशक्तिधारणयोग्या मूर्तयः विदधति। देवत्वप्राप्तये जलानां प्रभावः महत्वपूर्णः दृश्यते। यागद्वारा आपः प्राप्यन्ते।

एतेषां बाहुल्यात् समुद्रस्य निवेशनं वर्तते। जलानामभिषेकैः मूर्तयः शुध्यन्ति। देवत्वं च धारयन्ति पूजार्हा च भवन्ति। अभिषेकेन यजमानः विविधानि जीवनसम्बद्धितलाभकारिणि फलानि देवेभ्यः लभन्ते।

**अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः।**
**विश्वा यदजय स्पृधः॥**[१]

अकथनीयं जलस्य महत्वम्- जलानां फेनेनैव नमुचेः राक्षसस्य मस्तकमिन्द्रः उद्वर्तितवान्। अनेनैव वस्त्रेण सः विश्वान् समग्रान् अजयत्। मारणस्य महती शक्तिः जलानां फेनराशौ विद्यते।

**अद्भ्यः क्षीरं व्यपिबत् क्रूङ्ङाङ्गिरसो धिया ऋतेन सत्यमिन्द्रियम्॥**[२]

हंसः पक्षिविशेषः जलानां सारं संगृह्य पिबति जीवनं च धारयति। क्षीरनीरविवेकिनी बुद्धिः हंसस्य विद्यते। यतः हंसजीवनधारकं तत्त्वं जलेभ्यः निष्कास्य पिबति। यदि मनुष्याणां पार्श्वेऽपि एतादृशी बुद्धिर्जायेत तर्हि सोऽपि तद्गृहीत्वा पिबति जीवति च। इन्द्रस्य पयः वीर्यं अमृतं भवतु।

**द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव।**
**पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः॥**[३]

विष्ण्वादियागान् कृत्वा यजमाना अवभृथस्नानार्थं जलाशयं गच्छन्ति। द्रुममयात् पापात् जलानि यजमानान् पुनन्ति। जलेषु

---

[१] **शु०य० १९.७१**

[२] **शु०य० १९.७३**

[३] **शु०य० २०.२०**

स्नानानन्तरमार्द्रो भूत्वा मलात् पृथक् भवन्ति। आज्यं यथा वस्त्रेण क्षालितं भूत्वा कीटेभ्यः पृथक् भवति तद्वदापः मां शुन्धयन्तु इति अवभृथस्थाने यजमानाः प्रार्थयन्ति।

**यदापो अघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च। अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः। अव देवैर्देवकृतमेनोऽयक्ष्यव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि॥**[१]

आपः पापरहिताः सन्ति। नारायणनिवासत्वात् जलानि सततं शुद्धानि सन्ति। जलानामभिमानी देवविशेष वरुण! त्वमस्मान् नानाविधपापसमूहान्मोचय। हे देव! अवभृथ! नितरां पवित्रोऽसि अतः अस्मान् पापात् शोधय। वयं देवविषयकं यत् पापं कुर्मः तस्मान्मोचय। मनुष्यविषयकं यत् पापं कुर्मः तस्मात् मोचय। अवभृथस्थानेन सर्वथा यजमानाः पवित्राः भवन्ति।

**राजसूययज्ञे यजमानस्याभिषेकः -**

**स्थितं प्रञ्चमभिषिञ्चति पुरोहितोऽध्वर्युर्वा पुरस्तात् पालाशेन प्रथमं, पश्चादितरे, द्वितीयेन स्व, स्तृतीयेन मित्र्यो राजन्यो, वैश्यश्चतुर्थेन 'सोमस्य त्वा द्युम्नेनेति'॥**[२]

यजमानस्य पुरस्तादवस्थितः पुरोहितोऽध्वर्युर्वा प्राङ्मुखमूर्ध्वबाहुं तिष्ठन्तं यजमानं प्रथमं पालाशेन पात्रेणाभिषिञ्चेत्। इतरे भ्रात्रादयः पश्चादवस्थिता अभिषिञ्चेयुः। तत्र द्वितीयेनौदुम्बरपात्रेण स्वो राजभ्राता तृतीयेन न्यग्रोधपात्रेण मित्रत्वेनोपागतः क्षत्रियः चतुर्थेनाऽऽश्वत्थेन पात्रेण वैश्यः। राजानमभिषिञ्चन्ति। ततः स सम्राट् भवति।

---

[१] **शु०य० २०.१८**

[२] **का०श्रौ०सूत्र० १५.५.३०**

**अभिषेकार्थं जलानि** –

१. नैमित्तिकवर्षातः प्राप्तजलम्। २. पूर्वं राजसूयार्थं यस्य कस्यचित् तीर्थस्यानीतं जलम्। ३. अनैमित्तिकं तत्कालमानीतं जलम्। ४. सर्वप्रथमं सरस्वत्याः नद्याः औदुम्बरपात्रे आनीतं जलम्। ५. पशौ पुरुषे वा नद्यां प्रविशति सत्युत्पन्नं कल्लोलीयं जलम्। ६. स्यन्दमानायाः नद्यायाः धारायाः मध्यादानीतं जलम्। ७. नद्याः भ्रमरमध्यादानीतं जलम्। ८. समुद्रजलम्। ९.नद्याः तरङ्गजलम्। १०. नद्याः भ्रमरजलम्। ११. सूर्यकिरणैः सन्तप्तायाः नद्याः जलम्। १२. स्यन्दमानायाः नद्याः धाराजलं यत्र स्थितं वर्तते तत्रस्थं जलम्। १३. भूमावपतितं वर्षाजलम्।

सरोवरकूपमौषधीनां सिञ्चितमार्द्रभूमिस्थितवस्त्रगलितगर्भवेष्टितं, धेनोः प्रसवकालीननिर्गतरविकरतप्तजलम् इमानि सर्वाणि जलानि आनीय विभिन्नपात्रेषु स्थापयेत्। यथा काले यजमानं नृपमध्वर्युप्रभृतयः ऋत्विजः अन्ये च अभिषिञ्चेयुः। तत्र मन्त्रः –

**समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वोषधीरुतापः। सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः॥**[१]

यत्र आपः नृपस्य सम्राट् भवितुं योग्यतां स्थापयन्ति तत्र तथैव शत्रुविनाशनयोग्यतामपि स्थापयन्ति। हे अवभृथ! तव हृदयं समुद्रीयजलस्य मध्ये वर्तते। ओषधयः जलानि च तव हृदये प्रविशन्तु। आपः ओषधयश्च प्राणिभ्यः जीवनानि ददति। पीडिताः पुरुषा ओषधीनां साहाय्येन जीवनलाभं प्राप्नुवन्ति।

---

[१] **शु०य० २०.१९**

तद्वत् जलान्यपि ओषधिवदुपकारका: सन्ति। य: शत्रु: अस्मान् द्वेष्टि द्वेषं करोति वयं पुरुषा अपि यं शत्रुं प्रति द्वेषं कुर्म: तेभ्य: शत्रुभ्य: जलानि अस्मान् रक्षन्तु शोधयन्तु वा।

**आपो अद्यान्वचारिषꣳ रसेन समसृक्ष्महि।**
**पयस्वानग्न आगमं तं मा सꣳसृज वर्चसा प्रजया च धनेन च॥**[1]

इदानीमाप: अवभृथकर्मणा बहुविधपुण्यैरस्मान् संयोजितवत्य:। रसेन घृतादिना ब्रह्मवर्चस्तेजसा पुत्रादिना धनेन सुवर्णादिसम्पत्त्या च संसृज संयोजय। अहं पयस्वान् उदकवान् अस्मि। दुग्धादिरसेन पूरिता भवेम। धनमस्माकं पार्श्वे भवन्तु। धनप्रभावेण वयं सम्पन्ना: सुखिन:स्याम। नास्ति अस्माकं पार्श्वे कश्चित् क्लेश:। ब्रह्मतेजसा स्वर्णादिपुत्रपौत्रप्रजया धनेन च वयं संयुक्ता: भवेम।

**अवभृथेष्ट्यन्तेऽप्सु मग्नस्य पिङ्गलखलतिविक्लिधशुक्लस्य मूर्द्धनि जुहोति 'जुम्बकाय स्वाहेति'**[2]

उदकमध्ये बुडितस्य पिङ्गाक्षस्य खल्वाटस्य दन्तुरस्य अतिगौरस्य मूर्द्धनि जुहोति।

**उत्क्रान्ते यजमाने पापकृतोऽभ्यवयन्त्यचरित्वा व्रतानि॥**[3]

यजमाने जलमध्यादुत्तीर्णे सति ब्रह्महत्यादिकर्तारस्तच्छुध्यर्थं तत्र अश्वमेधावभृथसम्बन्धिनि जले स्नायु:। एतस्मिन् जले स्थानेन सर्वविधोपास्य मुक्तिर्भवति- **अश्वमेधपूताख्यास्ते॥**[4]

---

[1] **शु०य० २०.२२**

[2] **का०श्रौ०सू० २०.८.१६**

[3] **का०श्रौ०सू० २०.८.१७**

[4] **का०श्रौ०सू० २०.८.१८**

अवभृथजले ये मानवा स्नानीयुः ते 'अश्वमेधपूता' इति उपाधिना विभूषिता भवन्ति। तेषां कीर्तिः सर्वत्र प्रसरति।

**अश्वप्रोक्षणम्** –

**अश्वान्प्रोक्षत्यपोऽवनीयमानान्स्नातान्वाऽऽगतानप्स्वन्तरिति॥**[१]

वाजपेययागे स्नानार्थमप्सु प्रविष्टानथवा स्नात्वा समागतान् चतुरः अश्वानध्वर्युरद्भिः प्रोक्षेत्। तत्र मन्त्रः–

**अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तिष्वश्वा भवत वाजिनः। देवीरापो यो व उर्मिः प्रतूर्तिः ककुन्मान्वाजसास्तेनायं वाजꣳ सेत्॥**[२]

प्राणिनां जीवनेषु जलस्य महिमा अकथनीयो वर्तते। जलमेव जीवनमिति।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे '**यजुर्वेदे जलतत्त्वविमर्शः**' नाम दशमोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

[१] **का०श्रौ०सू० १४.३.३**

[२] **शु.य.सं. 9.6**

# अथैकादशोऽध्यायः

# यजुर्वेदे अग्नितत्त्वविमर्शः

**अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम्।
इदमहमनृतात्सत्यमुपैमि॥**[1]

अग्निः व्रतानां पालकोऽस्ति। अतः हे व्रतपते अग्ने त्वदनुज्ञया कर्मानुष्ठास्यामि। त्वत्प्रसादात् कर्मानुष्ठानस्य योग्यताप्राप्तये समर्थो भूयासम्। त्वत्कृपया मदीयं यज्ञानुष्ठानकर्म निर्विघ्नं फलप्राप्तिपर्यन्तं सिध्यतु। अहं यजमानः अस्मादनृतात् मनुष्यजन्मपरित्यज्य देवताशरीरं प्राप्नोमि। अनृतवदनादुद्गत्याहमिदं सत्यवदनमुपैमि। देवताशरीरप्राप्त्यर्थमग्नेः कृपा वर्तते। एतादृशः अग्निमहिमा वर्तते।

**अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्।
अपाꣳ रेताꣳसि जिन्वति॥**[2]

अयमग्निः द्युलोकाद् वृष्टिरूपेण पतन्तीनामपां रेतांसि साराणि व्रीहियवादिरूपेण परिणतानि पुष्णाति। आहुतिपरिणामेन वृष्टिं जनयति। यथा शिरः शरीरस्योपरि वर्तते तथाऽयमग्निरहनि स्वतेजसा आदित्ये प्रविष्टत्वादादित्यरूपेण द्युलोकस्योपरि वर्तते। गोपृष्ठोन्नतावयववाची तद्वदादित्यरूपेण सर्वोपरि स्थिततत्वात् ककुत्सदृशः। अयं पृथिव्याः पालकः दाहपाकप्रकाशैश्च द्युलोकस्थानामुपकारकत्वात्।

---

[1] **शु०य०सं० १.५**

[2] **शु०य० ३.१२**

**तनूपा अग्नेऽसि तन्वं मे पाह्यायुर्दा अग्नेऽस्यायुर्मे देहि वर्चोदा अग्नेऽसि वर्चो मे देहि। अग्ने यन्मे तन्वा ऊनं तन्म आपृण।।**[1]

अग्निः स्वभावतः अग्निहोतृणां शरीरस्य गोपायिता भवति। उदराग्नौ अन्ने जीर्णे सति शरीरपालनं भवति। हे अग्ने अस्माकं शरीराणां पालको भव। अपमृत्युपरिहारेण यावत् कालमुदराग्नेरौष्णमुपलभ्यते तावन्न म्रियत इति लोकप्रसिद्धिः। वैदिकानुष्ठानप्रयुक्तं तेजो वर्चः। यद्दर्शनादेव महानयं ब्राह्मणो विद्वांस्तपसाग्निरिव ज्वलतीति बुद्धिः नृणां भवति। एतादृक् वर्चोऽग्निनैव प्राप्यते। अतो वर्चो मे देहि इति प्रार्थना वर्तते। मदीयशरीरस्य यदङ्गमूनं वर्तते दृष्टिपाटवादिरहितं वर्तते तदङ्गं सर्वतो भावेन पूरय। मम खण्डितं शरीरं हे अग्ने त्वं पूरय। त्वत्कृपया जीवनपर्यन्तं स्वस्था वयं भवेम।

**सं त्वमग्ने सूर्यस्य वर्चसागथाः समृषीणाꣳ स्तुतेन। सं प्रियेण धाम्ना समहमायुषा सं वर्चसा सं प्रजया सꣳ रायस्पोषेण ग्मिषीय।।**[2]

अग्निः सूर्यस्य तेजसा ऋषीणां स्तोत्रेण बलवानस्ति देवत्वशक्त्या परिपूर्णोऽस्ति। आहुतिभिः स्तोत्रैश्च परिपूर्णोऽग्निः वर्तते। तस्य प्रसादात् यजमानाः दीर्घजीवनेन ब्रह्मतेजसा पुत्रपौत्रप्रभृतिभिः सन्ततिभिः धनधान्यबहुविधसम्पत्या च सम्पन्नाः भवन्ति।

**अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरुथ्यः। वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमꣳ रयिं दाः।।**[3]

अग्निः यजमानानां समीपवर्ती कल्याणकारिणी देवता वर्तते। शत्रुभ्यो रक्षकः शिवः शान्तरूपः गृहभवनधनधान्यपुत्रपौत्रप्रभृतीनां दाता

[1] **शु०य० ३.१७**

[2] **शु०य०सं० ३.१९**

[3] **शु०य० ३.२५**

वर्तते। प्राणिनां सकलजीवनिकायस्य वासयिता वर्तते। अग्निः दानशीलः वर्तते इति सर्वत्र तस्य कीर्तिः प्रसृता विद्यते। प्रसन्नमनाः अग्निः यजमानाय यज्ञस्थले फलदानार्थं गच्छति। हिरण्यधनधान्यकीर्तिप्रभृतीः प्रशंसनीयाः सम्पत्तीः ददाति। येन केन विधिनाऽग्निः यजमानान् सुखिनः करोति। अतो वयमग्निं स्तुमः।

**अग्ने त्वꣳ सुजागृहि वयꣳ सुमन्दिषीमहि।**
**रक्षाणो अप्रयुच्छन्प्रबुधे नः पुनस्कृधि॥**[१]

राक्षसेभ्यः रक्षार्थं सुखपूर्वकं शयनार्थं च यजमाना अग्निं प्रार्थयन्ति– यथा हे अग्ने! त्वमस्माकं राक्षसेभ्यः रक्षार्थं सुखेन निद्रां त्यज यथा यजमाना सुखेन शयनं कुर्युः। त्वं सुमन्दिषीमहि यथा वयं निर्विघ्नं शयनं कुर्याम। त्वं जागरितो भूत्वा अस्मान् रक्ष। प्रमादं त्यक्त्वा अस्मान् रक्ष। यथा रक्षाकर्मणि मा कश्चित् प्रमादो भूयात्। सततं यजमानान् वा प्रबोधय एतादृशं प्रयत्नं विधेहि। यथा स्वकर्मणि वयमपि जागरिताः भवेम।

**पुनर्मनः पुनरायुर्म आगन्पुनः प्राणः पुनरात्मा म आगन्पुनश्चक्षुः पुनः श्रोत्रं म आगन्। वैश्वानरो अदब्धस्तनूपा अग्निर्नः पातु दुरितादवद्यात्॥**[२]

अग्नेः प्रसादात् यजमानाः निद्रां त्यक्त्वा सुखेन जागरिता भूत्वा कथयन्ति यत् अस्माकं मनः आत्मा प्राणः शरीरेषु आगताः सन्ति। नेत्रेषु दृष्टिशक्तिः, श्रोत्रेषु श्रवणशक्तिः आत्मसु आत्मबलं दीर्घजीवनशक्तिश्च समागच्छति। सर्वेष्विन्द्रियेषु समागतेषु अयमग्निः निन्दितात् पापादस्मान् पालयतु। अग्निः स्वभावतः सर्वपुरुषोपकारकोऽस्ति। देवानां मध्ये सामर्थ्यशाली अग्निर्वर्तते। केऽपि

---

[१] **शु०य०सं० ४.१४**

[२] **शु०य०सं० ३.१५**

राक्षसाः अग्निं तिरस्कर्तुं समर्था न हि सन्ति। सोऽग्निः अस्मान् सर्वतः परिपातु।

**त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि।
त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः॥**[1]

अग्निरहोभिर्निर्मितभूतैर्मथ्यमानो यज्ञस्थलेषु जायते। अग्निः उत्पद्यमानः स्वप्रकाशेन सर्वान् देदीपयति प्रकाशयति वा। अद्भ्यः विद्युद्रूपेण जायते। पाषाणानां घर्षणेन जायते। वनाग्निरूपेण वनेषु जायते अरणिमन्थनाद्वा जायते। ओषधिभ्यः वंशादिभ्यः घर्षणेन जायते। अग्निहोत्रिणां गृहेऽपि हवनार्थं जायते। अग्निः सर्वस्मात् दुरितात् पालयति। अतः अग्निर्नृपतिः वर्तते। पवित्राणां मध्ये पवित्र शुचिः वर्तते। एतादृशोऽग्निः सर्वपूज्य इति।

**पुरीष्योऽसि विश्वभरा अथर्वा त्वा प्रथमो निरमन्थदग्ने।
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत। मूर्ध्नो विश्वस्य बाधतः॥**[2]

अग्निः प्राणिनां शरीरेषु पञ्चतत्त्वानां मध्ये मुख्यरूपाग्निर्भूत्वा निवसति। अतः पुरीष्यः वर्तते। निखिलस्य जगतः भरणत्वात् पोषणत्वाच्च विश्वम्भरा अग्निः वर्तते। अथर्वा ऋषिः सर्वप्रथमः त्वा निर्मथ्योत्पादितवान् । अतः सर्वपूज्योऽग्निः।

**अग्ने बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान् तमसो ज्योतिषागात्।
अग्निर्भानुना रुशता स्वङ्ग आ जातो विश्वा सद्मान्यप्राः॥**[3]

अयमग्निः सूर्यरूपेण महान् तेजस्वी भूत्वा प्राप्तकालानां सम्मुखे जगतामुपरि देदीप्यमान आकाशमण्डले विद्यमानोऽस्ति।

---

[1] **शु०य०सं० ११.२७**

[2] **शु०य०सं० ११.३२**

[3] **शु०य०स० १२.१३**

रात्रिलक्षणादन्धकारान्निर्गत्य ज्योतिषादहर्लक्षणे सः आकाशमध्येऽऽगतः। एतादृशोऽग्निः उत्पन्नमात्र एव सर्वान् लोकान् स्थानानि वा स्वतेजसा प्रकाशितवान्। आगत्य स्वप्रकाशेन तमः विनाशयन् स्वप्रकाशमानशरीरेणोदयं प्राप्तः। रूपेण अग्निः प्रकाशमानः विद्यते। स्वतेजसा निखिलं जगत् प्रकाशयति सूर्यरूपत्वात् तस्य स्तुतिर्विद्यते।

**अग्ने यत्ते शुक्रं यच्चन्द्रं यत्पूतं यच्च यज्ञियम्। तद्देवेभ्यो भरामसि॥**[1]

अग्नेः शरीरं शुद्धं देदीप्यमानमाह्लादकरं पवित्रं तथा यज्ञार्हं विद्यते। सः इन्द्रादिदेवेभ्य आहुतिभिः पूरयामास। हवनैः तर्पयामास। अग्निहोत्रादिभिः तर्पयामास।

**ऋतावानं महिषं विश्वदर्शतमग्निꣳ सुम्नाय दधिरे पुरो जनाः। श्रुत्कर्णꣳ सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा॥**[2]

पूर्वकाले ऋषयः ऋत्विजः यजमाना वा पौर्णमास्यामामावास्यां वा विविधेषु कालेषु वेदवाणीनां प्रार्थनया सुखप्राप्तये यज्ञायाग्निं आहवनीयादिषु वेदिषु स्थापितवन्तः। अग्नेः स्वरूपं सत्यवत् विद्यते। मध्ये श्रेष्ठतमं देवमनुष्यपशुपक्षिभिः दर्शनीयं यद् विज्ञाप्यते तत्सत्यमेव कर्णाभ्यां श्रुत्वा सम्पादयति इति श्रुतकर्णाग्निर्विद्यते। प्रसिद्धकीर्तिवन्तं देवानां हितसाधकमग्निं सर्वे जानन्ति।

**मयि गृह्णाम्यग्रे अग्निꣳ रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय॥ मामु देवताः सचन्ताम्॥**[3]

---

[1] **शु०य०सं० १२.१०४**

[2] **शु०य०सं० १२.१११**

[3] **शु०य०सं० १३.१**

यजमानाः सर्वप्रथमं प्रभूतधनप्राप्तये विद्याधनधान्यसम्पत्तिस्वस्थपुत्रपौत्रप्रभृति- सन्ततिलाभाय पूर्णात्मबलप्राप्तये कीर्तिलाभाय चाग्निं स्थापयन्ति। त्रैलोक्येषु या इन्द्रादिदेवताः वर्तन्ते ते सर्वे यज्ञभूमावागच्छन्तु आहुतिप्राप्तये। वयं तान् प्रार्थयामः।

**यो अग्निरग्नेरध्यजायत शोकात्पृथिव्या उत वा दिवस्परि।**
**येन प्रजा विश्वकर्मा जजान तमग्ने हेडः परि ते वृणक्तु॥**[१]

अग्निः प्राणिनां हितकारित्वात् प्रजापतिः विद्यत इति विदुषां मतम्। एतादृशमग्निं सर्वप्रथमं विश्वकर्मा प्रजापतिरुत्पादितवान्। प्रजापतेः सन्तापात् अग्निरजायत। पृथिव्याः सन्तापात् अजायत। जगन्निर्माणं मया न कृतमेतादृशः सन्तापः प्रजापतेः पार्श्वे आसीत्। अतः सः सर्वप्रथमं विश्वोत्पत्तिहेतवेऽग्निमुत्पादयामास। तव विषयकं क्रोधं प्रजापतिः त्यजतु। त्वमपि प्रसन्नो भूत्वा देवहितं साधय। द्युलोकस्योपरि सूर्यरूपेण त्वां स्थापयामास यथा त्वं जगतः दर्शको भवतु। प्रजाः विश्वकर्मा जजान। अग्निदेवः ते क्रोधः प्रजापतिः परिवृणक्तु।

**इमꣳ साहस्रꣳ शतधारमुत्सं व्यच्यमानꣳ सरिरस्य मध्ये। घृतं दुहानामदितिं जनायाग्ने मा हिꣳसीः परमे व्योमन्॥ गवयमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद। गवयं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु॥**[२]

अग्निः गोरूपपशूनामाकाशे वर्तमानः सन् सततं रक्षति। एतदर्थं यजमानाः प्रार्थयन्ति। गावः पशवः दुग्धेन घृतेन च जगतः पूरयन्ति। यजमानैः रक्षिता गावः अदीनाः सन्ति। ताः त्वया रक्षणीयाः। त्वां गवयमारण्यकं पशुं दिशामि। तमारण्यकं पशुं कामयमानः क्रोधं हिंसां वा परित्यज। यथा गावः दुग्धघृतदानेन सहस्राहाः सन्ति शतधारः बहुधाराभिः

[१] **शु०य०सं० १३.४५**

[२] **शु०य०सं० १३.४९**

दुग्धं दत्वा जनान् तर्पयन्ति। दुग्धोत्पादने गावः कूपमिव सन्ति। आकाशस्य मध्ये वर्तमानः त्वं गवयं पशुं हिन्सीः। सुखेन निवसतु। ते कष्टं दुःखशोकं वा गवयं पशुं गृह्णाातु यैः सहास्माकं द्वेषो विद्यते। त एव शोकं गृह्णान्तु यथा वयं सुखिनो भवेम गावश्च सुरक्षिताः सन्तु।

**अग्ने जातान् प्रणुदा नः सपत्नान् प्रत्यजातान्नुद जातवेदः।**
**अधि नो ब्रूहि सुमना अहेडँस्तव स्याम शँर्मस्त्रिवरूथ उद्भौ॥**[1]

अग्निः यजमानानां सपत्नान् विनाशयति। उत्पन्नाननुत्पन्नान्नपि शत्रून् विनाशयति। के यजमानानां शत्रवः सन्ति इति जातवेदगुणत्वादग्निः सर्वं जानाति। आहुतिभिः सुमना भूत्वा यजमानानां सम्मुखे अधिब्रवीति। क्रोधं परित्यज्य सुमना भूत्वा हिताय अधिब्रवीति येन जनाः स्वे गृहे सुखेन निवसन्तु। द्विपाद् चतुष्पाद्धनधान्यादिभिः समृद्धं गृहं भवतु। यजमानानां गृहाणि त्रिवरुथानि भवेयुः। एतदर्थमग्निं स्तौति।

**सहसा जातान्प्रणुदा नः सपत्नान्प्रत्यजातान् जातवेदो नुदस्व।**
**अधि नो ब्रूहि सुमनस्यमानो वयꣳस्याम प्रणुदा नः सपत्नान्॥**[2]

बलेन सहोत्पन्नान् शत्रून् अग्निः विनाशने समर्थः। जातानुत्पन्नान् शत्रूनजातान् अनुत्पन्नान् सर्वान् शत्रून् विनाशने अग्निः समर्थः। शुभचित्तः सन् प्रसन्नमनाः वा यजमानेभ्योऽधिकान् आशीर्वादान् ददाति यथा तेषां कल्याणं भवेत्। अग्नेः प्रसादात् जनाः अन्नेन धनेन प्रजया पशुभिश्च सम्पन्ना भवन्ति। भूयो भूयो यजमानानां सपत्नान् विनाशयति यथा लोकः सपत्नरहितः सुखेन निवसति।

**भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः। भद्रा उत प्रशस्तयः॥**[1]

---

[1] **शु०य०सं० १५.१**

[2] **शु०य०सं० १५.२**

ये यजमानाः अग्निमाह्वयन्ति पूजयन्ति यजन्ति। वाते कल्याणवन्तः सुखिनः धनधान्यसम्पन्नाः पुत्रपौत्रादिभिः मोदमाना भवन्ति। अग्निना प्रदत्तः आशीर्वादः मंगलप्रदः भवति। तस्य प्रसादात् यज्ञोऽपि मंगलप्रदः भवति। जनानां कीर्तिः यशःप्रभृतयः सुखदायिन्यो भवन्ति।

**भद्रा उत प्रशस्तयो भद्रं मनः कृणुष्व वृत्रतूर्ये। येना समत्सु सासहः॥**[२]

जनैः स्तुतोऽग्निः संग्रामेषु शत्रूनभिभवति विनाशयति। तस्य कीर्तयः यत्र तत्र सर्वत्र प्रसरन्ति। मनसा प्रसन्नः पापनाशाय विविधानि मंगलानि अग्निः करोति। प्रसादात् जनाः शत्रुरहिताः मोदन्ते। सुखेन जीवनं यापयन्ति च।

**अग्निं तं मन्ये यो वसुरन्तं यं यन्ति धेनवः। अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिनः इषꣳ स्तोतृभ्य आभर॥**[३]

अग्निः स्वकीयतापपाकप्रकाशैः सततमुपकुर्वन् धनानि ददाति। धनत्वात् स वसुर्वर्तते। धेनवः अग्नये दुग्धानि ददति। दोहकाले जनानां गृहे आगच्छन्ति च। शीघ्रगामिनः अश्वाः अग्निमुद्दिश्य यजमानगृहमायान्ति। यमुपास्य जनाः गामश्वञ्च लभन्ते। अग्निः स्तुतिकारिभ्यो यजमानेभ्यो शास्वतीः सम्पत्तीः ददाति। अन्नं धनं च यजमानेभ्यो वर्षति।

**सो अग्निर्यो वसुर्गृणे सं यमायन्ति धेनवः। समर्वन्तो रघुद्रुवः सꣳ सुजातासः सूरय इषꣳ स्तोतृभ्य आभर॥**[४]

---

[१] शु०य०सं० १५.३८

[२] शु०य०सं० १५.३९

[३] शु०य०सं० १५.४१

[४] शु०य०सं० १५.४२

अग्निः एव वसुः तापपाकप्रकाशरूपधनवानस्ति। एतादृशमग्निं जनाः विविधरूपेण स्तुवन्ति। तं दुग्धदानेन गावः तर्पयन्ति। शीघ्रगमनशीला अश्वाश्च यजमानगृहं समागच्छन्ति। कल्याणजन्मानः उत्तमकुलोद्भवाः वा विद्वांसः अग्निं विविधैः स्तोत्रवाक्यैः स्तुवन्ति। ततः स उदारमनाः अग्निः स्तुतिं कर्तृभ्यः इषमन्नं धनं रसं वा सर्वतो भावेन पूरयति।

**अग्निꣳहोतारं मन्ये दास्वन्तं वसुꣳसूनुꣳसहसो जातवेदसं विप्रं न जातवेदसम्। य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा। घृतस्य विभ्राष्टिमनुवष्टि शोचिसा जुह्वानस्य सर्पिषः॥**[१]

यजमानानां कथनमस्ति यत् वयमग्निं देवानां मध्ये सर्वोत्तमं देवं तयाऽन्येषां देवानामाह्वातारं मन्ये जानीमहे। तं तापपाकप्रकाशरूपधनवन्तं मन्ये, सर्वोत्तमं दानदातारं मन्ये बलस्य पुत्रस्य च दातारं मन्ये। यतः सः अरणिमन्थनात् जातः। अत एव सः बलस्य पुत्र इति। उत्पन्नकान्नैवस्वकर्तव्यज्ञातारं तं मन्ये, ब्राह्मण इव तमुपकारकर्तारं मन्ये। यः देवोऽग्निः स्वज्वालया अध्वरं पवित्रं सर्वतो भावेन कृत्वा देवान् प्रति प्रापयति। ततः देवानामाशिषः गृहीत्वा यजमानेभ्यः ददाति। घृतस्य धारां देवान् प्रति गमयति। ततः देवानामाहूयमानानां घृतस्याहुतीः ददाति। अतः तमेवाग्निमहं होतारं मन्ये।

**अग्ने प्रेहि प्रथमो देवयतां चक्षुर्देवानामुत मर्त्यानाम्।**
**इयक्षमाणा भृगुभिः सजोषाः स्वर्यन्तु यजमानाः स्वस्ति॥**[२]

अग्निः सर्वप्रथमः देवान्यष्टुमिच्छतां यजमानानां सम्मुखे गच्छति। यतः सः देवानामिन्द्रादीनामुत मनुष्याणां मार्गप्रदर्शकोऽस्ति। देवेभ्यः आहुतीः प्रापयति, मनुष्येभ्यो यज्ञस्य मार्गं प्रशस्तं विदधाति। यज्ञं

---

[१] **शु०य०सं० १५.४७**

[२] **शु०य०सं० १७.६९**

कर्तुमिच्छन्तो यजमानाः सरलतया मार्गेण द्युलोकं गच्छन्ति। भृगुवंशोत्पन्नैः ब्राह्मणैः सह प्रीतिं कुर्वन् यजमानान् द्युलोकं गमयति।

**अग्ने सहस्राक्ष शतमूर्धञ्छतं ते प्राणाः सहस्रं व्यानाः। त्वꣳ साहस्रस्य राय ईशिषे तस्मै ते विधेम वाजाय स्वाहा॥**[१]

अग्नेः सहस्रसंख्याकानि नेत्राणि सन्ति। यथा सर्वान् यजमानान् अनायासेन पश्यति। शतसंख्याकानि अनेकानि वा तस्य शिरांसि सन्ति। यथा अनेकेषां यजमानानां हितानि तत्त्वकालं करोति। यतः सोऽग्निः शतमूर्धा वर्तते। सहस्रसंख्याकाः प्राणाः व्यानाश्च सन्ति। येन सः दीर्घजीवी वर्तते। एतादृशाय धनिकाय अग्नये आहुतीः यजमाना ददति। स्वाहा सुहुतमस्ति। बहुरूपत्वादत्र अग्नेः स्तुतिः वर्तते।

**सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त ऋषयः सप्त धाम प्रियाणि। सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्त्वा घृतेन स्वाहा॥**[२]

अग्नेः सप्तसंख्याकाः समिधः इन्धनानि सन्ति। काली कराली च मनोजवा च विलोहिता चापि सधूम्रवर्णा स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्तसंख्याकाः अग्नेः जिह्वाः वर्तन्ते। मरीच्यादयः सप्तसंख्याकाः ऋषयः द्रष्टारः सन्ति। गायत्र्यादिसप्तसंख्याकानि छन्दान्सि अग्नेः स्तुतौ प्रयुक्ता भवन्ति। अथवा आहवनीयगार्हपत्यदक्षिणाग्निसभ्यावसथ्यप्रजाहिताग्निध्राणि सोमादियज्ञेषु अग्निधारकाणि सन्ति। ऋत्विजः सप्तसंख्याकेषु यज्ञेषु अग्निष्टोमादिषु अग्निं यजन्ते। होता प्रशास्ता ब्राह्मणाच्छंशी पोता नेष्टाग्नीध्रोच्छावाकश्चेति सप्तसंख्याका होमकर्तारः सन्ति। तस्य

[१] **शु०य०सं० १७.७१**

[२] **शु०य०सं० १७.७९**

सप्तसंख्याका योनिः चितिरूपेण उत्पत्तिस्थानि सन्ति। सः यजमानेभ्यः धनदानैः सम्पन्नान् करोति। एतादृशायाग्नये सुहुतमस्तु।

**अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम॥**[१]

अग्निः सुपथा शोभनमार्गेण देवयानेनोत्तमलोकं यजमानान् प्रापय। दानादिगुणयुक्तः अग्निः निखिलानि कर्माणि प्रज्ञानानि वा विद्वान् ज्ञाता वर्तते। प्राणिनां पार्श्वे यत् वञ्चनात्मकं पापं वर्तते तत् दूरीकरोति। अतः वारं वारमग्नये स्तुतिं कुर्मः। यथा सोऽस्मान् पापान्मुक्त्वा उत्तमवैकुण्ठलोकं प्रापयेत्।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे अग्नितत्त्वविमर्शः'** नाम एकादशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

[१] **शु०य०सं० ४०.१६**

# अथ द्वादशोऽध्यायः
# यजुर्वेदे वायुतत्त्वविमर्शः

**प्रघासिनो हवामहे मरुतश्च रिशादसः। करम्भेण सजोषसः।।**[1]

मरुत्सञ्ज्ञकाः देवाः एकोनपञ्चाशत्संख्यकाः सन्ति। तेषां मध्ये ये प्रघासिनः हविषां स्नेहेन भक्षकाः सन्ति तान् अस्मिन् यज्ञे यजमानाः आह्वयन्ति। ये दिशा दश शत्रूणां विनाशकाः सन्ति तान् यजमानाः आह्वयन्ति एते मरुत्संज्ञका विश्वेदेवाः यवमयहविरवशेषस्य भक्षयितारः सन्ति तानाह्वयामहे। तेऽन्नयज्ञे आगच्छन्तु आहुतीः गृह्णन्तु च।

**इन्द्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य। तव प्रणीती तव शूर शर्मन्नाविवा सन्ति कवयः सुयज्ञाः। उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते।।**[2]

मरुत्सञ्ज्ञका वायुदेवाः इन्द्रेण सह सदा निवसन्ति। अतः यजमाना यज्ञेषु इन्द्रेण सह तानाह्वयन्ति। यथा शर्यातेः नृपस्य यज्ञे सोमपानं कृतवन्तः तद्वत् आगच्छन्तु सोमं पिबन्तु च। तव प्रसन्नतायै विद्वांसः वेदज्ञाः शोभनसोमादीन् यज्ञान् कुर्वन्ति। वयं मुखेन तव परिचर्यां कुर्महे। एतत् तव हे इन्द्र सोमरसं पातुं स्थानमस्ति। अतः अत्रागत्य मरुद्भिः सह सोमरसं पिबतु। सुखेन वरदानानि ददातु च।

---

[1] **शु०य०सं० ३.४४**

[2] **शु०य०सं० ७.३५**

**सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान्। जहि शत्रूँ१॥ रप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः। उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते॥**[1]

सर्वैः सह समानप्रीतिकर्ता इन्द्रः एकोनपञ्चाशत् मरुत्संज्ञकैः देवैरन्येषां देवानां गणैः समूहैश्च सह सोमरसं पिबतु। इन्द्र विद्वान् सर्वज्ञः वीरः राक्षसस्य विनाशकश्च वर्तते। एतादृशः इन्द्रः प्रीतः सन् यजमानानां शत्रून् विनाशयतु, यजमानानां संग्रामान् जयतु च। सर्वतोभावेन भक्तान् अभयं करोतु। उपयामपात्रेण सोमरसः गृहीतः वर्तते। मरुद्भिः सह तं रसं पिबतु। एतत् यज्ञभूमौ इन्द्रस्य स्थानमस्ति स्वभागं मरुद्भिः सह पिबतु। यथा मरुद्भिः सह इन्द्रस्य महती प्रीतिर्वर्तते।

**मरुतो यस्य हि क्षये पाथ दिवो विमहसः। स सुगोपातमो जनः॥**[2]

द्युलोकस्य महता तेजसा युक्ताः मरुतः देवाः येषां यजमानानां गृहे आहुतीः गृह्णन्ति ते यजमानाः विधिवत् सर्वतो भावेन सुरक्षिताः भवन्ति। मरुतां पूजकाः यजमानाः सदा निर्भयाः शक्तिशालिनः सन्ति। तेषां नास्ति कुत्रापि भयम्। पूजनीयाः देवविशेषाः मरुत इति।

**अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवतादित्या देवता मरुतो देवता विश्वे देवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता॥**[3]

अनेन मन्त्रेण सिद्धं भवति यत् वायवः देवताः वर्तन्ते। वायूनामपि गणना देवानां मध्ये वर्तते। ते देववदुपकारकाः सन्ति। वायुः प्राणिनां जीवनाय महत्तत्त्वं वर्तते।

---

[1] **शु०य०सं० ७.३७**

[2] **शु०य०सं० ८.३१**

[3] **शु०य०सं० १४.२०**

**पशवोऽसृज्यन्त वायुरधिपतिरासीत् सप्तविꣳशत्यास्तुवत द्यावापृथिवी व्यैतां वसवो रुद्रा आदित्या अनुव्यायँस्त एवाधिपतय आसन्॥**[१]

सप्तविंशत्त्याकरपादाङ्गुलय द्वौ भुजावूरू चात्मेति तैः स्तुत तदारण्या वनस्थाः पशवः कृष्णमृगादयः सृष्टास्तेषां वायुः स्वाम्यभूत्। सप्तविंशत्या करपादङ्गुलयः द्वौ भुजावूरु चात्मेति तैस्तुतः, ततो द्यावापृथिवी व्यैताम्। अष्टौ संख्याकाः वसवो देवाः, एकादशसंख्याकाः रुद्राः द्वादश संख्याका आदित्याः देवाः सततं विश्वं रक्षन्ति। वायुभिः प्रभाविता एते पशवो वनेषु विचरन्ति।

**असौ या सेना मरुतः परेषामभ्यैति न ओजसा स्पर्धमाना।**
**तां गूहत तमसाऽपव्रतेन यथामी अन्यो अन्यं न जानन्॥**[२]

शत्रूणां या प्रसिद्धा सेना वर्तते राक्षसानां वा समूहाः सन्ति सा सेना अस्मान् प्रति युद्धार्थमागच्छति। एते मरुतः स्तुताः स्वकीयबुद्धिबलेन शत्रूणां विध्वंसनाय समर्थाः सन्ति। तां शत्रुसेनां गम्भीरान्धकारेषु पातयन्तु। यथा अमी सैनिकाः परस्परं न जानीयुः कीदृशेन तमसा अपगतं वयं स्याम। येन व्याप्तानां कर्म नश्यति। इन्द्रेण सहास्माकमेते मरुतः देवसहायकाः भूत्वा राक्षसान् विनाशयन्ति। ते मरुतः अस्माभिः पूजार्हाः सन्ति।

**समुद्रोऽसि नभस्वानार्द्रदानुः शंभूर्मयोभूरभि मा वाहि स्वाहा मारुतोऽसि मरुताङ्गणः शम्भूर्मयोभूरभि मा वाहि स्वाहावस्यूरसि दुवस्वाञ्छम्भूर्मयोभूरभि मा वाहि स्वाहा॥**[३]

---

[१] **शु०य०सं० १४.३०**

[२] **शु०य०सं० १७.४७**

[३] **शु०य०सं० १८.४५**

वायवः जनानामभिमुखमागत्य प्रवहन्ति। ते समुद्रवत् जनानार्द्रं कुर्वन्ति। आकाशे वर्तमानानि नक्षत्राणि जनान् प्रकाशयन्ति सुखेनाच्छादयन्ति। ऐहिकसुखेन प्राणिनः परिपूरयन्ति। पारलौकिकसुखेन सर्वान् भावयन्ति। अतः हे मरुतः अस्मान् प्राणिनः सुखेन शान्त्या नानावैभवेन च परिपूरयन्तु। यूयं शुक्रज्योतिः प्रभृतीनां गणः तन्निवासत्वात् त्रैलोक्यस्य रक्षणकर्मणि मरुतः समर्थाः सन्ति। हविर्लक्षणेनान्नेन युक्ताः आर्द्रकर्तुं समर्थाः सन्ति। अस्मान् रक्षणाय सततमागच्छन्तु।

**वायोः पूतः पवित्रेण प्रत्यङ्क्सोमो अतिद्रुतः। इन्द्रस्य युज्यः सखा।**
**वायोः पूतः पवित्रेण प्राङ्क्सोमो अतिद्रुतः। इन्द्रस्य युज्यः सखा॥**[1]

वायुना पवित्रीकृतः सोमः पीते सति शरीरमध्ये अतिवेगेन इतस्ततः परिभ्रमति। अधोमुखः सोमः अतिद्रुतः सः इन्द्रस्य योग्यः अतिप्रियः सखा वर्तते। वायुना पवित्रीकृतः सोमः शरीरमध्ये उदरान्तर्वर्तिना पूतः सोमः मुखतः उर्ध्वं गच्छति। सोमः इन्द्रस्य प्रशंसनीयं मित्रम्। वायुः शरीरमध्ये वर्तमानो भूत्वा प्राणिनः गमनं कारियतुं समर्थः। प्राणादिरूपेण शरीरे वर्तमानत्वात् जनान् सञ्चारयितुं समर्थः।

**तन्नो वातो मयोभु वातु भेषजन्तन्माता पृथिवी तत्पिता द्यौः।**
**तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना श्रृणुतन्धिष्ण्या युवम्॥**[2]

भेषजवदुपकारको भूत्वा वायुरस्माकं पार्श्वे वातु प्रवहतु। मातृवदुपकारिणी भूमिः पितृवदुपकारक आकाशः अस्मभ्यं सुखं प्रदाय अनुगृह्णताम्। सोमाभिषवकारिणो ग्रावाणः भेषजवदुपकारकाः भूत्वा प्रवहन्तु। एते सदा अस्मदर्थमुपकारकाः भवन्तु। अश्विनौ देवविशेषौ

---

[1] **शु०य०सं० १९.३**

[2] **शु०य०सं० २५.१७**

अपि उपकारकौ भूत्वा व्याधिं विनाशयताम्। गृहवद् धारयितारौ अश्विनौ प्रार्थनां श्रुत्वा अभयं दत्त।

**आ नो नियुद्‌भिः शतिनीभिरध्वरꣳसहस्रिणीभिरुपयाहि यज्ञम्।**
**वायो अस्मिन्सवने मादयस्व यूयं पात स्विस्तिभिः सदा नः॥**[1]

यज्ञस्य रक्षणाय यजमाना वायुमाह्वयन्ति कथयन्ति च। हे वायो! त्वं बहुगमनशीलोऽसि। अतः अस्माकं यज्ञे शतसंख्याकैः सहस्रसंख्याकैश्चाश्वैर्युक्तेषु रथेषु आसीनो भूत्वा यज्ञमुपयाहि। यजमानैः प्रदत्तं सोमं पीत्वा सुखेन मादयस्व तृप्तिं प्राप्नुहि। वायवः सदा यजमानानां स्वस्ति कुर्वन्तः तान् रक्षयन्ति। वाहनैः वायवः सम्पन्नाः सन्ति यथा ते निरन्तरं द्रुतगत्या प्राणिनां जीवनदानाय प्रवहन्ति। तद्वदत्र यज्ञे आगच्छन्तु।

**प्र याभिर्यासि दाश्वाꣳसमच्छा नियुद्भिर्वायविष्टये दुरोणे।**
**नि नो रयिꣳसुभोजसँयुवस्व नि वीरं गव्यमश्व्यं च राधः॥**[2]

नियुक्तेषु अश्वेषु रथेषु आरुढाः वायवः यज्ञपूर्णताप्राप्तये यज्ञगृहे हविर्दत्तवन्तं यजमानमभिमुखं गच्छन्ति। अत्रागत्य नानाविधधनानि ददतु। उपभोगयोग्यं वीरं पुत्रं गोसम्बन्धिधनं अश्वादिकं च ददतु। वायवः पूजार्हा वर्तन्ते। यजमानाः सततं रक्षणार्थं धनार्थञ्च वायूनाह्वयन्ति।

**नियुत्वान् वायवागह्ययꣳशुक्रो आयामि ते। गन्तासि सुन्वतो गृहम्॥**[3]

यजनशीलस्य यजमानस्य गृहे वायवः प्रसन्नमनसः भूत्वा आगच्छन्ति। तत्रागत्य तेषां उपकाराः कुर्वन्ति। तेषामभावे यज्ञस्यापूर्तिः। एतेषां निर्धारितं स्थानं विद्यते तत्र गत्वा अभिसुतस्य सोमरसं पिबन्ति।

---

[1] **शु०य०सं० २७.२८**

[2] **शु०य०सं० २७.२८**

[3] **शु०य०सं० २७.२९**

गमनार्थमेतेषां पार्श्वे शीर्घगामिभिरश्वैर्युक्ता रथाः सन्ति। सोमरसः एतेभ्यः अभिषुतो वर्तते। अतः सोमं पिबन्तु रक्षन्तु च।

**वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु।**
**आयाहि सोमपीतये स्पार्हो देव नियुत्वता।।**[1]

वायुभ्यः देवेभ्यः शुक्रग्रहस्थितस्य सोमरसस्य पानार्थमत्र यज्ञे व्यवस्था वर्तते। भवन्तः आगच्छन्तु। द्युलोकं प्रापयितुं समर्थः एषः यज्ञः। अतः यजमानादिभिः स्पृहणीयः एषः यज्ञः सोमपीतये यूयमायान्तु। अश्ववता रथेन आगच्छन्तु।

**वयुरग्रेगा यज्ञप्रीः साकङ्गन्मनसा यज्ञम्। शिवो नियुद्भिः शिवाभिः।।**[2]

वायवः कल्याणकारिभिः अश्वैर्युक्तैः रथैः सुखेन अत्र यज्ञे आयान्तु। वायूनां स्वभावः वर्तते यत् अग्रे अग्रे यज्ञेषु आगच्छन्ति। यज्ञस्नेहकर्तारः एते सन्ति। शान्तस्वभावाः वायवः सन्ति। कल्याणकारिभिः अश्वैः सहिता एते वर्तन्ते। सदा यजमानानां यज्ञेषु आगच्छति स्वभागं गृहणन्ति च।

**वयो ये ते सहस्रिणो रथासस्तेभिरागहि। नियुत्वान्सोमपीतये।।**[3]

वायूनां पार्श्वे सहस्रसंख्याकाः रथाः सन्ति। तेषु ते गमनं कुर्वन्ति। यत्र तत्र सर्वत्र प्रवहन्ति। यज्ञेषु गच्छन्ति च। यजमानाः सोमपानार्थं वायुभ्यः व्यवस्थां कुर्वन्ति। वायुनामभावे जीवनमेव कठिनम्। एतद् विचार्यैव यज्ञेषु देवानां मध्ये सोमपानाय वायूनां व्यवस्था भवति। सहस्रसंख्याकेषु रथेष्वारूढाः सन्तः सर्वत्र गच्छन्ति।

---

[1] **शु०य०सं० २७.३०**

[2] **शु०य०सं० २७.३१**

[3] **शु०य०सं० २७.३२**

**एकया च दशभिश्च स्वभूते द्वाभ्यामिष्टये विꣳशती च।**
**तिसृभिश्च वहसे वित्रिꣳशता च नियुद्भिर्वायविह ता विमुञ्च॥**[1]

जगतः दृश्यमानाः सर्वाः विभूतयः वायूनामेव वर्तते। अतः मन्त्रस्य कथनमस्ति यत् हे वायो! एकया द्वाभ्यां विंशतिभिः संख्याकाभिश्च अश्वाभिः युक्तैः रथैः यज्ञभूमौ आयाहि। तव पर्श्वे महती शक्तिः वर्तते। आवागमनस्य बहूनि साधनानि सन्ति। प्राणिनां प्राणाः वाय्वधीनाः सन्ति। वाय्वभावे जगत्सर्वं विनश्यति। अतः शास्त्रेषु महती स्तुतिः दृश्यते। प्रवहणस्यापारशक्तिः वर्तते। एतदर्थमेव मन्त्रः –

**तव वायवृतस्पते त्वष्टुर्जामातरद्भुत। अवाꣳस्यावृणीमहे॥**[2]

वायुः सत्यस्य पालकः यज्ञरक्षकश्च वर्तते। त्वष्टुरादित्यस्य जामातृवत् वर्तते। आदित्यात् जलमादाय वायुः गर्भयति ततो वृष्टिर्भवति। अभूतपूर्वः देवो वायुः वर्तते। ततः अन्नानि धनानि प्रसादान् वरान् यजमानाः याचन्ते। यतः अग्निर्ज्योतिर्मरुतां सन्निपातः मेघः शास्त्रेषु निर्णीतः इति।

**विश्वेभिः सोम्यं मध्वग्न इन्द्रेण वायुना। पिबा मित्रस्य धामभिः॥**[3]

विश्वेदेवेन्द्रवरुणाग्नीनाञ्च सर्वेषां देवानां परमसहायकः वायुः वर्तते। अतः एतैः देवैः सह वायोः स्तुतिरस्ति। एतैः देवगणैः सह वायुः स्वतेजसा बलेन पराक्रमेण च सोमं पिबति। एष वायोः महिमा वर्तते।

**अग्न इन्द्रवरुणमित्रदेवाः शर्धः प्रयन्त मारुतोत विष्णो।**
**उभा नासत्या रुद्रो अध ग्नाः पूषा भगः सरस्वती जुषन्त॥**[4]

---

[1] **शु०य०सं० २७.३३**

[2] **शु०य०सं० २७.३४**

[3] **शु०य०सं० ३३.१०**

[4] **शु०य०सं० ३३.४८**

हे इन्द्र! वरुण! मित्र! मरुद्गणविष्णुप्रभृतिदेवा:! यूयं सर्वे यजमानेभ्य: बलानि प्रयच्छत। युष्माकं बलै: बलिनो भूत्वा यजमाना: सुरक्षिता: भवेयु:। उभौ अश्विनीकुमारौ रुद्र:, देवानां पत्नय:, पूषा भग: सरस्वतीप्रभृतयो देवगणा: देवपत्न्यश्च यजमानानां यज्ञेषु आगत्य हवींषि सेवन्ताम्। प्रसन्नमना जगत: रक्षन्तु। जगद्रक्षका: एते: देवा: सन्ति।

**इन्द्राग्नी मित्रावरुणादितिꣳस्व: पृथिवीं द्यां मरुत: पर्वताँ२॥अप:। हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शꣳसꣳसवितारमूतये॥**[१]

इन्द्राग्निमित्रवरुणादित्यपृथिवीद्यौर्मरुत: पर्वता आप: विष्णुपूषामन्त्रपतिभगसवितृप्रभृति- देवगणा: स्वगणै: सह यजमानानां यज्ञेषु रक्षणाय सततमागच्छन्ति रक्षन्ति च। एतदर्थं यजमाना: तान् आह्वयन्ति। स्तुतिं कुर्वते क्षिप्रमवनाय आगच्छन्ति।

**आ नो यज्ञं दिविस्पृशं वायो याहि सुमन्मभि:।**
**अन्त: पवित्र उपरि श्रीणानोयꣳशुक्रो अयामि ते॥**[२]

हे वायव:! अस्माकं यज्ञे आगच्छत। यूयं स्वभावेन परार्थपरायणा: स्थ। यज्ञ: स्वर्गसाधक: वर्तते। युष्माकमागमनेनास्य पूर्ति: स्यात्। ऋत्विग्यजमानवैदुष्याद्दक्षिणा- सम्पन्नत्वाच्च स्वर्गेऽपि महिमा गीयते अस्य यज्ञस्य। वस्त्रादिभि: कृतपवित्र: सोमरस: युष्माकं निर्धारितस्थानेषु स्थापित: वर्तते। दशापवित्रेण वस्त्रेण कृतपवित्र: वर्तते। प्रसन्नमना: भूत्वा यूयमागच्छथ। सोमपानै: तृप्तिं लभध्वम्।

**इन्द्रवायू सुसन्दृशा सुहवेह हवामहे।**
**यथा न: सर्व इज्जनोऽनमीव: सङ्गमे सुमना असत्॥**[३]

---

[१] **शु०य०सं० ३३.४९**

[२] **शु०य०सं० ३३.८५**

[३] **शु०य०सं० ३३.८६**

यजमानाः इन्द्रेण सह यज्ञस्य रक्षाणार्थं वायुमाह्वयन्ति। मधुराभिः स्तुतिभिराह्वयन्ति। श्रद्धया वायुविषयकैः मन्त्रैः ध्यानं कुर्वन्तः आह्वयन्ति। यथा यजमानानां पुत्रपौत्रादयो व्याधिरहिताः स्वस्था भवेयुः। नानाविधसम्पत्तीनां प्राप्तये उदारहृदयैः तमाह्वयन्ति। इन्द्रवाय्वोः मध्ये समानप्रीतिः वर्तते। तथा एतौ समनस्कौ परस्परं प्रीतिं कुर्वन्तौ वर्तेते।

**शन्नो वातः पवताꣳशन्नस्तपतु सूर्यः।**
**शन्नः कनिक्रदद्देवः पर्जन्यो अभिवर्षतु॥**[१]

वायुः यजमानानां कृते सुखकरः अपरुषः अव्याधिजनकश्च प्रवहतु। सूर्योऽपि वायुसदृशः सुखकरः तपतु, मा दाहं करोतु, पर्जन्यदेवोऽपि मधुरस्वरेण गर्जनां कुर्वन् सुखेन जलं वर्षतु।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे वायुतत्त्वविमर्शः'** नाम द्वादशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

[१] **शु०य०सं० ३६.१०**

# अथ त्रयोदशोऽध्यायः

# यजुर्वेदे आकाशतत्वविमर्शः

**अग्ने वेर्होत्रं वैर्दूत्यमवतां त्वां द्यावापृथिवी अव त्वं द्यावापृथिवी स्विष्टकृद्देवेभ्य इन्द्र आज्येन हविषा भूत्स्वाहा सञ्ज्योतिषा ज्योतिः॥**[1]

अग्निर्देवः स्वकर्म विधिवत् जानाति। हवनस्य दूतत्वं च अग्नेः कर्म, एतत् सः जानाति। कर्मवेत्ता अग्निस्त्वं द्यावापृथिवीं लोकद्वयं पालय। द्यावापृथिवी त्वां पालयताम्। अन्योन्यपालने सति लोकद्वयस्योपकार इति। इन्द्र आज्येन आहुत्या देवानां कृते कल्याणकारी भवतु। यजमानदत्ताभिराहुतिभिः सर्वं जगत् वैकल्यरहितं भवति। देवमुद्दिश्याहुतिः प्रदत्ता स्वाहेति। ध्रुवापात्रस्थिताज्यरूपाहुतिभिः सर्वं जगत् प्रकाशते देदीप्यत इत्यर्थः।

**उपहूतो द्यौष्पितोप मां द्यौष्पिता ह्वयतामग्निराग्नीध्रात्स्वाहा। देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां। प्रतिगृह्णाम्यग्नेष्ट्वास्येन प्राश्नामि॥**[2]

पितृवत्पालकोद्युलोकः अस्मिन् यज्ञे उपहूयताम्। आग्नीध्रगृहात् हस्तात् वा आहुतीः देवाः प्राप्नुवन्ति। देवस्य सवितुः प्रेरणायामश्विनीकुमारस्य बाहुभ्यां पूषादेवस्य हस्ताभ्यां भक्षणार्थमाहुतीः देवेभ्यः गृह्णामि तथा अग्निदेवस्य मुखेन प्राशित्रं भक्षयामि।

---

[1] **शु०य०सं० २.९**

[2] **शु०य०सं० २.११**

**वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो वृष्टिमावह॥**[1]

द्यावापृथिवीप्रस्तरग्रहणस्यानुमोदनं कुरुताम्। एष यज्ञः दिवं गच्छतु। ततः तत्र गत्वा वृष्टिमावह येन लोकाः तर्पिताः भवेयुः। घृतेनाप्लुतं प्रस्तरमास्वादयन्तः आगच्छन्तु। गायत्रीप्रभृतीनि छन्दांसि पक्षिरूपेण दिवं गच्छन्तु ततः वृष्टिमावहन्तु।

**ध्रुवोऽसि पृथिवीं दृꣳह ध्रुवक्षिदस्यन्तरिक्षं दृꣳहाच्युतक्षिदसि दिवं दृꣳहाग्नेः पुरीषमसि॥**[2]

मध्यमपरिधिः स्थिरासिः तया पृथिवीलोकः दृढः भवति। दक्षिणपरिधिरपि यज्ञे अचलरूपेण विद्यमाना वर्तते। तयाऽपि अन्तरिक्षलोकोऽपि दृढो भवति। हे उत्तरपरिधे! त्वमपि यज्ञे दृढा अचलरूपाऽसि। तव साहाय्येन द्युलोकमपि दृढं भवति। हे यज्ञसम्भार! यूयमपि दृढाः स्थ। भवन्तोऽपि यज्ञेषु अग्नेः परिपूरकाः वर्तन्ते। यज्ञात् निखिलं ब्रह्माण्डमपि स्थिरं भवति। स्वस्योनः स्थिरो भवति।

**द्यां मा लेखीरन्तरिक्षं मा हिꣳसीः पृथिव्या सम्भव। अयꣳहि त्वा स्वधितिस्तेतिजानः प्रणिनाय महते सौभगाय। अतस्त्वं देव वनस्पते शतवल्शो विरोह सहस्र वल्शाविव यꣳरुहेम॥**[3]

हे वनस्पते द्युलोकस्य हिंसां मा कुरु। यूपवृक्ष! त्वं द्यूलोकवासिनः देवान् रक्ष। अन्तरिक्षस्य हिंसां मा कुरु। त्वमन्तरिक्षलोकं तत्र निवासिनः जनाञ्च सर्वतो भावेन रक्ष। तथा पृथिवीलोकनिवासिभिः जनैः सह स्नेहेन सम्भव। महते सौभाग्याय त्वं यूपत्वं प्रापयन्ति। हे

---

[1] **शु०य०सं० २.१६**

[2] **शु०य०सं० ५.१३**

[3] **शु०य०सं० ५.४३**

वनस्पते! त्वं शतसंख्याकैः सहस्रसंख्याकैश्च किसलयैः रूपैः वृद्धिं प्राप्नुहि। यतः तव प्रसादात् यज्ञस्य पूर्तिः स्यात्।

**अन्तस्ते द्यावापृथिवी दधाम्यन्तर्दधाम्युर्वन्तरिक्षम्।**
**सजूर्देवेभिरवरैः परैश्चान्तर्यामे मघवन् मादयस्व॥**[१]

इन्द्रस्य प्रसादात् द्यावापृथिवी व्यवधायिके करोमि। हे अन्तर्यामि! प्राणरूपापन्नस्य तव शरीरमध्ये द्यावापृथिव्यौ दधामि। विस्तीर्णान्तरिक्षमध्ये त्वां दधामि। हे इन्द्र पृथिवीलोकनिवासिभिः देवैः सह तथा द्युलोकनिवासिभिः देवैः सह समानप्रीतिं कुर्वन् अस्मिन् यज्ञे मादयस्व। अन्तर्यामग्रहस्थितसोमरसस्य पानं कुर्वन् तृप्तिं प्राप्नुहि। देवानां तृप्त्यर्थमेव यज्ञाः सम्पाद्यन्ते।

अन्तर्यामग्रहे स्थापितः सोमरसः द्यावापृथिवीदेवताहेतवे वर्तते। विस्तृतान्तरिक्षलोकः अन्तर्यामग्रहस्थितसोमरसपानाय वर्तते। अवरैः पृथिवीलोकस्थितैः देवैः परेः देवलोकस्थितैः देवैश्च सार्द्धमिन्द्रः सोमरसं पीत्वा तृप्तिं प्राप्नोतु प्रसन्नतामलभत। द्यावापृथिवीभ्यां सह अन्तरिक्षेण सार्द्धं च अपरैः परैः देवैश्च सह इन्द्रः सोमं पिबतु मोदं प्राप्नोतु।

**चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च स्वाहा॥**[२]

उदयकालादारभ्य सायंकालपर्यन्तं प्रकाशशीलोऽयमादित्यः आश्चर्यं यथा स्यात् तथा उदयाचलमागतवान्। उदयन्नेव स्वतेजसा जगत् सर्वं देदीप्यमानं कृतवान्। आदित्यः रश्मीनां समूहः मित्रस्य वरुणस्याग्नेश्च प्रकाशकः। स उदयन् द्यावापृथिवीमन्तरिक्षं च स्वतेजसा

---

[१] **शु०य०सं० ७.५**

[२] **शु०य०सं० ७.४२**

आपूरयति। स्थावरजंगमजगतः सूर्यः चक्षुर्वत् प्रकाशकः। सूर्यस्य प्रकाशेन निखिलमन्तरिक्षं देदीप्यमानमभवत्। अन्तरिक्षलोकस्यायं सूर्यः तेज इति।

**अप्सुषदं त्वा घृतषदं व्योमसदमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम्। पृथिविसदं त्वान्तरिक्षसदन्दिविसदन्देवसदन्नाकसदमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम्॥**[१]

यजमानाः सोममिन्द्रार्थं गृह्णन्ति जले स्थितं घृते स्थितमन्तरिक्षे स्थितं त्वां गृह्णन्ति। इन्द्रस्यापि प्रीतिकरः सोमः अतः तं पृथिव्यां स्थितमन्तरिक्षे स्थितं द्युलोके स्थितं देवेषु स्थितं स्वर्गेषु स्थितं च सोमं गृह्णन्ति।

**अदित्यास्त्वा पृष्ठे सादयाम्यन्तरिक्षस्य धर्त्री विष्टम्भनी दिशामधिपत्नी भुवनानाम्। ऊर्मिर्द्रप्सो अपामसि विश्वकर्मा त ऋषिरश्विनाध्वर्यू सादयतामिह त्वा॥**[२]

कल्लोलराशिः अपां रसो वर्तते। पृथिव्याः पृष्ठे त्वां स्थापयामि अन्तरिक्षलोकस्य धारयित्री वर्तते। त्वमन्तरिक्षलोकस्य धारणकर्त्री असि। पूर्वादिदिशानां भुवनानां च भूतजातानां च स्वामिनी असि। विश्वकर्मा देवविशेषः तव ऋषिः। द्वौ अश्विनीकुमारौ तव अध्वर्यू यागसम्पादकौ वर्तेते। इह यज्ञस्थले त्वां यज्ञपूरणाय स्थापयामि। अत्र स्थित्वा यज्ञं रक्ष। यजमानानामुपकारं कुरु। यज्ञे मा कश्चित् विघ्नो भवेत्।

**इन्द्राग्नी अव्यथमानामिष्टकां दृꣳहतं युवम्।**
**पृष्ठेन द्यावापृथिवी अन्तरिक्षं च विबाधसे॥**[३]

---

[१] **शु०य०सं० ९.२**

[२] **शु०य०सं० १४.५**

[३] **शु०य०सं० १४.११**

हे इन्द्राग्नी! देवविशेषौ! युवां अचलामिष्टां दृढां कुरुताम्। हे स्वयमातृष्णे इष्टिके स्वपृष्ठोपरि द्यावापृथिव्यौ अन्तरक्षिलोकं चाभिभवसि। लोकत्रयं धारयसि। यज्ञीयेष्टिकानां महती शक्तिः वर्तते। ता यज्ञमाध्यमेन लोकत्रयस्य भारं धारयितुं समर्थाः इति।

**विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीमन्तरिक्षं यच्छान्तरिक्षं दृꣳहान्तरिक्षं मा हिꣳसीः। विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय। वायुष्ट्वाभिपातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीद॥**[1]

प्रजापतिः विश्वकर्मा ऋषिः त्वामिष्टकामत्र यागे स्थापयतु। अन्तरिक्षलोकस्य पृष्ठे त्वामिष्टकां स्थापयतु। अभिव्यक्तियुक्तां विस्तारयुक्तां त्वां स्थापयतु। हे इष्टके! त्वं गन्धर्वाप्सरोगणादिधारकतयान्तरिक्षं यच्छ नियमय, उपद्रवादिरहितमन्तरिक्षलोकं कुरु। सर्वस्मै प्राणायापानाय व्यानायोदानाय समानाय च वायुवृत्तिलाभाय स्वगृहस्थित्यै उत्तमचरित्रलाभाय स्थापयामि। हे इष्टिके! त्वमन्तरिक्षं दृढं कुरु। यज्ञैः सर्वे प्राणिनः सुखिनो भवेयुः। प्राणिनामेतत् सर्वं लोकं तव दार्ढ्ये सति भविष्यति। बृहत्या स्वस्त्या योगक्षेमसम्पत्त्या अतिशुभकारिणा तेजसा च वायुः त्वामिष्टिकां सर्वतोभावेन परिपातु। स्वाधिष्ठातृदेवतयानुगृहीता स्थिरा भूत्वा अत्र वेदिभागे सुखेन निवासं कुरु। यथा अङ्गिरसां चयने यज्ञे त्वं ध्रुवा स्थापिता आसीत्, तद्वदत्र स्थापिता भव।

**विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीम्। विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ। वायुष्टेऽधिपतिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद॥**[2]

---

[1] **शु०य०सं० १४.१२**

[2] **शु०य०सं० १४.१४**

हे विश्वज्योतिर्नामिके इष्टिके! प्रजापतिः ऋषिः अन्तरिक्षलोकस्य पृष्ठभागे निखिलजगत्प्रकाशकर्त्रीं त्वां स्थापयतु। सर्वेषां प्राणानां धारणकर्त्रीं त्वां स्थापयतु विश्वज्योतिः तुभ्यं सर्वेभ्यः सुखं देहि। वायुदेवविशेषः तव अधिपतिः भवतु। यथा त्वमङ्गिरसां यागे स्थापिता आसीत्, तद्वदत्र तिष्ठ, ते शुभं भवतु।

**पृथिवी छन्दोन्तरिक्षं छन्दो द्यौश्छन्दः समाश्छन्दो नक्षत्राणि छन्दो वाक्छन्दो मनश्छन्दः कृषिश्छन्दो हिरण्यं छन्दो गौश्छन्दोऽजा छन्दोऽश्वश्छन्दः॥**[१]

छादयति इति छन्दः रोगेभ्यः आपद्भ्यः झंझावातेभ्यश्च छादयति इति पृथिवी अन्तरिक्षं द्यौः समाः नक्षत्राणि वाक् मनः कृषिः हिरण्यं गौः अजाश्वाः एते सर्वे रोगेभ्यः आपद्भ्यः झंझावातेभ्यश्च सदा प्राणिनः छत्रवत् उपकारका भवन्ति। अन्तरिक्षलोकोऽपि विविधेभ्यः उपद्रवेभ्यः जनान् रक्षति।

**अधिपत्न्यसि बृहती दिग्विश्वे ते देवा अधिपतयो बृहस्पतिर्हेतीनां प्रतिधर्ता त्रिणवत्रयस्त्रिꣳशौ त्वा स्तोमौ पृथिव्याꣳश्रयतां वैश्वदेवाग्निमारुते उक्थे अव्यथायै स्तभ्नीताꣳशाक्वररैवते सामनी प्रतिष्ठित्या अन्तरिक्ष ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु विधर्ता चायमधिपतिश्च ते त्वा सर्वे सँविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु॥**[२]

हे इष्टिके! त्वं सर्वासां दिशामधिपत्नी असि। तव अधिपतयो विश्वे देवाः वर्तन्ते। बृहस्पतिः उपद्रवकारिणामवरोधकः वर्तते। स्तोम द्वन्द्वः त्वां भूमौ स्थापयतु। विश्वे देवाः अग्निमारुते उक्थ्ये स्थायिनिवासाय दृढीकुर्वन्तु। शाक्वरैवते साममन्त्रौ अन्तरिक्षलोकस्य

---

[१] **शु०य०सं० १४.१९**

[२] **शु०य०सं० १५.१४**

रक्षायै प्रतिष्ठार्थं त्वां स्थापयत। प्रथमोत्पन्ना ऋषयः त्वामिन्द्रादिदेवानां मध्ये स्थापयन्तु। द्युलोकस्य मात्रया परिणामेन विस्तारयन्तु च। वागभिमानी देवः त्वां धारयतु। तव दशां सर्वे देवाः जानन्तु परिस्थित्या परिचिता भूत्वा सुखस्थानीयभूते स्वर्गे लोके यजमानं स्थापयतु।

**द्यौस्ते पृथिव्यन्तरिक्षं वायुश्छिद्रं पृणातु ते।**
**सूर्यस्ते नक्षत्रैः सह लोकं कृणोतु साधु या॥**[१]

हे अश्व! द्युलोकस्य पृथिवीलोकस्यान्तरिक्षलोकस्य च स्वामिनो देवाः अग्निवायुसूर्याः तव न्यूनं कष्टमापदां वा दूरीकुर्वन्तु। सूर्यो नक्षत्रयुक्तः सन् तुभ्यं समीचीनं लोकं करोतु। उत्तमलोकं प्रापयतु।

**अग्निश्च पृथिवी च सन्नते ते मे सन्नमतामदो वायुश्चान्तरिक्षञ्च सन्नते ते मे सन्नमतामद आदित्यश्च द्यौश्च सन्नते ते मे सन्नमतामद आपश्च वरुणश्च सन्नते ते मे सन्नतामदः। सप्त सꣳसदो अष्टमी भूतसाधनी सकामाँ२॥ अध्वनस्कुरु सज्ञानमस्तु मेमुना॥**[२]

अग्निः पृथिवी च परस्परमनुकूलमना भवेताम्। अतोऽग्निः पृथिवी च ममाधीनं जगत्सर्वं कुरुताम्। तयोः सुखं प्राप्नुयाम्। वायुः अन्तरिक्षश्च परस्परं समानप्रीतिकर्तारौ भवेताम्। तौ द्वौ मम कृते अनुकूलौ भवेतां यथा वयमानुकूल्येन वायोरन्तरिक्षस्य च लाभं प्राप्नुयाम। आदित्यश्च द्यौश्च परस्परं समानभावेन प्रीतिकर्तारौ भवेताम्, यतः वयं तयोः सुखं प्राप्नुयाम। आपः वरुणश्च परस्परं समानभावेन तिष्ठन्तु, यतः वयं परमात्मानं प्राप्नुयाम। एतानि सप्त संसदः अग्निवाय्वन्तरिक्षादित्यद्युलोकाम्बुवरुणाख्यानि भूतसाधनानि। अष्टमं भूतसाधनपृथिवी वर्तते। तानि सर्वाणि परमात्मनः निवासस्थानानि वर्तन्ते।

---

[१] **शु.य.सं. 2३.४३**

[२] **शु.य.सं. 26.1**

अतः हे परमात्मन्! एतानि सर्वाणि ममानुकूलं करोतु। यतः येन मार्गेण गच्छामि तत्र ममाभीष्टं सिद्धं भवतु। ममापि इष्टेन सह प्रीतिः भवतु। इमानि यानि तत्त्वानि कथितानि सन्ति तानि सर्वाणि ममानुकूलानि भवेयुः। यथा वयं स्वकार्ये व्यवहारे जीवने वा सुखिनो भवेम।

**देवो देवैर्वनस्पतिर्हिरण्यपर्णो मधुशाखः सुपिप्पलो देवमिन्द्रमवर्धयत्।**
**दिवमग्रेणास्पृक्षदान्तरिक्षं पृथिवीमदृꣳहीद्वसुवने वसुधेयस्य वेतु यज॥**[१]

वनस्पतिदेवः देवैस्सह इन्द्रमवर्धयत्। वनस्पतिदेवस्य पर्णानि हिरण्यवत् प्रकाशमानानि सन्ति। रसवतीशारवायुक्तानि सुफलानि अमृतवत् मधुरस्वादयुक्तानि शोभनफलयुक्तानि वा सन्ति। सः वनस्पतिः अग्रभागेन स्वर्गमस्पृक्षत्। मध्यभागेन अन्तरिक्षलोकमस्पृक्षत्। शेषभागं पृथिवीमस्पृक्षत्। वनस्पतिदेवोऽस्माकं बहूपकारयुक्तो वर्तते।

**येन द्यौरुग्रा पृथिवी च दृढा येन स्व स्तभितं येन नाकः।**
**यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम॥**[२]

येन परमात्मना द्यौरुग्राः उद्गूर्णा वृष्टिदायिनी कृता। भूमिश्च दृढा स्थिरा प्राणिधारणाय वृष्टिग्रहणाय अन्ननिष्पादनाय च कृता। येन परमात्मना आदित्यमण्डलं स्तम्भितम्। येन स्वर्गं नाकः स्तमितं दृढं चकार। य आकाशमण्डले उदकस्य वृष्टिलक्षणस्य जलस्य निर्माता वर्तते। तं परमात्मानं वयं हविषा विधेम। अन्तरिक्षलोकस्य निर्माणं वर्षाहेतवे परमात्मा कृतवान्। एतावत् तस्य महिमा वर्तते। अतः वयं हविषा तं तर्पयाम।

**कल्पन्तान्ते दिशस्तुभ्यमापः शिवतमास्तुभ्यं भवन्तु सिन्धवः।**
**अन्तरिक्षꣳ शिवन्तुभ्यं कल्पन्तान्ते दिशः सर्वाः॥**[१]

---

[१] **शु०य०सं० २८.२०**

[२] **शु०य०सं० ३२.६**

हे यजमान! प्राचीप्रभृतयः दिशः त्वदर्थशुभकारिण्यः भवन्तु। आपः त्वदर्थं मधुरस्वादोपेताः भवन्तु। त्वदर्थं स्यन्दनशीलाः नद्यः शुभकारिण्यः भवन्तु। आकाशलोकः त्वदर्थं कल्याणकारी भवतु। निखिला दिशः त्वदर्थं शिवं कल्पन्ताम्।

**द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥**[२]

द्युलोकस्य शान्तिः अन्तरिक्षलोकस्य शान्तिः पृथिवीलोकस्य शान्तिः जलस्य शान्तिः ओषधीनां शान्तिः वृक्षलतावनस्पतीनां शान्तिः सर्वेषां देवानां शान्तिः शान्तेः शान्तिः सर्वाः शान्त्यः मम पार्श्वे समागच्छन्तु। निखिलं जगत् मदर्थं शान्तिप्रदं भवतु। जगतः मध्ये यत्र कुत्रापि या शान्तिः वर्तते सा मम पार्श्वे समायातु।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे आकाशतत्त्वविमर्शः'** नाम त्रयोदशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

---

[१] **शु०य०सं० ३५.९**

[२] **शु०य०सं० ३६.१७**

# अथ चतुर्दशोऽध्यायः

# वैश्विकदृष्ट्या यजुर्वेदे प्रकृतिचिन्तनस्य समीक्षणम्

प्रकृतितः महत्तत्त्वस्य प्रादुर्भावो भवति[१], पञ्चतन्मात्रातः पञ्चमहाभूतानि, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि च जायन्ते। भगवती श्रुतिः कथयति –

**पञ्चभिर्धाता विदधा इयं यत् तासाँ स्वसृरजनन पञ्च पञ्च।**
**तासामुयन्ति प्रयवेण पञ्च नाना रूपाणि क्रतवो वसानाः॥[२]**

मन्त्रे प्रयुक्तेन पञ्चभिः शब्देन तन्मात्राणाम्, स्वसृरजनत् पञ्च पञ्च शब्दाभ्यां पञ्च महाभूतानां पञ्च ज्ञानेन्द्रियाणां च, पञ्च नाना रूपाणि क्रतवः इति शब्देन पञ्च कर्मेन्द्रियाणां परिगणनं भवति। सृष्टेः प्रारम्भिकस्वरूपस्य सम्बन्धे यजुर्वेदे पञ्च शब्दाः प्राप्यन्ते। तानि च – गर्भाण्डहिरण्यगर्भ[३] प्रजापतिपुरुषाः। अत्र अन्तिमत्रयशब्दाः गर्भस्य विकसितावस्थां कथयन्ति, प्रजापतिना पृथिव्या एवं द्युलोकस्य धारणा कृता।

---

[१] **ऋक्० ८.१०१.१४ एवम् शतप०ब्रा० २.५.१.५**

[२] **काठकसं. ३९.१०**

[३] **हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥ शुक्लयजुर्वेदसंहिता २५.१०**

**पृथिवीतत्त्वम्** -

पृथिवी येन रूपेण सृष्टा, येन प्रकारेण निवासयोग्या भूत्वा अस्माभिः प्राप्ता, अत्र पृथिव्याः विकासक्रमस्य स्पष्टीकरणं वर्तते। नवपरिवर्तनानन्तरं पृथिव्याः वर्तमानस्वरूपमस्माभिः प्राप्तमासीत्[१]। पृथिव्यां संयोजनशक्तिः वर्तते, तथा जले भारः वर्तते। अत एव एताः परमाणवः प्रजापतेः अधस्तनभागे स्थिताः अभूवन्, वायोः एवमग्नेश्च ये परमाणवः ते तु मात्रायामधिकाः आसन्। ते तु प्रजापतेः उपरितनभागे स्थिताः अभूवन्। वायोः वेगेन एषा भूमिः प्रजापतितः पृथग् जाता[२]। एषः प्रजापतिः अस्याः भूमेः केवलं दशाङ्गुलदूरे आसीत्। भगवती यजुर्वेदश्रुतिः कथयति -

**सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।**
**स भूमिꣳ सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥**[३]

प्रारम्भे पृथिवी सूक्ष्मा आसीत्, एषा प्रादेशमात्रा उत्तरवेदी एवं वराहस्य नासिका तुल्याकारा आसीत्। शतपथब्राह्मणस्य श्रुतिः कथयति- **इयतीह वा इयमग्रे पृथिव्यास प्रादेशमात्री, तामेमूष इति वराह उज्जघान**[४] इति। पृथिवी वराहावतारे भगवता विष्णुना समुद्रतः निष्कास्य आनीता आसीत्।[५] पृथिव्याः प्रथमं स्वरूपं फेनमासीत्[६]। पृथिव्याः द्वितीयं परिवर्तितं रूपं मृत् आसीत्, यतो हि मृदः एव पृथिवी[७]। तृतीयावस्थायां पृथिव्याः जलं शुष्कमभूत्, अस्यैतत् रूपं शुष्कापः आसीत्। तस्मिन्

---

[१] **ता वा एता नव सृष्टयः (शतप०ब्रा० ६.१.१)**

[२] **द स्टोरी आफ् क्रीएशन, पृ० १२८ प.भगवद्दत्तः**

[३] **यजुर्वेदः ३१.१**

[४] **श०प०ब्रा० १४.१.२.११**

[५] **काठ०सं० ८.२**

[६] **ऋक्० ८.१४.१३**

[७] **ताऽतप्यत। ताः फेनमसृजन्त। (श०प०ब्रा० ६.१.३.२)**

समये एषा पृथिवी कूर्मपृष्ठसदृशा आसीत्[1], पृथिव्याः चतुर्थावस्था ऊषा अथवा ऊषररूपेण जाता। तदाह – "यद्वा इमे व्यैतां यदमुष्या यज्ञीयमासीत्। तदिमामभ्यसृतोषाः" इति। पृथिव्याः पञ्चमावस्था सिकता आसीत्, या आदित्यस्य भस्म इत्युच्यते स्म, सूर्यस्य ऊष्माद्वारा सिक्तं रजः सिकतापदेनोच्यते। शतपथब्राह्मणस्य श्रुतिः कथयति –

**अग्नेर्वा एतद्वैश्वानरस्य भस्म यत् सिकता।**
**अग्नेरेतद्वैश्वानरस्य रेतो यत् सिकता॥**[2]

सिकता द्विविधा भवति – शुक्लवर्णयुक्ता कृष्णवर्णयुक्ता च[3]। कृष्णसिकतायां जलस्य भागः अधिकः भवति, शुक्लसिकतायां अग्नेः भागः अधिको भवति। पृथिव्याः षष्ठी अवस्था शर्करायुक्ता पृथिवी आसीत्, अग्नौ स्थापितं तेजः एव शर्करा वर्तते। तदाह –

**तेजो वा अग्ना अदधुर्यच्छर्करा"**[4] इति।

मैत्रायणी श्रुतिः कथयति –

**इन्द्रो वै वृत्राय वज्रं प्राहरत्। तस्य या विपुषा आसंस्ताः शर्करा अभवन्"**[5] इति।

अर्थात् इन्द्रेण वृत्रासुरे यदा वज्रेण प्रहारः कृतः तदा वज्रादुत्पन्नाः कणाः ताः शर्करा अभवन्। पृथिव्याः आन्तरिकः यः शिथिलभागः तदेव शर्कराद्वारा कठोरीकृतः। भगवती श्रुतिरपि कथयति –

---

[1] **एता वै शुष्कापः। (मैत्रायणी संहिता ३.६.३), काठ०सं० ८.२**

[2] **श०प०ब्रा० ७.१.१.१०**

[3] **श०प०ब्रा० ७.३.१.४३ (द्वे हि सिकते शुक्ला च कृष्णा च)**

[4] **काठकसंहिता ८.२**

[5] **मैत्रायणी संहिता १.६.३**

**"शिथिरा वा इयमग्र आसीत् तां प्रजापतिः शर्कराभिरदृंहत"** [१] इति। लोकव्यवहारे दृश्यते यत् भवननिर्माणे भवनस्याधारः कणेन पूरयित्वा दृढीक्रियते।

पृथिव्याः सप्तमं परिवर्तितः स्वरूपं अश्मा अस्ति। शर्करातः अश्मरूपेण पृथिव्याः परिणामो भवति, शतपथब्राह्मणस्य श्रुतिः कथयति– "शर्कराया अश्मानम् (असृजत)। तस्मात् शर्कराश्मैव अन्ततो भवति" [२] इति। पृथिव्याः अष्टमं परिवर्तितं स्वरूपमायसी वर्तते, ऋग्वेदश्रुतिः कथयति – **"अधा मही न आयस्यनाधृष्टो नृपीतये। पूर्भवा शतभुजिः"**[३] इति।

पृथिव्याः नवमं परिवर्तितं स्वरूपं काल्वाली आसीत् [४]। पुनश्चास्मिन् हिरण्यं तथा लोमरूपेण औषधयः वनस्पतयश्च प्रादुर्भूताः। नवपरिणामतः परिणमने सति निर्मिता पृथिवी आग्नेयी इत्युच्यते – **"आग्नेयी पृथिवी"**[५] इत्यादिना। येन प्रकारेण माता पुत्रं स्वगर्भे धारणं धारयति तथैव भूमौ विद्यमाना उखा प्राणिनां हितकारिणमग्निं स्वमध्ये धारणं करोति। तदाह–

**"मातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योनावभारुखा। तां विश्वैर्देवैः ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा विमुञ्चतु॥"** [६] इति।

---

[१] **मैत्रायणी संहिता १.६.३**

[२] **श०प०ब्रा० ६.१.३.३**

[३] **ऋक्० ७.१५.१४**

[४] **श०प०ब्रा० २.२.४.३**

[५] **ता०ब्रा० १५.४.८**

[६] **शु०य० १२.६१**

कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां कथतमस्ति यत् यदा प्रजापतिना पृथिव्यामग्निप्रज्वालनस्य इच्छा प्रकटिता तदा पृथिव्या अग्निः निषिद्धः कथितश्च यदि भवान् प्रज्वलितो भविष्यति चेदहं कम्पायमाना भवामि–

**"प्रजापतिरग्निमाचिकीर्षत। तं पृथिव्यब्रवीत् न मय्यग्निं चेष्यतेऽति मा धक्ष्यति। सा त्वाति दह्यमाना विधविष्ये"**[१] इति।

एतन्मन्त्रः पृथिव्यां भूकम्पस्य पूर्वसंकेतं प्रतिपादयति, पृथिव्यां गिरिः तथा हिमवान् पर्वतः स्तः। अश्मापांसू त्रिविधाः मृत्तिकाः बभ्रुः, कृष्णाः तथा रक्ताः च सन्ति। गिरिः, पर्वतः वनस्पतयश्च पृथिव्याः उपरि विद्यमानभागस्याध्ययनाय प्रेरयन्ति, एवमेव पृथिव्यां प्राप्ता त्रिविधा मृत्तिका पृथिव्यभ्यन्तरे प्राप्तरसायनानामध्ययनाय प्रेरयति। कृष्णा मृत्तिका बेसाल्टस्य रासायनिकविघटनद्वारा निर्मिता इति कथ्यते। लौहयुक्ता, खनिजयुक्ता, कणयुक्ता च मृत्तिका कार्पासोत्पादने उत्तमा भवति। एवमेव रक्ता मृत्तिका तु लौहस्य आँक्साइडित्यस्य उपस्थितिकारणेन भवति। रक्तमृत्तिकायां चूराक्षारस्य, नाइट्रोजनित्यस्य तथा फास्फोरसस्य न्यूनता भवति। तस्मादेषा भूमिः धान्यादिकमधिकं नोत्पादयति[२]। भूमिः खनिजसम्पदां संचयो वर्तते –

**विश्वम्भरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी** इति। यजुर्वेदश्रुतिरपि कथयति –

**स्योना पृथिवि नो भवानृक्षरा निवेशनी।**
**यच्छा नः शर्म सप्रथाः**[३] इति।

---

[१] **कृ०य०तै०सं० ५.५.२**

[२] **भौतिकभूविज्ञानम् द्र०पृ० ६०-६४**

[३] **यजुर्वेदः ३५.२१**

हे पृथिवि! त्वमस्माकं कृते सुखकारिणी, कण्टकादिरहिता, वसनयोग्या च भव, त्वं सर्वविधप्रकारेण विस्तृता भूत्वा अस्माकं कृते स्थानं सुखं च प्रदेहि। खनिजसम्पदायान्तर्गतं पृथिव्यां तथा समुद्रस्यान्तिरिकभागे प्राप्यमानः पदार्थः वर्तते। पृथिवी सम्पदाः गृहमित्युच्यते। अत्र च मणयः, सुवर्णमित्यादिकं सर्वमपि प्राप्यते। तदाह–

**निधिं बिभ्रती बहुधा गुहा वसु मणिं हिरण्यं पृथिवी ददातु मे।**
**वसूनि नो वसुदा रासमाना देवी दधातु सुमनस्यमाना"**[१] इति।

**जलतत्त्वम्** –

जलदेवतया विश्वप्रपञ्चमपि गर्भरूपेण धारणं कृतमासीत्। तदा हिरण्यगर्भः विद्यमानः जातः[२]। भूमेः उपरि आनयने कारणत्वात् जलस्य नाम उदकमपि कथ्यते। तदाह–

**"उदानिषुर्महीरिति तस्मादुदकमुच्यते"**[३] इति।

जलं स्वास्थ्यस्य कृते प्रकृतेः सर्वश्रेष्ठः उपहारः विद्यते। यजुर्वेदे जलस्य विभिन्नगुणानामुल्लेखः वर्तते। जन्मतः आरभ्य लयपर्यन्तं यत् वस्तु उपयोगि भवतु तस्यैव जलमिति संज्ञा वर्तते। मित्रवरुणदेवयोः जलं रूपं प्रदत्तम्। जलं पूर्वं वायुरूपे आसीत्, मित्रवरुणौ वायू स्तः, एतौ यदा अग्निना सह मिलन्ति तदा जलमुत्पादयन्ति अथवा प्रकटयन्ति। आधुनिकविज्ञानानुसारेण जले हाइड्रोजनस्य आक्सीजनस्य च सम्मिश्रणं वर्तते। एतौ वायू मानवजीवनस्य कृते परमलाभदायकौ स्तः। आक्सीजनवायोः उपयोगिता तु सर्वविदिता एव, आक्सीजनवायुः वयं न

---

[१] **अथर्ववेदः १२.१.४४**

[२] **आपो ह यद्बृहतीर्विश्वमायन्गर्भं दधाना जनयन्तीरग्निम्।**
**ततो देवानाꣳ समवर्ततासुरेकः कस्मै देवाय हविषा विधेम॥ (शु०य० २७.२५)**

[३] **तैत्तिरीयसंहिता ५.६.१.३**

केवलं श्वासमाध्यमेन स्वीकुर्मः अपितु जलमाध्यमेनापि ग्रहणं कुर्मः। यजुर्वेदे जलस्य अनेके प्रकाराः प्रतिपादिताः सन्ति – आकाशात् पतितं दिव्यं जलं समुद्रजलम्[१] उच्यते, निर्झरात् यत्स्रवते तज्जलं प्रस्रवणमुच्यते, यत्तु खनित्वा कूपान्निष्कास्यते एवं स्वयं भूमिमुत्पाट्य स्रवितं भवति तस्य नाम जलमित्युच्यते। जलमस्माकं पापान्मुक्तिं प्रदाय परमपवित्रं करोति, भगवती श्रुतिरपि कथयति –

**यदापो अघ्न्या इति वरुणेति शपामहे ततो वरुणनो मुञ्च**

यज्जलं स्वच्छस्थापनयोग्यं तत् जलमस्माभिः कलुषितं कृतम्। हे वरुण! तस्मात् पापात् अस्मभ्यं मोचय, देवराजेन्द्रोऽपि जलपानस्य ऊर्जाद्वारा आनन्दो भूत्वा शत्रून् तिरस्करोति। यजुर्वेदस्य श्रुतिः कथयति–

**सिञ्चन्ति परिषिञ्चन्त्युत्सिञ्चन्ति पुनन्ति च।**
**सुरायै बब्भ्वै मदे किन्त्वो वदति किन्त्वः॥**[२]

अर्थात् सोमरसं सुरातः सिञ्चितं परिसिञ्चितमेवमुत्सिञ्चितं कुर्वन्ति। तेन सः सोमरसः पवित्रो भवति। पीतवर्णसुरायाः मदे इन्द्रः शत्रून् कथयति त्वं किमसि? त्वं किमसि? इत्यादितिरस्कारवाक्यं कथयति। समुद्रस्याभ्यन्तरे अमूल्यानि रत्नानि प्राप्यन्ते, गङ्गा, यमुना, सरस्वती, शुतुद्री, परुष्णी, आसिक्न्यादि नामानि ऋग्वेदे प्राप्यन्ते। सरस्वतीनामकनदी पर्वतात् निःसृत्य समुद्रपर्यन्तं स्यन्द्यन्ते स्म, या सम्पूर्णविश्वस्य कृते धनधान्यं प्रदाय समीपस्थदेशेभ्यः घृतं पयश्च च ददाति स्म। तदाह –

**एकाचेतत् सरस्वती नदीनां शुचिर्यती गिरिभ्य आ समुद्रात्।**
**रायश्चेतन्ती भुवनस्य भूरेर्घृतं पयो दुदुहे नाहुषाय॥**[१]

---

[१] **समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वोषधीरुतापः। ( शु.य.२०.१९ )**

[२] **शु०य०वे० २०.२८**

यजुर्वेदस्य श्रुतिरपि कथयति –

**पञ्च नद्यः सरस्वतीमपियन्ति सस्रोतसः।**
**सरस्वती तु पञ्चधा सो देशेऽभवत्सरित्॥**[२]

सरस्वत्या सहायकनदीभिः सह पञ्चनद्यः सरस्वतीनदीं सङ्गमं कुर्वन्ति। पञ्च धारायां प्रवाहिता सा सरस्वती स्वप्रवाहप्रदेशे एका एव सरिज्जाता, अर्थात् पञ्चनदीभिः स्वस्याः नाम त्यक्त्वा सरस्वत्याः नाम धारणा कृता। जलं समस्तरोगद्वारा निवारणस्य महौषधिः वर्तते। उदकस्य शतनामानि निघण्टुग्रन्थे[3] दत्तानि सन्ति। जलमारोग्यस्य वर्धकं, रोगनिवारकं रसतत्त्वमस्ति। तस्य प्रतिपादनं यजुर्वेदस्य श्रुतिः करोति –

**संवपामि समाप ओषधीभिः समोषधयो रसेन।**
**सꣳरेवतीर्जगतीभिः पृच्यन्ताꣳ संमधुमतीर्मधुमतीभिः पृच्यन्ताम्॥**[४]

**आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे॥**
**यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः।**
**तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥**[५]

जलं सुखदायि वर्तते। तज्जलमस्मभ्यं महारमणीयप्रकाशाय बलं धारयतु। हे आपः! युष्माकं यः अत्यन्तं सुखकरः सारः, तस्य भागी अस्मान् कारय। यथा कामयमाना माता स्वपुत्रं स्तनपानं कारयति तथैव। हे आपः! वयं युष्मभ्यं तस्य कृते प्रचुरमात्रायां प्राप्नुयुः, यस्य यज्ञगृहे त्वमनुकूलं भवसि, तादृशं जलं त्वमस्मभ्यं पवित्रं कुरु। अभीष्टसिद्ध्यर्थं रोगनिवारणार्थञ्च स्तुतिः कृता वर्तते। यजुर्वेदस्य श्रुतिः कथयति –

---

[१] **ऋग्वेदः ७.९५.२**

[२] **यजुर्वेदः ३४.११**

[३] **निघण्टु १.१२**

[४] **शु०य० १.२१**

[५] **शु०य० ३६.१४-१६**

**शं नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभिस्त्रवन्तु नः।।**[1]

अभीष्टसिद्ध्यर्थं पाननिमित्तं विद्यमानं जलमस्माकं कृते सुखदं भवतु, अस्माकं सुखप्राप्तये तथा रोगनिवारणार्थञ्च अनुकूलतया स्त्रवतु। चराचरात्मकसृष्टेः प्रारम्भिकस्य स्वरूपस्य विषये वेदे पञ्चशब्दाः प्राप्यन्ते – गर्भः, अण्डः, हिरण्यगर्भः, प्रजापतिः, पुरुषः। ऐषु क्रमशः त्रयः शब्दाः गर्भस्य विकसितावस्थां प्रदर्शयन्ति। भगवती श्रुतिरपि कथयति –

**स ईं वृषाजनयत् तासु गर्भं स ईं शिशुर्धयति तं रिहन्ति।**
**स अपां नपादनभिम्लातवर्णोऽन्यस्येवेह तन्वा विवेष।।**[2]

बलवान् अग्निः जले गर्भं स्थापितवान्। सः शिशुः जलं पिबति तथा जलं शिशोः लेहनं करोति। पुनः जलस्य पुत्रः (अपां नपात्) अत्यन्तप्रदीप्तवर्णयुक्तो भूत्वा अस्यां पृथिव्यां द्वितीयशरीररूपेण व्याप्तो जातः। गर्भः सर्वप्रथमं जलेन धारणं कृतः, यतः सृष्टेः प्रारम्भः स्वीक्रियते। गर्भं सर्वप्रथमं जलेन धारणं कृतः यत्राधुना देवताः एकत्रीजाताः। तदनन्तरमजन्माप्रकृतेः नाभौ स्थितो जातः, यत्र समस्तलोकाः स्थिताः सन्ति। अर्थात् सर्वेषां लोकानां निर्माणं प्रकृतेः नाभितः जातम्। यत्र पुरुषेण बीजवापः कृतमासीत्, भगवती यजुर्वेदस्य श्रुतिः कथयति–

**तमिद् गर्भं प्रथमं दध्र आपो यत्र देवा समगच्छन्त विश्वे।**
**अजस्य नाभावध्येकमर्पितं यस्मिन् विश्वा भुवनानि तस्थुः।।**[3]

---

[1] शु०य० ३६.१२

[2] ऋग्वेदः २.३५.१३

[3] तै०सं० ४.६.२.३., ऋक्० १०.८२.६

गर्भमग्ने: जन्मदातु: विशालजलेन धारणं कृत्वा सर्वत्र व्यप्तीकृतम्। यजुर्वेदोऽपि दिव्यजलद्वारा अत्यधिकप्रियगर्भं सुष्ठु पोषितं तथा धारणकृतमिति कथयति – **"देवीराप एष वो गर्भस्तꣳ सुप्रीतꣳ सुभृतं बिभृत"**[1] इति।

आप: अग्ने: जन्मदात्र्य: इति कथिता वर्तन्ते, निष्कर्षतया अग्नि: (अपांनपात्) जलस्य पुत्र: कथितो वर्तते। अपांनपादेव जले स्थित: गर्भ: वर्तते, अपां नपादित्यपि अग्निरेव। यतो हि पिता एव पुत्ररूपेणोत्पद्यते "आत्मा वै जायते पुत्र:" इत्यादिना। अत्र एतत्स्पष्टं भवति – अग्नि: पिता अस्ति, आप: मातर: सन्ति। अपां नपात् पुत्रोऽस्ति। अमुं गर्भं यजुर्वेद: सुभ्रू: तथा स्वयम्भू: कथयति। यतो हि अग्नि: स्वयमेव स्वं जले गर्भरूपेण स्थापयति। अयञ्च स्वयमुत्पन्न: गर्भ: जलस्य विशालसमुद्रे तिष्ठति –

**सुभूः स्वयम्भूः प्रथमोऽन्तर्महत्यर्णवे।**
**दधे ह गर्भमृत्वियं यतो जातः प्रजापतिः**[2]

यस्मात् परमेश्वरात् संसारस्य रक्षक: सूर्य उत्पन्न:, तादृशेन सुन्दरविद्यमानेन, स्वयं सत्तावता, उत्त्पत्तिनाशरहितेन, सर्वप्रथमेन, पूर्वविद्यमानेन जगदीश्वरेण विस्तृतात् जलात् मुक्तसंसारस्य मध्ये समयानुकूलस्य प्राप्तस्य गर्भस्य धारणं कृतम्। निश्चयेन तस्यैव परमात्मन: यूयं सर्वे उपासनां कुरुत। पूर्वं जलपृथिवीप्रभृतिपञ्चमहाभूतै: परिपुष्ट:, विश्वकर्मा कालस्य प्रीतिवशादुत्पन्नं रसरूपं धारणं कृत्वा आदित्य: प्रतिदिनं पूर्वदिशि उदितो भवति –

**अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्त्तताग्रे**[1] इति। एतज्जलमन्नस्य कारणं भूत्वापि अन्नस्य रसोऽस्ति –

---

[1] **शु०य० ८.२६**

[2] **शु०य० २३.६३**

**मनसः काममाकूतिं वाचः सत्यमशीय। पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा**[2] इति। मनसः काम, एवं सङ्कल्पस्य वाण्याः सत्यं वयं प्राप्नुमः। पशूनां रूपाणि, अन्नस्य रसः, यशः लक्ष्मीश्च मयि आश्रयतु इति एषा आहुतिः। समस्तानामौषधीनामपि औषधिः जलमेवास्ति - **सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः**[3] इति।

जलौषधयः अस्मभ्यं मित्ररूपाः सन्तु, यः अस्माभ्यं द्वेष्टि यस्मात् वयं द्विष्मः। औषधयः तस्य कृते शत्रुरूपाः भवन्तुः। जलधाराः अस्माकं कल्पनां जागरितां कुर्वन्ति, प्रदर्शयन्ति च। भगवती श्रुतिः कथयति-

**कल्पन्तां ते दिशस्तुभ्यमापः शिवतमास्तुभ्यं भवन्तु सिन्धवः।**
**अन्तरिक्षꣳ शिवं तुभ्यं कल्पन्तां ते दिशः सर्वाः**[4] इति।

हे यजमान! तुभ्यं दिशः शुभसङ्कल्पयुक्ताः भवन्तु। जलदेवता तुभ्यं कल्याणकारिणी भवतु। समुद्रः अन्तरिक्षश्च तुभ्यं कल्याणकारिणौ भवतः। सर्वाः दिशः तुभ्यं शुभसङ्कल्पं कुर्वन्तु। प्रशंसनीयं जलमस्माकं कृते हृदये सौम्यभावस्यैवं भावनायाः सृजनं करोति। उच्चतायाः सञ्चारं करोति। जलप्रयोगेण बहवः रोगाः नष्टाः भवन्ति। जलाधानयुक्तः पुरुषस्तु निरन्तरं शान्तप्रकृतिको भूत्वा धारणाध्यानसंयमसमाधिभावनायामोतप्रोतः सन् सदैव तिष्ठति।

जलशब्दः जन्मनः एवं प्रलयस्य निदानकारणत्वात् “यस्माज्जायते यस्मिंश्च लीयते” तदेव जलमित्युच्यते। अर्चनस्य

---

[1] **शु०य० ३१.१७**

[2] **शु०य० ३९.४**

[3] **शु०य० ३६.२३**

[4] **शु०य० ३५.९**

साधनत्वात् जलं अर्चमित्यपि कथ्यते। वृक्षाः जलस्य पालकाः भवन्ति तस्मादेव वनस्पतय इति कथ्यन्ते। कलशब्दोऽपि जलस्य कृते एव प्रयुज्यते, कलं जलं भवतीत्यादि। कलं यस्मिन् शयनं करोति स एव कलश इति। कमनीयतायाः काम्यतायाश्च निदानत्वात् जलं काम्यमित्युच्यते। बिन्दुरूपस्य जलस्य कृते द्रप्सशब्दस्य प्रयोगः भवति। नद्याः कृते मधुमती, गोमती शब्दौ प्रयुक्तौ, जलस्य कृते अर्णशब्दस्यापि प्रयोगो भवति। अत एव सागराय अर्णवस्य प्रयोगो भवति। जलं जीवनधारकमस्ति, अतः धरुणः इत्यपि कथ्यते। जलधाराः समुद्रस्य निर्माणं कुर्वन्ति, अत एव सिन्धुमातरः इत्यपि कथ्यन्ते। समुद्रस्य समुद्रनामकरणमपि समानोदकेन युक्तत्वात् जातम्। जलं शक्तेः संचारं करोति, अतः जलमेव घृतपदेनाप्युच्यते। सर्वत्र व्याप्तत्वात् जलमेव आप इत्यपि कथ्यते, जलस्य वाहनत्वात् मेघमुद्वाहः कथ्यते। मिह सेचने शब्दात् मेघस्योत्पत्तिर्भवति। पूजा, प्रतिष्ठा गरिमा, धीरता शान्त्यादीनां सम्मानितोऽर्थः जले निहितो वर्तते। जन्मनः कारणत्वात् जलधारा योनिरस्ति।

जलस्य गुहायामग्नेः वासः भवति – “आपो ज्योतिः” इति। जलमार्द्रतायाः कारणमस्ति, अत एवास्य नाम आम इत्यस्ति। मेघस्य कृते उत्सशब्दस्य प्रयोगो भवति यतोहि मेघादेव जलस्य उत्सृजनं भवति। शुद्धतायाः पावनतायाः प्रतीकत्वात् गङ्गा मन्दाकिनी कथ्यते – गं जलं गमयतीति गङ्गा। जलमयपर्वतत्वात् मन्दरनाम प्रसिद्धं जातम्। मन्दे प्रशस्ते जले रमते। जलं रसमपि[१] कथ्यते। जलस्य विविधतां प्रकाशयितुं यजुर्वेदश्रुतिः कथयति –

---

[१] **यो वः शिवतमो रसः (शु.य. ३६.१५)**

**ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्।**
**स्वधा स्थ तर्पयत मे पितृन्**[१] इति।

हे आपः! अन्नम्, अमृतम्, घृतम्, दुग्धम्, रसम्, सुराञ्च धारयित्वा त्वं स्वधारूपो भव, तथा अस्माकं पितरं पूर्णतया जीवितं कुरु। यथा बोधहीनं शास्त्रं, लवणहीनं भोजनम्, नाड़ीज्ञानं विना वैद्यः निरर्थकः तथैव जलं विना जगदेतत् निस्सारभूतं वर्तते। जलं शुरुध इति कथ्यते, यतो हि क्षुधारूपस्य दुःखस्य निवारणं करोति। अस्मादेव हेतोः जलं शुरुधः इति कथ्यते – "क्षुद्रूपस्य शोकस्य रोधयित्री। शमनाय दुःखानां यो मिश्रणाय च सुखानाम्" इति। एवं प्रकारेण जलधारां देवीं प्रतिपाद्य तत्र देवतत्त्वस्याधानं कृतं वर्तते[२]।

**अग्नितत्त्वम्** –

यजुर्वेदे अग्नेः महत्वपूर्णं स्थानं वर्तते। विश्वस्य मूलभूतं कारणमग्निरेवास्ति। आचार्ययास्केन अग्निपदस्य निर्वचनं निगदितं यत् – अग्रे गच्छतीति अग्निः। अर्थात् अग्निः प्रधानमथवा अग्रगामी भवति। देवेषु प्रथमोत्पत्तिः अग्नेः जातः। तस्मादेव सोऽग्निः, तदाह शतपथब्राह्मणस्य श्रुतिः –

**तद्वा एनमेतदग्रे देवानामजनयत।**
**तस्मादग्निरग्निह वै नामैतद्यदग्निरिति**"[३] इति।

सोऽग्निः तस्मादेव कारणात् वर्तते। यतो हि सः यज्ञयागादिषु सर्वप्रथममानीयते। सः सर्वेषां तृणकाष्ठादिपदार्थानामाश्रयं प्राप्य तान् पदार्थान् स्वाधीने करोति। अग्निः स्निग्धो न भवति, अपि सर्वान् रसान्

---

[१] **शु०य० २.३४**

[२] **शु०य० ३६.१२**

[३] **श०ब्रा० २.२.४.२**

शुष्कयति, यत्र गच्छति तत्र विद्यमानान् पदार्थान् स्वाधीनं करोति। तस्मादेव अग्नेर्नाम अग्निरिति। शाकपूर्णि-आचार्यैः क्रियात्रस्य गतिदहनप्रापणानां योगेन अग्निपदस्य सिद्धिः कृता। अग्निशब्दस्य पर्यायवाचकं वैश्वानरशब्दमादाय यास्केन बहूनामाचार्याणां मतस्योल्लेखः कृतः। केचनाचार्याः वैश्वानरं मध्यमधर्मा विद्युदिति, एवञ्च आदित्यं स्वीकुर्वन्ति। अचार्यशाकपूर्णिना अग्निः वैश्वानररूपेण स्वीकृतः।

श्रौतस्मार्तगृह्यकर्मणां दृष्ट्या एकस्यैवाग्नेः अनेके भेदाः, एवं विविधनामानि जातानि। सोमयागस्य अग्निष्टोमादिसप्तसंस्थानैः, श्रौतयागैश्च मुख्यरूपेण आहवनीयगार्हपत्यदाक्षिणाग्नयः त्रय एव प्रतिपादिताः। आहवनीयाग्निमररणिमन्थनद्वारा उत्पाद्यते, मन्थनद्वारा बलपूर्वकं मन्थनं कृत्वा निष्कासनकारणात् अस्य नाम सहस्त्रपुत्रः, बलपुत्रः जातः। शवदाहाग्नेः नाम क्रव्यादोऽस्ति। श्रौते स्मार्त्ते चाग्नौ सूक्ष्मरूपेण कुत्रापि क्रव्यादः एवमामादाग्निः न भवन्तु इति कृत्वा स्थण्डिलवेदी अथवा कुण्डे स्थापनात् पूर्वं नैर्ऋत्यकोणे क्रव्यादः एवमामादाग्नेरंशाः यज्ञाद्बहिः निस्काष्यते। यजुर्वेदस्य श्रुतिरपि कथयति-

**धृष्टिरस्यपाग्ने अग्निमामादं जहि निष्क्रव्यादꣳ सेधा देवयजं वह**[1] इति। हे उपवेष! त्वं प्रगल्भः असि, आमादमर्थात् अपक्वपदार्थस्य भक्षणकारणात् लौकिकाग्निः, क्रव्यादः अर्थात् प्रेतमासादिपदार्थस्य भक्षणकारणात् चिताग्निः, तथा यज्ञीयाग्निः। एवं प्रकारेणाग्नेः त्रयः भागाः सन्ति। हे गार्हपत्याग्ने! त्वमामादाग्नेः त्यागं करोतु एवं क्रव्यादाग्निं दूरीकरोतु। यज्ञियाग्निं तु समीपे स्वीकरोतु। स्मार्तकर्म एव गृह्यकर्म आवसथ्याग्नौ क्रियेते। पारस्करगृह्यसूत्रे कथितं वर्तते यत् - **आवसथ्याधानं दारकाले। दायाद्यकाल एकेषाम्**[2] इति। यदि कापि

---

[1] **शु०य० १.१७**

[2] **पा०गृ० १.२.१-२**

व्यक्तिः विवाहसमये आवसथ्याग्नेः आधानं कर्तुं न शक्नोति तदा गृह्यकर्माणि लौकिकाग्नौ एव कर्तव्यानि। गर्भाधानादिषोडशसंस्कारेषु स्मार्तकर्मसु च अग्नेः भिन्नानि भिन्नानि नामानि सन्ति। लौकिकयागे यस्याग्नेः स्थापना भवति तस्य सामान्यरूपः पावकाग्निः वर्तते। यजुर्वेदस्य श्रुतिः अग्नेः स्तुतिं कथयति –

**पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः।**
**पयस्वतीः प्रदिशः सन्तु मह्यम्**[1] इति।

हे अग्ने! त्वं पृथिव्यां रसस्य स्थापनां कुरु, औषधिषु, द्युलोके, अन्तरिक्षे च जलस्य स्थापनां कुरु। हे अग्ने! तव कृपया एताः सर्वाः प्रकृष्टदिशाः मम कृते रसपूर्णाः भवेयुः। वैदिकः ऋषिः व्रतानुष्ठानादीनां निर्विघ्नतापूर्वकं समाप्तये अग्नेः प्रार्थनां करोति। भगवती श्रुतिरपि कथयति– **अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम्। इदमहमनृतात्सत्यमुपैमि**[2] इति। अनुष्ठेयव्रतरूपस्य कर्मणः पालकः हे अग्निदेव! तव अनुज्ञया एव व्रतकर्मणः अनुष्ठानमकुर्वम्। तव अनुग्रहादेव अहमनुष्ठानकरणे समर्थोऽभवम्, मया क्रियमाणस्य कर्मणः फलप्राप्तिपर्यन्तं निर्वघ्नरूपेण सिद्धं कुरु। व्रतसमाप्त्यनन्तरं पुनः प्रार्थनां करोति– **"अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मेऽराधीदमहं य एवास्मि सोऽस्मि"**[3] इति। व्रतानां पालक हे अग्ने! तव कृपया एव मया यज्ञरूपस्य व्रतस्याचरणं निर्विघ्नतया कृतम्, तव कृपयैव मम व्रतोऽपि पूर्णः, हे अग्ने! तस्य व्रतस्य मया समापनं कृतम्। अधुना तस्य यज्ञस्य विसर्जनं कृत्वा अहं तदेव यः मनुष्ये व्रतात्पूर्वे आसम्।

---

[1] **शु०य० १८.३६**

[2] **शु०य० १.५**

[3] **शु०य० २.२८**

**वायुतत्त्वम्** –

वायुः सम्पूर्णस्य जगतः स्वामी वर्तते। वायोः शब्दः पर्वतगुफादिषु विविधप्रकारेण गर्जनां करोति। आकाशं स्पृष्ट्वा पृथिव्याः कणं प्रवाह्य चलति। विशेषरूपेण स्थिताः पर्वताः वृक्षादयः पदार्थाः अपि वायोरनुकूलदिशायामेव गतिं कुर्वन्ति। अन्तरिक्षे स्थितमार्गद्वारा चलन् वायुः कदापि न तिष्ठति। सदैव प्रवहति। वायुः जलस्य मित्रमस्ति, तथा प्रथमोत्पत्तिरपि अस्यैव। वायुः सत्यनियमानां नियमितरूपेण पालनं करोति। वायुदेवता सर्वत्र विद्यमाना वर्तते। ऋग्वेदस्य श्रुतिः प्रतिपादयति–

**आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव एषः।**
**घोषा इन्द्रस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेम॥**[१]

वायुः इन्द्रादिदेवतानामपि आत्मा अर्थात् एतेषु जीवरूपेण विद्यमानं वर्तते, सम्पूर्णभुवनस्य अर्थात् प्राणिमात्रस्य अथवा पञ्चमहाभूतस्य बीजमस्ति, तान् पञ्चमहाभूतान् स्वगर्भे धारणमपि करोति। एवं प्रकारेण दिव्यशक्तिसम्पन्नः वायुः स्वेच्छया विचरणमपि करोति, वायोः केवलं शब्दमेव श्रूयते, रूपं तु कदापि न दृश्यते। रूपरहितत्वात् शब्देनैव अनुमानं कर्तुं शक्यते। वायुदेवतायाः हविर्द्वारैव पूजा विधातव्या, ब्राह्मणग्रन्थस्य श्रुतिः कथयति यत् अन्यदेवतावत् वायुदेवतापि सोमपायी अस्ति। सोमपानस्य सन्दर्भे वायोः प्रथमं सम्मानं भवति। यतो हि समस्तासु देवतासु वायुः अत्यन्तवेगवानस्ति[२]। मरुद्गणाः अपि वायोः सहायकाः सन्ति, मरुद्गणानां मुख्यं कार्यं पर्जन्यः वृष्टिरस्ति। मरुद्गणाः भूमौ विद्यमानं जलं स्वबलेन आकाशे उत्कृष्य पुनः वर्षारूपेण पृथिव्यामेव अन्नफलपुष्पवनस्पतीनामुत्पाद्यर्थं सहयोगं

---

[१] **ऋग्वेदः १०.१६८.४**

[२] **श०ब्रा० १२.१.२.७**

कुर्वन्ति। एते सामान्यरूपेण समस्तजीवान् प्राणवायुमपि प्रददति, भगवती श्रुतिरपि कथयति–

**वायो ये ते सहस्त्रिणो रथासस्तेभिरागहि। नियुत्वान्त्सोमपीतये।।**[१]

हे वायो! तव ये सहस्रसंख्याकाः रथाः, तेषु युतो भूत्वा सोमरसपानार्थमागच्छ इति।

**आकाशतत्त्वम्** –

अत्यधिकविस्तारयुक्तः पालनकर्ता पितृरूपः आकाशः सर्वेषां लोकानां रक्षां करोति। अत्यधिकप्रगल्भः आकाशः शरीरस्य कृते हितकरः पितृसदृशोऽस्ति, यः सर्वतः पितृरूपः द्युलोकः स्वस्य विविधरूपद्वारा अथवा प्रकाशद्वारा वर्षाद्वारा वा अधिष्ठितो भवति। द्युलोकः भुवनस्य रक्षकोऽस्ति, अन्तरिक्षात् सुष्ठुलोकस्य कामना कृता वर्तते–

**द्यौस्ते पृथिव्यन्तरिक्षं वायुश्छिद्रं पृणातु ते।**
**सूर्यस्ते नक्षत्रैः सह लोकं कृणोतु साधुया।।**[२]

शान्तिप्राप्त्यर्थमाकाशादिदेवताभिः प्रार्थना कृता वर्तते –

**द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि**[३] इति। वेदे द्यौः शब्दः आकाशाय बहुधा प्रयुक्तः, द्यौरमनेकस्थले पिता कथ्यते–

---

[१] **शु०य० २७.३२**

[२] **शु०य० २३.४३**

[३] **शु०य० ३६.१७**

**उरुव्यचसा महिनी असश्चता पिता माता च भुवनानि रक्षतः।**
**सुधृष्टमे बपुष्ये ३ न रोदसी पिता यत्सीमभि रूपैरवासयत्॥**[१]

द्यौरर्थः आकाशः, एवं तदभिमानिनी देवता द्यौरिति। द्यौरग्निरदर्थात् वज्रधारी कथितो वर्तते, मेघात् सः स्मितं करोति, अर्थात् मेघस्य गर्जना आकाशे स्मितं भवति। प्रलयकारिणः मेघस्य गर्जना युक्तियुक्ता एव भवति, द्यावापृथिव्योरेव सम्पूर्णदेवताः निवसन्ति, समस्तदेवताः द्यावापृथिव्यौ गर्भस्थाः सन्ति। आकाशः वैदिकपञ्चतत्त्वेषु अन्यतमः। ईश्वरेण सर्वप्रथममाकाशस्योत्पत्तिः कृता। यथा –

**तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशाद्वायुः। वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी। पृथिव्या ओषधयः, ओषधीभ्योऽन्नम्। अन्नाद्रेतः, रेतसः पुरुषः। स वा एष पुरुषोऽन्नरसमयः।**[२]

**आकाशमण्डलम्** – अन्तरिक्षमण्डले यदा सूर्यनक्षत्रपृथिवीपिण्डादयः उत्पद्यन्ते तदा तस्य अन्तरिक्ष इति नाम कथ्यते[३]। ध्रुवः वरुणश्च सम्पूर्णज्योतिष्पिण्डाकाशे ध्रुवमाधारीकृत्य भ्रमतः, यस्मिन् परिधिमण्डले ध्रुवः तं भ्रामयति स एव वरुणः[४]। सूर्योऽपि स्वकक्षे परिभ्रमणं करोति, परिभ्रमणं विना किमपि पिण्डं स्थातुं न शक्नोति, आकाशस्य नक्षत्राणि वातसूत्रेण अर्थात् वायुधारया प्रस्तारितानि। अनेन भ्रमणेनैव कालः ऋतवश्व उत्पद्यन्ते। कालस्य विषये सूर्यवर्षम्, चन्द्रवर्षम्, इन्द्रवत्सरः, संवत्सर इत्यादीनां यजुर्वेदे[५] विवेचनं कृतं वर्तते।

---

[१] **ऋग्वेदः १.१६०.२**

[२] **तैत्तिरीयारण्यकम्**

[३] **ऋग्वेदः ३.५४.१९**

[४] **ऋग्वेदः ८.४१.९**

[५] **शु०य० २७.४५**

**नक्षत्राणि** – आकाशमण्डले विद्यमानानि तानि तारकादीनि नक्षत्राणि कथ्यन्ते। तानि व्योमकक्षायां परस्परं यथोक्तान्तरे सदैव वर्तमानमिव दृष्टिगोचराः भवन्ति। वेदे अष्टविंशतिः नक्षत्राणि कथितानि सन्ति[1]।

**राशयः** – द्वादश राशयः सन्ति। राशीनां सम्बन्धः पृथिव्याः भ्रमणेन वर्तते, राशीनां नामानि आकाशे विद्यमाननक्षत्राकारविशेषाधारेण स्थापितानि।

**ऋषयः** – याः तारकाः व्योमकक्षायामर्थात् नक्षत्रचक्रं त्यक्त्वा अन्यत्राकाशे वर्तमानं सत् ध्रुवस्य परिक्रमां कृत्वा स्वस्थाने यथाक्रमं विद्यमानाः सन्ति, ते एव ऋषयः कथ्यन्ते। प्रथमस्थानं सप्तर्षीणां वर्तते, सप्तर्षयः धुव्रतारकायाः सर्वतः एकश्रृंखलायां परिक्रमां कुर्वन्ति[2]।

**आकाशगङ्गा** – चन्द्रविहीनरात्रौ आकाशे श्वेताः तेजस्विनः नदीसदृशा लम्बायमानाः प्रकाशधारायाः समूहा एव आकाशगङ्गा कथ्यन्ते।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'वैश्विकदृष्ट्या यजुर्वेदे प्रकृतिचिन्तनस्य समीक्षणम्'** नाम चतुर्दशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

---

[1] **अथर्ववेदः १९.८.१-२, एवं १९.७.२-५**

[2] **अथर्ववेदः १५.३.२१-२२**

# अथ पञ्चदशोऽध्यायः
# यजुर्वेदे पुरुषसूक्तसमीक्षणम्

पुरुषसूक्ते परमात्मनः विविधव्यूहात्मकस्वरूपाणां वर्णनं विद्यते। मन्त्रानुसारं सः सर्वव्यापकः अनादिः अनन्तश्च विद्यते। तस्यैव दिव्यप्रकाशः सर्वेषां प्राणिनामन्तःकरणेषु प्रकाशते। तथापि सः अन्तःकरणानां धर्मेभ्यः निर्लिप्तः विद्यते। सर्वस्मात् परं तस्य चेतनात्मकस्वरूपमेव विद्यते।

पुरुषसूक्तस्य द्वितीये मन्त्रे जगत् परमात्मनः स्वरूपमिति। स एव सर्वेषां देवानामीशानः। तथान्येनातिरोहति। स सोमप्रभृतियागैः प्रकाशते। सः स्वरूपसौन्दर्यधनः दिव्यकामात्मकः ध्यानगम्यश्च विद्यते। त्रिपाद्विभूतौ नित्यं लोकेषु परमात्मा विविधरूपेण विराजमान इति। सः दुर्निकरस्वरूपः योगमायासमन्वितः। एतदेव रूपं जगतः कारणं विद्यते।

आत्मशोधनयज्ञे देवाः पुरुषशरीराभिमानिनं जनं कुशसंसाधनैः प्रोक्षितमकरोत्। तेन सः अग्रजन्मा ब्राह्मणः ब्रह्मज्ञानसम्पन्नोऽभवत्। इन्द्रादिदेवाः साध्याः ऋषयश्च यजनं चक्रुः। ततः सर्वे अनेन विधिना आत्मशोधनं विधाय मोक्षं प्राप्तवन्तः। सर्वाणि कर्माणि भगवदर्पणबुद्ध्या कृतानि यज्ञाः भवन्ति।

कर्मरूपयज्ञैः सात्त्विकाः पुरुषाः यज्ञस्वरूपं परमात्मानमजयन्। भगवदर्पणबुद्ध्या कृतं कर्म यज्ञरूपमजायत। ये विद्वांसः साधकाः वा भगवतो यजनरूपकर्माणि आचरन्ति कुर्वन्ति ते भगवतो दिव्यरूपमालभन्ते, तत्र मोदन्ते च। तत्रैव साध्यः आराध्यः आदिदेवः

परमात्मा विराजमानः विद्यते। तस्याधिगमनं पुरुषसूक्तस्याध्ययनस्य अर्थज्ञानस्य लक्ष्यं विद्यते।

**सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।**
**स भूमिꣳ सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥**[1]

परमात्मविज्ञानानन्दादिगुणाध्यात्मनि प्रभूतः पुरुषमेधो यज्ञः प्रजापतिलोककालाग्न्यादिवपुः पुरुषोत्पत्तिस्थितिसंहृतीनां हेतुः स्वर्गापवर्गैश्वर्यमोक्षदो ज्ञानकर्मसमुच्चयकारणम्। शरीरमिति त्रैधातवी उदवसनीयेष्टिः। तदन्ते अयं ते योनिरित्यग्नी आत्मनि समारोह्य तदुष्माणामास्ये प्रवेश्याद्भ्यः संभृत इति अनुवाकेन सूर्यमुपस्थाप्य पश्चादपश्यन्वनं गत्वा ग्रामं न गच्छेत्। वानप्रस्थो भवेत्। अथवा ग्रामे वस्तुमिच्छन् अरण्योरग्नी समारोप्यार्कोपस्थानानन्तरं ग्रामं गत्वा यज्ञान् कुर्यात्।

अव्यक्तमहदादिविलक्षणः चेतनो यः पुरुषः प्रसिद्धः सः सर्वप्राणिसमष्टिरूपो ब्रह्माण्डदेहो विराजकोऽस्ति। सः सहस्रशीर्षा असंख्यशिरः नारायणः पुरुषः। असंख्यनेत्रैर्युक्तः बहुद्रष्टा सर्वद्रष्टा सर्वविधज्ञानैः पूर्णः सर्वत्र गमनशीलः सन् नानारूपैः विराजते। पञ्चभूतानि व्याप्य दशाङ्गुलपरिमितं देहमत्यतिष्ठत् अतिक्रम्यावस्थितः।

**पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम्।**
**उतामृतत्वस्येशानो यदन्नेनातिरोहति॥**[2]

यदिदं वर्तमानं जगत् तत्सर्वं पुरुष एव। यत् अतीतं जगत् यत् भविष्यं जगत् तत्सर्वं पुरुषः परमात्मा एव। यथा अस्मिन् कल्पे वर्तमाना प्राणिदेहाः सर्वे परमात्मानः अवयवाः सन्ति। तथैव आगमिनोऽपि

---

[1] **शु०य० ३१.१**

[2] **शु०य० ३१.२**

कल्पस्य परमात्मनः अवयवाः सन्ति। स एव अमृतधर्माणां देवानां स्वामी प्राणिनां भोग्येनान्नेन फलेन निमित्तभूतेनातिरोहति। स्वीयां कारणावस्थामतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति। तस्मात् पुरुष एव इदं सर्वम्। स मोक्षस्य स्वामी न हि मृत्युं प्राप्नोति। जीवजातमन्नेनातिरोहत्युत्पद्यते। ब्रह्मादिस्तम्बपर्यन्तो भूतग्राम उक्तः। तस्यान्नेनैव स्थितिः।

**एतावानस्य महिमातो ज्यायाँश्च पूरुषः।**
**पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि॥**[१]

अतीतानागतवर्तमानकालसम्बद्धजगदादिसर्वस्मिन् परमात्मनः महिमा वर्तते। तस्यैव स्वकीयसामर्थ्यविशेषो विभूतिः। अतः अस्मात् जगज्जालात् तस्य महिमा अधिको वर्तते। यावन्मात्रं दृश्यमानं निखिलं ब्रह्माण्डं वर्तते तावन्मात्रं पुरुषस्य चतुर्थांश एकपादमात्रं वर्तते। तस्य परमात्मनः पुरुषस्यावशिष्टं त्रिपाद्भागम् अमृतमरणधर्मरहितं ऋग्यजुःसामलक्षणम् आदित्यरूपेण दिवि प्रकाशते। पादचतुष्टयं निरूपयितुमशक्यं तथापि जगदिदं ब्रह्मरूपापेक्षयाल्पमिति।

**त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः।**
**ततो विष्वङ्व्यक्रामत्साशनानशने अभि॥**[२]

योऽयं त्रिपात्पुरुषः संसारस्पर्शरहितब्रह्मरूपः अयमूर्ध्वमुदैत् अस्मादज्ञानकार्यात् संसाराद्बहिर्भूतोऽत्रत्यैर्गुणदोषैरस्पृष्टः उत्कर्षेण स्थितवान्। अस्य पादलेशजगद्रूप इह मायायां पुनरभवत् सृष्टिसंसाराभ्यां पुनः पुनरागच्छति। निखिलस्य जगतः परमात्मलेशत्वं वर्तते। मायायामागत्यान्तरं देवतिर्यगादिरूपेण विविधः सन् व्याप्तवान्। स्वर्गः मोक्षश्च तस्मादेवोत्पन्नः।

---

[१] **शु०य० ३१.३**

[२] **शु०य० ३१.४**

**ततो विराडजायत विराजोअधिपूरुषः।**
**स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥[1]**

तदनन्तरं तस्मादादिपुरुषात् ब्रह्माण्डरूपशरीरमजायत। विराड्देहस्योपरि तमेव देहमधिकरणं कृत्वा एक एव पुमान् पुरुषोऽजायत। सर्ववेदान्तवेद्यः परमात्मा स्वमायया ब्रह्माण्डरूपं देहं सृष्ट्वा तत्र बीजरूपेण प्रविश्य ब्रह्माण्डाभिमानी जीवोऽभवत्। उत्पन्नमात्रेणैव विराट्पुरुषः देवतिर्यङ्मनुष्यादिरूपोऽभवत्। इमानि विविधरूपाणि सृष्ट्वा तेषां निवासार्थं च पृथिवीमसृजत्। भूमेः सृष्टेरनन्तरं विविधजीवानां सृष्टिं रचितवान्। एवमेकोंऽशः तेनैव सर्वं विश्वमुत्पादितम्।

**तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम्।**
**पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये॥[2]**

सर्वज्ञः परमात्मा सर्वहुतमेधाख्यात् यज्ञात् दधिमिश्रमाज्यं सम्पादितवान्। दध्यादिभोज्यपदार्थं सम्पादितवान्। ततः स वायुदेवताकान् हरिणादिपशून् उत्पादितवान्। ततः स ग्राम्यान् पशून् गवादीन् चक्रे। ततः आत्मयज्ञात् सर्वहुतात् आरण्यान् हिंसकान् निर्मितवान्। निखिलां सृष्टिं रचित्वा विरराम। योऽग्निः इमानि सर्वाणि भूतानि निखिलान् जीवान् करतलवत् आत्मयज्ञेन पश्यति।

**तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।**
**छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत॥[3]**

---

[1] शु०य० ३१.५
[2] शु०य० ३१.६
[3] शु०य० ३१.७

तस्मात् सर्वहुतयज्ञात् ऋग्वेदः सामवेदः गायत्रीप्रभृतिच्छन्दांसि च उत्पन्नानि। यजुर्वेदः अथर्ववेदश्च तस्मात् पुरुषादेव अजायत। एवमात्मयज्ञे प्रणवेन दीपिते स्वयमेव ज्ञानादधिष्ठितानि भवन्ति। येन परमात्मनि ज्ञाते सर्वं वाङ्मयं ज्ञातं भवति।

**तस्मादश्वा अजायन्त ये के चोभयादतः।**
**गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः॥**[१]

तस्मात् पुरुषात् अश्वाः पशुविशेषाः उत्पन्नाः अभवन्। ततः अश्वातिरिक्ता गर्दभादयोऽश्वतराश्च उभयादतः पशवः उत्पन्ना अभवन्। ऊर्ध्वाधोभागयोर्दन्तयुक्ताः सन्ति तेऽप्यजायन्त। तस्माद्यज्ञात् गावोऽजायन्त। ततस्तस्मात् गावः अवयश्च अजायन्त। न हि पशुभिर्विना यज्ञस्य पूर्तिः। अत एव पुरुषसृष्टेरनन्तरं पशूनामपि सृष्टिं कृतवान्।

**तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः।**
**तेन देवा अयजन्त साध्या ऋषयश्च ये॥**[२]

यज्ञयोग्यपुरुषः सर्वप्रथमः जातः। मानसे यज्ञे प्रोक्षितवन्तः प्रोक्षणादिभिः संस्कारैः संस्कृतवन्तः। सृष्टेः पूर्वं जातं पुरुषं पुरुषत्वेनोत्पन्नम्। तत इन्द्रादयो देवाः सृष्टिसाधनयोग्याः प्रजापतिप्रभृतयः तदनुकूलाः ऋषयः मन्त्रद्रष्टारः उत्पन्नाः जाताः। ऋषयश्चाप्येतेनैव प्रणवाधिष्ठितेन पुरुषेणात्मयज्ञं कृतवन्तः।

**यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।**
**मुखं किमस्यासीत्किं बाहू किमूरू पादा उच्येते॥**[३]

---

[१] **शु०य० ३१.८**

[२] **शु०य० ३१.९**

[३] **शु०य० ३१.१०**

प्रश्नोत्तररूपोऽयं मन्त्रः – यत्पुरुषं कतिधा व्यकल्पयन्। जायमानस्य पुरुषस्य मुखं किमासीत्। कीदृशौ तस्य बाहू कीदृशौ तस्य ऊरुभागौ वर्तेते। पादौ कीदृशौ आस्ताम्। इन्द्रादयो देवाः यत्पुरुषं तस्मिन् यज्ञे कृतवन्तः। योगिनः साध्याश्च आत्मयज्ञेन परमात्मनः पुरुषस्य ज्ञानं कृतवन्तः। कति प्रकारं विकल्पितवन्तः। एवं विधस्य पुरुषस्य कीदृशं मुखमासीत्। कीदृशौ तस्य बाहू कीदृशौ तस्य पादौ। यतः ब्राह्मणक्षत्रियवैश्यशूद्रप्रभृतयो जीवाः उत्पन्नाः।

**ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।**
**ऊरू तदस्य यद्वैश्यः पद्भ्याꣳ शूद्रो अजायत॥**[1]

ब्रह्मत्वजातिविशिष्टः पुरुषोऽस्य परमात्मनः मुखादुत्पन्नः। क्षत्रियत्वजातिविशिष्टः पुरुषोऽस्य प्रजापतेः बाहुभ्यामुत्पन्नः। प्रजापतेः परमात्मनः यावूरू तद्रूपो वैश्योऽजायत। ऊरुभ्यामुत्पादितः। अस्य महापुरुषस्य चरणाभ्यां शूद्रत्वजातिमान् पुरुष उत्पन्न इति। एवमेते अवयवाः शिरःप्रभृतयः पुरुषस्य विद्यन्ते। एभ्यः अवयवेभ्यः ब्राह्मणप्रभृतयो जनाः उत्पन्नाः अभवन्।

**चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत।**
**श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥**[2]

प्रजापतेः परमात्मनः मनसः चेतसः चन्द्रस्योत्पत्तिः यथा प्रजाः आह्लादिताः भवेयुः। नेत्रयोः सकाशात् सूर्यस्योत्पत्तिः यथा विश्वं दृश्यमानं भवति। तस्य महाविभूतेः सकाशात् कर्णाभ्यां वायुः प्राणश्च अजायत। मुखात् अग्नेरुत्पत्तिरभवत्। इति कल्पयते मुखमेवाग्निः अंशोत्पन्नत्वात्।

---

[1] **शु०य० ३१.११**

[2] **शु०य० ३१.१२**

**नाभ्या आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्तत।**
**पद्भ्याम्भूमिर्दिशः श्रोत्रात्तथा लोकाँ२॥ अकल्पयन्॥**[1]

प्रजापतेः नाभेः सकाशात् अन्तरिक्षलोकस्योत्पत्तिः। प्रजापतेः यो नाभिः तदेवान्तरिक्षम्। शिरसः द्यौः स्वर्गलोकः अकल्पयत्। यत् तस्य शिरः स एव द्युलोकः। तस्य चरणाभ्यां भूमिः भूप्रदेशस्योत्पत्तिस्तथा कर्णाभ्यां दिशामुत्पत्तिः। सर्वान् लोकान् पुरुषस्यावयवभूतान् चिन्तयेत्। भूरादिलोकान् प्रजापतेः सकाशात् कल्पितवन्तः।

**यत्पुरुषेण हविषा देवा यज्ञमतन्वत।**
**वसन्तोऽस्यासीदाज्यङ्ग्रीष्म इध्मः शरद्धविः॥**[2]

यस्मात् कारणादिन्द्रादयो देवा परमात्मनः प्राप्तये यज्ञं सोमादियज्ञं विस्तारितवन्तः। ब्रह्मद्रव्यस्यानुत्पन्नत्वेन पुरुषस्वरूपमेव मनसा हविष्ट्वेन संकल्प्य पुरुषाख्येन हविषा मानसं यज्ञमतन्वत। तदानीमस्य यज्ञस्य वसन्तः ऋतुः एव आज्यमासीत्। ग्रीष्मर्तुः इध्मत्वेन संकल्पितः। शरदृतुरेव पुरोडाशादि हविरासीत्।

पूर्वं पुरुषस्य हविः सामान्यरूपत्वेन संकल्पय अनन्तरं वसन्तादीनामाज्यादिविशेषरूपत्वेन संकल्पः। वसन्तशब्देन सात्विको गुण उच्यते, ग्रीष्मशब्देन राजसः, शरच्छब्देन तामसः, त्रीन् गुणान् आत्मयज्ञे योगिनः जुह्वति।

**सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः।**
**देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम्॥**[3]

---

[1] शु०य० ३१.१३
[2] शु०य० ३१.१४
[3] शु०य० ३१.१५

यदा देवा प्रजापतिप्राणेन्द्रियरूपयज्ञं तन्वानाः मानसं यज्ञं कुर्वाणाः विराट्पुरुषमेव पशुत्वेन भावितवन्तः तदा संकल्पितस्य यज्ञस्य गायत्र्यादीनि छन्दांसि सप्त परिधय आसन्। त्रिगुणाः सप्त एकविंशतिसंख्याका समिधः कृताः। द्वादशमासाः पञ्च ऋतवः त्रयो इमे लोकाः आदित्यश्च एते एकविंशतिः समिधः सन्ति। अथवा सप्त समुद्राः अस्य पुरुषमेधयज्ञस्य सप्त समिधः सन्ति। सप्त त्रिवर्गोऽस्य यज्ञस्य समिधः सन्ति। दीप्यमानाः देवाः ज्ञानेन योगिनश्च समाध्याख्यं यज्ञं विस्तारयन्तः।

**यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।**
**ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥**[1]

इन्द्रादयो देवाः प्रजापतिप्राणरूपयज्ञेन मानसेन संकल्पेन यज्ञस्वरूपं प्रजापतिं पूजितवन्तः। तस्मात् प्रजननात् प्रसिद्धानि धर्माणि जगद्रूपविकाराणां धारकाणि मुख्यानि कर्माणि आसन्। एतावता सृष्टिप्रतिपादकसूक्तभागार्थ उक्तः।

यस्मिन् विराट्प्राप्तिरूपे नाके पुरातनाः विराडुपाधिसाधका देवा तिष्ठन्ति। विराट्प्राप्तिरूपस्वर्गे एते महिमानः सचरन्ते योगिनः जन्मान्तरैर्निर्धूतगुणाः शुद्धाः नारायणाख्यं पुरुषमाविशन्ति मुक्तिं च लभन्ते। एतद्व्याख्यानं पुरुषसूक्ते विशदरूपेण वर्णितं वर्तते। विज्ञानात्मनो हृद्यवस्थानं कर्मफलोपभोगाय अन्तर्यामिणो नियन्तृत्वेन उक्तं वर्तते। अत्र पुरुषस्य बहुरूपत्वेन वर्णनं विद्यते। यत् अतीतं जगत् यत् च भाव्यं जगत् तत्सर्वं परमात्मनः रूपं वर्तते।

वर्तमानं सर्वं जगत् तस्य महिमा अस्ति। सः वर्तमानात् जगतः महत्तरः बृहत्तरश्च वर्तते। तस्य महिमानं कथयितुं न कोऽपि समर्थः।

---

[1] **शु०य० ३१.१६**

एकपादमिदं ब्रह्माण्डं वर्तते। त्रिपादं जगतः त्रिगुणमात्रं परमात्मा विद्यते। परमात्मनः विराडजायत। उत्पन्नमात्रेणैव पृथिवी दिशश्च निर्मितवान्। ततः वायुदेवताकान् हिरणादिपशून् आरण्यान् सिंहादीन् ग्राम्यगवादीन् च असृजत्। ततः ऋचः सामानि यजूंषि छन्दांसि च असृजत्।

ततः अश्वाः गर्दभाः उभयादत पशवः अजाप्रभृतयोऽजायन्त। पशूनां लोकानां पृथिव्याश्च सृष्टेरनन्तरं इन्द्रादिदेवानां भृग्वादिमुनीनां साध्यानां च सृष्टिरजायत। तदनन्तरमश्वाः उभयादतः गावः अजाः अविप्रभृतीनां पशूनां सृष्टिरभूत्।

एतेषां सृष्टेरनन्तरं इन्द्रादिदेवाः कपिलादयः साध्याः मन्त्रद्रष्टारः भृग्वादिऋषीणां सृष्टिरभूत्। यदा पुरुषः सृष्टिं चकार तदा कतिभिः प्रकारैः सृष्टिरासीत्। आधारः कीदृश आसीत्। कीदृशं तस्य मुखं कीदृशौ तस्य बहुप्रदेशावास्ताम्।

तस्य कीदृशः ऊरुभागः कीदृशौ तस्य पादौ अभवताम्। कुतः सृष्टिप्रारम्भो जात इति। ब्रह्मत्वजातिविशिष्टपुरुषः अस्य प्रजापतेः मुखतश्चकार। भुजाभ्यां क्षत्रियत्वजातिविशिष्टपुरुषोऽजायत। ऊरुभागात् वैश्यजातिविशिष्टानां पुरुषाणां सृष्टिः।

तस्य चरणप्रदेशात् शूद्रत्वजातिविशिष्टानां पुरुषाणामुत्पत्तिः। तस्य मनसः आह्लादकरः चन्द्रः उत्पन्नः। चक्षुर्भ्यां देदीप्यमानः सूर्योऽजायत। कर्णप्रदेशात् वायोः सृष्टिः तत एव प्राणा अपि अजायन्त। अग्नेरुत्पत्तिः तस्य मुखतोऽभवत्। परमात्मनः नाभिभागे अन्तरिक्षलोकः आसीत्। शिरसः स्वर्ग उत्पन्नः।

तस्य चरणाभ्यां भूमिरजायत श्रोत्रात् पूर्वादिदिशः अन्ये लोकाश्च अजायन्त। एतेषां सृष्टेरनन्तरं हवनीयपदार्थानामभावः तेषां नास्ति। सृष्टिः अतः सर्वे देवाः प्रजापतेः प्रीत्यर्थं मानसं यज्ञं चक्रुः। अतस्तदा वसन्तर्तुः आज्यमासीत्। ग्रीष्मर्तुः इन्धनानि आसन् शरदृतुः हवनीयद्रव्यमासीत्।

तस्मिन् मानसे यज्ञे गायत्र्यादिसप्तछन्दांसि परिधय आसन्। द्वादशमासाः पञ्चर्तवः त्रयो लोकाः एक आदित्यः।

एतानि एकविंशतिः इन्धनानि तस्मिन् मानसे यज्ञे आसन्। परमात्मा एव यज्ञस्याधारभूतः पशु आसीत्। एतादृशमानससंकल्पेन देवाः परमात्मानं प्रजापतिमयजन्त। एतादृशात् यज्ञात् तानि प्रसिद्धानि जगद्रूपविकाराणां धारकाणि मुख्यानि भूतानि आसन्। यस्मिन् विराट्प्राप्तिरूपे नाके पुरातना साधकाः देवाः आसन् तत्रैव तदुपासकाः महात्मानः वर्तन्ते।।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे पुरुषसूक्तसमीक्षणम्'** नाम पञ्चदशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

# अथ षोडशोऽध्यायः
# यजुर्वेदे रुद्रसूक्तसमीक्षणम्

शतरुद्राख्यहोममन्त्राः अस्मिन्नध्याये कथिताः सन्ति।

**शतरुद्रियहोम उत्तरपक्षस्याऽपरस्याꣳ सूक्त्यां परिश्रित्स्वर्कपर्णेनार्ककाष्ठेन शातयन्त्सन्ततं जर्तिलमिश्रान् गवेधुकासक्तूनजाक्षीरमेके तिष्ठन्नुदङ् 'नमस्त इध्यध्यायेन' त्र्यनुवाकान्ते स्वाहाकारो जानुमात्रे॥ पञ्चान्ते नाभिमात्रे॥ प्राक् च प्रत्यवरोहेभ्यो मुखमात्रे॥ प्रतिलोमं प्रत्यवरोहान् जुहोति प्रमाणेषु नमोऽस्त्विति प्रतिमन्त्रम्॥**[1]

हिरण्यशकलैरग्निप्रोक्षणानन्तरं शतरुद्रियसञ्ज्ञो होमः। तस्याहवनीये प्राप्तावपवादमाह। उत्तरपक्षपश्चिमकोणे याः परिश्रितो जङ्घामात्र्यादयः पूर्वं निखातास्तासु होमः।

जर्तिलैर्मिश्रान् गवेधुकासक्तूनर्कपत्रेण जुहोति। अर्ककाष्ठेन संततं क्षारयन् परिश्रित्सु पातयन् अर्कपत्रं दक्षकरेणाादायार्ककाष्ठं दामेनादायतेन पातनीयम्। केचित् विदुषां मतमस्ति ''सक्तुस्थानेऽजागेदुग्धम्'' इति उदङ्मुखो नमस्ते इत्यध्यायेन अनुवाकत्रयान्ते "अर्भकेभ्यश्च वो नमः'' एतावत् पर्यन्तं जानुमात्रे परिश्रिति स्वाहाकारः कर्तव्यः।

पञ्चमनुवाकान्ते **सुधन्वने च** इति नाभिमात्रे परिश्रिति स्वाहाकारः।

---

[1] **का०श्रौ०सू० १८.१.१-५**

**नमोऽस्तु रुद्रेभ्यः** इति प्रत्यवरोहमन्त्राः तेभ्यः प्राक् मुखमात्रपरिश्रिति स्वाहाकारः।

**नमोऽस्त्विति** कण्डिकात्रयेण प्रतिलोमं होमः।

**ये दिवि** इति मुखमात्रे परिश्रिति होमः।।

**येऽन्तरिक्षे** इति नाभिमात्रे परिश्रिति होमः।

**ये पृथिव्याम्** इति जानुमात्रे परिश्रिति होमः।

स एषोऽग्निश्चितो बुभुक्षमाणो रुद्ररूपेणावतिष्ठते।।[१]

**यश्च सागरपर्यन्तां सशैलवनकाननाम्।**
**सर्वानात्मगुणोपेतां सुवृक्षजलशोभिताम्।।**
**दद्यात् काञ्चनसंयुक्तां भूमिं चौषधिसंयुताम्।**
**तस्मादप्यधिकं तस्य सकृत् रुद्रजपात् भवेत्।।**
**यश्च रुद्रान् जपेन्नित्यं ध्यायमानो महेश्वरम्।**
**स तेनैव शरीरेण रुद्रः सञ्जायते ध्रुवम्।।**[२]

रुद्राध्याये ब्रह्मणः निर्गुणस्य सगुणस्य च स्वरूपस्य वर्णनं विद्यते। गृहस्थधर्मः राजधर्मः ज्ञानम्, वैराग्यम्, शान्तिः तथा विविधसर्वश्रेष्ठविषयाणां विवेचनं विशदरूपेण वर्तते। समुद्रपर्यन्तं वनम्, काननम्, पर्वतः, सलिलम्, तथा नानाविधवृक्षैर्युक्तां भूमिं दानरूपेण यः महापुरुषः दद्यात् तस्य यत् फलं लभते तादृशं फलं रुद्राध्यायस्य पाठात् रुद्राभिषेकाच्च लभते।

यः पुमान् भगवन्तं रुद्रं ध्यायन् रुद्राध्यायस्य परायणेन रुद्राभिषेकयज्ञस्यानुष्ठानेन च निश्चयेन सशरीरं रुद्रस्वरूपो भवति।

---

[१] **शु०य०सं० उवटभा. १६.१**

[२] **वायुपुराणम्**

स्तेयं कृत्वा गुरुदाराश्च गत्वा मद्यं पीत्वा ब्रह्महत्यां च कृत्वा मस्मच्छन्नो भस्मशय्याशयान्तो रुद्राष्टाध्यायी मुच्यते सर्वपापैः।।[1]

ततः कुम्भान् संस्पृशन्नक्षतांश्चाक्षिपन्नेकादशावृत्या रुद्रान् यजेत्। तस्मिन् ब्रह्मपदमादाग्नेय्यां दिशि स्थण्डिलेऽग्निमुपसमाधाय तूष्णीं निर्वापादिना चरुं पक्त्वाऽऽज्यभागान्तं कृत्वा समित्तिलचर्वाज्यैः- **ॐ मानस्तोके..** इति मन्त्रेण अष्टोत्तरशतवारं नवग्रहहोमपूर्वकं जुहुयात्।

ततः स्विष्टकृतादिपूर्णाहुतिप्राक्तनहोमशेषं समाप्याचार्यो गन्धाद्युपचारैः रुद्रस्योत्तरपूजां कृत्वा अभिषेकार्थं मण्डलादग्नेरुत्तरतश्चतुरस्रं स्वस्तिकोपेतं मण्डलं कृत्वा तत्रोदुम्बरकाष्ठपीठद्वये परिहिताऽऽहतश्वेतवस्त्रे दम्पती प्राङ्मुखमुपावेश्य स्वयमुदङ्मुखः पूर्वादिकलशोदकेन रुद्राध्यायस्यैकेन मन्त्रेण एकैकेनार्कपत्रेणाभिषिच्य यजेत्। तत्र हवनमन्त्रः-

**ॐ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। मा नो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित्वा हवामहे।।**[2]

अभिषेकमन्त्राः- **ॐ नमस्ते रुद्र मन्यव उतो त इषवे नमः। बाहुभ्यामुत ते नमः।।**[3] इत्यादयो मन्त्राः।

रुद्रस्य क्रोधः अस्मदरिषु प्रसरतु नास्मासु इति प्रदर्शितं वर्तते।

**मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्।**
**मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः।।**[4]

---

[1] **रुद्राष्टाध्यायी**

[2] **शु०य० १६.१६**

[3] **शु०य० १६.१**

[4] **शु०य० १६.१५**

हे रुद्रास्माकं वृद्धं गुरुपितृप्रभृतिवृद्धजनान् मा वधीः हिंसां मा कुरु। अस्माकं बालानामपि हिंसा मा कुरु तथा सर्वात्मना भावेन रक्ष तरुणं मा वधीः, अस्माकं गर्भस्थं मा वधीः पितरं मातरं पत्नीं च मा वधीः। अस्माकं शरीराणि पुत्रान् पौत्रान् तथा सम्बन्धिनं मा वधीः।

**मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः।**
**मा नो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे॥**[1]

हे रुद्र अस्माकं पुत्रान् पौत्रान् मा हिंसीः। अस्माकं जनानां आयुः मा हिंसीः। अस्माकं गवामश्वानाञ्च हिंसां मा कुरु। हे रुद्र अस्माकं वीरान् रक्षकान् रक्ष। क्रोधयुक्तानपि प्राणिनः रक्ष। वयं यजमानाः सदैव हस्ते आहुतीः गृहीत्वा त्वां हवामहे। रक्षार्थं हवामहे। अनन्यशरणाः वयं तवाह्वानं कुर्महे।

**यामिषुङ्गिरिशन्त हस्ते बिभर्ष्यस्तवे।**
**शिवाङ्गिरित्र ताङ्कुरु मा हिꣳसीः पुरुषञ्जगत्॥**[2]

कैलाशपर्वतस्य रमणीये शिखरे निवसन् हे गिरिशन्त यानि अस्त्राणि शस्त्राणि च हस्ते धारयसि तैः अस्त्रैः शस्त्रैश्च निखिलं जगत् पालयसि। केषाञ्चित् प्राणिनामपि हिंसां न करोषि। यतः त्वं जगद्रक्षकः इति। मन्त्रेऽस्मिन् रुद्रस्य रक्षकरूपत्वस्य वर्णनं विद्यते।

**असौ योवसर्पति नीलग्रीवो विलोहितः।**
**उतैनङ्गोपा अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः॥**[3]

भगवान् रुद्रः अवतारं धृत्वा रक्तवर्णात्मकः नीलकण्ठश्च दृश्यते। एनं गोपालकाः उदकहारिण्यः गोपाङ्गनाः चापश्यन्।

---

[1] **शु०य० १६.१६**

[2] **शु०य० १६.३**

[3] **शु०य० १६.७**

योगिनामगम्यं भगवन्तं रुद्रं विश्वस्य निखिलाः जनाः अपश्यन्। मन्त्रस्य निर्देशोऽयं यत् सः सर्वेषां सुखदाता विपत्तिहर्ता च वर्तते।

**या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी।**
**शिवा रुतस्य भेषजी तया नो मृड जीवसे॥**[1]

रुद्रस्य कल्याणकृत् शरीरं विद्यते। रोगिणां कृते भेषजरूपं मंगलप्रदं जीवनदायकं च विद्यते। तेन शरीरेण सः परमेश्वरः ब्रह्माण्डस्य प्राणिनां कृते दीर्घजीवनाय सुखप्रदाता विद्यते। अत एव जनाः नानाव्याधिपीडिताः संसाररूपव्याधिनिवृत्त्यर्थं विविधैः स्तवैः स्तुवन्ति। विश्वाहा सर्वदा सर्वकालं नानाविधानां दुःखानां निवृत्यर्थं रुद्रं जनाः स्तुवन्ति यजन्ति पूजयन्ति च।

**नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च॥**[2]

शान्तिप्रदाय सुखप्रदाय कल्याणकराय शान्तस्वरूपाय भक्तानां सततं सुखदात्रे भगवते शिवाय वारं वारं नमस्कारः। अस्मिन् मन्त्रे शिवः कल्याणरूपः भक्तानामपि सततं शुभचिन्तकः इति। इहलौकिकसुखस्य पारलौकिकसुखस्य च प्रदातृमुक्तिप्रदातृरूपेण स्तुतिः विद्यते। शिवतरः ततोऽप्यधिको निरतिशयसर्वज्ञः सुखबीजरूपः शिवः विद्यते। एतदेव प्रदर्शितं विद्यते।

**इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः।**
**यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टङ्ग्रामे अस्मिन्ननातुरम्॥**[3]

---

[1] **शु०य० १६.४९**

[2] **शु०य० १६.४१**

[3] **शु०य० १६.४८**

अस्माकं बुद्धिः दुःखविनाशकर्त्रे बलशालिने जटाजूटधराय शास्त्रादिभिः सम्पन्नाय च शिवाय स्तुत्यर्थं प्रयतामहे। येन प्रकारेण अस्माकं पुत्रपौत्राणां गवादिपशुसमूहानां मंगलं भवेत्। तथा अस्मिन् ग्रामे सर्वे अनातुरा भवेयुः। मन्त्रस्य भावः रुद्रसंस्तुत्या पुत्रपौत्रप्रभृतीनां रक्षा गवादिपशूनां सुखं च भवति। यत्र रुद्रस्य स्तुतिर्भवति तत्र सर्वत्र अनातुरत्वं जायते न विद्यते तत्र कोऽपि जनः आतुरः। तस्य स्तुत्या सर्वे धनिनः सम्पन्नाः स्वस्थाः दीर्घजीवनाः भवेयुः। एतदर्थमेषा स्तुतिः।

**नमः पर्णाय च पर्णशदाय च नम उद्‌गुरमाणाय चाभिघ्नते च नम आखिदते च प्रखिदते च नम इषुकृद्‌भ्यो धनुष्कृद्‌भ्यश्च वो नमो नमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नम आनिर्हतेभ्यः॥**[१]

वृष्ट्यादिभिः उपकारकृतत्वात् रुद्राः देवानां हृदयेषु वर्तन्ते। अग्निवायुसूर्यरूपेण देवानां हृदयभूताः रुद्राः सन्ति। धर्मात्मनां पापात्मानां च मध्ये विभाजकाः रुद्राः राक्षसानां विधिवत् विहिंसकाः प्रदर्शिताः वर्तन्ते। एतान् गुणान् दृष्ट्वा रुद्राः देवानां हृदयभूताः सन्ति। विविधरूपेण पापविनाशकाश्च सन्ति।

**नमोऽस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोद्‌र्ध्वाः तेभ्यो नमो अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः॥**[२]

कण्डिकात्रयात्मिकानि प्रत्यवरोहसंज्ञकानि बहुरुद्रदेवत्मकानि सन्ति। रुद्राः त्रिषु लोकेषु निवसन्ति। एषां पार्श्वे वृष्टिः वातः अन्नानि इषवश्च सन्ति। आयुषस्थानीया वृष्टिः अतिवृष्ट्यादिभिः

---

[१] **शु०य० १६.४६**

[२] **शु०य० १६.६४**

अनावृष्ट्यादिभिश्च जनान् हिंसन्ति। कुवातेनान्नं विनाश्य वातरोगं वा उत्पाद्य जनान् विनाशयन्ति। अयथान्नभक्षणत्वात् कदन्नभक्षणत्वात् चौर्ये वा प्रवर्त्य विविधान् रोगानुत्पाद्य विविधैः झंझावातैश्च प्राणिनः हिंसन्ति। अतः द्युलोकान्तरिक्षलोकभूलोकवासिनां रुद्राणां वयं स्तुतिं कुर्मः ते प्रसन्नतया नः अवन्तु मृडयन्तु च। यं पापिनं वयं द्विष्मः यश्च नो द्वेष्टि तं पापिनं शत्रुं रुद्राणां कराले मुखे स्थापयामः।

**परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः।**
**अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड॥**[१]

रुद्राणां हेतिः आयुधविशेषः क्रोधः दुर्बुद्धिश्च अस्मान् सर्वतोभावेन परित्यजतु। तस्य आयुधानि राक्षसानां पापिनां कदाचारिणां जनानां च विनाशाय प्रयुक्तानि भवेयुः। अस्माकं रक्षणाय आयुधानि भवन्तु तथा यजमानानां भयनिवृत्तये विविधान् व्यवहारान् कुर्वन्तु। पुत्रं पौत्रं सम्बन्धिनः जनान् च सुखिनः कुर्वन्ति रक्षन्ति पालयन्ति च। अत्र रुद्रस्य विविधशक्तेः वर्णनं वर्तते।

**नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः॥**[२]

सभारूपेभ्यः सभापतिरूपेभ्यश्च व्रातरूपेभ्यः व्रातपतिरूपेभ्यश्च सेनारूपेभ्यः विविधविधयुद्धकुशलेभ्यः सेनारूपेभ्यश्च रुद्रेभ्यो वारं वारं नमस्कारः। उत्कृष्टभृत्यसमूहरूपेभ्यः विविधरूपेषु युद्धेषु पारंगताः रुद्राः। तेभ्यः वारं वारं नमस्कारः। नानारूपाः सर्वव्यापकाः रुद्रा इति विचार्य अत्र स्तुतिः वर्तते।

---

[१] **शु०य० १६.५०**

[२] **शु०य० १६.२५**

**मीढुष्टम शिवतम शिवो नः सुमना भव।**
**परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि।।**[१]

मनोरथानां पूरयिता अत्यन्तकल्याणकर्ता शिवः अस्माकं कृते शोभनमनस्कः भवतु। अस्मान् प्रति प्रसन्नमनाः भवतु। उत्कृष्टे वृक्षे तरौ त्रिशूलादिकमायुधं स्थापयित्वा कृतिं दधानः अस्माकं पार्श्वे आचरतु। पिनाकं स्वधनुः धारयन् आगच्छतु। रुद्रः बहुमनोरथपूर्णकर्ता कल्याणकर्ता च वर्तते। प्रसन्नमनाः भूत्वा यजमानानां पार्श्वे आगच्छति। एष भावो मन्त्रेऽस्मिन् प्रदर्शितो वर्तते–

**असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम्।**
**तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि।।**[२]

असंख्यातानि सहस्राणि अभिता रुद्रा भूम्यामुपरि निवसन्ति। तेषां रुद्राणां धन्वानि धनूंषि सहस्रयोजने सह्वससंख्यापरिमितक्रोशभागे अवतारयामः। अत्र रुद्राणां संख्या अपरिमिता अगणिता वर्तते। ते सर्वे भूमौ निवसन्ति। साधारणजनानां परिरक्षणाय निवसन्ति।

**नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः।**
**तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि।।**[३]

येषां रुद्राणां ग्रीवाः नीलवर्णाः वर्तन्ते श्वेतवर्णकण्ठभागाश्च वर्तन्ते तेषां रुद्राणां धनुःप्रभृतिशस्त्राणि सहस्रयोजनसंख्याकभूभागे अवतारयामः। ये रुद्राः द्युलोके निवसन्ति। तेषां रुद्राणां धनूंषि दूरतरभागे अवतारयामः। असंख्याकाः रुद्राः वर्तन्ते ये दिवि स्थिताः द्युलोके वर्तमानाः सन्ति तेषां रुद्राणामाकृतयः नीलग्रीवाः श्वेतवर्णकण्ठभागाः वर्तन्ते। अत्र मन्त्रे एतत् प्रदर्शितं वर्तते।

---

[१] **शु०य० १६.५१**

[२] **शु०य० १६.५४**

[३] **शु०य० १६.५६**

**येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्।**
**तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि।।**[1]

ये रुद्रा भुज्यमानेषु अन्नेषु स्थिताः सन्तः प्राणिनः विशेषेण ताडयन्ति। धातुवैषम्यं कृत्वा रोगानुत्पादयन्ति। क्षीरादिपानं कुर्वतः जनान् विविध्यन्ति तेषामायुधानि सहस्रयोजने अवतारयामः। अन्नोदकभोक्तारः व्याधिभिः पीडिताः भवन्ति तेषां रक्षणाय स्तुतिः वर्तते। भोजनपानवैषम्येन बहवो जनाः पीडिताः भवन्ति। तेषां रक्षणाय रुद्राः समर्थाः सन्ति एतत् मन्त्रे अत्र प्रदर्शितं वर्तते।

**नमः कृत्स्नायतया धावते सत्त्वनां पतये नमो नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमः।।**[2]

आकर्णपूर्णधनुष्ट्वेन युद्धभूमौ शीघ्रं गच्छते रुद्राय नमः। शरणागतप्राणिनां रक्षणाय तत्पराय रुद्राय नमः। पापिनां हिंसकानां दुराचारकारिणां च तिरस्काराय पराजयाय विनाशाय च संततं सन्नद्धाय रुद्राय नमः। रक्षसां गुप्तचौराणामपहरणबुद्ध्या निरन्तरं विचरणशीलानां च कृते सद्बुद्धिदानाय रुद्राय नमः। अरण्येषु निरन्तरं सर्वत्र गतवते अरण्यानां पालकाय रुद्राय नमः। अत्र रुद्रः शरणागतरक्षकः राक्षससमूहानां हिंसकः, वनेषु निवासिनां जनानां सततं रक्षकश्च वर्तत इति।

**नमः शङ्गवे च पशुपतये च नम उग्राय च भीमाय च नमोऽग्रे वधाय च दूरे वधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय।।**[3]

---

[1] शु०य० १६.६२

[2] शु०य० १६.२०

[3] शु०य० १६.४०

सुखकारिणे जीवानां रक्षकाय पापिनां कृते भयङ्कररूपाय भीषणाय वर्तमानशत्रूणां दूरेस्थितानां शत्रूणां विनाशकारिणे हननकर्त्रे च रुद्राय नमः। कल्पतरुरूपाय संसारसागरपारकारयित्रे रुद्राय नमः। अत्र पशुपतिः, उग्रः भीमः, अग्रेवधः, दूरेवधः, हन्ता, हवनीयरूपेण रुद्रः स्तुतः इति। मनोरथपूरणकर्तृविषये भक्तानां रुद्रः कल्पतरुः संसारसागरपारकर्ता च वर्तते।

**ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः।**
**तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि॥**[1]

अश्वत्थादिवृक्षेषु बालतृणवते पिञ्जरवर्णाः हरितवर्णाश्च वर्तन्ते। कण्ठनीलवर्णाः तेजोमयशरीरा रुद्राः वर्तन्ते। तेषां तीक्ष्णानि धनूंषि सहस्रयोजनदूरदेशमवतारयामः। अत्र रुद्रः वृक्षादिसमूहेषु वनाद्रिषु च नानारूपेण तिष्ठति सः हरितवर्णः, श्वेतवर्णः, रक्तवर्णः, कृष्णवर्णश्च वर्तते। नानारूपेषु अत्र रुद्राणां स्तुतिः। ताः पूजनीयाः स्तुत्या प्रार्थनीयाः ध्यातव्याश्च वर्तन्ते इति।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे रुद्रसूक्तसमीक्षणम्'** नाम षोडशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

[1] **शु०य० १६.५८**

# अथ सप्तदशोऽध्यायः
## यजुर्वेदे ब्रह्मसूक्तसमीक्षणम्

सर्वकामस्य राज्ञोऽश्वमेधः तस्य फाल्गुनशुक्लाष्टम्यामारम्भः। चतुःसुवर्णनिर्मिताभरणविशेषः निष्कः, तं यजमानकण्ठे प्रतिबध्नन्नध्वर्युस्तेजोऽसीति मन्त्रं पाहीत्यन्तं वाचयति। तं च निष्कं प्रातर्होमान्ते पूर्णाहुतिं कृत्वा अध्वर्यवे दद्यादिति। प्रजापतिः ऋषिः, सौवर्णनिष्कं देवताः, प्रजापत्या अनुष्टुप्छन्दः, निष्कः आग्नेयत्वात् तेजः असि। अग्नेः वीर्यमसि, वह्नितापेऽनुच्छिद्यमानद्रवत्वाधिकरणत्वात् दानेनामृतत्वप्रदानाच्चामृतत्वात् सुखदोऽसि। यजमानस्यायुषः गोपायिता निष्कः वर्तते। अतः त्वं ममायुर्वर्धय। यज्ञसमाप्तिपर्यन्तमायुरक्षणाय यजमानः प्रार्थयते। यथा यज्ञे मा कश्चिदवरोधः भवेत्। सर्वप्रेरकस्य सवितुर्देवस्य आज्ञायां वर्तमानत्वात् अश्वनीकुमारयोः देवविशेषयोः बाहुभ्यां पूष्णोदेवस्य हस्ताभ्यां त्वामाददे।

**तेजोऽसि शुक्रममृतमायुष्पा आयुर्मे पाहि। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे।।**[१]

अत्र मन्त्रे स्वर्णस्य महत्वं प्रतिपादितं यथा स्वर्णममृतमयम्। आयूरूपः आयुर्दाता च वर्तते। स्वर्णदानेन आयुषः वृद्धिर्भवति अत्र प्रदर्शितं वर्तते।

---

[१] **शु०य० २२.१**

**इमामगृभ्णन्नशनामृतस्य पूर्व आयुषि विदथेषु कव्या।**
**सा नो अस्मिन्त्सुत आबभूव ऋतस्य सामन्त्सरमारपन्ती।।**[१]

एषा यज्ञीया रशना यज्ञस्यारम्भे ग्रहीतव्या। यज्ञेषु कुशला प्रजापत्यादयो देवा यज्ञस्य आरम्भे गृहीतवन्तः। सा रशना यज्ञे अभिषुतस्य सोमस्य रक्षणाय यथा यज्ञप्रसारो भवति इति शब्दं जपन्तीं रशनां गृहीतवन्तः। यज्ञादेषां सृष्टिं प्रजापतिरसृजत्। पूर्वाचार्याः ये यज्ञान् कृतवन्तः तेऽपीमां रशनां गृहीतवन्तः। अनया एव रशनया सोमयज्ञस्य प्रारम्भः भवति।

**अभिधा असि भुवनमसि यन्तासि धर्ता।**
**स त्वमग्निं वैश्वानरꣳ सप्रथसङ्गच्छ स्वाहा कृतः।।**[२]

ब्रह्मणानुज्ञातः अध्वर्युः गृहीतया रशनया अश्वं बध्नाति। त्वं स्तुतेः पात्रमसि। भुवनानामाश्रयश्चासि सर्वेषां नियमनं करोति। जगतः धारयिता वर्तते, एभिः गुणैः पूर्णः त्वं यज्ञस्य पूरयिता स्वाहाकरेण हुतः सन् अग्निं प्राप्नुहि। अश्वमेधयज्ञस्याग्निः सर्वेषां हितकर्ता वर्तते। सर्वत्र तिर्यग् ऊर्ध्वमधः सर्वत्र प्रथितः वर्तते। अश्वमेधयज्ञस्य साधकोऽश्वः वर्तते। यज्ञेन राष्ट्रस्य आबालवृद्धवनितानां सजीवनिकायास्य हितं सिद्धं भवति। अतः यज्ञाग्निः वैश्वानरः वर्तते। सकलभुवनानां मंगलप्रदः भवति।

**स्वगा त्वा देवेभ्यः प्रजापतये ब्रह्मन्नश्वं भन्त्स्यामि देवेभ्यः प्रजापतये तेन राध्यासम्। तं बधान देवेभ्यः प्रजापतये तेन राध्नुहि।।**[३]

---

[१] **शु०य० २२.२**

[२] **शु०य० २२.३**

[३] **शु०य० २२.४**

हे अश्व त्वामिन्द्रादिदेवेभ्यः प्रजापतये च बध्नामि। अध्वर्युः देवेभ्यः प्रजापतये चाश्वं बध्नाति। अश्वेन सः यज्ञस्य पूर्तिं करिष्यति। यज्ञः पूर्णत्वं गच्छति। अनेन यज्ञस्य सिद्धिर्भविष्यति। अश्वबन्धनेन यज्ञसमाप्तिलक्षणां सिद्धिं प्राप्नुहि।

**प्रजापतये त्वा जुष्टं प्रोक्षामीन्द्राग्नीभ्यां त्वा जुष्टं प्रोक्षामि वायवे त्वा जुष्टं प्रोक्षामि विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि सर्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि। यो अर्वन्तं जिघाँ सति तमभ्यमीति वरुणः परो मर्तः परः श्वा।।**[१]

अध्वर्युः यजमानो वा अश्वं जलेन प्रोक्षति। प्रोक्षणमेव त्वा शुद्धदेवयोग्यं यज्ञयोग्यं वा विदधामि। वायवे प्रीतिकरं त्वा प्रोक्षामि विश्वेभ्यः देवेभ्यः प्रीतिकरं त्वां प्रोक्षामि। सर्वेभ्यस्त्वा प्रीतिकरं प्रोक्षामि। यः पुरुषः यज्ञीयमश्वं हन्तुमिच्छां करिष्यति वरुणः तं व्यापादयिष्यति तमश्वघातिनं जनं वरुणः विनाशयति।

विशेषः- यज्ञीयाश्वस्य प्रोक्षणं भवति। एनं यः कश्चित् हन्तुमिच्छां करिष्यति वरुणः तं नरं पातयिष्यति । वरुणकोपभाजनः भविष्यति। इत्यध्वर्युर्यजमानं वाचयति।

अग्नये सोमाय मोदाय सवित्रे वायवे विष्णवे इन्द्राय बृहस्पये मित्राय वरुणाय एतेषां दशसंख्याकदेवानां सकृत् गृहीत्वाज्येन जुह्वा स्तोकीयसंज्ञा दशाज्याहुतिं जुहोति। अथवानुवाकमावर्त्यावर्त्य सहस्रमाज्याहुतिं जुहोति।

विशेषः- एताभिराहुतिभिरेतेभ्यो दश देवेभ्योऽश्वं ददाति।।[२]

---

[१] **शु०य० २२.५**

[२] **शु०य० २२.६**

अश्वस्यैकोनपञ्चाशच्चेष्टितानि भवन्ति। तेषां स्मरणं कृत्वा दक्षिणाग्नौ प्रतिमन्त्रं 'प्रक्रमसंज्ञान् होमान्' एभिर्मन्त्रैर्जुहोति। हिङ्काराय हिङ्कृताय क्रन्दते अवक्रन्दाय प्रोथते प्रपोथाय गन्धाय घ्राताय निविष्टाय उपविष्टाय संदिताय वल्गते आसीनाय शयानाय स्वपते जाग्रते कूजते प्रबुद्धाय विजृम्भमाणाय विचृताय संहानाय उपस्थिताय अयनाय प्रायणाय यते धावते उद्रावाय उद्रुताय शुकराय शूकृताय निषण्णाय उत्थिताय जवाय बलाय विवर्तमानाय विवृत्ताय विधून्वानाय विधूताय शुश्रूषमाणाय शृण्वते ईक्षमाणाय ईक्षिताय वीक्षिताय निमेषाय यदत्ति तस्मै यत् पिबति तस्मै यन्मूत्रं करोति तस्मै कुर्वते कृताय एताः एकोनपञ्चाशताहुतीः आज्येन जुहोति।।[1]

**तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।।**[2]

विश्वामित्रदृष्टा सावित्री गायत्री छन्दः। तस्य प्रकाशात्मकदेवस्य सर्वप्रेरकस्य अन्तर्यामिनो विज्ञानानन्दस्वभावस्य ब्रह्मणः वरणीयं तेजः वयं ध्यायामः। सः भगवान् सर्वप्रेरकः सविता देवः अस्माकं बुद्धिं सन्मार्गेषु योजयतु सन्मार्गगमनाय प्रेरणां ददातु।

विशेषः- अत्र सन्मार्गगमनाय सवितुः देवस्य स्तुतिः वर्तते सद्बुद्धिश्च याच्यते।

**हिरण्यपाणिमूतये सवितारमुपह्वये। स चेत्ता देवता पदम्।।**[3]

हिरण्यवत् प्रकाशमानं सर्वप्रेरकं भगवन्तं भास्करं स्वरक्षणाय वयं यजमानाः प्रार्थयामः। सः भगवान् सूर्यः अत्यन्तचैतन्यः सर्वज्ञः ज्ञानिजनानां देवतापदप्रदाता वर्तते। यो देवतापदं प्राप्तुं यतते स सूर्यं स्तौति। स एव तद्दातुं समर्थः।

---

[1] **शु०य० २२.७-८**

[2] **शु०य० २२.९**

[3] **शु०य० २२.१०**

**देवस्य चेततो महीं प्र सवितुर्हवामहे। सुमतिꣳ सत्यराधसम्॥**[१]

सत्यसाधयित्रीं बुद्धिं प्राप्तुं यजमानाः सवितारं देवं प्रार्थयन्ति। सः देवः अस्माकं सततकल्याणायानश्वरं परमात्मानं प्राप्तुं बुद्धिमायातु परमात्मनि समर्पणबुद्धिः भवतु। सः देवः चैतन्यः यजमानानां हितसाधकः कल्याणकारिणीं बुद्धिं दातुं समर्थश्च।

**विभूर्मात्रा प्रभूः पित्राश्वोऽसि हयोऽस्यत्योऽसि मयोऽस्यर्वासि सप्तिरसि वाज्यसि वृषासि नृमणा असि। ययुर्नामासि शिशुर्नामास्यादित्यानां पत्वान्विहि देवा आशापाला एतं देवेभ्योऽश्वं मेधाय प्रोक्षितꣳ रक्षतेह रन्तिरिह रमतामिह धृतिरिह स्वधृतिः स्वाहा॥**[२]

अध्वर्युर्यजमानौ यज्ञीयाश्वस्य दक्षिणकर्णे 'विभूर्मात्रा' इति मन्त्रं जपतः। एषोऽश्वः अश्वमेधयागीयः। यः दिग्विजयार्थं रक्षकैः सह भ्रमणार्थमितस्ततः जायमानोऽसि। तस्य रक्षणार्थं चतुर्विंशतिवार्षिकाश्वशतमध्यस्थस्यैशान्यमुत्सृष्टस्य रक्षकान्नगरानादिशति। अनुचरी सजातीयान् तावतोऽनुचरीसंख्याकान् तेन शतं राजपुत्रान् शतं क्षत्रियपुत्रान् शतं सूतग्रामण्यापुत्रान्। सूता अश्वपोषकाः तेषां मध्ये ग्रामण्यो मुख्याः तत्सुतान्।

शतं क्षात्रसंगृहीतृणां सुतान्। क्षत्तारः आयव्ययाध्यक्षास्तत्समूहः क्षात्रं तत्राधिकृता क्षात्रसंगृहीतारस्तत्सुतान्। क्रमात् क्वचिनिषङ्गिकलापिदण्डिनः, तेन राजपुत्राः संनाहवन्तः क्षत्रियपुत्राः निषङ्गिणः सखड्गाः सूतग्रामणीपुत्राः, इषुधिमन्तः, क्षात्रसंगृहीतृपुत्राः वंशादिदण्डधराः। एतादृशाः अश्वरक्षकाः अश्वैः सह वर्षपर्यन्तं इतस्ततः

---

[१] **शु०य० २२.११**

[२] **शु०य० २२.१९**

विजयार्थं परिभ्रमन्ति। एते रक्षकाः निर्देशमपि प्राप्ता आसन्। यथा आदेशः वडवाभ्यो जलस्नानाच्चाश्ववरणम् इति।

वर्षपर्यन्तमश्वरक्षणं भवति। राजगृहे तावत् यजमानो वावातोर्वोः शेते सावित्री कारयति। वीणागानं पारिप्लवशस्त्रपाठः धृतिहोमश्च भवति। राजा राजभृत्याश्च देवान् प्रार्थयन्ति - हे आशापालाः! देवाः! यूयं यागाय प्रोक्षणेन संस्कृतमेतदश्वं रक्षत॥[१]

सायं प्रातःकालेऽस्तमितेऽर्के अग्निहोत्रहोमात् प्रागग्निहोत्रहोमाहुते आहवनीये अग्नौ चतस्रो धृतिसंज्ञकाः आहुतयः प्रतिमन्त्रं जुहोति। वर्षपर्यन्तं प्रत्यहं एवं चत्वारिंशदधिका चतुद्रशशती भवति।

**काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहा स्वाहाधिमाधीताय स्वाहा मनः प्रजापतये स्वाहा चित्तं विज्ञातायादित्यै स्वाहादित्यै मह्यै स्वाहादित्ये सुमृडीकायै स्वाहा सरस्वत्यै स्वाहा सरस्वत्यै पावकायै स्वाहा सरस्वत्यै बृहत्यै स्वाहा पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा पूष्णे नरन्धिषाय स्वाहा त्वष्ट्रे स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहा विष्णवे स्वाहा विष्णवे निभूयपाय स्वाहा विष्णवे शिपिविष्टाय स्वाहा॥**[२]

**विशेषः**- त्रीणि कृष्णाजिनदीक्षातः अध्वरदीक्षणीयायाः चत्वारि त्रीणि त्रीणि अश्वमेधसम्बद्धाहुतयः सन्ति। चत्वारि चत्वारि ओद्ग्रभणनि सन्ति। तानि हुत्वा काय स्वाहेत्याश्वमेधिकानि त्रीण्योद्ग्रभणानि जुहूयात्। औद्ग्रभणहोमानन्तरं दीक्षणीयाशेषं समाप्य कृष्णाजिनदीक्षा तत्रोपवेशनान्ता कर्तव्या। सप्ताहदिनपर्यन्तदीक्षणीयेष्टिः कर्तव्या। प्रत्येकं दिने अध्वरदीक्षणीयायाश्चत्वारि चत्वारि औद्ग्रभणानि ''ओमाकूत्यै प्रयुजे अग्नये स्वाहा'' इति कर्तव्यानि।

---

[१] **शु०य० २२.१९**

[२] **शु०य० २२.२०**

त्रीणि त्रीणि आश्वमेधिकानि कर्तव्यानि। तत्र मन्त्रः ''ओं काय स्वाहा'' कण्डिकायां सप्तत्रिकाणि पठितानि। तन्मध्ये सप्त स्वाहासु क्रमेणैकं त्रिकं हूयते। तत्र द्वितीयत्रिके स्वाहाकाराद्यं मन्त्रत्रयं स्वाहा ह्यधिमाधीतायेत्यादि। काय कस्मै कतमस्मै आधिमाधानमाधीताय मनसे एतादृशाय प्रजापतये स्वाहा। चित्ताय विज्ञाताय प्रजापतये स्वाहा।

**अदित्यै अदित्यै मह्यै अदित्यै सुमृडीकायै स्वाहा। सरस्वत्ये सरस्वत्यै पावकायै सरस्वत्ये बृहत्यै स्वाहा। पुष्णे पुष्णे प्रपथ्याय पुष्णे नराधिपाय स्वाहा। त्वष्ट्रे त्वष्ट्रे तुरीपाय त्वष्ट्रे पुरुरूपाय स्वाहा। विष्णवे विष्णवे विभूयपाय विष्णवे शिपिविष्टाय स्वाहा** एते औद्ग्रभणमन्त्राः। औद्ग्रभणमन्त्रैः अश्वमेधयज्ञे प्रजापतिप्रभृतयो देवाः आहुतिभिः पूजनीयाः सन्ति। सप्तम्यां दीक्षणीयायां चत्वारि औद्ग्रभणानि आध्वरिकाणि हूयन्ते।

तेषां चतुर्ण्णां स्थाने 'ॐ आकूत्यै प्रयुजाग्नये स्वाहा' इति मन्त्रेण षडग्निकानि हुत्वा आश्वमेधिकानि त्रीणि ''ओं विष्णवे स्वाहा'' इति मन्त्रेण होमं कुर्यात्।

**विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम्।**
**विश्वो राय हषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा।।**[१]

अनेन मन्त्रेण दशममौद्ग्रभणं जुहोति। अयमश्वमेधयागे दशम औद्ग्रभणहोमः।

**आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां**

---

[१] **शु०य० २२.२१**

**निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्॥**[१]

कृष्णाजिनदीक्षातः आरभ्याग्नौ त्रयोदशसमिदाधानान्तं कृत्वा अश्वमेधोत्सर्गकाले विभूर्मात्रामन्त्रजपानन्तरमध्वर्युः ''आब्रह्मन्'' इति मन्त्रं जपति। अध्वर्युः स्तुतिं च करोति। अत्र राष्ट्रवादः वेदस्य ऋषीणाञ्च राष्ट्रभक्तिः दृश्यते। हे ब्रह्मन्! ब्राह्मणाः ब्रह्मतेजोयुक्ताः वेदज्ञाः अध्ययनशीलाश्चास्मिन् राष्ट्रे उत्पन्नाः भवन्तु। क्षत्रियाः शूराः युद्धकुशलाः शुत्रुपराक्रमभेदनशीलाः युद्धे सहस्रसंख्याकवीराणां जेतारश्च अजायन्ताम्।

राष्ट्रे दुग्धपूरयित्र्यः गावः अजायन्ताम्। स्त्रियः सकलनारीगुणसम्पन्नाः अजायन्ताम्। भारवाहनसमर्थाः स्वस्थाः वृषभाः अजायन्ताम्। अश्वाः शीघ्रगामिनः अजायन्ताम्। रथेष्ठाः वीराः सर्वत्र विजयशीलाः युद्धकुशलाः अजायन्ताम्। यजमानानां पुत्राः पौत्राश्च समर्थाः सभायां कुशलाश्च अजायन्ताम्। अस्माकं मेघाः आवश्यकतानुरूपं जलं वर्षन्तु। यवप्रभृतयः ओषधयः फलवत्यः सफलाः स्वयमेव पक्वाः भवतु। अस्माकं राष्ट्रवासिनां जनानामलब्धलाभः योगः लब्धानां परिपालनक्षमः भवन्तु।

**प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा॥**[२]

आज्यसक्तूधानालाजाप्रतिप्रहरमेकैकेन क्रमेण सर्वरात्रौ उत्तरवेदिस्थितेऽग्नौ जुहोति। आवर्तनमावर्तनं होमः। प्राणाय स्वाहा इत्यादिकमेशताय स्वाहा इति मन्त्रगणमावर्त्य आवर्त्य होमो भविष्यति। तत्र प्रथमे यागे घृतेन, द्वितीये सक्तूभिः, तृतीये धानाभिः, चतुर्थे लाजैः

---

[१] **शु०य० २२.२२**

[२] **शु०य० २२.२३**

होमः। अत्र अश्वमेधयागस्य प्रकरणे एकस्मै स्वाहा, द्वाभ्यां स्वाहा, त्रिभ्यः स्वाहा, चतुर्भ्यः स्वाहा, पञ्चभ्यः स्वाहा, षड्भ्यः स्वाहा, सप्तभ्यः स्वाहा, अष्टभ्यः स्वाहा, नवभ्यः स्वाहा, दशभ्यः स्वाहा, एकादशभ्यः स्वाहा, इत्येवमादयो मन्त्राः अपठिता अपि एकैकोपचयेन शतपर्यन्ताः मन्त्राः पठनीयाः होमाश्च कर्तव्याः।

समाप्तायां रात्रौ 'व्युष्ट्यै स्वाहा' इति घृताहुतिमेकामुदिते सूर्ये 'स्वर्गाय स्वाहा' इति मन्त्रेण जुहोति। तदनन्तरं प्राच्यै, पश्चिमायै, दक्षिणायै, उदीच्यै, अन्तरिक्षाय, भूम्यै इति दशदिग्भ्यः जुहोति।[१] ततः द्वादशाहुतयः जलदेवतायै 'अद्भ्यः स्वाहा' इति मन्त्रेण जुहोति। तत्र अद्भ्यः वारि, उदक, स्थिर, स्रवण, स्यन्दमान, कुप्य, सूद्य, धार्य, अर्णवादिभ्यः एता आहुतयः सन्ति। ततः वातधूमाभ्रमेघविद्योतमानस्तनयित्नुस्फूर्जत्वर्षणप्राप्तभ्रशवर्षणोग्रवर्षण-शीघ्रवर्षणोद्ग्रहणोद्ग्रहीतप्रस्वाहादुनीनीहारप्रभृतिदेवानां होमाः भवन्ति।[२]

तदनन्तरं नक्षत्रनक्षत्र्यहोरात्रः अर्द्धमासमासर्त्वावर्तसम्वत्सर-द्यावापृथिवीचन्द्रसूर्यरश्मिवसुरुद्रादित्यमरुतविश्वेदेवमूलशाखावनस्पतिपुष्पफलौषधिप्रभृतिदेवानां होमाः भवन्ति।[३] ततः पृथ्व्यन्तरिक्षद्यूलोकसूर्यचन्द्र-नक्षत्रापौषधीवनस्पतिपरिप्लवचराचरसरीसृपकीटपतंगप्रभृतिदेवानां होमाः भवन्ति।[४] वसुविभुविवस्वान् गणश्रीगणपति-अभिभू-अधिपतिबल-संसर्पचन्द्रज्योतिमलीमुचदिवापतिप्रभृतिदेवानामाज्येन होमाः भवन्ति।[५]

---

[१] **शु०य० २२.२४-२५**

[२] **शु०य० २२.२६**

[३] **शु०य० २२.२८**

[४] **शु०य० २२.२९**

[५] **शु०य० २२.३०**

मधुमाधवशुक्रशुचिनभनभस्योर्जसहसहस्यतपतपस्यांहस्पतिप्रभृतिदेवानां होमाः भवन्ति।।[१] वाजप्रसवापिजक्रतुस्वः मूर्धा, व्यश्नुविनान्त्यभौवभुवनपति–अधिपति–प्रजापतिप्रभृति– देवानां होमाः भवन्ति।[२] अश्वमेधयागप्रकरणे एतेषां होमानन्तरं वाजप्रभृति, अन्नप्राणापानव्यानोदानसमानचक्षुश्श्रोत्रवाङ्मन–आत्माब्रह्मज्योतिःस्वःपृष्ठयज्ञ प्रभृतयोऽस्मभ्यं प्राप्ताः भवन्तु। वयं यजमानाः शरीरेण स्वस्थाः धनेन पूर्णाः कीर्त्या यशसा बहुभिः कामनाभिश्च सम्पन्नाः भवेम इति।।

**यजुर्वेदस्य सर्वमेधयागाध्यायस्य विमर्शः –**

**तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः।**
**तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः।।**[३]

सर्वमेधयज्ञस्य विधानमत्र वर्तते। स्वयम्भूः ब्रह्मद्रष्टा आत्मदेवत्या 'आप्तोर्यामसंज्ञके'' सर्वहोमे मन्त्राः विनियुक्ताः सन्ति। परमात्मा पुरुषः अग्निः स एव सर्वप्रकाशकः आदित्यः स एव सर्वेषां सकलजीवनिकायानां जीवनदाता वायुः, स एव विश्वेषामाह्लादकरश्चन्द्रः स एव प्रकाशकानां प्रकाशकः तदेव त्रयीलक्षणं वेदवाक्यं स एव प्रसिद्धनिखिलब्रह्माण्डस्य निर्माता प्रजापतिः वर्तते। अत्र परमात्मनः सर्वव्यापित्वं वर्णितं वर्तते।

**सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि।**
**नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत्।।**[४]

सर्वे निमेषु त्रुटिकाष्ठाघट्यादयः कालविशेषाः परमात्मनः सकाशादुत्पन्ना सन्ति तस्यैव कालविषयमहिमा इति। स एव

---

[१] **शु०य० २२.३१**

[२] **शु०य० २२.३२**

[३] **शु०य० ३२.१**

[४] **शु०य० ३२.२**

सूर्यचन्द्रविद्युत्प्रभृतिरूपैः विद्योतते। कश्चिदपि पुरुषः परमात्मानः उपरिभागे आकाशे न गृहीतवान्। एतस्योपरिभागे मध्यभागे चतुद्रिक्षु न गृह्णाति न पश्यति। न सः प्रत्यक्षदृश्यो विषयः। ज्ञानेनानुभवेन तपस्यया च ज्ञातव्यः।

विशेषः- न असौ प्रत्यक्षदृष्टेर्विषयः परन्तु अनुभवेन ज्ञातव्यः।

**न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः।**
**हिरण्यगर्भ इत्येष मा मा हिꣳ सीदित्येषा यस्मान्न जात इत्येषः॥**[१]

तस्य प्रतिमानभूतं किञ्चिदपि न विद्यते। अत एव तस्य मानं महिमानं प्रसिद्धं यशः सर्वत्र विद्यते द्योतते श्रूयते च। वेदान्तविदः हिरण्यगर्भनाम्ना कथयन्ति। सः मम यजमानस्य च हिंसां न कुर्यात्। सर्वतोभावेन परिपूरयेत्। एतस्मात् महान् न कोऽपि अस्ति। स सर्वोत्कृष्टः देवः वर्तते। सर्वेषामाश्रयभूतः सर्वेषां पूज्यः उपास्यः प्रार्थनीयश्च वर्तते।

**एषो ह देवः प्रदिशोऽनु सर्वाः पूर्वो ह जातः स उ गर्भे अन्तः।**
**स एव जातः स जनिष्यमाणः प्रत्यङ् जनास्तिष्ठति सर्वतोमुखः॥**[२]

सः परमात्मा देवः सर्वासु दिक्षु व्याप्य स्थित इति सर्वत्र तस्यैव रूपं महिमा च दृश्यते। स सर्वप्रथमः उत्पन्नः सर्वेषां मध्ये वर्तमानश्चाऽस्ति। स एव नानाविधपशुपक्षिमनुष्यादिरूपेषु विभाति। स एव भविष्यत्कालेऽपि उत्पत्स्यमानो भविष्यति। स एव सर्वतोऽक्षिशिरोग्रीवपाणिपादः तिष्ठति। अनाद्यनिधनः तिष्ठति। अचिन्त्यमानस्तिष्ठति।

---

[१] **शु०य० ३२.३**

[२] **शु०य० ३२.४**

**यस्माज्जातं न पुरा किञ्च नैव य आबभूव भुवनानि विश्वा। प्रजापतिः प्रजया सꣳ रराणस्त्रीणि ज्योतीꣳ षि सचते स षोडशी॥**[१]

यस्मात् परमात्मनः पूर्वं किञ्चिदपि न हि जातं वर्तते। कोऽपि पुरुषो देवो वा न जातः वर्तते। यः स्वयमेव सर्वजगद्रूपं भूत्वा प्रकाशते। स षोडशावयवलिङ्गधारी प्रजापतिः प्रजोत्पादकः वर्तते। स एव प्रजया जीवधारिभिः सह रममाणः रविचन्द्राग्निरूपेषु विराजमानो वर्तते। त्रीणि रविचन्द्राग्निप्रकाशरूपाणि भूत्वा प्रकाशते।

**येन द्यौरुग्रा पृथिवी च दृढा येन स्व स्तभितं येन नाकः।**
**योऽन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम॥**[२]

येन परमात्मना द्यौः द्युलोकः तेजस्विभावः कृतः, द्यूलोकं निर्मितश्चेति। पृथिवीलोकमपि प्राणिनां धारणसामर्थ्यं चकार। येनाद्वितीयेनादित्यं प्रकाशनाय दृढः आकाशमण्डले कृतः। येन स्वर्गः देवानां कृते सुखप्रदस्थानं निर्मितः।

एतत्सर्वमद्वितीयेन परमात्मना जगत्कल्याणाय कृतम्। य आकाशमण्डले जलस्य निर्माणाय वृष्टिरूपं चकार। नानाविधोपकारं कर्तुं समर्थाय महापुरुषाय यागेन तर्पयामः। हविर्द्दद्मः।

विशेषः – परमात्मा जगतः प्राणिनामुपकाराय नानारूपं धृत्वानेकविधनिर्माणं चकार तस्मै परमात्मनेऽऽहुतयः दद्म इति।

**यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने। यत्राधि शूर उदितो विभाति कस्मै देवाय हविषा विधेम॥ आपो हयद्बृहतीर्यश्चिदापः॥**[३]

---

[१] **शु०य० ३२.५**

[२] **शु०य० ३२.६**

[३] **शु०य० ३२.७**

इमे क्रन्दनशीले द्यावापृथिव्यौ रक्षणाय हविर्लक्षणेन वृष्टिधारणाद्युपकारजनितेन प्राणिजातं स्तम्भयन्तौ मनसा स्वरक्षणाय परमात्मानं प्रार्थयतः। द्यावापृथिव्याः मध्ये उदयं प्राप्तः सूर्यः चकास्ते। प्रजापतये देवाय हविषा विधेम, आहुत्याद्यन्नेन तर्पयामः। बृहत्यः आपः यदा विश्वं गर्भे धृतवत्यः तदा स एव ताः ररक्ष जगतश्चोपकारं चकार। सर्वं जगत् स्वरक्षार्थं तस्यैव मुखमवलोकयति प्रतीक्षां च करोति मन्त्रं च जपति तस्मै परमात्मने आहुतिं च ददाति।

**वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम्। तस्मिन्निदꣳसं च वि चैति सर्वꣳ स ओतः प्रोतश्च विभूः प्रजासु॥**[१]

वेदान्तशास्त्रस्य रहस्यज्ञाता विद्वान् सद्भावनया शास्त्राज्ञया वेदशास्त्रान्तर्गतवर्तमानपरमात्मनः रहस्यं पूर्णतः जानाति। परमात्मा वेदवाण्यां तिष्ठति योगिनां हृदये च निवसति। एतत् रहस्यं विद्वानेव जानाति। यत्र परमात्मनि विश्वस्य सर्वं ब्रह्माण्डजातं निवसति।

अखिलब्रह्माण्डस्य एकमेव निवासस्थानं तस्मिन् परमात्मनि इदं ब्रह्माण्डजातं संहारकाले संगच्छते सृष्टिकाले च ततः निर्गच्छति। सः परमात्मा प्रजासु ऊर्ध्वतन्तुषु पट इव शरीरभावेन सम्मिलितः तथा तिर्यक् तन्तुषु पट इव देहरूपेण प्रोतः वर्तते। स कार्यकारणरूपेण विविधरूपेण च दृश्यते। सर्वव्यापकः जीवभावेन सर्वत्र वर्तमानः वर्तते।

विशेषः - परमात्मनः महिमा एव इदं सर्वं जगत् वर्तते। तेनैव संचालकेन सर्वं प्रचलति सर्वं जीवितं दृश्यते।

---

[१] **शु०य० ३२.८**

**प्र तद्वोचेदमृतं नु विद्वान्गन्धर्वो धाम विभृतं गुहा सत्।**
**त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुः पितासत्।।**[१]

वेदवाचं विचारयति वेदार्थस्य ज्ञाता वेदान्तवेत्ता विद्वान् सदा वर्तमानं परमात्मानं सरहस्यं वेद। स एव विद्वान् तस्य व्याख्याता भवति। नानाभूतं सर्गस्थितिप्रलयभूतं तस्य रहस्यं गुहासु वेदवाणीषु स्थापितं वर्तते। तस्य स्वरूपसर्गस्थिति यः त्रयो वेदा त्रयः कालाः गुहासु वर्तन्ते। तस्य महत्वं स्वरूपरहस्यं वा य विद्वान् जानाति सः पण्डितः। यथा स ब्रह्मणाोऽपि पिता परमात्मैव भवति।

विशेषः - इदं दृश्यमानं जगत् तस्यैव माया वर्तते। यः पुरुषः तस्य धाम स्वरूपं वेद स एव विद्वान् इति।

**स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।**
**यत्र देवा अमृतमान शानास्तृतीये धामन्नध्यैरयन्त।।**[२]

सः परमात्मा बन्धुवत् मान्यः। उपकारकर्ता बन्धुवत् सदा सहायकः वर्तते। स एवास्माकं उत्पादयिता च वर्तते। स एव विविधरूपेण निखिलजगद्धारणकर्ता सहायकश्च वर्तते।

स सर्वेषां लोकानामखिलचराचरजगतः आबालवृद्धवनितानां च धारयिता रक्षकश्च वर्तते। तस्यैव कृपया इद्रादयो देवा अपि अमृतं प्राप्य मोदन्ते।

---

[१] **शु०य० ३२.९**

[२] **शु०य० ३२.१०**

तस्यैव कृपया ते तृतीये स्वर्गे लोके स्वेच्छया निवसन्ति। मोक्षप्रापकं ज्ञानं प्राप्य ब्रह्मणि ओतप्रोताश्च जायन्ते। ब्रह्मनिष्ठं ज्ञानं प्राप्य मुदिताः सन्तः निवसन्ति।

विशेषः - ब्रह्मज्ञानाद् एव मोक्षलाभः अमृतप्राप्तिश्च। ब्रह्मनिष्ठं ज्ञानं प्राप्ताः सन्तः स्वर्गे देवाः मोदन्ते। नानात्मानो भिन्नानि वेद स सर्वज्ञः। सः पण्डितः स एव परमार्थस्य सर्वेषामुपकारकश्च इति।

**परीत्य भूतानि परीत्य लोकान् परीत्य सर्वाः प्रदिशो दिशश्च।**
**उपस्थाय प्रथमजामृतस्यात्मनात्मानमभि संविवेश॥**[१]

सर्वेषु प्रपञ्चेषु भूतेषु अहमेवास्मि। सर्वाणि भूतजातानि मयि निवसन्ति इत्थं ज्ञानवतः पुरुषस्य मुक्तिः उच्यते। ब्रह्मज्ञानयुक्तस्य पुरुषस्य सर्वे अग्निहोत्रादयो यज्ञाः सर्वमेध एव परीत्य परं कृत्वा सर्वभूतानि सर्वान् लोकान् पारं कृत्वा सर्वाः दिशः आशाः सर्वाः प्रदिशश्च पारं कृत्वा आत्मज्ञानवान् पुरुषः सर्वमेधयज्ञकर्ता जीवरूपेण यज्ञस्यात्मानं यज्ञपुरुषं परमात्मानमभिसंविवेश। ब्रह्मैव भवति। भूतजातमपि ब्रह्मैव, लोकान् अपि ब्रह्मैव दिशः प्रदिशः सर्वाः ब्रह्मैव इति वेत्ता ब्रह्मैव भवति। प्रथमोत्पन्नानां त्रयीरूपाणां वाचां वेदवाण्यामुपस्थाय सम्पूज्य स्तुत्य च शरीरमाध्यमेन ब्रह्मस्वरूपं प्राप्य परमात्मनि ब्रह्मणि संविवेश ब्रह्मलीनं भवतीत्यर्थः। विशेषः- आत्मज्ञानादेव मोक्षः।

**परि द्यावापृथिवी सद्य इत्वा परिलोकान् परिदिशः परि स्वः।**
**ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्तदासीत्॥**[१]

---

[१] **शु०य० ३२.११**

सर्वमेधयायी तद् ब्रह्म अपश्यत् जानाति ब्रह्मरूपञ्च भवति। अज्ञाननिवृत्तिरेव भगवद्दर्शनम्। द्यावापृथिवीं च सद्यः ज्ञात्वा द्यावापृथिव्योः रहस्यं ज्ञात्वा ब्रह्मणि समागतः दिशः पूर्वदिशः प्रदिशः आदिस्वरूपं च ज्ञात्वा मोदते। ऋतस्य यज्ञस्य स्वरूपं विदित्वा गुह्यवस्तु वारम्वारं कथितं चित्तमारोहति।

ऋतस्य तन्तु इति कर्तव्यतां विततं प्रसारितं यथा तथा निवृत्य यज्ञं कृत्वा मोदते। ब्रह्मणि चेतः प्रसारितं सत् ब्रह्मरूपस्य जीवस्य अज्ञाननिवृत्तिं ब्रह्मप्राप्तिञ्च कारयति। विशेषः- अत्र मन्त्रे गृहस्थानामपि मुक्तिः दर्शिता वर्तते। वेदाध्ययनात् ब्रह्मज्ञानमेव मुक्तिः इति।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे ब्रह्मसूक्तसमीक्षणम्'** नाम सप्तदशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

[१] **शु०य० ३२.१२**

# अथाष्टादशोऽध्यायः

# यजुर्वेदे मेधासूक्तसमीक्षणम्

इदं सुप्रसिद्धं यत् समग्रमपि वैदिकवाङ्मयं लोके परलोके वा सुखप्राप्तिस्थानानां परमार्थतः व्यवहारतश्च साधनानाम् अनूहजीवातुरूपं तदेव वेदस्य नारायणत्वं स्थितिविज्ञानस्य सर्वोपकारकत्वञ्च अवधितत्त्वं प्रतिवर्णं सुधीतल्लजैः आम्नातं प्रगीतञ्च। इदम् अपि सुविदितमेव **यद् जानाति इच्छति यतते** इति लौकिकसम्विज्ञानस्य ज्ञानेच्छाक्रियाणामेव सर्वोपकारकत्वं सर्वसमर्थञ्च अबाधितमुपकल्पितम्। तेन मेधासम्विज्ञानं यजुर्वेदे कथं न परिचर्चितं स्यात् तदेव पार्थक्येन मेधासूक्ताख्यं ऋक्चतुष्टयं सुव्यक्तमुपलभ्यते।

अस्मिन् मेधासूक्ते यजमानः एवं प्रार्थयति अग्निदेवं यत्- हे अग्लायमानगतिशीलाग्निपरमात्मन्! मयि कमनीयां शक्तिमाधेहि मेधाशक्तिञ्च अचिन्त्यशक्तिसम्पन्नां प्रकल्पय। इयमेव मेधा सर्वथा अभ्यर्चनीया देवगणैरपि अभ्यर्हितत्वात्। तदर्थमेव भवद्भ्यः सादरमाहुतिं प्रददे। पुनश्च क्रियासमनन्तरं प्रार्थये यद् हे अग्ने! मां ज्ञानशक्त्या समायोजय तदेव तत् समर्थां धारणाख्यां मेधां मयि निधेहि। तथैव इन्द्रवरुणादीनामपि मेधानिमित्तं प्रार्थनामाहुतिञ्च प्रकल्प्य आत्मानं कृतीति मन्ये। तथा च एतत्सर्वं ब्रह्मविदां विश्वहिततत्परां शक्तिं अङ्गीकुर्वतां जनानां कृते अस्याः प्रयोगसौविध्यं भवेत् तदर्थमेव मम इमां प्रार्थनां स्वीकुरु। पुनश्च भगवतीं श्रियमुद्दिश्य आहुतिविधानात् श्रियः सम्प्रार्थनात् च सूक्तमेतत् श्रीसूक्तपदेनापि अभिधीयते। एतेन अभिव्यक्तिरियं प्रसिद्ध्यति यत् एतस्य पाठकर्मणा विधानकर्मणा

ज्ञानकर्मणा च सर्वमानवानां सर्वविधं हितं प्रत्यक्षं वर्तते। तेन इदं अनुसन्धेयमेव।

**सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्।**
**सनिं मेधामयासिषꣳस्वाहा॥**[१]

इतः प्रारभ्य तिसृभिर्ऋग्भिर्मेधा याच्यते श्रीश्च चतुर्थ्या। सदसस्पतीत्यारभ्य इदं मे ब्रह्मेति इमाश्चतस्त्र ऋचो वैदिकसम्प्रदाये श्रीसूक्तशब्देन प्रोच्यन्ते। सर्वोऽपि विधिः श्रीसूक्तवदेव कार्यः।[2]

अहं द्रव्यदानं मेधां बुद्धिं चाग्निं देवं प्रार्थयामि। अग्निः यज्ञगृहस्य रक्षकोऽस्ति। अद्भुतबलपराक्रमः शक्तिपरिपूर्णोऽस्ति। इन्द्रस्य प्रियं प्रीतिपात्रं हितसाधकं वर्तते। धनमेधादिभिः दर्शनीयोऽग्निः वर्तते।

विशेषः – यज्ञेषु सर्वपूजकः मुख्यदेवोऽग्निः वर्तते। अतः द्रव्यं बुद्धिं मेधां च प्राप्तये यजमानः अग्निं याचते स यज्ञस्य स्वामी अतुलपराक्रमपरिपूर्णः अस्ति।

**यां मेधां देवगणाः पितरश्चोपासते।**
**तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा॥**[३]

इन्द्रादयो देवगणाः बर्हिषद् प्रभृतयो पितरश्च यां पवित्रां मेधां बुद्धिं निर्मलमतिं च प्राप्तुमग्निं प्रार्थयन्ते। हे अग्ने तां देवोपकारसदृशीं सदसद्विवेचनकर्त्रीं च बुद्धिं दत्त्वा त्वदर्थमेषा अस्मान् तेजस्विनः कुरु। आहुतिः मया दीयते स्वाहा सुहुतमस्ति।

---

[१] **शु०य० ३२.१३**

[२] **शु०य० ३२.१६ वेदार्थपारिजातभाष्ये स्वामिकरपात्रचरणाः**

[३] **शु०य० ३२.१४**

विशेषः – सदसद्विवेचनकर्त्री बुद्धिं प्राप्तये सर्वे यतन्ते येषां देवानां पार्श्वे एतादृशीं शक्तिं दातुं वर्तते। एतद् विचार्यैव अग्निमेधां प्राप्तये याचन्ते। मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः।

**मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः।**
**मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा॥**[१]

वरुणदेवस्य बुद्धिः मां प्रापयतु। अग्निः प्रजापतिः मदर्थं कल्याणाय सद्बुद्धिं ददातु। इन्द्रः वायुश्च मे सद्बुद्धिं ददातु। धाता मदर्थं सद्बुद्धिं ददातु।

विशेषः – ये पूजार्हा देवाः सन्ति तेषां सद्बुद्धयः मां प्रापयन्तु दुर्बुद्धिश्च विनश्यन्तु। देवानां पार्श्वे सदसद्विवेचनकर्त्री सुमतिः अस्ति सा मां प्रापयतु यथा वयं सुखेन निवसामः जागृयामः।

**इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम्।**
**मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा॥**[२]

ब्राह्मणजातिः क्षत्रियजातिश्च उभे उत्तमां श्रियमश्नुताम्। इन्द्रादयो देवा अपि मयि श्रियं दधतु, स्थापयन्तु यथा वयं श्रीमन्तः स्याम। श्रियै देव्यै मया आहुतिः दीयते स्वाहा। इन्द्रप्रभृतिदेवानां श्री मयि आयातु। श्रिया मेधया च विना न काचित् कार्यसिद्धिः न कश्चित् लाभः न काचित् श्रेष्ठता उपलब्धा वर्तते।

विशेषः – श्रेष्ठत्वं यशस्यं प्रशंसनीयतां च प्राप्तये मेधा श्रीश्च आवश्यकीये वर्तते अतः तयोः प्राप्त्यर्थं सततं प्रयतितव्यम्।

मेधासूक्तविषये कश्चित् एवं व्याख्याति – यतः तत्सम्प्रदायानुसारं सर्वत्रापि वेदमन्त्राणां व्याख्याने यथेच्छं यौगिकशक्त्या

---

[१] **शु०य० ३२.१५**

[२] **शु०य० ३२.१६**

अर्थस्यावलम्बं कृत्वा अत्यन्तं लौकिकोर्थः सिद्धान्ततया प्रतिपाद्यते। अतः सः वदति यत् ईश्वरः सर्वस्यापि प्रियं मित्रं भवति स एव सद्बुद्धिं ददाति। तथा च **'सदस'** शब्दस्य तात्पर्यं सभेति कृत्वा जगद्रूपेण व्याख्यानं करोति। **सद्लृगत्यवसानेषु** इति प्रकृत्या **'सदस'** शब्दः गृहशब्दस्य पर्यायवाचकोस्ति। इन्द्रशब्दस्य जीवात्मोर्थः तथा देवतापितृशब्दयोः ज्ञानीत्यर्थः ब्राह्मणक्षत्रियस्य यथोक्तं व्याख्यानं स्वीकरोति। अन्ते सामञ्जस्येन सर्वसमाजस्य हितमेव प्रतिपादयति।

अत्र विषये ममेदं वक्तव्यं भवति यत् वेदानां तात्पर्यम् अपरिमितं भवति। लोकसौष्ठवमासाद्य केनोपि यथामति व्याख्यानं कर्तुं शक्यते। परन्तु प्रमुखतः -

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।**
**एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता।।**

इत्याप्तलक्षणेन एवं भूताः लोकसिद्धाः अर्थाः वेदैः कदापि न प्रतिपाद्यन्ते। वेदानां प्रामाण्यस्य सर्वैरपि अङ्गीकारात्। प्रामाण्यं हि अपूर्वार्थस्य प्रतिपादने एव सिद्धार्थस्य कथनं तु अनुवाद एव।

तस्मात् यागस्य इतिकर्तव्यताविधानेन मन्त्रशक्त्या देवतानां प्रीत्या या लोकोत्तराप्रतिभासर्वहितकारिणीबुद्धिः प्रकृष्टा च मेधोभीष्टा भवति, सा तु लोकाराधनतः कदोपि न। तदेव **'पण्डितराजेन काव्यस्य हेतुत्वे प्रतिभैवाङ्गीकृता सा च प्रतिभा देवराधनबलादेव। देवाराधनाप्रभावात् प्रतिभोदेति'** पण्डितराजः प्रथमानने रसगङ्गाधरे तस्याश्च हेतुः **देवतामहापुरुषप्रसादादिजन्यम्** अदृष्टम्।

वेदसूक्तेषु समभ्यर्चितदेवानां कृपया सा जागरिता भवति, अत्र कालिदासः प्रमाणम्। संस्कृतवाङ्मये सर्वत्र स्वस्य इष्टदेवात् बुद्धिनैर्मल्यं ग्रन्थकृद्भिः प्रार्थितम्। देवानां प्रसादेन तस्याः प्राप्तिर्भवति।

किञ्च 'सु –आह ; 'स्वा– आह' इति रुपेण स्वाहेतिपदस्य व्याख्यानमप्रियमेव अप्रमाणितत्वात्। नेयं व्युत्पत्तिः अपितु निर्वचनम्। प्रसिद्धमेतत् निर्वचनस्याधिकारः अबाधितबुद्धिनां यास्कप्रभृतीनामेव। तस्मात् एवं रूपाणि व्याख्यानानि अत्यन्तं लौकिकानि न तु वेदस्य मुख्याभिप्रायरुपाणि। अनुसङ्गतस्तु कथञ्चित नेयानि। तस्मात् पूर्वोक्तमेव व्याख्यानं मद्दृष्ट्या वेदसिद्धान्तानुरोधि प्रतिभाति।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे मेधासूक्तसमीक्षणम्'** नाम अष्टादशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

# अथैकोनविंशोऽध्यायः

## यजुर्वेदे यमसूक्तसमीक्षणम्

यमसूक्तं [1] यमदैवत्यानामृचां समुदायं सूक्तशब्दवाच्यम्। अस्मिन्नध्याये पितृमेधसम्बन्धिनो मन्त्रा उक्ताः सन्ति। पितृमेधः मृतस्य पितुः वर्षस्मरणे भवति। वर्षस्मृतौ विषमवर्षे पितृमेधो भवितुमर्हति। एकतारकनक्षत्रे चित्राप्रभृतिनक्षत्रेषु च अमावस्यायां तिथौ शरदृतौ ग्रीष्मे वा माघमासे वा भवति।

पितृमेधं करिष्यता यजमानेन कुम्भेऽस्थिसंचयं विधातव्यम्। मृतपुरुषस्य यावन्तः पुत्रपौत्रप्रभृतयः परिजनाः सन्ति तावन्तः कुम्भाः कर्मकाण्डदिवसे आनेतव्याः। ततः अरण्ये कुम्भाः स्थापनीयाः। कुम्भेऽस्थिसंचयनं कृत्वा ग्रामसमीपे समानीय शय्यायां कुम्भं नवीनवस्त्रेण सर्वान् कुम्भान् विविधवाद्ययन्त्रेषु वाद्यमानेषु सर्वे परिवारजनाः मृतस्य कुम्भस्थितास्थिप्रदक्षिणं परिचरन्ति। तमस्थिकुम्भं गृहीत्वा ग्रामाद् बहिः स्नानभूमौ गत्वा श्मशानकर्म कुर्वन्ति। तत्र निखिलं श्मशानकर्म सम्पाद्य गृहमागत्य तं गृहेषूच्छ्रयेत्। एतदुच्छ्रयणं प्रजावृद्ध्यैः कार्यम्।

---

[1] **यमगाथां गायन्तो यमसूक्तं च जपन्त इत्येके। (पा०गृ०सू० ३.१०९) अपेतो यन्तु पणय इत्यध्यायो यमसूक्तम्। (पा०गृ०सू० भाष्यकारः आचार्यविश्वनाथः पृ० ३७७)**

**अपेतो यन्तु पणयोऽसुम्ना देवपीयवः।**
**अस्य लोकः सुतावतः। द्युभिरहोभिरक्तुभिर्व्यक्तं यमो ददात्ववसानमस्मै।**[1]

असुराः राक्षसाः वा अत्र अस्थिस्थानात् दूरं गच्छन्तु। एते असुराः राक्षसा वा देवद्वेषकारकाः सन्ति। पणयः परद्रव्यापहरणकारकाः सन्ति। एतद् स्थानं सोमाभिषवकर्तृणां यजमानानां निवासाय वर्तते। यमः अस्यामृतस्य पुरुषस्य निवासस्थानं ददातु। ऋतुभिः दिवसैः रात्रिभिश्च स्पष्टीकृतं निरन्तरं यमः सुखमस्मै मृताय पुरुषाय ददातु।

विशेषः - मृतपुरुषाय परलोके सुखं प्राप्नोतु एतदर्थं परिवारजनाः यमं प्रार्थयन्ते।

**सविता ते शरीरेभ्यः पृथिव्यां लोकमिच्छतु।**
**तस्मै युज्यन्तामुस्त्रियाः॥**[2]

ये केचित् मृतस्य पुरुषस्य सम्बन्धिनः वर्तन्ते ते सर्वे सवितारं याचन्ते। यथा सविता मृताय पुरुषाय सुखपूर्वकनिवासाय अवसानं ददातु। सविता तस्मै गमनाय यानं बलीवर्दयुक्तं ददातु। मया यत्र मार्गे गच्छता सः पुरुषः न किञ्चिदपि दुःखस्यानुभवं कुर्यात्।

विशेषः- सुखपूर्वकगमनाय साधनं बलीवर्दयुक्तयानं सविता ददातु एतदर्थं परिवारजना प्रार्थयन्ति। यत्र मृतजनः निवसतु तत्र मा किञ्चित् कष्टं भवतु।

**वायुः पुनातु सविता पुनात्वग्नेर्भ्राजसा सूर्यस्य वर्चसा।**
**विमुच्यन्तामुस्त्रियाः॥**[3]

---

[1] **शु०य० ३५.१**

[2] **शु०य० ३५.२**

[3] **शु०य० ३५.३**

तत्स्थानं वायुः पुनातु सविता शुद्ध्यतु, सूर्यस्य तेजसा पवित्रं भवतु। सूर्यस्य प्रकाशेन शुद्ध्यतु। बलीवर्दाः तत्स्थानशुद्ध्यर्थं शकटात् वियुक्ताः भवन्तु। तत्स्थानशुद्ध्यर्थं ये पवित्रकर्तारः देवाः सन्ति ते सर्वेऽत्र प्रार्थिताः वर्तन्ते।

**अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता। गोभाज इत्किलासथ यत्सनवथपूरुषम्।**[१]

हे साधकाः! अश्वत्थे संसारवृक्षे, वो निषदनम्, पर्णे पत्रे, वसतिः स्थितिः। यूयं गोभाज एव गाव इन्द्रियाणि तानि भजन्तीति गोभाजः। तस्मात् सर्वोपद्रवशान्तये यूयं पुरुषं परमात्मानं सनवथसेवध्वम्। अश्वत्थे पलाशे च वः स्थानम्। देवाधिष्ठानादश्वत्थो लोके नतिप्रदक्षिणादिना पूज्यते पलाशश्चेध्मादिरूपेण।

**सविता ते शरीराणि मातुरुपस्थ आवपतु।**
**तस्मै पृथिवि शं भव॥**[२]

मृतस्य परिवारजनाः प्रार्थयन्ति- हे मृतपुरुष! ते तव शरीरसम्बन्धिनम् अस्थिसमूहं सर्वप्रेरकसूर्यः मातुः पृथिव्याः उत्सङ्गे स्थापयतु। त्वदर्थं भूमिः सुखं ददातु। पुरुषमात्रक्षेत्रस्य मध्ये मृतस्यास्थीनि राशीकरोति। हे मातृभूमे! तस्मै सवित्रोप्तायास्थिरूपाय यजमानाय सुखरूपा भव।

विशेषः - अत्र सूर्यस्य भूमेश्च प्रार्थना वर्तते मृतयजमानकल्याणाय।

**प्रजापतौ त्वा देवतायामुपोदके लोके निदधाम्यसौ।**
**अप नः शोशुचदघम्॥**[१]

---

[१] **शु०य० ३५.४**

[२] **शु०य० ३५.५**

मृतस्य परिवारजनाः कथयन्ति,यत् हे मृतपुरुष! उपोदके उदकसमीपवर्तिनी लोके स्थाने प्रजापतौ देवतायां त्वां निदधामि। स प्रजापतिर्नोऽस्माकमघं पापमपशोशुचत्।

विशेषः - पापराशिशमनार्थं प्रजापतेः प्रार्थना विद्यते।

**परं मृत्यो अनु परेहि पन्थां यस्ते अन्य इतरो देवयानात्।**
**चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाꣳ रीरिषो मोत वीरान्॥**[२]

मृतजनस्य पुरुषाः मृत्युदेवं कालपुरुषं वा प्रार्थयन्ति। हे मृत्यो! अन्यत्मार्गमाश्रित्य त्वं यत्र कुत्रापि अन्यस्थानं गच्छ। त्वं देवस्थानाद् दूरं गच्छ। तव मार्गोऽन्यत्र विद्यते देवस्थानात् पृथक्भूत्वा पितृस्थानं मृतस्थानं वा गच्छ। तव पार्श्वे कर्णौ विद्येते नयने च विद्येते त्वं शृणोषि पश्यसि चास्माकं पुत्रपौत्रवीरान् सम्बन्धिनः जनान् मा रीरिषः मा हिंसीः मा जहि।

विशेषः - अत्र स्वजनरक्षार्थं मृत्युदेवं प्रार्थयन्ति। देवयानात् पथोऽन्यः पितृयानाख्यः पन्था एव मृत्योर्विषयः।

**शं वातः शꣳ हि ते घृणिः शं ते भवन्त्विष्टकाः।**
**शं ते भवन्त्वग्नयः पार्थिवासो मा त्वाभिशूशुचन्॥**[३]

मृतपुरुषस्य कल्याणाय निखिलान् देवान् प्रार्थयन्ति। यथा हे मृतपुरुष! वायुः तुभ्यं सुखं ददातु, त्वदर्थं सुखरूपं प्रवहतु। सूर्यकिरणाः तुभ्यं सुखं ददतु। तवासनार्थं स्थापिताः इष्टकाः मयोभवाः भवन्तु यथा तव सुखं भवेत् तद् वत् भवन्तु। पार्थिवाः पृथिव्यां भवाश्चाग्नयः तव हेतवे सुखरूपा भवन्तु। अग्नयः त्वां माऽभितापयन्तु।

---

[१] **शु०य० ३५.६**

[२] **शु०य० ३५.७**

[३] **शु०य० ३५.८**

विशेषः – लोके वर्तमानाः सर्वे देवाः त्वदर्थं सुखहेतवो भवन्तु, इति प्रार्थना वर्तते।

**कल्पन्तां ते दिशस्तुभ्यमापः शिवतमास्तुभ्यं भवन्तु सिन्धवः।**
**अन्तरिक्षꣳ शिवं तुभ्यं कल्पन्तां ते दिशः सर्वाः॥**[1]

हे मृत! तवार्थं पूर्वादिदिशः कल्पन्तां क्लृप्ताः समर्था भवन्तु। स्यन्दनशीलाः नद्यः समुद्राः आपः सर्वतः स्वच्छन्दभावेन तव सुखार्थं प्रवहन्तु। सिन्धवः समुद्राः सुखकारिण्यो भवन्तु। अन्तरिक्षं शिवं भवतु। सर्वाः दिशः चराचरसर्वं जगत् तवार्थं मङ्गलप्रदं भवतु।

विशेषः– ब्रह्मदृष्ट्या दृष्टानि सर्वाणि वस्तूनि सुखरूपाणि भवन्तु।

**अश्मन्वती रीयते सꣳरभध्वमुत्तिष्ठत प्रतरता सखायः।**
**अत्रा जहीमोऽशिवा ये असञ्छिवान्वयमुत्तरेमाभिवा जान्॥**[2]

हे बन्धुजनाः! पाषाणवती एषा नदी प्रवहति। अस्याः संतरणाय प्रयत्ना विधातव्याः। हे सखायः! जागरिता भवन्तु प्रकर्षेण नदीं जलाशयं वा पारं कुरुत। अस्मिन् स्थाने ये मङ्गलविनाशकाः हानिकारकाः दुःखदातारः सन्ति ते सर्वे इतः अन्यत्र गच्छन्तु ये राक्षसप्रभृतयो म्लेच्छाः वर्तन्ते तान् सर्वान् वयं दूरीकुर्मः, परित्यजामः। तेषामन्यत्र गमने सति वयं सुखप्रदानि मङ्गलदायकानि अन्नानि प्राप्नुयाम।

विशेषः – मृतस्य कल्याणाय राक्षसान् अपसारयन्ति परिजनाः।

**अपाघमप किल्बिषमप कृत्यामपो रपः।**
**अपामार्ग त्वमस्मदप दुःष्वप्न्यꣳ सुव॥**[3]

---

[1] **शु०य० ३५.९**

[2] **शु०य० ३५.१०**

[3] **शु०य० ३५.११**

परिवारजनाः यज्ञोपवीतिनो भूत्वा आप उपस्पृश्य हस्तगृहीतैरपामार्गैः स्वशरीराणि शोधयन्ते अपामार्गबीजैरुद्वर्तयन्ति वा। हे अपामार्ग! त्वमस्मत्सकाशान्मानसं पापमपगमय कीर्तिनाशकं शारीरिकं पापमपजहि। परकृतमभिचाररूपपापमपजहि। कायिकं वाचिकं मानसिकं पापमपजहि। तव प्रसादाद् वयं पापरहिताः पवित्राः भवेम। दुःस्वप्नरूपपापादुत्पन्नं दुःखमपजहि।

विशेषः - मृतस्य पुरुषस्य श्मशानसंस्कारानन्तरं शरीरशुद्ध्यर्थमपामार्गस्पर्शनं परिवारजनाः कुर्वन्ति।

**सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः॥[1]**

श्मशानक्रियानन्तरं सर्वे परिवारजनाः स्नानं कुर्वन्ति मन्त्रं च पठन्ति- सुमित्रिया0 इति अनेन मन्त्रेण स्नात्वा नूतनानि वस्त्राणि परिधाय परिवारजनाः अनड्वाहमिति मन्त्रेण वृषपुच्छमन्वारभ्य 'ओमुद्वयमिति' मन्त्रं पठन्तः सर्वे ग्राममागच्छन्ति। "सुमित्रियान आप0" इति मन्त्रेण जलमात्मानः उपरि सर्वे आसिञ्चन्ति कथयन्ति चेमानि जलानि मित्रवदस्माकमुपकारकाणि भवन्तु। "दुर्मित्रिया" इति मन्त्रेण जलानि यस्यां दिशि शत्रवः सन्ति तत्र क्षिपन्ति कथयन्ति च य अस्मान् द्वेष्टियः यं शत्रुः वयं द्वेषं कुर्मः, तस्मै शत्रवे इमानि जलानि नाशकराणि भवन्तु सर्वतः तद्विनाशकानि भवन्तु।

**अनड्वाहमन्वारभामहे सौरभेयꣳ स्वस्तये।**
**स न इन्द्र इव देवेभ्यो वह्निः सन्तारणो भव॥[2]**

---

[1] **शु०य० ३५.१२**

[2] **शु०य० ३५.१३**

सर्वे परिवारजना अनड्वाहं स्पृशन्ति कथयन्ति च। हे अनड्वन्! त्वमस्माकं दु:खे पतितानां दु:खात् पारकर्तृको भव वयमात्मशुद्ध्यर्थं त्वां स्पृशामः। त्वं सुरभेः देवगोः कुलस्य पवित्रबलीवर्दः असि। अस्माकं कल्याणाय सततं चिन्तनशीलो असि। त्वमग्ने: देवानां च वाहकोऽसि यथा इन्द्रः सततं देवरक्षकोऽस्ति। तद्वत् अस्माकं त्वं पालकश्चासि। यथा इन्द्रः देवानां तारकः तथा त्वमपि वर्तसे।

विशेषः - आत्मशुद्ध्यर्थमनडुहः स्पर्शः वर्तते।

**उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम्।**
**देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्।।**[1]

वयं यजमानाः अज्ञानात् अन्धकारान्मोहाद्वा मोहबहुलात् अस्माल्लोकात् पारं गताः स्मः। सर्वोत्तमं स्वर्गलोकमवलोकयन्तः देदीप्यमानं भगवन्तमादित्यं प्राप्तवन्तः। यत्र ब्रह्मरूपमुत्तमं ज्योतिः प्रकाशः वर्तते, तद्वयं प्राप्नुयामः। मोहात् निर्गत्य उत्तमं लोकं प्राप्तवन्तः। अपां सोममृता अभूम तद्वत् वयं सच्चिदानन्दं ब्रह्म प्राप्नुयाम।

विशेषः - सात्त्विकं ज्ञानं प्राप्य जीवः परमानन्दमोदमनुभवति।

**इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतम्।**
**शतं जीवन्तु शरदः पुरुचीरन्तर्मृत्युं दधतां पर्वतेन।।**[2]

स्वनिवासग्रामस्य श्मशानस्य च मध्ये मर्यादालोष्टं महत्तरं मृतखण्डमध्वर्युः निदधाति। जीवितेभ्यः पुरुषेभ्यः सततं कल्याणाय मृत्योः रक्षणाय इमं मर्यादालोष्टं परिधिं स्थापयामि। यथा मृत्युः ग्रामं नागच्छेत्। एषां जीवितानां जनानां मध्येऽन्यः कश्चित् वेदोक्तादायुषः पूर्वं

---

[1] **शु०य० ३५.१४**

[2] **शु०य० ३५.१५**

पितृलोकगमनकार्यमुद्दिश्य नागच्छतु। एते जीवाः शतवर्षपर्यन्तं जीवनं जीवन्तु शतवर्षायुषो भवन्तु। दानपुण्यकर्माध्ययनयागानुकूलाः कर्मकर्तारः भवन्तु। एतं महत् मृतखण्डं संस्थाप्य मृत्युमन्तर्हितं कुर्मः यथा अकालमृत्युः कस्यचित् पुरुषस्य मा भवेत् इति।

विशेषः - अकालमृत्युवारणाय शतायुषः प्राप्तये च दानपुण्याध्ययनयागाः कर्तव्याः।

**अग्न आयूꣳषि पवस आसुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनाम्॥**[१]

कज्जलादिना नेत्राञ्जनमञ्जयन् तैलेन पादाञ्जनमभ्यञ्जनं च इति द्वयं कार्यं कृत्वा औपासनं कर्तुरावसथ्याग्निं दर्भैः परिस्तीर्य वारणवृक्षनिर्मितान् चतुरः परिधीश्च चतुर्षु दिक्षु अमन्त्रकं परिधाय वारणेन स्त्रुवेण ऐकामाहुतिं जुहोति।

हे अग्ने! आयुः प्रापकाणि कर्माणि स्वयमेव चेष्टसे। यथा जना दीर्घायुषः भवन्तु। अत एव इषं व्रीह्यादिधान्यं दध्यादिकं च देहि अस्मान् प्रापय। दूरेऽपि वर्तमानाः श्वानः श्वानवत् राक्षसाः अस्मत्तः दूरे भवन्तु अस्मान् प्रति अवरोधय। न कश्चिदस्मभ्यं हानिकारको भवतु।

विशेषः- पापीनां दुष्टजनानामवरोधनायाग्निप्रार्थना वर्तते।

**आयुष्मानग्ने हविषा वृधानो घृतप्रतीको घृतयोनिरेधि।**
**घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि रक्षतादिमान्त्स्वाहा॥**[२]

हे अग्ने! आयुषा त्वं दीर्घायुः दीर्घजीवी भव! हविषा यजमानेन प्रदीयमानया आहुत्या तेजस्वितां प्राप्तोऽसि। सततं तव मुखे घृतं पूर्णमस्ति घृतमेव तवोत्पत्तिस्थानं वर्तते।

---

[१] **शु०य० ३५.१६**

[२] **शु०य० ३५.१७**

अतः निरन्तरं वृद्धिं प्राप्नुहि। घृताहुत्या सन्तुष्टस्त्वं प्रसन्नमना भव। मधुरो स्वादुपेतम् सुगन्धितमाज्यं पीत्वा तृप्तिं प्राप्नुहि! यथा पिता स्वपुत्रान् रक्षति तथा त्वमस्मान् राक्षसेभ्यः उपद्रवकारिभ्यः सर्वतोभावेन पाहि, यथा वयं तव रक्षणे सुखिनो स्याम तुभ्यं सुहुतमस्ति।

विशेषः - उपद्रवकारिभ्यः राक्षसेभ्य नानाविधरोगेभ्यः रक्षणार्थमग्निं प्रार्थयन्ते यजमानाः।

**परीमे गामनेषत पर्यग्निमहृषत। देवेष्वक्रत श्रवः क इमाँ२।। आदधर्षति।।**[१]

श्मशानादागत्य यजमानाः गोदानानि कुर्वन्ति। आहुत्या देवान् तर्पयन्ति। अतः अग्निं प्रार्थयन्ते। यजमानाध्वर्युश्च स्वरक्षणार्थं परिदां वदन्ति। इमे यजमानाः अनड्वाहपुच्छमालभन्तः अग्निं हवनादिकर्मभिः तर्पितवन्तः। कः एतादृशः समर्थः जनः वर्तते यः यजमानान् पराभवितुं समर्थः? सुकर्मभिः सन्तुष्टाः यजमानाः बलिनः सन्ति।

विशेषः - श्मशानक्रियानन्तरं गोदानं होमाश्च देवेभ्यः कर्तव्यमस्ति।

**क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः।**
**इहैवायमितरो  जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्।।**[२]

आहुतिहोमानन्तरं यत्र हुतं तस्यैपासनस्यैकशेषं निरस्यति येन अग्निना पुरुषः दह्यते सोऽग्निः क्रव्याद् वर्तते। तमग्निं दूरं करोति। अपुनरागमनाय दूरं प्रेषयामि। इतः दूरं गतः क्रव्यादग्निः यमस्थानं गच्छतु। अत्र मा आगच्छतु। पापनाशकोऽग्निः एव वर्तते। अन्यः जातप्रज्ञानोऽग्निः अस्मिन्नेव गृहे इन्द्रादिदेवेभ्यः हव्यं हवनीयद्रव्यं ददातु।

---

[१] **शु०य० ३५.१८**

[२] **शु०य० ३५.१९**

अयमग्निः जातवेदाः उत्पत्तिकालादेव सर्वं निजकर्म जानाति। सो जातवेदा अग्निः देवान् आहुतिभिस्तर्पयतु।

विशेषः – पितृमेधसमाप्त्यनन्तरं हवनमग्निप्रार्थना वर्तते। येन पुरुषो दह्यते स क्रव्यात् तं क्रव्यादमग्निमहं यमराज्यं प्रेषयामि। किमर्थं यमराज्यं गच्छतु? पापनाशाय तत्र गच्छतु। क्रव्यादादन्यो जातप्रज्ञानोऽग्निः अस्मिन्नेव गृहे देवेभ्योऽर्थाय हविः प्रापयतु।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे यमसूक्तसमीक्षणम्'** नाम एकोनविंशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

# अथ विंशोऽध्यायः

# वैश्विकदृष्ट्या यजुर्वेदे पञ्चसूक्तानां समीक्षणम्

ज्ञानराशेः प्रत्येकं कणः उपादेयाः अस्ति। यजुर्वेदस्य सर्वाणि सूक्तानि महत्वपूर्णानि सन्ति। यजुर्वेदे यत्र तत्र सूक्तरूपिणः मुक्तामणयः विस्तरिताः वर्तन्ते, यत्र साधकस्य अभीष्टफलप्राप्तये साधनं वर्तते। यजुर्वेदस्य सूक्तानां स्वरूपज्ञानम्, प्रयोजनज्ञानम्, तत्त्वज्ञानञ्च बिना तेषामध्ययनं न भवितुमर्हति। तदभावे च जपे तत्प्रतिपादितानुष्ठाने च प्रवृत्तिर्न भवति। स्वरूपज्ञानमेवं प्रयोजनज्ञानमेव प्रवृत्तिप्रयोजनज्ञानस्य आधारे स्तः। प्रवृत्तिप्रयोजकस्य विषयरूपेण विषयप्रयोजनसम्बन्धाधिकारिणां चतुर्णां समावेशकारणात् एते अनुबन्धचतुष्टयाः कथ्यन्ते। **प्रवृत्तिप्रयोजकज्ञानविषयत्वमनुबन्धत्वम्** इति। सूक्तानां विषयः कः? सूक्तानां विषयेण कः सम्बन्धः? कानि सूक्तानि? सूक्तानां प्रयोजनं किम्? तत्र सर्वप्रथमं सूक्तञ्च स्तोत्रविशेषः। यस्मिन् मन्त्रे मन्त्रसमुदाये वा प्रतिपाद्योऽर्थः सम्यग्वर्णितस्तत्सूक्तमित्यर्थः। **ये मित्रे वरुणे सूक्तवाचः** [१] इत्यादिमन्त्रे सूक्तस्तोत्रशब्दयोः पर्यायवाचकत्वेन दर्शनात्।

सूक्तशब्दः सूपपदपूर्वकवच्धातोः क्तप्रत्यये सति निष्पद्यते। सूक्तशब्दस्यार्थो भवति सम्यक् प्रकारेण कथितः। सूक्तस्य विशेष्यः वैदिकमन्त्रः। सूक्तशब्दः विविधोद्देश्यमादाय वेदे कथितानां मन्त्राणामुद्बोधको वर्तते। सूक्तमन्त्रेषु तत्तद्देवीदेवतानां स्वरूपमेवं तेषां प्रभावानां वर्णनं तेषां पूजायाः विधानमपि अन्तर्निहिताः भवन्ति। यः

---

[१] **ऋग्वेदः ५.४९.९**

वेदमन्त्रसमूहः एकदेवतायाः एकार्थस्य वा प्रतिपादकः तदेव सूक्तमित्युच्यते। बृहद्देवतायां सूक्तशब्दस्य निर्वचनमनेन प्रकारेण कृतं वर्तते – **सम्पूर्णमृषिवाक्यं तु सूक्तमित्यभिधीयते** इति।[1] बृहद्देवतायां सूक्तस्य चत्वारि प्रकाराणि प्रतिपादितानि सन्ति। यथा – देवतासूक्तम्, ऋषिसूक्तम्, अर्थसूक्तम्, छन्दःसूक्तम्। तदेवाह –

**देवतार्षार्थछन्दस्तो वैविध्यं च प्रजायते।**
**ऋषिसूक्तं तु यावन्ति सूक्तान्येकस्य वै स्तुतिः॥**
**श्रूयन्ते तानि सर्वाणि ऋषेः सूक्तं हि तस्य तत्।**
**यावदर्थसमाप्तिः स्यादर्थसूक्तं वदन्ति तत्॥**
**समानच्छन्दसो याः स्युस् तच्छन्दः सूक्तमुच्यते।**
**वैविध्यमेवं सूक्तनाम् इह विद्याद्यथातथम्॥**[2]

अभिप्रायोऽयं वर्तते यदेकस्याः देव्याः, देवतायाः वा स्तुतौ यानि सूक्तानि पर्यवसितानि सन्ति तानि 'देवतासूक्तम्', 'देवीसूक्त'मिति कथ्यते। एवमेव एकस्य ऋषेः यानिसूक्तानि प्रवृत्तानि सन्ति तानि 'ऋषिसूक्त'मिति, सम्पूर्णप्रयोजनस्य पूर्तिः येन सूक्तेन भवति तत् 'अर्थसूक्तम्', एकविधच्छन्दसः प्रयोगः यत्र भवति तत् 'छन्दःसूक्त'मिति कथ्यते। साधकः वेदमन्त्रसूक्तस्य पाठेन एवं जपेन सर्वविधप्रकारात् आध्यात्मिकात्, आधिदैविकात्, आधिभौतिकात् क्लेशात् मुक्तिं तथा पुरुषार्थचतुष्टयञ्च प्राप्नोति।

**पुरुषसूक्तम्** – परमात्मनः विश्वरूप एव पुरुषः कथ्यते। पुरुषसूक्ते अवयविनः पुरुषस्य स्तुतिः कृता वर्तते। महर्षिकात्यायनस्य विनियोगानुसारेण ब्रह्मा यूपे नियुक्तब्राह्मणादिपशूनां षोडशाभिः

---

[1] **बृहद्देवतायाम् १.१३**

[2] **बृहद्देवतायाम् १.१४-१६**

ऋग्भिर्युक्तेन पुरुषसूक्तेन स्तुतिं करोति, तथा **"उदवसानीयेष्टिः"**[१] इत्येतदन्ते षड्भिः ऋग्भिर्युक्तैः उत्तरनारायणीयानुवाकैः सूर्यस्योपस्थापनं भवति।

दार्शनिकविचाराय निजमहत्त्वाय गाम्भीर्याय अन्तःपर्यवेक्षणाय पुरुषसूक्तं नितान्तं विख्यातमनन्यतमञ्चास्ति। अस्मिन् सूक्ते पुरुषस्याध्यात्मिककल्पनाया भव्यं निदर्शनमस्ति। पुरुषस्यास्य सहस्राणि शिरांसि सहस्राण्यक्षीणि तथैव पादाश्च सन्ति। तस्मै पुरुषाय एतेषां शरीरावयवानां किमपि परिमाणं नास्ति। अस्य निखिलसंसारस्य परिमाणादसावधिकोऽस्ति विश्वमभितः स्थितस्य परिवेष्टनात् दशाङ्गुलैः अग्रतरोऽस्ति। अत्र दशाङ्गुलं केवलं परिमाणाधिक्यस्योपलक्षणमात्रमेवास्ति। निखिलस्य संसारस्य मरणशीलजीवाः तस्य पुरुषस्यैकचतुर्थांशमात्रमेवास्ति। तस्यामृतस्य त्रिपाद आकाशेऽवस्थितोऽस्ति। स सर्वेषां प्राणिनां निखिलब्रह्माण्डस्य च शासको वर्तते। अस्य विषये विलक्षणः महिमा वेदे दृश्यते–

**पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम्।**
**उतामृतत्वस्येशानो यदन्नेनातिरोहति॥**[२]

एक एवासौ पुरुषो निखिले विश्वे वर्तते। सः सृष्टेरुत्पत्तिकाले स्वमहिम्ना उत्पन्नो जातोऽस्ति। सर्वेश्वरवादस्यायं प्रौढः सिद्धान्तः। पाश्चात्यविदुषां मते आर्याणां प्रौढदार्शनिकविचारधारायाः परिमापकोऽस्ति। सृष्ट्याः समुत्पादने यज्ञस्य कल्पना कीदृशी जागरूका क्रियाशीला चासीत्। तस्यापि परिचयोऽस्मिन्नेव सूक्ते मिलति। देवता स्वयज्ञे पुरुषबलिं कृतवन्तः येन बलिना जगतः प्राणिनां समुत्पत्तिः तस्य पुरुषस्य

---

[१] **अग्निष्टोमयागे अनुवन्ध्या यागानन्तरमस्याः इष्टेः अनुष्ठानं भवति ( कात्या.पृ.४७१ )**

[२] **शु०य० ३१.२**

मुखात् बाहुभ्यां उरो पादाभ्यां च क्रमशः जाता। अस्मिन् मन्त्रे चतुर्णां वर्णानां चर्चास्ति। येन प्रतीतो भवति अस्मिन् समाजे तस्मिन् काले युगे वा चतुर्णां वर्णानां कल्पना समुद्भूता। अनेन प्रकारेण सूक्तमिदं वैदिककार्याणां सामाजिकाध्यात्मिकधारणायाः परिचायकत्वेन नितान्तं महत्त्वपूर्णमस्ति।

**ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।**
**ऊरू तदस्य यद्वैश्यः पद्भ्याꣳ शूद्रोऽजायत।।**[१]

एवमेव प्रथममात्मा एक एवास्ति। एष आत्मा यदा स्पष्टा ज्ञाता तथानुभूतिः भवति। तदैतस्मादेव आत्मतत्त्वज्ञानात् सकलानि जगतः स्थितानि वस्तूनि स्वतः ज्ञातानि भवन्ति। आत्मज्ञानस्य सिद्ध्या सर्वज्ञानं भवति। एकत्वबोधने सकलं बुध्यते। अत एव आत्मोपासना सर्वथा करणीया स्यात्। उक्तं च वर्तते।

**आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः**[२] इति

व्यावहारिके क्षेत्रेऽपि पुत्रो वै अधिकः प्रियो भवति। किन्तु यदा सत्यज्ञानस्य बोधो जायते तदा अहं ब्रह्मास्मीति वस्तुतोऽनुभूयते। स्वयं सच्चिदानन्दः इति चानुभूयते तदाऽऽत्मा हि पुत्राऽपेक्षयाऽधिकः प्रियो भवति। सुतरां सकलानां दृश्यवस्तुनां प्रियतापेक्षया आत्मा वै प्रियतमो भवतीति सर्वथा बोध्यम्।

आत्मज्ञानी मनीषी यदात्मज्ञाने सत्यभाषणे च सिद्धः समर्थश्च जायते तदाऽसौ वस्तुतः सत्यवान् भवति। तस्य वचने सदैव सत्यं प्रतिफलति। अतः प्रियतमस्यात्मन उपासना सर्वथा कार्या। प्रथमं खलु ब्रह्मेदमासीत्। ब्रह्म स्वयं जानाति यदहं ब्रह्मास्मीति। अतस्तत् सर्वमभूत् य

---

[१] **शु०य०मा०सं० ३१.११**

[२] **बृ०आ०उ० २.४.५**

एवं वेदाहं ब्रह्मास्मीति। स इदं सर्वं भवति। प्रथमं ब्रह्म बहिर्बभूव। ब्राह्मणोऽस्य मुखमासीदिति पुरुषसूक्तस्य सिद्धान्तानुसारं प्रथमं ब्राह्मणस्य सृष्टिरभूत्। किन्तु तद् ब्रह्म वा इदमग्र आसीदेकमेव। नैव विभूतियुक्तमासीत्। अनन्तरम् एकं प्रशस्तरूपं क्षेत्रं बभूव। देवानां मध्ये क्षत्रिय एव उत्कर्षतां प्राप्तवान्। यथा देवराज इन्द्रः, जलजन्तूनामधिपतिः वरुणः, ब्राह्मणानां राजा सोमः, विद्युदादीनां नायको मेघः, पशुपतिः रुद्रः, पितृणां राजा यमः, रागादीनां स्वामी मृत्युः, प्रकाशानां स्वामी ईशानः, पुरूरवाइन्द्रवंशीयानां राजानः एव क्षत्रिया आसन्। राजसूययज्ञे क्षत्रियाणानामाधिपत्यमधिकतरमस्ति। एते एव यो मंचोपरि समुपविशन्ति। ब्राह्मणानां पुनः वशतां स्वीकुर्वन्ति।

तस्मात् यद्यपि राजा परमतां गच्छति ब्रह्मैवान्ततः उपमिश्रयति स्वां योनिम्। तत्र राजसूययज्ञे ब्राह्मणाः वदन्ति– त्वं राजन् ब्रह्मासि इति अतो ब्राह्मणं विहाय क्षत्रियाद् अन्यः कश्चन उत्कृष्टो नैवास्ति। अस्माद्धेतोः क्षत्रियः स्वस्य कारणभूताय ब्राह्मणाय कदापि नैव द्रुह्येत। ब्रह्महिंसाचारणेन पापी भवतीति जानीयात्।

तदनन्तरं वैश्यजातेरुत्पत्तिरभवत्। वित्तार्जनकुशला वैश्याः वर्तन्ते। एते वैश्याः समाजस्य महत्मात्रेण आवश्यकतां साधयन्ति। अत एव लिखितमस्ति **वसवो रुद्रा आदित्या विश्वे देवा मरुदादय देवाः** वैश्यवर्गे भवन्ति। एते समाजे सर्वान् पुरुषान् पोषयन्ति।

अतः परं शूद्रवर्णः सञ्जातः। विभूतिसूक्ते कर्मणि न केऽपि जनाः समर्थाः भवन्तीति हेतोः शूद्रवर्णस्य सृष्टिरभवत्। पूषा हि शूद्रः। पृथिवी अपि पूषा। एषा हि सर्वेषां पोषणं कुर्वन्ती अस्ति।

सम्पूर्णलोके व्याप्तः महानारायणः सर्वात्मकत्वात् अनन्तशिरोवान्, अनन्तनेत्रवान्, अनन्तचरणवाँश्चास्ति। भगवान् नारायणः पञ्चतत्त्वेभ्यः निर्मितं समस्तं व्यष्टिसमष्टिब्रह्माण्डं उपरि, अधः, तिर्यक्,

सर्वतः व्याप्तं कृत्वा नाभितः दशाङ्गुलपरिमितं देशं हृदयमतिक्रम्य अन्तर्यामिरूपेण स्थित आसीत्[१]। एते सर्वे पुरुषाः ये जाताः, ये भविष्ये भविष्यन्ति। तादृशस्यामृततत्त्वस्यापि स्वामी एवं तस्यापि पुरुषस्यान्नद्वारा वृद्धिं कारयति[२]। अस्य महानारायणपुरुषस्य महिमा एतादृशो वर्तते, सः पुरुषः इतोऽप्यधिकः वर्तते। समस्तभूतान्यपि अस्य चतुर्थांशमात्रमस्ति। अस्य त्रयः अंशास्तु अमृतस्वरूपाः सन्ति, ते तु द्युलोके वर्तन्ते।[३] एषः महानारायणः स्वेन त्रिपादेन सह ब्रह्माण्डस्योपरि तस्मिन् दिव्यलोके स्वस्य सर्वोत्कृष्टस्वरूपे स्थित्वा निवासं करोति। स्वस्यान्तिमचतुर्थांशद्वारा अस्मिन् संसारे व्याप्तो भवति। स्वस्य चतुर्थांशस्य मायायां प्रवेशं कारयित्वा महानारायणपुरुषः मनुष्यपशुपक्ष्यादिरूपं धृत्वा सम्पूर्णचराचरात्मके जगति व्याप्तो भवति[४]। तस्मात् परमपुरुषात् विराट्स्वरूपः हिरण्यगर्भः उत्पन्नः[५]। तेन विराटस्वरूपेण पुरुषेण उत्पत्त्यनन्तरमेव स्वस्य श्रेष्ठता स्थापिता। अनन्तरं तेन भूमेः लोकस्य च निर्माणं कृतम्[६]। तेन विराट्पुरुषेण सर्वात्मनः पुरुषस्य यत्र यजनं क्रियते तादृशात् यज्ञात् दधिमिश्रितघृतस्य सम्पादनं कृतम्। तेन वायुप्राधानगतियुक्ताः पशवः निर्मिताः ये मृगादिवनवासिनः पशवः एवं अश्वादिग्रामवासिनः पशवः आसन्[७]। तस्मात् सर्वहुतात् यज्ञात् ऋग्वेदः सामवेदश्च प्रादुर्भूतौ, ताभ्यामेव सर्वविधच्छन्दसामपि उत्पत्तिर्जाता, यर्जुवेदोऽपि तस्मादेव यज्ञपुरुषात् प्रादुर्भूतः[८]। तस्मादेव यज्ञपुरुषात् अश्वाः

[१] **शु०य० ३१.१**

[२] **शु०य० ३१.२**

[३] **शु०य० ३१.३**

[४] **शु०य० ३१.४**

[५] **शु०य० २५.१०**

[६] **शु०य० ३१.५**

[७] **शु०य० ३१.६**

[८] **शु०य० ३१.७**

प्रादुर्भूताः, ते सर्वे प्राणिनः प्रादुर्भूताः येषां मुखे उपरि नीचैश्च दन्ताः सन्ति। तस्मादेव गावः वृषभाश्च प्रादुर्भूताः, तस्मादजादयोऽपि प्रादुर्भूताः[१]। प्रथमोत्पन्नं तं पुरुषं यज्ञार्थदर्भेण प्रोक्षणं कृतम्। तेन दैवैः यजनं कृतम्, येऽपि साध्यदेवताः, ऋषिगणाश्च आसन् तैः[२]।

यदा यज्ञसाधनभूतस्यास्य विराट्पुरुषस्य ऋषिभिः कल्पना कृतासीत्, कतिप्रकारैः तैः अस्य कल्पना कृता आसीत्? तस्य विराट्पुरुषस्य मुखबाहूरुपादानां निर्माणं केन केन उपादानेन कृतम्[३]। अस्य प्रश्नस्योत्तरं भगवती श्रुतिः ददाति यद् ब्राह्मणः अस्य विराट्पुरुषस्य मुखस्थानीयः जातः, क्षत्रियः बाहुभ्यां निष्पन्नः, वैश्यः ऊरुतः, शूद्रः पद्भ्यामजायत[४]। विराट्पुरुषस्य मनसः चन्द्रमा प्रादुर्भूतः, नेत्रात् सूर्य उत्पन्नः, कर्णात् वायुः एवं प्राण उत्पन्नः तथा मुखादग्निः प्रादुर्भूतः[५]। नाभेः अन्तरिक्षस्य, शिरसा स्वर्गस्य, चरणाभ्यां भूमिरुत्पन्ना। एवम्प्रकारेण कर्णात् दिशाः, भूम्यादीनां चोत्पत्तिः तेन विराट्पुरुषेण स्वस्य शरीरस्य अवयवैः कृतः[६]। यदा पुरुषरूपात् हवेः देवतादिभिः सृष्टियज्ञः विस्तारितः तदा वसन्तर्तुना घृतस्य, ग्रीष्मर्तुना समिधायाः स्थानं स्वीकृतम्। एवं शरदऋतुः हविस्थानीया जाता[७]। यदा अस्य मानसयागस्यानुष्ठानं देवतादिभिः प्रारब्धं तदा सर्वप्रथमं विराट्पुरुषस्यैव पशुरूपेण भावना कृता। तदा गायत्र्यादिसप्तभिः छन्दोभिः सप्तपरिधीनां स्वरूपं स्वीकृतम्। द्वादश मासाः, पञ्च ऋतवः, त्रयः लोकाः एवं

---

[१] **शु०य० ३१.८**

[२] **शु०य० ३१.९**

[३] **शु०य० ३१.१०**

[४] **शु०य० ३१.११**

[५] **शु०य० ३१.१२**

[६] **शु०य० ३१.१३**

[७] **शु०य० ३१.१४**

सूर्यदेवतामादाय एकविंशतिः अथवा गायत्र्यादिसप्त, अतिजगत्यादिसप्त, कृत्यादयः सप्त छन्दसः आदयः एकविंशतिः समधयः अभवन्[१]।

देवतादिभिः विराट्पुरुषस्य अवयवानां हविरूपे कल्पनां कृत्वा प्रस्तुतमानसयज्ञे यज्ञपुरुषस्य महानारायणस्य उपासना कृता। तत्पश्चात् एताः देवताः महानारायणस्य आराधनायाः उपादानकारणमभवन्। यस्मिन् स्वर्गे पुरातनसाध्यदेवताः तिष्ठन्ति, तथाविधदुःखरहितलोके एव महानारायणस्य यज्ञपुरुषस्य उपासनां ये कुर्वन्ति तादृशाः भक्तगणाः तमेव लोकं प्राप्नुवन्ति[२]। उत्तरनारायणस्य षट् सूक्तानां कण्डिकासु पूर्वकाले आदित्यरूपप्राप्तस्य पुरुषमेधयागस्य स्तुतिः कृता वर्तते। अत्र कर्मदेवानामाजानदेवानाञ्च चर्चा वर्तते। अस्मिन् प्रकरणे तमः शब्दस्यार्थः भाष्यकाराः अविद्या इति अकुर्वन्। अत्र एतदपि प्रतिपादनं कृतं वर्तते यत् जीवरूपेण अन्तर्यामिरूपेण च सः सर्वात्मा प्रजापतिरेव सर्वत्र परिभ्रमणं करोति।

**रुद्रसूक्तम्** –

यजुर्वेदे रुद्रस्य त्रिषु देवेषु महत्त्वपूर्णं स्थानं वर्तते। ब्रह्मविष्णुमहेशानां तिसृषु मूर्तिषु संहारकरूपेण रुद्रस्य स्थानं वर्तते। यजुर्वेदस्यानुसारेण रुद्रस्य स्वरूपं मङ्गलमयं कल्याणकारि चास्ति। रुद्रः क्रोधशमनं तथा तीव्रदृष्टिं न प्रददाति अतः वारम्वारं तस्य प्रार्थना क्रियते। तस्य जलाषभेषजं विविधरूपेण सोमपावृष्टिः स्वीकृता वर्तते। यजुर्वेदः रुद्रं "शर्वः" एवं "भवः" नामद्वारा स्मरणं करोति[३]। अग्निः, अशनिः, पशुपतिः, भवः, शर्वः, महादेवः, ईशानः, उग्र इत्यादिदेवताः

---

[१] **शु०य० ३१.१५**

[२] **शु०य० ३१.१६**

[३] **शु०य० ६१.१८,५७**

एकस्यैव देवस्य विविधस्वरूपेण स्वीकृताः [१] । अम्बिका रुद्रस्य भगिनीत्वेन प्रतिपादिता वर्तते, अम्बिकाया रुद्रभागिनीत्वं श्रुत्योक्तम्। एवमेव मूषकः रुद्रस्य पशुः मन्वते [२] । अम्बिकया युक्तत्वात् रुद्रः त्र्यम्बको भवति[३]। भगवती श्रुतिरपि कथयति –

**त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।**
**उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्॥**[४]

दिव्यगन्धयुक्तः, मृत्युरहितः धनधान्यवर्धकः त्रिनेत्रः रुद्रः तस्य वयं पूजां कुर्मः। तस्य कारणेन वयमपमृत्युतः संसाररूपमृत्युतः अपि मुक्तिं प्राप्स्यामः। यथा येन प्रकारेण कर्कटिकाफलं यदा अत्यधिकं पक्वं भवति तदा तत् स्वाश्रयात् पतितं भवति, तथैव वयमपि मृत्युतः मुक्तिं प्राप्नुमः। किन्तु अभ्युदयरूपादमृतादस्माकं सम्बन्धः सदैव भवेत्। रुद्रस्य नीलकण्ठः, सहस्राक्षः, हिरण्यबाहुः, सेनानायकः, दिशांपतिः पशुपालकः, तेजस्वी पीतवर्णः चेत्यादिसंज्ञाः सन्ति [५] । तं ब्रभ्रुवर्णं, व्याधिरूपमन्नपतिम्, आयुधरूपं, जगत्पतिं, क्षेत्रपतिं, वनपतिं, लोकवर्णं, विश्वकर्माणम्, ओषधिपतिं, व्यापारकुशलं लतापत्रादिपालनकर्तारं, गुप्तधनस्य हर्तुः पतिं, चौरवञ्चकोद्रवानां नियामकं, पत्युः सज्जनस्य च पालकं, मनुष्यस्यान्तःकरणे निवासकर्त्रीं रूद्रदेवतां प्रति रुद्रसूक्ते वारम्वारं नमस्कारो विहितोऽस्ति[६]। सभारूपेभ्यो रुद्रेभ्यो नमः। सभादिषु रुद्रदृष्टिः कर्तव्येति तात्पर्यम्। सभापत्यश्वपतिदेवसेनादिषु अवस्थितो महादेवः, गणगणपतिबुद्धिमतः स्वामी, तथा विषयाशक्तव्यक्तीनां स्वामिरूपेण च

---

[१] **शु०य० ३९.८**

[२] **शु०य० ३.५७**

[३] **श०ब्रा० २.६.२.९**

[४] **शु०य० ३.६०**

[५] **कृ०य०तै०सं० ४.५.५. एवं शु०य० १६.१७**

[६] **शु०य० १६.१८-२१,२३**

रुद्रसूक्ते रुद्रस्य स्तुतिः कृता वर्तते [१]। शिल्पीरथकारकुम्भकारलोहकारनिषादव्याधप्रभृतयः सर्वा अपि रुद्ररूपा एव स्वीकृताः[२]। स्वाने तथा श्वास्वामिषु अपि रुद्रस्यैव दर्शनं कृतं वर्तते। यथा –

**नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः।**
**शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च॥**[३]

शीघ्रगामिषु रथेषु, वीरपुरुषेषु, शस्त्रास्त्रादिषु, दुर्गममार्गेषु, रणभूमिषु, सरोवरेषु, कूपेषु जलाशयेषु च सर्वत्र रुद्र एव विद्यमानः वर्तते [४]। वस्तुकलासु, वास्तुग्रहेषु, चन्द्रमसि, सूर्ये च सर्वत्र रुद्रः व्याप्तोऽस्ति [५]। नदीषु सिकतासु, प्रवाहे, वृक्षे, कङ्कणे, भूमौ, पर्वते, कन्दरे, गहनजले च सर्वत्र रुद्र एव विद्यमानोऽस्ति [६]। रुद्रः पापिने दण्डं ददाति, तथा सज्जनस्य कल्याणं करोति। सर्पाः रुद्रस्य गणत्वेन निर्दिष्टाः। तैत्तिरीया श्रुतिः कथयति यत् रुद्रः निर्जनवने निवसति। गोपालकेषु, जलानयनयोग्यासु कुमारिषु, गोपीषु च रुद्रस्य दर्शनं भवति[७]। रुद्रदेवतायाः प्रभावः जले, मत्स्ये, पशुषु तथा सम्पूर्णवनस्पतिषु समानरूपेण व्याप्तोऽस्ति। यजुर्वेदे रुद्रस्य व्युप्तकेशविशेषणेन प्रतीयते यत् रुद्रः धार्मिकवैदिकनृत्यस्य देवतापि वर्तते[८]।

---

[१] **शु०य० १६.२५**
[२] **शु०य० १६.२६-२७**
[३] **शु०य० १६.२८**
[४] **शु०य० १६.३४,३५,३७,३८**
[५] **शु०य० १६.३९**
[६] **शु०य० १६.४४**
[७] **कृ०य०तै०सं० ४.५.१**
[८] **कृ०य०तै०सं० ४.५.५**

**ब्रह्मसूक्तम्** –

अस्मिन् सूक्ते सर्वव्यापिनः सर्वशक्तिमतश्च ब्रह्मणो महिमा वर्णितः। मनुष्यस्य जीवनयात्रायां ब्रह्मैव मार्गप्रदर्शकः, जीवनयात्रायां मार्गे ब्रह्मा मार्गप्रदर्शकरूपेणास्माभिः सह वर्तते। ब्रह्मा सर्वेषां पिता विधाता बन्धुर्माता च वर्तते। यजुर्वेदस्य द्वाविंशाध्याये अश्वमेधमन्त्रास्तेषां प्रजापतिर्ऋषिः। तेजोऽसीत्यस्य [१] सौवर्णनिष्कं देवता, प्रजापत्यानुष्टुप् यज्ञसमाप्तिपर्यन्तमायुः प्रार्थ्यते **"देवस्य त्वेति रशनामादाय ब्रह्मन्नश्वं भन्त्स्यामीत्याह"** [२] इति। देवस्यत्वेत्यादिसरमारपन्तीत्यन्तेन मन्त्रेण त्रयोदशारत्निं दर्भमयीं द्विगुणामश्वबन्धनार्थां रशनां रज्जुमादाय ब्रह्मन्नश्वमित्यादितेनराध्यासमित्यन्तं मन्त्रं ब्रह्माणं प्रत्याहेति सूत्रार्थः [३]। बृंह्धातोः ब्रह्मशब्दस्य निष्पत्तिर्भवति, यस्यार्थः व्यापकः, ब्रह्म एव सम्पूर्णस्यास्य सृष्टेः मूलं कारणमस्ति। जगति यावन्त्यऽपि वस्तूनि दृश्यन्ते तथा यावन्तः पदार्थाः व्यस्ताः भवन्ति तानि सर्वाण्यपि ब्रह्म एव। श्रुतिः कथयति – **"यद्वै किञ्च प्राणि स प्रजापतिः"**[४] इति। ब्रह्मणः सम्पूर्णजगतः पदार्थस्य प्रतिष्ठा वर्तते, अनेनैव ब्रह्मणा अर्थात् प्रजापतिना सम्पूर्णस्य चराचरात्मकजगतः रचना विहिता –

**"प्रजापतिस्त्वेवेदं सर्वमसृजत् यदिदं किञ्च"**[५] इति। तथा च **"ब्रह्मैवेदं सर्वम्"** [६], **"सर्वं खल्विदं ब्रह्म"** [७] इति। ब्रह्मणः एव सर्वप्रथममुत्पत्तिर्जाता। ब्राह्मणश्रुतिः कथयति – **"ब्रह्मैवास्य सर्वस्य**

---

[१] **शु०य० २२.१**

[२] **कात्यायनश्रौतसूत्रम् २०.१.२७**

[३] **शु०य० २२.१ (म.भा.)**

[४] **श०ब्रा० ११.१.६.१७**

[५] **श०ब्रा० ६.१.२.११**

[६] **नृ०उ० ७**

[७] **छा०उ० ३.१४१**

**प्रतिष्ठा, ब्रह्म वै सर्वस्य प्रथमजम्"**[१] इति। ब्रह्म यदा विस्तारितं भवति तदैव सम्पूर्णजगतः उत्पत्तिर्भवति। बृंहणभावस्य कारणात् एतत् ब्रह्मपदेन कथ्यते –

**विश्वस्य तूलस्य यदस्ति मूलं तस्यैव चैकस्य तु बृंहणेन।**
**पश्यामि विश्वं तत एव मूलं तद् ब्रह्मशब्देन सदा वदामि।।**[२]

एतत्ब्रह्म जगतः समस्तपदार्थेषु अद्वितीयत्वेन नित्यत्वेन च वर्तमानं सत् व्याप्तं वर्तते। एतदाकाशसदृशं व्याप्तमस्ति, ब्रह्मसदृशं स्थूलं न किमपि भवितुं शक्नोति, तथा ब्रह्मातिरिक्तं नान्यत् किञ्चित् जगतोऽस्य बृंहणम्, अत एवैतत् सर्वापेक्षया बृहदस्ति। ब्रह्म सर्वेषां पदार्थानां सृष्टिं विधाय तेषु पदार्थेषु प्रविश्य स्थितं वर्तते। भगवती श्रुतिः कथयति–

**सोऽकामयत। बहु स्याम प्रजायेयेति। स तपोऽतप्यत। स तपस्तप्त्वा इदꣳ सर्वमसृजत यदिदं किञ्च। तत्सृष्ट्वा तदेवानुप्राविशत्**[३] इति। जगतः त्रयाणामुत्पत्तिस्थितिप्रलयानामवस्थानां कारणमपि ब्रह्मैवास्ति – **यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत् प्रयन्त्यभिसंविशन्ति। तद् विजिज्ञासस्व। तद् ब्रह्मेति।"**[४] इति। ब्रह्म अस्य समस्तस्य जगतः उक्थं साम च वर्तते यतो हि तद्वारैव सर्वे पदार्थाः उत्पद्यन्ते, तद्वारैव ध्रियन्ते, तदेव सर्वेषु पदार्थेषु समानरूपेण स्थितमपि वर्तते। यद्वस्तु यस्मात् उत्तिष्ठति अर्थात् उत्पद्यते, तद्वस्तु उत्पद्यमानवस्तुनः उक्थं निगद्यते – **यतोऽपूर्वं रूपमुत्तिष्ठते**

---

[१] **शब्रा० ६.११.१.८**

[२] **ब्रह्मसिद्धान्तः पृ० २७**

[३] **तै०उ० २.६.१**

[४] **तै०उ० ३.१.१**

**तदुक्थम्**[१] इति। यथा मृत्तिकातः घट उत्पद्यते, अतः मृत्तिका घटस्य उक्थं भवति। यत्समस्तकार्येषु समानभावेन वर्तते तदेव तस्य साम कथ्यते – **यत्सर्वैर्विकारजातैः समं तत्साम**[२] इति। यद्यस्य उक्थम्, ब्रह्म, साम च वर्तते तदेव तस्य वस्तुनः आत्मा कथ्यते। अस्य आत्मनोऽभावे शरीरं जगच्च स्थातुं न शक्नोति, एवमेव शरीरेण जगता च रहितः आत्मा आत्मा न कथ्यते। स आत्मा त्रिविधः वर्तते – जीवः, ईश्वरः, परमेश्वरश्च। तदाह – **इत्थं स आत्मा त्रिविधः प्रसिद्धो जीवोऽन्य ईशः परमेश्वरोऽन्यः**[३] इति। एतत्ब्रह्म अनिर्वचनीयमस्ति। तस्य अखण्डस्य ब्रह्मणः निरूपणं सर्वथासम्भवमस्ति। वेदान्तेऽप्येतत् ब्रह्म अवाङ्मनसगोचरत्वेन प्रतिपादितं वर्तते। यथा –

**अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम्।**
**आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये॥**[४]

एतत्ब्रह्म अज्ञेयमनिर्वचनीयम् एतदेव तस्य निरुक्तिरस्ति, यतो हि यदज्ञेयं तदज्ञेयनिश्चयकरणमेव तस्य वास्तविकं ज्ञानम्। एवमेव यत्तत्त्वमनिर्वचनीयं तमनिर्वचनीयत्वप्रतिपादनमेव याथार्थ्यं भवति। भगवती श्रुतिरपि ब्रह्म अचिन्त्यं वाङ्मनसातीतं वर्तते इति प्रतिपादयति – **"यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह"**[५] इति। यजुर्वेदस्य श्रुतिरपि प्रतिपादयति –

---

[१] **शारीरकविमर्शः पृ० १२४**

[२] **शारीरकविमर्शः पृ० १२४**

[३] **ब्रह्मचतुष्पदी पृ० ४४**

[४] **वैदान्तसारस्य मङ्गलपद्यम्**

[५] **तै०उ० २.४.१**

**ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।**
**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।**[1]

ब्रह्म निर्विशेषरससृष्टकर्मसु संकुचितं सदपि कदापि क्षीणभावं न प्राप्नोति। रसस्वरूपं निर्विशेषं ब्रह्म पूर्णमस्ति, विश्वमनेन पूर्णेन उत्पन्नत्वात् तदपि पूर्णमेव। विश्वस्य पूर्णता यदा पूर्णे सम्मेल्यते तदा पूर्णमेव शिष्टं भवति। तथा चोक्तम् -

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत्।**
**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।।**[2]

ब्रह्म देशकालवस्तुपरिच्छेदेन रहितमस्ति। शास्त्रेषु ब्रह्मणः तटस्थलक्षणस्वरूपलक्षणभेदेन द्विविधं लक्षणं वर्तते। तटस्थलक्षणं तद्भवति यल्लक्ष्ये कदाचिद्भवति कदाचिन्न भवति। उदाहरणार्थं मयूरवन्ति देवदत्तस्य गृहानि अत्र मयूरः देवदत्तस्य गृहे सदा तु स्थातुं न शक्नोति। तस्य उड्डयनानन्तरमपि देवदत्तस्य गृहो ज्ञायत एव। तटस्थलक्षणस्य स्वरूपं वदन् भगवान् वेदव्यासः वदति यत् - **यस्मात् उत्पत्तिः, लयः, प्रलयश्च भवन्ति तदेव ब्रह्म कथ्यते**[3]**।** सिद्धान्ते ब्रह्मणः स्वरूपं सच्चिदानन्दात्मकं वर्तते, एतानि ब्रह्मणः स्वरूपलक्षणानि कथ्यन्ते यतो ब्रह्म विहाय एतानि कुत्रापि न गच्छन्ति। एतानि ब्रह्मणः न रूपाणि अपि तु स्वरूपाण्येव। **गुणाः गुणेषु कदाचिदपि न तिष्ठन्ति,** परन्तु यद्यस्य स्वरूपं भवति तत्तु तत् विहाय कदापि कुत्रापि गन्तुं न शक्नोति।

ब्रह्म जगतः उपादानकारणं निमित्तकारणं च भवति। न्यायदर्शने उपादानकारणं समवायिकारणत्वेन प्रतिपाद्यते, तन्तूनां परस्परसंयोगः तु

---

[1] **बृ०उ० ५.१.१**

[2] **मै०उ० २.५.६**

[3] **जन्माद्यस्य यतः, ब्रह्मसूत्रम् १.१.२**

असमवायिकारणं कथ्यते। कार्यस्य कर्त्तारं तु निमित्तकारणं कथ्यते। वेदान्तदर्शने ब्रह्म अभिन्ननिमित्तोपादानकारणं भवति। यथा ऊर्णनाभिः प्राणिः स्वगृहं प्रति अभिन्ननिमित्तोपादानकारणं भवति, तथैव ब्रह्म अपि जगतः अभिन्ननिमित्तोपादानकारणं भवति। भगवती यजुर्वेदस्य श्रुतिः कथयति –

**विश्वतश्चक्षुरुत विश्वतो मुखोविश्वतोबाहुरुत विश्वतस्पात्।**
**सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः।।**[१]

अर्थात् तत् ब्रह्म सर्वतः चक्षुर्युक्तं, मुखयुक्तं, ऊरुयुक्तं, पादयुक्तञ्चास्ति। सः अद्वितीयः देवः स्वोरुद्वारा अद्वितीयं द्युलोकं पृथिवीलोकं च परिकल्प्य पतनशीलायाः प्रगतिशीलायाः च प्रकृतेः परमाणुतः संसारं सुव्यस्थिततया निर्माणं कारयति। ब्रह्मणः पारमार्थिकी सत्ता स्वीकृता वर्तते। सत्ता त्रिविधा – व्यावहारिकी, प्रातिभासिकी, पारमार्थिकी च। ब्रह्मज्ञानं विना यस्य बाधो न भवति सा एव व्यावहारिकी सत्ता वर्तते। जाग्रदवस्थायां विद्यमानानां पदार्थानां सत्ता व्यावहारिकी भवति यतो हि तेषां पदार्थानां बाधः ब्रह्मज्ञानं विना नैव भवितुं शक्नोति।

यस्य पदार्थस्य ब्रह्मज्ञानं विना अधिष्ठानस्य ज्ञाने सति स्वयं बाधः भवति तस्य पदार्थस्य सत्ता तु प्रातिभासिकी भवति। यथा रज्जौ सर्पः, शुक्तौ रजतं, मृगतृष्णायाः जलम्, स्वप्नपदार्थः, डित्थे पुरुषः, एतेषां सर्वेषां पदार्थानां सत्ता प्रातिभासिकी भवति। यस्य त्रिकालेऽपि बाधः न भवेत् तस्यैव सत्ता पारमार्थिकी भवति। ब्रह्मणः बाधः कदापि भवितुं न शक्नोति अतः ब्रह्मणः सत्ता पारमार्थिकी भवति। ब्रह्मचेतनस्य त्रीणि रूपाणि – सामान्यचेतनम्, विशेषचेतनम्, कल्पितचेतनञ्च। यत्

---

[१] **शु०य० १७.१९**

भ्रान्तिकाले भासितं भवति, एवं भ्रान्तिनिवृत्तिकाले च भासितं भवति तदेव सामान्यचेतनं भवति। सिद्धान्ते अहं शरीरवान् अस्मि इति भ्रान्तिकाले, अहं ब्रह्मास्मि इति भ्रान्तिनिवृत्तिकाले च अहं प्रतिभासितो भवति, अतः ब्रह्मणः सामान्यांशः कथ्यते। शुक्तेः यथार्थप्रतीतेः नाम विशेषांशः कथ्यते, यथा शुक्तिः, रज्जुरित्यादि। सिद्धान्ते ब्रह्मणः यथार्थप्रतीतेर्नाम विशेषचेतनमस्ति, यथा – अहं ब्रह्मास्मि, अहं नित्यमुक्तः अस्मीत्यादि। भ्रान्तिकालस्य नाम कल्पितविशेषचेतनमस्ति, यथा– अहं ब्राह्मास्मि, अहं जात्या युक्तः अस्मीत्यादि सामान्यचेतनं विशेषचेतनञ्च उभयमपि सत्यम्। तृतीयं विशेषचेतनं मिथ्या एव त्यागयोग्यमस्ति। कल्पितचेतनं यदा त्यज्यते तदा एव परमसुखस्य प्राप्तिर्भवति। विद्याद्वारैव अस्य हृदयग्रन्थेः उद्घाटनं सम्भवति, यथा यथा ज्ञानस्य मात्रा वर्धते तथा तथा एका एकः ग्रन्थिः छिद्यते। तद्यथा –

**भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।**
**क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।।**[१]

एवंप्रकारेण यदा समस्ताः ग्रन्थयः छिद्यन्ते तदा शुद्धः रसरूप एवावशिष्यते। विशुद्धः रसरूपः एषः निर्विशेषः केवलः आनन्दरूप एव, दुःखरूपस्य बलस्य अनेन सह लेशोऽपि नास्ति। तैत्तिरीयोपनिषदः श्रुतिः कथयति –**रसो वै सः। रसꣳ ह्येवायं लब्ध्वा आनन्दी भवति**[२] इति। ब्रह्मसूक्ते[३] अश्वमेधयज्ञस्य मन्त्राः सन्ति। वैदिकाश्वमेधयज्ञे कृष्णाजिनः दीक्षातः उखायां त्रयोदशसमिधाधानपर्यन्तमध्वर्युः ब्रह्मणा सह प्रार्थनापूर्वकं कथयति –

---

[१] **मु०उ० २.२.८**

[२] **तै०उ० २.७.१**

[३] **शु०य० २२.१-३४**

**आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढाऽनड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवाऽस्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्**[१] इति।

हे ब्रह्मन्! अस्माकं देशे यज्ञसम्पादनकुशलाः वेदाध्ययनशीलाः ब्राह्मणाः सर्वत्र उत्पद्यन्ताम्, शूरवीराः बाणविद्यायां चतुराः, शत्रुमारणकुशलाः महारथिनः क्षत्रियाः उत्पद्यन्ताम्, अस्य यजमानस्य गावः बहु दुग्धं प्रददतु, अनडुहः भारं वोढुं समर्थाः भवन्तु, अश्वाः शीघ्रगामिनः भवन्तु, स्त्रियः सर्वगुणसम्पन्नाः भवन्तु, रथे आरुढाः जयशीलाः भवन्तु, पराक्रमी युवा सौभायोग्यपुत्रो भवतु, अस्माकं देशे इच्छानुसारेण वृष्टिर्भवतु, ओषधयः फलवत्यः भवन्तु, एवं शीघ्रं पक्वाः भवन्तु। अस्माभिः अप्राप्तवस्तुनः प्राप्तिः, प्राप्तवस्तुनश्च संरक्षणं भवतु।

**ब्रह्मसूक्तं तथा श्रीसूक्तम्** - शुक्लयजुर्वेदस्य द्वात्रिंशदध्याये ब्रह्मसूक्तमस्ति। अस्मात् अध्यायात् सर्वमेधयागस्य प्रकरणं प्रारभ्यते, अस्याध्यायस्य मन्त्राणां विनियोगः सर्वमेधस्य अप्तोर्यामनामकसप्तमदिने सर्वहोमे क्रियते। समस्तकामनानां पूर्तये सर्वमेधः यागः क्रियते। सर्वमेधयागे द्वादश दीक्षाः[2], द्वादश उपासदः, दश सुत्याः भवन्ति।

सप्तमदिने जायमाना सुत्यायाः नाम आप्तोर्याम वर्तते। तृतीये मन्त्रे हिरण्यगर्भादिपदेन कस्य कस्यानुवाकस्य, मन्त्रस्य वा ग्रहणं भवति इति विषयोऽपि स्पष्टीकृतो वर्तते। एषां मन्त्राणां विनियोगः ब्रह्मयज्ञार्थं जपार्थं च भवति। चतुर्थमन्त्रे कथितं वर्तते यत् विश्वतैजसविराट्हिरण्यगर्भप्राज्ञ- अव्याकृतसमष्टिव्यष्टयः एताः सर्वाः

---

[१] **शु०य० २२.२२**

[२] **का०श्रौ०सू० ( आचार्यविद्याधरशर्मा ) भू०पृ० ६८**

तस्यैव सर्वात्मकस्य भगवतः स्वरूपाः। पञ्चममन्त्रे षोडशपदस्यार्थः षोडश अवयवयुक्तलिङ्गशरीरं यः धारयति तादृशस्य प्रजापतेः बोधकः। अष्टममन्त्रे ओतप्रोतशब्दयोः व्याख्याबेलायां प्रतिपादितं वर्तते यत् सः परमेश्वरः शरीरभावेन ओतः, जीवभावेन प्रोतश्च वर्तते। नवमे मन्त्रे त्रीणि पदानि इत्यस्य व्याख्यायां सृष्टिस्थितिलयानां, त्रयाणां वेदानाम्, त्रयः कालाः, परब्रह्मान्तर्याम्यव्याकृतानां स्वरूपस्य चर्चा विहिता वर्तते।

दशमे मन्त्रे प्रदर्शितं वर्तते यत् ब्रह्मज्ञानेन कैवल्यस्य एवं अग्निहोत्रादिना स्वर्गस्य प्राप्तिर्भवति। एकादशे द्वादशे च मन्त्रे कथितं वर्तते यत् सर्वमेधयाजेः गृहस्थस्यापि मुक्तिः भवितुं शक्नोति। त्रयोदशचतुर्दशपञ्चदशमन्त्रैः मेधा एवं षोडश मन्त्रेणः श्रियाः याचनं क्रियते। एताः चत्वारः मन्त्राः वैदिकसम्प्रदाये श्रीसूक्तनाम्ना प्रसिद्धाः सन्ति।

**श्रीसूक्तम्** -

सदसस्पतीत्यारभ्य इमाश्चतस्त्र ऋचो वैदिकसम्प्रदाये श्रीसूक्तशब्देन प्रोच्यन्ते[1]। सर्वोऽपि विधिः श्रीसूक्तवदेव कार्यः। **सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्। सनिं मेधामयासिषꣳ स्वाहा**[२] इति। यज्ञगृहस्य पालकात्, अचिन्त्यशक्तिसम्पन्नस्य परमेश्वरस्य प्रियकमनीयशक्तिसकाशादहं धनैश्वर्यस्य तथा धारणावतीमेधायाः याचनं करोमि। तस्य कृते एषा आहुतिरस्ति। -

**यां मेधां देवगणाः पितरश्चोपासते।**
**तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा॥**[३]

---

[१] **शु०य० ३२.१६ (अनन्तश्रीविभूषिताः स्वामिकरपात्रमहाराजस्य मन्त्रभाष्ये)**

[२] **शु०य०३२.१३**

[३] **शु.य.३२.१४**

यस्याः परमपवित्रमेधायाः देवगणाः पितृगणाश्च उपासनां कुर्वन्ति, हे अग्ने! भवान् मह्यं तया एव पवित्रमेधया मेधाविनं कुरोतु।

**मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः।**
**मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा॥**[1]

वरुणदेवः मह्यं तत्वज्ञानबोधसमर्थां मेधां प्रददातु, अग्निः प्रजापतिश्च मह्यं मेधा प्रदत्ताम्, इन्द्रः वायुश्च मह्यं मेधां प्रदत्ताम्। हे दाता! मह्यं त्वं मेधां प्रदेहि। भवद्भ्यः देवेभ्यः मम एषा श्रेष्ठाहुतिः।

**इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम्।**
**मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा॥**[2]

मम मेधारूपां श्रियं ब्राह्मणक्षत्रियौ उभौ अश्नुताम्। देवगणाः उत्तमां श्रियं प्रददतु। लक्ष्म्याः निमित्तं मम द्वारा प्रदत्ता श्रेष्ठाहुतिः भवते समर्प्यते।

**यमसूक्तम्** –

अस्मिन् सूक्ते पितृमेधसम्बन्धिनः मन्त्राः प्रदत्ताः सन्ति। शुक्लयजुर्वेदस्य पञ्चत्रिंशदध्यायः यमसूक्तं वर्तते। अत्र पितृमेधस्य = अन्त्येष्टिसंस्कारस्य मन्त्राणां निरूपणं वर्तते। असुखकारिणः देवहिंसकाः असुराः इतः गच्छन्तु। एतत् सोमाभिषवस्य कर्तुः यजमानस्य स्थानमस्ति। ऋतुदिवसरात्रिद्वारा स्पष्टीकृतमेतत्स्थानं यमराजः मृतयजमानं प्रददातु[3]। भगवती श्रुतिः कथयति –

---

[1] **शु०य० ३२.१५**

[2] **शु०य० ३२.१६**

[3] **शु०य० ३५.१**

**सविता ते शरीरेभ्यः पृथिव्याँ लोकमिच्छतु। तस्मै युज्यन्तामुस्त्रियाः**[१]

हे मृत यजमान! सूर्यदेवः तव अस्थिरूपस्य शरीरस्य कृते पृथिव्यां स्थानमिच्छतु, अर्थात् तव कृते प्रतिष्ठापदस्य स्थानं सङ्कल्पं करोतु। तव तत् सूर्यद्वारा दत्तं स्थानं वृषभादिद्वारा सुसंस्कृतं स्यात्। वायुः तत्स्थानं पवित्रं करोतु, सविता तत्स्थानं पवित्रं करोतु, अग्नेः तेजसा, सूर्यस्य प्रकाशेन च तत्स्थानं पवित्रं भवतु। तत् स्थानं हलेन वारचतुष्टयं कर्षणीयम्, अर्थात् तत्र चतुर्णां कुण्डानां कर्षणं कृत्वा वृषभः हलात् पृथक्कर्तव्यः[२]। भगवती यजुर्वेदस्य श्रुतिः कथयति –

**अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता।**
**गोभाज इत्किलासथ यत्सनवथ पूरुषम्।।**[३]

तं स्थानमुद्पाट्य मृतस्य पुरुषस्य अस्थि तत्र स्थापनीयम्, हे ओषधयः! अश्वत्थवृक्षे तव निवासस्थानमस्ति, पलाशपर्णे च तव गृहमस्ति। त्वं पृथिवीं प्राप्तो भव, त्वं पुरुषस्य सेवां करोसि। हे मृत! सविता तव शरीरं पृथिव्याः हृदये स्थापितं करोतु, हे पृथिवि! तस्य मृतस्य कृते त्वं शान्तिदायिनि भव[४]।

हे मृत देवदत्त! जलस्य निकटे स्थाने अहं तुभ्यं प्रजपतिदेवतायां स्थापितं करोमि, सः प्रजापतिः अस्माकं पापानि दूरीकरोतु[५]। हे मृत्यो! त्वमितः पराङ्मुखो भूत्वा अन्यमार्गेण गच्छ, तव मार्गः देवयानमार्गेण पृथक् वर्तते। त्वं पितृयानमार्गस्य अधिकारिन् असि, हे

---

[१] **शु०य० ३५.२**

[२] **शु०य० ३५.३**

[३] **शु०य० ३५.४**

[४] **शु०य० ३५.५**

[५] **शु०य० ३५.६**

चक्षुकणयुक्तमृत्यो! तुभ्यं कथयामि यत् त्वमस्माकं सन्तानस्य वंशपरम्परायाश्च नाशं मा कुरु। अस्माकं वीराणां पुत्राणाञ्च रक्षां कुरु[1]।

हे मृत! वायुः सूर्यनारायणः च तुभ्यं सुखं प्रदत्ताम्, शवगृहे इष्टिकां स्थापयित्वा एताः इष्टिकाः तव कृते सुखकारिण्यः भवन्तु, हे मृत! एते पार्थिवाग्नयः तव कृते सुखकराः भवन्तु, ते तुभ्यं तापितं न कुर्वन्तु[2]। हे मृत! पूर्वादिदिशाः तव कृते शुभसंकल्पशालिनः भवन्तु, जलदेवता तव कृते कल्याणकारिणी भवतु, समुद्रः नद्यश्च तव कृते कल्याणकारिण्यः भवन्तु। हे मृत! सर्वाः दिशाः तव कृते शुभसङ्कल्पं कुर्वन्तु[3]। हे बान्धवाः! एषा पाषाणयुक्ता नदी प्रवहति, तां तर्तुं प्रयत्नं कुर्वन्तु, नद्याः तरणं च कुर्वन्तु। अस्मिन् नदीप्रदेशे ये दुष्टाः अशुभाः राक्षासाः आसन्, तेषां वयं परित्यागं कुर्मः।

तदनन्तरमस्मभ्यं शुभं पथ्यभूतं पिण्डात्मकमन्नं प्राप्तं भवतु[4]। हे अपामार्ग! त्वमस्माकं पापम्, किल्बिषं, कृत्यां, लाञ्छनं, दुष्टस्वप्नादुत्पद्यमानं दुःखरूपं फलं दूरीकरोतु[5]। भगवती श्रुतिः कथयति –

**सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यं च वयं द्विष्मः॥**[6]

जलमोषधयश्च अस्मभ्यं सुमित्रस्य स्वभाववतः कल्याणकारिण्यः भवन्तु। यः अस्मान् द्वेष्टि, यञ्च वयं द्विष्मः तेषां कृते

---

[1] **शु०य० ३५.७**

[2] **शु०य० ३५.८**

[3] **शु०य० ३५.९**

[4] **शु०य० ३५.१०**

[5] **शु०य० ३५.११**

[6] **शु०य० ३५.१२**

जलौषधयः शत्रुस्वरूपाः भवन्तु। वयं वृषभस्य स्वकल्याणाय आलम्भनं कुर्मः। एषः वृषभः सुरभ्याः पुत्रः, एषोऽस्माकं कल्याणं करोतु, एषः देवतायै इन्द्रसदृशः रक्षकः अस्ति[१]। भगवती श्रुतिरपि कथयति –

**उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम्।**
**देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्॥**[२]

अन्धकारात् लोकात् श्रेष्ठं स्वर्गलोकं पश्यन् वयं देवेषु श्रेष्ठदेवं सूर्यं तथा तेषामुत्तमां ज्योतिं प्राप्नुयाम। कब्रश्मशानयोर्मध्ये एकं पाषाणं स्थापयन् अहं विद्यमानजीवानां मर्यादां स्थापयामि यत् जीवेषु नान्यः कश्चन शीघ्रमर्थात् प्रारब्धकर्मसमाप्तेः पूर्वं पितृलोकगमनस्य सङ्कल्पं न करोतु। दानाध्ययनयागानुकूलमायुस्समाप्तिपर्यन्तं जीवतु। एषः जीवः मृत्युं पर्वतात् रक्षतु[३]। यजुर्वेदस्य श्रुतिः कथयति –

**अग्न आयूꣳषि पवस आसुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनाम**[४]**॥**

हे अग्निदेव! भवान् एव आयुःप्राप्तकरणकर्मणः कर्ता असि, अस्मभ्यं धनधान्यवर्षादिरसं ददातु। दुष्टकुक्कुरसदृश्याः दुर्जनस्य बाधाया अस्माकं रक्षां कुरु। हे अग्निदेव! भवान् चिरायुः असि, भवान् हविषा वर्धते, भवान् घृतयुक्तमुखवान् अस्ति। गावः मधुरसुगन्धितघृतस्य पानं कृत्वा जीवानां रक्षां कर्वन्तु, यथा पिता पुत्रस्य रक्षां करोति[५]।

---

[१] **शु०य० ३५.१३**
[२] **शु०य० ३५.१४**
[३] **शु०य० ३५.१५**
[४] **शु०य० ३५.१६**
[५] **शु०य० ३५.१७**

एभिः जीवैः वृषभस्य स्पर्शः कृतः, अग्निः तृप्तः कृतः। ऋत्विग्षु धनस्य दक्षिणायाश्च वितरणं कृतम्। एतादृशानां जीवानां दमनं कः कर्तुं शक्नोति? अर्थात् केनापि न। तदाह –

**परीमे गामनेषत पर्यग्निमहृषत।**
**देवेष्वक्रत श्रवः क इमाँ२॥ आ दधर्षति॥**[1]

अपक्वमासभक्षणशीलं शवदाहकं पितृमेधिमग्निमहं दूरीकरोमि, सः पापनाशकोऽग्निः श्मशानभूमिं प्राप्तो भवतु। एषः द्वितीयः सर्वज्ञाग्निः स्वधिकारं ज्ञात्वा अस्मिन्नेव गृहे स्थित्वा देवतानां कृते हविषः वहनं करोतु[2]।

हे जातवेदः अग्ने! भवान् पितरस्य निमित्तं सारभागं वपां वहतु, दूरदेशे स्थितान् पितृन् भवान् सम्यक्प्रकारेण जानाति। तेभ्यः पितृभ्यः मेदावर्धनयोग्याः घृतयुक्ताः नद्यः तेषां समीपे वहन्तु, तेषां समस्तशुभकामनाः पूर्णाः भवन्तु, तन्निमित्ता प्रदत्ता आहुतिं भवान् गृह्णातु[3]। भगवती श्रुतिरपि कथयति –

**स्योना पृथिवि नो भवानृक्षरा निवेशनी।**
**यच्छा नः शर्म सप्रथाः। अप नः शोशुचदघम्॥**[4]

हे पृथिवि! भवती अस्माकं कृते सुखदा कण्टकरहिता च भवतु। भवती प्रभूतसुखं ददातु, जलदेवता अस्माकं पापं दूरीकरोतु।

---

[1] **शु०य० ३५.१८**
[2] **शु०य० ३५.१९**
[3] **शु०य० ३५.२०**
[4] **शु०य० ३५.२१**

तदाह – **अस्मात् त्वमधि जातोऽसि त्वदयं जायतां पुनः। असौ स्वर्गाय लोकाय स्वाहा॥**[१]

हे अग्निदेव! भवान् अनेन यजमानेन आधानकाले प्रकटीकृतः। तस्मात् अयं यजमानः पुनः प्रादुर्भवतु, एषः देवदत्तः स्वर्गलोकस्य योग्यो भवतु इति एषा आहुतिः।

यद्यपि अस्य पञ्चसूक्तस्य मुख्यं प्रयोजनमक्षय्यस्वर्गस्य प्राप्तिरस्ति तथापि एतेषु सूक्तेषु सांसारिकजनानां मनोरथपूर्तये बहूनि साधनानि प्रतिपादितानि सन्ति। येन साधनेन विश्वे स्थितः मानवः ऐहिकपारमार्थिकोभयलोकसिद्धं प्राप्तुं शक्नोति।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'वैश्विकदृष्ट्या यजुर्वेदे पञ्चसूक्तानां समीक्षणम्'** नाम विंशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

[१] **शु०य० ३५.२२**

# अथैकविंशोऽध्यायः

# यजुर्वेदे भौतिकविज्ञानम्

भौतिकं विज्ञानं बहुष्वनुशासनेषु विशिष्टमनुशासनमस्ति। यस्मिन् प्रकृतेः तत्सम्बन्धिनामभिव्यक्तीनां परमाण्वन्तर्मध्ये विद्यमानानां लघुतमोपकरणादारभ्य ब्रह्माण्डस्यातिविशालाञ्जलिलाश्रयव्यवस्था-पर्यन्तमध्ययनं क्रियते। अस्यानुसन्धानद्वारा सर्वेषां भौतिकविषयाणां क्रियासम्बन्धिविषयाणां नियमानाञ्च व्यवस्था प्राप्तुं शक्यते। भौतिकानुसन्धाने करिष्यमाणं परिश्रमसाध्यरूपमनुसन्धानं विविधनियमानां सत्यतां प्रतिष्ठापयति अथवा नूतनानां तथ्यपरकनियमानां सन्धानं करोति ये नियमाः वस्तुतः सिद्धान्ततथ्यपरकाः भवन्ति। भौतिकक्षेत्रं तथाविधमस्ति यन्माध्यमेन जनाः प्रकृत्या सहानेकान् नैजान् सम्बन्धानुपस्थापयन्ति, ये सत्यस्य समीपस्थाः भवन्ति। सम्पूर्णस्य भौतिकानुसन्धानस्याधारः गणितशास्त्रमस्ति। अतः तच्छास्त्रं भौतिकानुसन्धानकर्तृभिः सर्वैरपि ज्ञेयं भवति। यस्य कस्यापि शाखाविशेषमादाय कृतं कार्यं शाखान्तरमादाय करणीयं कार्यं प्रत्यपि सहायकं भवति। अध्येता च प्रकृतिसम्बन्धिनः व्यवहारा स्वकार्यं प्रति अनेकरूपेणोपयोगिनः भवन्ति इति कृत्वा कश्चिद् विशेषस्थाने निरीक्षणं कृत्वा पुनः नूतनस्यैकस्य सिद्धान्तस्य रचनां करोति यः तस्य निरीक्षणकार्यस्य व्यवस्थां स्थापयति। अन्ते च स एतादृशान् प्रयोगान् योजयति यद्वारा सिद्धान्तस्य परीक्षणं सम्भवं स्यात्। सर्वेषामनुसन्धानं वैशिष्ट्यमेतादृशमेव भवति। नाभिकीयभौतिकानुसन्धानमर्थात् परमाणोरध्ययनं समयेऽस्मिन् तस्य प्रथमं स्थानं विद्यते। प्रकारान्तराणां

प्रकाशिका (Optics) भौतिकरसायनज्यौतिषभौतिकीब्रह्माण्डविज्ञान-वायुविज्ञानघनीभूता भौतिकी ऊष्मप्रकाशध्वनिरित्यादीनामनुसन्धानस्थानपि आसां शाखानां विभाजकोद्भूताः रेखा अपि स्पष्टतया न प्रतीयन्ते। प्रायेणैतादृशानि विशेषस्थानानि सन्ति येषामध्ययनं सम्बन्धितास्वन्यासु शाखासु क्रियते। अध्ययनद्वारा स्फुरितान् सिद्धान्तान् द्विधा विभज्य प्रायोगिकभौतिकरूपेण सिद्धान्तिकरूपेण च स्थाप्यते।

**सैद्धान्तिकभौतिकशास्त्री-**

सैद्धान्तिकभौतिकशास्त्रज्ञाः मुख्यरूपेण गणितशास्त्रसाहाय्येन विशेषपत्रोपरि कर्गदोपरि प्रकृतिनियमानाधारीकृत्यानुसन्धानं कुर्वन्ति। ये सैद्धान्तिकभौतिकशास्त्रज्ञाः यदा कदा काल्पनिके वैज्ञानिकलोके वैज्ञानिकनामाभिधेयाः भवन्ति। आधुनिकानुसन्धाने भौतिकपरमाणुसम्बन्धिसंरचना एतादृशशास्त्रज्ञानां कार्यमाधारीकृत्यैव भवन्ति। भौतिकशास्त्रज्ञैरेव गणितशास्त्रं सर्वाग्रगण्यमिति तस्य वैशिष्ट्यं स्थापितम्। ये सिद्धान्तज्ञाः जनाः (प्रतीकं) चिह्नमादाय संसारे स्थीयन्ते। एतेषां व्यवहारप्रयोगार्हा भाषा सामान्यजनाः काठिन्याधिकतयेनैव ज्ञातुं शक्नुवन्ति। यदि स जनः नूतनाविष्कारमाध्यमेन स्वजीवनं यापयति।

**प्रायोगिकः वैज्ञानिकः -**

प्रायोगिकानुसन्धानकर्तृणां वैज्ञानिकानां कश्चिद् विशिष्टो गुणः स्थानञ्च भवति। ये खल्वन्येषां सिद्धान्तानामन्वेषणार्थं प्रयोगानुसन्धानयोजनां निर्ममते। तेषां प्रतिभा तान् एतादृशीं क्षमतां प्रददाति। ये प्रायेणाविश्वसनीयरूपेण सूक्ष्मतमानां युक्तीनां निर्माणं कुर्वते। यया युक्त्या कस्यापि परिकल्पनायाः सत्यत्वं प्रमाणितं स्यादथवानुसन्धानकर्तुरक्षमता सिद्धा स्यात्। एतादृशैरनेकैः वैज्ञानिकैः स्वकर्तृकप्रयोगद्वारा विद्युद्यन्त्रपरमाणुसमानं बलं व्यावहारिकप्रयोगं व्यवहारे आनयनार्थमाधारस्य निर्माणं कृतम्। अधिकतराणां भौतिकशास्त्रज्ञानां

विश्वासोऽयं वर्तते यत् अद्यावधि यावत् स्तूनामुपरि विद्यमानं विषयं स्पष्टयति प्रकृतिसम्बन्धिज्ञानमस्माकमपूर्णमिति। इदानीं वयं परमाणुसम्बन्धिनीम् ऊर्जाशक्तिं प्रकृतिसम्बन्धिनमन्तिमं द्रव्यं ब्रह्माण्डस्योपत्तिमस्पष्टरूपेण स्मर्तुं प्रारम्भिकावस्थायां स्मः। अयमेव नियमः मानवीयशरीरसमानं सरलमन्यत् जातस्य नूतनस्य वस्तुनः क्रियाविषयेऽपि प्रवर्तते। आधुनिकेऽस्मिन् समये सर्वेषामनुसन्धानकर्तृणां चित्तं भौतिकपरमाणोः प्रकृतेद्रव्यस्य चानुसन्धानोपरि प्राथमिकरूपेण दत्तावधानं दृश्यते। वयं सर्वेऽप्यस्मिन्नाधुनिके काले सत्यं प्रति दत्तचित्तावधानाः जाताः वयं बहूनामुपपरमाणुसम्बन्धिनामणूनां साहाय्येन यान्त्रिकेषूपकरणेषु स्वशासनं स्थापयितुं शक्नुमः। संसारविषये पूर्णरूपेण तावत्पर्यन्तं ज्ञानं न समीचीनं भवति यावत्पर्यन्तं सर्वेषामणूनां कणानां ज्ञानं न स्यादथवा प्रकृतिसम्बन्धिनः व्यवहाराः पूर्वकथनरूपेण स्वज्ञापितं न स्युः। अस्मिन् विषये मया यजुर्वेदीयभौतिकविज्ञानस्य सैद्धान्तिकमनुसन्धानं कृतम्।

यजुर्वेद एवात्र शोधविषयः, वेदार्थज्ञानं विना भारतीयविज्ञानवैशिष्ट्यं ज्ञातुं न शक्यते। यजुर्वेदः भारतीयविज्ञानधारावाहकः सर्वार्थावद्योतक इत्येतत्सुविदितमेव समेषां पाठकानाम्। वेदो न केवलशब्दराशिः। परिच्छिन्नानि सर्वाण्यपि वस्तूनि वेद एव। तथा च निर्गुणं ब्रह्म अपि वेदरूपं धत्ते। ब्रह्म च ज्ञानरूपेणोपनिषत्सु उद्धृतमस्ति। सगुणावस्थायां वर्तमानाः सर्वेऽपि पदार्थाः वेद एव। एतावता उदवगम्यते यत् न केवलं निर्गुणतत्त्वमपि तु सगुणा अपि सर्वे पदार्थाः वेदशब्दवाच्या इति।

उपनिषद्युगे देवविद्याया नक्षत्रविद्यायाश्चाध्ययनं कृतम्। ते भौतिकविज्ञानस्य परिधौ समन्विता वर्तन्ते। पञ्चतत्त्वानां वैज्ञानिकानुशीलनं कृतम्। तेषां प्राथमिकस्वरूपमणुपरमाणुतः सिद्धमिति पर्यालोचितम्।

भौतिकविज्ञानविषये "शक्तेः" कार्याणामध्ययनं भवति। साधारणतोऽस्मिन् शास्त्रे गति विद्युत्प्रकाशशब्दप्रभृतिविषयाणामध्ययनं भवति। एते विनाशरहिताः परिवर्तनशीलाश्च वर्तन्ते। मूलस्थापनं यजुर्वेदस्य–

**इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसङ्गिरः।**
**रथीतमꣳ रथीनाँवाजानाꣳ सत्पतिं पतिम्॥**[1]

अन्तरिक्ष इव सर्वत्र व्यापके क्षोभरहिते रथे तिष्ठन्तं रथीनां रथीतमं श्रुतिस्मृतिप्रतिपादकानां कर्मणामनुष्ठातारमिन्द्रं ऋत्विजः स्तुतिभिर्वर्द्धयन्ति। अत्र यजुर्वेदे भौतिकविज्ञानस्य द्योतकस्य रथस्य वर्णनमस्ति। तथा च शब्दशक्तेः प्रदर्शनं दृश्यते।

सूतनिर्माणाय चरखायन्त्रं भारवाहनाय शकटयन्त्रं भवननिर्माणाय चूनासूरखीप्रभृतियन्त्रं, कुम्भकारस्य पात्रनिर्माणाय यन्त्रं, लौहकारस्य भार्यायन्त्रं धनुर्बाणप्रभृतियुद्धस्य विभिन्नयन्त्राणि सर्वाणि भौतिकानि सन्ति। भारतीयजीवनपद्धतौ एषु प्रयुक्तेषु यन्त्रेषु वैज्ञानिकसिद्धान्ताः ज्ञातव्याः। भौतिकशक्तेः कार्यं विद्युदिति। अनन्ताः प्रजापतयः। अनन्ताश्चैते यज्ञाः। तेषु सर्वेषु प्रधानः सर्वेषामात्मा भगवान् सूर्यः। तस्मादेतत्। सूर्यविज्ञानं वेदः। सूर्यस्यैव याथातथ्येन विज्ञानात् सर्वे देवाः सर्वे यज्ञाः सर्वे प्रजापतयः सुविज्ञाता भवन्ति। तदित्ययमेव सूर्यवेदश्च ब्रह्मवेदश्च। सर्वेषु प्रजापतिषु यज्ञेषु प्रधानः भगवान् सूर्यः। यैः सूर्यो ज्ञातः। तैः एव देवः प्रजापतिः धर्मः ब्रह्म च ज्ञाताः। सूर्यविज्ञानस्य ज्ञानानन्तरं सर्वं ज्ञानं भवति।

**सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक्। धीरा देवेषु सुम्नया॥**[2]

---

[1] **शु०य० १२.५६**

[2] **शु०य० १२.६७**

धीराः अग्निक्षेत्रविदः कृषिकर्माभिज्ञाः पुरुषाः सीराणि हलानि वृषभैः योजयन्ति युगानि पृथक् विस्तारयन्ति यथा यज्ञयागादिकर्मभिरिन्द्रादिदेवेभ्य आहुतयः प्रदाय तर्पयामः। अत्र बलीवद्रशब्दः शक्तिवाचकः सीरेण क्षेत्रकर्षणक्रियायां बलीवद्रसहायकाः। शक्तिवाचकभौतिकविज्ञानस्याधारः शक्तिः। अत्र मन्त्रशक्तेः संकेतः।

**शब्दविज्ञानम् ( वाक्शक्तिः ) –**

**अहं रुद्रेभिर्वसुभिश्चरामि। अहमादित्यैरुत विश्वदेवैः। अहं मित्रावरुणावुभौ बिभर्मि। अहमिद्राग्नी अहमश्विनावुभौ ॥**[१]

अहं वायुसदृशी भूत्वा सर्वेषु देवेषु विचरामि तथाहमेवास्याः पृथिव्याः रुद्रवस्वादित्यविश्वेदेवमित्रावरुणेन्द्राग्न्यश्विनीकुमारप्रभृतीनां देवानामान्तरिकशक्तिरस्मीति, वाक्शक्तेर्विज्ञानं वर्तते। एतद् विवेचनं शब्दविषयकं सम्पूर्णज्ञानं वर्तते। न केवलं निरर्थककोलाहलं परञ्च सार्थकं कोलाहलमपि शब्दशक्तिः। सः शब्दोऽक्षरमप्युच्यतम्– अर्थात् विनाशरहितब्रह्म इति।

अनेन वैज्ञानिकशब्देन सिद्धमस्ति यथा एतादृशमुपकरणं साम्प्रतमुपलब्धं विद्यते। पुरा व्यतीतकालेऽपि कथिताः शब्दाः अधुना प्राप्नुवन्ति। एते एव शब्दाः ''ग्रामोफोनयन्त्रे अंकिताः संग्रहीताश्च सन्ति''। एष एव शब्दविज्ञानस्य महिमा वर्तते। ततः परमात्मना सह शब्दानां तुल्यता विद्यते। यथा परमात्मा अक्षरः तद्वत् शब्दोऽप्यक्षर इति। वेदानां रहस्यमार्षबुद्ध्या कठोरेण श्रमेण चावगन्तुं शक्यते। शतशो मन्त्राः विज्ञानविषयं वर्णयन्ति। यथा–

**अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्र।**
**येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः॥**[१]

---

[१] **श्रीदेव्यथर्वशीर्षम् – ५**

हे अग्ने! तव तेजः दिवि द्युलोके सूर्यरूपेण वर्तते। पृथिव्यामग्निरूपेणोषधीषु जीवनधारकशक्तिरूपेण, जलेषु विद्युद्रूपेण वडवानलरूपेण वा दृश्यते। तेन स्वतेजसा त्वं विश्वं प्रकाशयसि। त्वं विस्तृतमाकाशं प्रकाशय। त्वं नृणां शुभाशुभकर्मणां द्रष्टा अस्ति। अस्मान् त्वं पालय इति। अनेन मन्त्रेण प्रकाशस्य महिमा प्रदर्श्यते। साम्प्रतं विद्युता सर्वत्र निखिलं व्यवहारं प्रचलति।

**विश्वस्य केतुर्भुवनस्य गर्भ आ रोदसी अपृणाजायमानः।**
**वीडुं चिदद्रिमभिनत्परायञ्जना यदग्निमयजन्त पञ्च॥**

अयमग्निः प्राणिजातस्य विज्ञानभूतोऽग्न्यात्मना भूतजातस्य गर्भवदन्तरवस्थितोऽस्ति। वाय्वात्मना स हि प्राणभावेन प्राणिसमूहानामन्तः वाय्यात्मना विचरति। इन्द्ररूपेण सर्वत्र गमनशीलो वर्तते। इदमपि अग्निरद्रिमदारयितव्यं मेघभावेन विदारयितुं योग्यः। चत्वारो महर्त्विजः यजमानश्च एते सर्वेऽग्निं यजन्ते।[२]

यजुर्वेदेऽग्नेः रूपत्रयं वर्ण्यते सौर ऊर्जा भौतिकोऽग्निः। समुद्रान्तर्गतो वह्निश्च बडवानल इत्यर्थः। ऊर्जायाः विश्वव्यापित्वमेतत् विस्तरेण प्रतिपाद्यते। सेयमूर्जा अग्निरूपेण भुवि अन्तरिक्षे दिवा च सर्वत्र संचरति। व्यक्तरूपेणाव्यक्तरूपेण च सर्वत्र प्रसरति। अत एव यत्र कुत्रापि घर्षणं भवति तत्र विद्युदुत्पत्तिः।

**दिवस्परि प्रथमं जज्ञे अग्निरस्मद्द्वितीयं परि जातवेदाः।**
**तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः॥**[३]

ऊर्जायाः विश्वव्यापित्वं दृश्यतेऽग्निरूपेण भुव्यन्तरिक्षे दिवि च सञ्चरति। ऊर्जा व्यक्तरूपेणाव्यक्तरूपेण च सर्वत्र प्रसरति। अयं भावो

---

[१] **शु०य० १२.४८**

[२] **शु०य० १२.२३**

[३] **शु०य० १२.१८**

यत् यत्र कुत्रापि घर्षणं भवति तत्र विद्युदुत्पत्तिः।। कृष्णयजुर्वेदस्य तैत्तिरीयशाखायामूर्जाकृते प्रयुज्यमानानां विविधयन्त्राणां वर्णनं प्राप्यते। यथा– दिग्बोधकं यन्त्रम्, प्रकाशजननार्थयन्त्रम्, ध्वनिप्रसारणयन्त्रम्, वायोः भारमानाय यन्त्रम्, शीतोष्णतादिमानार्थयन्त्रञ्च वर्णितानि सन्ति सर्वाणि भौतिकविज्ञानानि सन्ति। वातानां यन्त्राय ऋतूनां यन्त्राय दिशां यन्त्राय तेजसे यन्त्राय वाचो यन्त्रम् अशीय।[१]

परमाणुष्वग्नेरस्तित्वम्– सर्वेषु परमाणुवस्तुष्वग्नितत्त्वं निहितमस्ति। अग्नितत्त्वाय सत्तयैव तत्रोष्मोत्पत्तिश्च संलक्ष्यते। अग्नेः आविष्कारं त्रयः ऋषयः कृतवन्तः। अथर्वणः ऋषेः पुत्रः दध्यङ् नामकः ऋषिः सर्वप्रथममरण्योर्मन्थनेनाग्निमाविष्कृतवान्। वृत्रस्य मेघस्य हन्तारमग्निमाविष्कृतवान् यथा साम्प्रतं यज्ञमण्डपेऽपि मन्थनेनाग्निमुत्पादयेत्। यथा– **तामु त्वा दध्यङ्ऋषिपुत्र ईधे अथर्वणः। वृत्रहणं पुरन्दरम्।।**[२]

सरोवरस्थजलमन्थनेन जलीयविद्युतः उत्पादनम्। –

**त्वामग्ने पुष्कराद्ध्यथर्वा निरमन्थत्।।**[३]

अथर्वा ऋषिः जगतः पोषयितारं त्वां भूगर्भमन्थनेन पुरीष्यं भूगर्भीयमग्निमाविष्कृतवान् यथा– **पुरीष्योऽसि विश्वभरा अथर्वा त्वा प्रथमो निरमन्थदग्ने।।**[४]अथर्वा ऋषिः त्रयाणामप्यग्नीनामाविष्कारक इति।

**आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च।**
**हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्।।**[१]

---

[१] **तैत्तिरीय सं० १.६.१.२**

[२] **शु०य० ११.३३**

[३] **शु०य० ११.३२**

[४] **शु०य० ११.३२**

तथा च – **आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरं च प्रयन्त्स्वः।।**[२]

न केवलं भूरसि न केवलं सूर्यः परञ्च सकलं जगत् परिक्रामति। यथा–

**समाववर्त्ति पृथिवी समुषाः समु सूर्यः। समु विश्वमिदं जगत्।।**[३]

सूर्य एवं चन्द्रं प्रकाशयति। चन्द्रे नास्ति प्रकाशः। सूर्यः स्वः किरणैः चन्द्रं प्रकाशयति। यथा– **सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम।।**[४]

एतद् यास्काचार्येणापि प्रतिपादितम्–

**अथाप्य एको रश्मिः चन्द्रमसं प्रतिदीप्यते। आदित्ययोऽस्य दीप्तिर्भवति।।**[५]

यजुर्वेदे स्फुटम् एतत् प्रतिपाद्यते यत् सूर्ये उच्चशक्तियुक्ततत्त्वं बाष्पद्वयं वर्तते। बाष्पद्वयस्य निर्देशः ''अपां रसः, जलस्य सारभूतो यो रसः वर्तते स एव महती शक्तिः''। सूर्ये कालिमाऽपि वर्तते सूर्यस्य मण्डलं रजसा आवृतमस्ति। वैज्ञानिकैः एतन्मतं स्वीकृतम्। आकृष्णेन रजसा वर्तमानः सूर्यः। स स्वाकर्षणशक्त्या पृथिवीं धारयामास। वेदेषु आकर्षणशक्तेः स्पष्टमुल्लेखो वर्तते। सर्वेषु परमाणुष्वाकर्षणशक्तिः विद्यते। सर्वतोभावेन स्वकिरणैः पृथिवीं धृतवान्। यथा –

**दाधर्थ पृथिवीमभितो मयूखैः स्वाहा।।**[६]

---

[१] **शु०य० ३३.४३**

[२] **शु०य० ३.६**

[३] **शु०य० २०.२३**

[४] **शु०य० १८.४०**

[५] **निरुक्तम् २.६**

[६] **शु०य०५.१६**

ऊर्जायाः द्रव्यस्य चान्योऽन्यरूपेण परिवर्तनं वर्तते। अस्य सिद्धान्तस्य सूत्रमुपलभ्यते। अदितेः दक्षोऽजायत। अदितिः प्रकृतिद्रक्षः ऊर्जा अजायत। दक्षाच्चादितिरजायत। ऊर्जा एव द्रव्यरूपं धत्ते द्रव्यमेव ऊर्जारूपं धत्ते। जलेऽग्निः सोमश्च विद्येते। यथा- **अग्नीषौमौ बिभ्रति आप इत तौ॥**[१]

जलनिर्माणसूत्रमुपलभ्यते। मित्रवरुणयोः सम्मेलनेन जलस्योत्पत्तिः। मन्त्रे तु निर्दिश्यते यत् जलार्थं मित्रं वरुणं च गृहाण।

**मित्रं हुवे पूतदक्षं वरुणं च रिशादसम्। प्रियं घृताचीं साधन्ता॥**[२]

वेदेषु शतशो विज्ञानसूत्राणि सन्ति। आदिकाले सर्वेषां भूतानामुत्पत्तिकर्ता जगतः एकमात्रस्वामी हिरण्यगर्भ एव वर्तते। यथा-

**हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।**
**स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥**[३]

प्राणिजातस्य पूर्वं हिरण्यगर्भ एक एव आसीत्। प्राणिजातोत्पत्तेः पुरा स्वयं शरीरधारी अभवत्। स जातैव सर्वस्याधिपति बभूव। स निखिलां पृथिवीं दधार धृतवान् इति। परब्रह्मणः जायमानेन ज्योतिषा उत्पन्नस्तेज एव सूर्यः। स एव जगतः सृष्टा पालकः संहारकश्चास्ति। यथा- **विश्वानि देव सवितर्दुरितानि परासुव। यद्भद्रन्तन्न आसुव॥**[४]

**सूर्यतत्त्वरहस्यम्** -

सूर्यतत्त्ववेत्तारः विद्वान्सः कथयन्ति। असंख्यैः हिरण्यैर्युक्तः प्रकाशमयस्तपनमयश्च सूर्यः। स विश्वेषां भुवनस्वरूपाणां केन्द्रः। जगतो

---

[१] **अथर्व० ३.१३.५**

[२] **ऋग्वेद १.२७**

[३] **शु०य० १३.४**

[४] **शु०य० ३०.३**

रूपरंगकृतयश्च सूर्यादेव जायन्ते प्रकाशन्ते च स एव सविता प्राणिनामुत्पत्तिस्थानस्य जीवनज्योतिषश्च मूलस्रोतः। सहस्रैः किरणैर्युक्तः विश्वं प्रकाशयन् उदयति। उष्णत्वप्रदानं प्रकाशप्रसारणमृतूनां परिवर्तनं च सूर्यस्यैव कार्यमिति। अतः-

**तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत। पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्॥**[१] इति। तेजसा जलोत्पत्तिः -

**अग्नेर्वै धूमो जायते धूमादभ्रमभ्राद्वृष्टिः॥**[२]

अत एव भगवता मनुना प्रोक्तम् -

**अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।**
**आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः॥**[३]

सूर्यस्य परितः विशालधूमराशिः। सा तमाच्छाद्य विद्यते ततस्तेन कृष्णाो भूत्वा देव भुवनानि पश्यन् गच्छति।

**शकमयं धूममारादपश्यं विषूवता पर एनावरेण॥**[४]

भूतत्वं नाम बहिरिन्द्रयग्राह्यविशेषणगुणवत्त्वम्- इमान्येव पञ्चभूतानि पञ्चेन्द्रियग्राह्याणां विशेषणगुणानामाश्रयाणि। स्थानमिदं विश्वं पञ्चभिर्बाह्येन्द्रियैर्गृह्यते अतो भूतानि तेषामाधारीभूतानां पञ्चद्रव्याणां भौतिकमन्तरं निरूपयन्ति। घ्राणरसनाचक्षुत्वक्श्रोत्राणि इन्द्रियाणि तैः ग्राह्याः। गन्धरसरूपस्पर्शशब्दादयो गुणाः अस्माकं सामान्यमनुभवमेव

---

[१] **शु०य० ३६.२४**

[२] **श०ब्रा० ३.५.१७**

[३] **मनुस्मृतिः ३.७६**

[४] **ऋ० 1.164.43**

सुदृढं कुर्वन्ति। एतेषां पञ्चगुणानां समवायिकारणानि हि पृथिवीजलतेजोवाय्वाकाशभूतानि। तदित्थं पञ्चमहाभूतसिद्धान्तमतीव व्यवस्थितं सुसंगतं च। तत्रेदं मुख्यतमोल्लेख्यं यदेतेषु पञ्चसु भूतेष्वारम्भकसंयोगास्तु प्रतिषिद्ध एव कार्यगुणानां कारणगुणपूर्वकत्वात् परमनारम्भकस्तु संयोगो न प्रतिषिद्ध इति। अतः खलु मानुषादिशरीराणां पार्थिवत्वमेवाभिमतं न हि पाञ्चभौतिकत्वम्। तत्रान्येषां चतुर्णां भूतानां सहकारित्वं तु स्वीकृतं परन्नारम्भकत्वम्।

**अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे श्यामं च मे लोहं च मे सीसं च मे त्रपु च मे यज्ञेन कल्पन्ताम्॥**[१] नमोऽस्तु एतेभ्यः भूतेभ्यः।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे भौतिकविज्ञानम्'** नाम एकविंशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

---

[१] **शु०य० १८.१३**

# अथ द्वाविंशोऽध्यायः

# यजुर्वेदे रसायनविज्ञानम्

रसायनविज्ञानं तदस्ति यदस्मिन् लोके विद्यमानाः जनाः अत्यधिकरूपेण व्यवहारं कुर्वन्ति। तदेव सर्वासु प्राचीनतमासु शाखास्वेकमस्ति। अस्या अनेकान्युदाहरणानि यजुर्वेदे समुपलभ्यन्ते। प्राचीनकालेष्वपि विद्युल्लेपनस्य कृते रसायनद्वारा विद्युद्यन्त्रं निर्मितमासीत् तदेव निर्मितं विद्युद्यन्त्रमस्मिन् समये 'बैटरी' इति नाम्ना व्यवह्रियते। तस्य मुख्योद्देश्यमासीत् लौहजन्यधातूनां सुवर्णत्वेन परिवर्तनमिति। अन्यच्च स्वावश्यकतानुसारेणाप्रयोगयोग्यपदार्थेभ्यः प्रयोगार्हाणामौषधेन्धन–सदृशपदार्थानामुत्पत्तिकरणमेव प्रयोजनम्। इत्यनेन प्रकारेण सर्वेऽपि खाद्यपदार्थाः प्रतिदिनं प्रयोगार्हाः भवन्ति। असंख्यप्रकारकाः पदार्थाः रसायनजन्या एव। तत्त्वानां पारस्परिकसंयोजने तस्याः संरचनाया अध्ययनं व्यवहारस्याध्ययनञ्च रसायनस्य विशिष्टा सुदृढपरिभाषाऽस्ति। पृथिव्यप्तेजवाय्वतिरिक्तान्यन्यानि बहूनि द्रव्याणि सन्ति येषां सर्वेक्षणं कृत्वा प्रयोगः क्रियते। परमाणुगताणवः परस्परं सम्मिल्य गूढतत्त्वाश्रयाणां पदार्थानां निर्माणं कुर्वन्ति। परमाणुद्रव्याणां लघुतमो भागो नास्त्यपि तु सर्वेषां लघुतमानामणुतमो भाग इति सर्वैरपि वैज्ञानिकैरङ्गीकृतम्। यः कोऽपि पदार्थः स्यात् यः एकप्रकारेण परमाणुना निर्मितः स्यात्। यस्य प्राथमिके स्तम्भे एकस्य लाक्षणिकं परिवर्तनीयस्य धनावेशस्य संख्यायाः स्थितिर्भवति। अस्य नाभिकस्य चतुर्षु दिक्षु यन्त्रस्य एका निश्चिता संख्या परिभ्रमति स एवास्माभिः तत्त्वाभिधेयो कथ्यते। गन्धरसरूपस्पर्शानां पाकप्रक्रियानिरूपणप्रसङ्गे आचार्यैः रासायनिकप्रक्रियया मूलसङ्केतः कृतः। तन्मते **'पाको नाम**

**विजातीयस्तेजः संयोगः'**, स च नानाविधो भवितुं शक्नोति। यथा – गन्धजनकः, रसजनकः, रूपजनकः, स्पर्शजनको वा। आचार्यकणादेन इदमपि विवेचितं यज्जले तेजः संयोगात् नानाविधानि परिवर्तनानि जायन्ते। तत्र च तेषां मध्ये विद्युतो विस्फूर्जथुरेव लिङ्गमिति[१]। अन्येषामपि पार्थिववस्तूनां तेजःसंयोगादेव द्रवत्त्वमाविर्भवति। तच्च न नीरवत् सांसिद्धिकमपितु नैमित्तिकं भवति।

संकेतस्यैकया प्रणाल्या रसायनशास्त्रे तत्त्वानां नामोल्लेखनं क्रियते। प्राय एतानि संकेताक्षराणि कस्यामपि भाषायां तत्त्वविशेषस्य नामसंक्षेपणोपरि आधारितसंकेतबोधकलिप्यक्षराणां रूपे वर्तन्ते। अन्ताराष्ट्रियसहमत्या तथाविधाक्षरसंकेता सर्वेषु देशेषु प्रयुज्यन्ते। एवंरूपेण H इत्याकारकेणाक्षरं (हाईड्रोजन) इत्येतं बोधयति। O इति आक्सीजन इत्यस्य द्योतकः। Fe इत्यनेन लौहपदार्थः एवं F इत्यनेन क्लोरीनपदार्थः बुध्यते। NA इत्यनेन सोडियम इत्यस्य बोधो भवति। सोडियम इति पदं लेटीन नेट्रियम (Natrivm) इत्युभयोः पदयोः वाचको भवति। W इत्येतद् अगस्तनपदार्थं संकेतयति। यस्योत्पत्तिश्च जर्मनदेशीयबोल्फरम (Wolfram) इति शब्दात् जातमस्ति। नवीनानामाविष्कृतानां तत्त्वानां नाम (फरमीयम) इति माध्यमेन वैज्ञानिकानां नामोपरि अथवा नगरदेशानां नामोपरि संकेतावबोधितमस्ति। एतेषु पदार्थेषु यस्मिन् अधिकानि तत्त्वानि भवन्ति शक्तिशालिविद्युन्माध्यमेन संयोजनं कृत्याणूनामुत्पत्तिर्भवति। तमेव रासायनिकं तत्त्वं यौगिकं कथ्यते। एतेषामणूनां लक्षणं विशिष्टं भवति। प्रायेण स्थिराः भवन्ति। अद्यतनदैनिकजीवने एकाकीनामपेक्षायां यौगिकतत्त्वान्यधिकतया सामान्यरूपेण मिलन्ति। यथा साधारणलवणं सोडियम (NA) इत्यस्य एकस्य परमाणोः (Cl) क्लोरीन इत्यस्य परमाणोश्च यौगिकमस्ति अस्य सूत्रञ्च NACI इति अस्ति। यौगिकानां संख्या लक्षात्मिका

[१] **वै०सू० ५.२.८-९**

अस्ति। एते च यस्मिन् कार्बोन इत्यस्योपस्थितिर्भवति तत्सदृशाः बहुजटिलाः भवन्ति। प्रायेणेत्थं भवति यत् एतानि यौगिकतत्त्वानि परस्परं मिलित्वा विभिन्नानुपातेषु मिलन्ति। यथा $Fe_2\ O_3\ Fe_3\ O_4$ FeO इत्यादयः सर्वेऽपि लौहसदृशाः यौगिकतत्त्वरूपाः भवन्ति। सूत्रेषु नीचैः लिखितं Subscript इति संख्यायाः अर्थश्चैवमस्ति यत् यौगिके प्रत्येकतत्त्वानां कति परमाणवः सम्मिलिता सन्तीति कृत्वास्मान् बोधयन्ति। उदाहरणाय सोहागायाः रासायनिकं सूत्रं ($Na_2\ B_4\ O_7$) बोधयति यत् तस्मिन् सोडियम इत्यस्य द्वौ परमाणू बोरान इत्यस्य चत्वारः परमाणवः आक्सीजन इत्यस्य सप्तपरमाणवः भवन्तीति तद् दृढतया एकस्मिन्नेवाणौ बन्धिताः सन्ति। कस्यापि तत्त्वस्य यौगिकस्य वा लघुतमं स्थिरं समूह अणुः कथ्यते। ऑक्सीजन हाईड्रोजन इत्युभयोस्तुल्यं केचन वाष्पः (Gas) स्वस्य सामान्यावस्थायां परस्परं सम्मिल्याणूनां निर्माणं कुर्वन्ति। एतेषां द्वौ परमाणू परस्परं मिलित्वा ऑक्सीजन हाईड्रोजन इत्युभयात्मकपरमाणून् निर्मिमीते। यथा ($H_2\ O_2$) ऊष्मोर्जामपरा ऊर्जा च परमाण्विक ऑक्सीजने ग्रहणयोग्यं वायोः हाईड्रोजनमध्ये च खण्डनं कुर्वन्ति। अन्यच्च ये परमाणवः यदा सम्मिलिता भवन्ति तदा युग्मरूपेण स्थितिर्भवति। परन्तु प्रायेण बहुषु तत्त्वेषु धातुजन्यद्रव्याण्यपि परस्परं सम्मिल्य विशेषैकस्मिन् परमाण्विके अणौ स्थातुमिच्छन्ति। हीलियम, निर्यान इत्यादि राजसी वाष्पं परित्यज्यान्येषां सर्वेषां तत्त्वानां प्रवृत्तिर्भवति। यन्माध्यमेन तानि सर्वाण्यपि तत्त्वानि प्रवृत्तानि भवन्ति। येन अन्येषु तत्त्वेषु तानि सम्मिल्य यौगिकानामणूनां निर्माणं सम्भवेत्। सोडियम क्लोरीन सदृशान्यन्यानि कानिचिद् तत्त्वान्यत्यन्तक्रियाशीलानि भवन्ति। परन्तु स्वर्णसदृशान्यन्यानि तत्त्वानि प्रायेण निष्क्रियाणि भवन्ति। अधुना यावत् धातुपदस्यास्माभिर्विवेचनं कृतं तत्पदेन केषां द्रव्याणां संग्रहो भवतीति विचारः क्रियते।

**धातुः कः ?** भौतिकरूपेणायं तत्त्वानां तथाविधानां समूहोऽस्ति यः पारदं परित्यज्य क्रिस्टलीयसंरचनायाः ज्योतिष्मयाः कठिनपदार्थाः भवन्ति। परन्तु सामान्यरूपेण लौहस्वर्णरजतेत्यादिसदृशानि धातुवर्धनसहायकानि Malleable विस्तारयोग्यानि (Dvctile) भवन्ति। एतेषु संयोजकरूपेण इलेक्ट्रान इति पदाभिधेयो भवति, यद्द्वारा यौगिकतत्त्वानां निर्माणाय अधातुवस्तु अपि सरलतया धनं विनापि दातुं शक्यते। रसायनिकरूपेण ते क्रियां कृत्वा क्षारं निर्मिमीते। तद्द्वारा भूगोलमध्ये धनार्जनं भवति। स्वस्याव्यवस्थितानां पुञ्जीभूतानामिलेक्ट्रान् स्वस्वकारणेन ते साधारणतया कुशलविद्युत्संवाहकतया विशिष्टरूपं विद्युत् संवहन्ति। सर्वेषां संकलनं क्रियते चेत् सप्ततिः प्रतिशतं धातवः मिलन्ति।

**किं नाम अधातुत्वम्?** अधातु इत्यनेन एतादृशाः पदार्थाः गृह्यन्ते यत्र प्राकृतिकी ज्योतिर्नभवति। यथा द्रवाद्रवावयवः। अधातुः विद्यदूष्मशक्त्योः संवाहको भवति। तयोर्बाह्यभागेषु इलेक्ट्रान् इत्यादीनां न्यूनता भवति। एतादृशाः पदार्थाः स्वस्य न्यूनतां पूरयितुं सारल्येन इलेक्ट्रानयुक्तधातुभिः सह सुयुक्ताः भवन्ति। रासायनिकरूपेण स्वक्रियां सम्पाद्य अम्लपदार्थस्य निर्माणं कुर्वन्ति। घोलमध्ये ऋणायननाय स्वयं हि निर्माणं भवति। विंशति अधातवः सन्ति मूलरूपेण। येषु दशविशेषवायवः स्थिता भवन्ति। तेषु नव अद्रवपदार्थाः, एकं द्रवं, पदार्थसामान्येनाधातुषु गन्धक-फारफोरस-ऑक्सीजननिर्आन-इत्यादिपदार्थानां संमिश्रणं भवति। अत्रास्मद्द्वारा यजुर्वेदे रसायनविज्ञानस्यानुसन्धानं विहितमस्ति।

विशिष्टं ज्ञानं विज्ञानमिति। तत्त्वानां ज्ञानानाञ्चान्वेषणमस्माकमेषा क्रिया वर्तते। अस्याः नास्ति समाप्तिः। यावन्मात्रं ज्ञानं वयं जानीमहे एतस्मादधिकं ज्ञानमवशिष्टं विद्यते। विज्ञानमस्माकं जीवनस्याभिन्नमङ्गं साम्प्रतं विद्यते। जनेषु जनेष्वस्य प्रसारोऽस्माकं नागरिकतायाः महानुत्तरदायित्वं वर्तते।

**दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः।**

**अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेताः॥**[1]

समिदाधानान्ते ऐशान्यां तिष्ठन् यजमानो ग्रीवायां स्वर्गनिर्मितं रुक्मं फलकाकारमाभरणशेषं बध्नाति। तत्रुक्मं वर्तुलमेकविंशतिपिण्डयुक्तं शणकदलतुल्यं भवति। स्वरूपाद्बहिर्भूताः उन्नतबिन्दवः पिण्डा उच्यन्ते।

विभिन्नसंख्याभिरथवा निर्धारिताभिः मात्राभिः तत्त्वानां मिश्रणेन नवीनपदार्थस्योत्पत्तिस्तद्वत् स्वर्गनिर्मितस्य रुक्मस्य ज्ञानं वर्तते।

**घृतेन सीता मधुना समज्यतां विश्वैर्देवैरनुमता मरुद्भिः।**
**उर्जस्वती पयसा पिन्वमानास्मान्सीते पयसाभ्याववृत्स्वः॥**[2]

वैज्ञानिकभाषायां यदा किञ्चित्तत्त्वमपरतत्त्वरूपेण परिवर्तते तदा तदैतत् परिवर्तनमुत्परिवर्तनं कथ्यते। यथा मधु घृतेन सम्मेलनममृतं रसमुत्पद्यते तदा सा क्रिया बहुलाभकरा भवति। एषा एव रासायनिकी क्रिया। पार्थिवगुणानां गन्धरसरूपस्पर्शानां पाकक्रियाविवेचनप्रसङ्गे आचार्यैः रासायनिकप्रक्रियायाः मूलसंकेतः प्रस्तुतः। तन्मते हि पाको नाम विजातीयस्तेजः संयोगः स च नानाविधो भवितुं शक्यते। गन्धजनको रसजनकः रूपजनकः स्पर्शजनको वा पार्थिवकार्याणामिव तैजससंयोगा अपि बहुविधा भवन्तीति तेः सुष्ठु प्रतिपादितम्। विद्वांसः सौरं तेजोऽपि पाकहेतुं मन्यन्ते। विद्वांसः कथयन्ति यज्जले तेजसंयोगात् विविधानि परिवर्तनानि जायन्ते तत्र च तेषां मध्ये विद्युतो विस्फूजर्थुरेव लिङ्गमिति, अपि चान्येषामपि पार्थिववस्तूनां तेजः संयोगादेव द्रवत्वमाविर्भवति। तच्च जलवत् सांसिद्धिकमपितु नैमित्तिकं भवति।

**संवृत्या जायते सर्वं शाश्वतं नास्ति तेन वै।**
**सद्भावेन ह्यजं सर्वमुच्छेदस्तेन नास्ति वै॥**[3]

---

[1] **शु०य० १२.१**

[2] **शु०य० १२.७०**

[3] **मा०उ० गौ०.का० अलात. प्र. 57**

**वह्नेर्यथा योनिगतस्य मूर्तिर्न दृश्यते नैव च लिङ्गनाशः।**
**स भूय एवेन्धनयोनिगृह्यस्तद्वोभयं वै प्रणवेन देहे॥**[१]

यथा काष्ठस्थितो वह्निर्नहि दृश्यते परञ्च तस्य लिंगरूपत्वं विद्यते। तद्वदग्नेः अग्निलिङ्गस्य च सदृशमेवास्माकं शरीरे विद्यते आत्मतत्त्वम्।

**सोमो राजामृतꣳ सुत ऋजीषेणाजहान् मृत्युम्। ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु॥**[२]

अग्निपिण्डस्योत्पत्तिकाले प्रकृतेः द्रव्यभागस्य कणप्रतिकणभागस्य वा तथा विकिरणभागस्य (ऊर्जाभागस्य वा) मध्ये मन्थनं भवति। ऊर्जाभागस्य द्रव्यभागस्योपरि वर्चस्व आसीत्। विज्ञानस्यास्य सिद्धान्तस्य वर्णनमत्र विद्यते। आधुनिकविज्ञानं सर्वस्य विश्वस्योपादानकारणं पोट्रानमेलेक्ट्रानं तथा न्यूट्रानं मन्यते। परिभाषा विद्यते– प्रोटानतत्त्वमाकर्षकशक्तेः पुञ्जभूतं वर्तते। अस्य विपरीतं एलेक्ट्रानतत्त्वमिति। एतदाकर्षणरूपमस्ति। प्रथमोऽन्यमाकर्षयति तथा द्वितीयमपकर्षणे प्रवृत्तम्। अनयोः द्वयोर्मध्ये प्रथमः घनावेशितः द्वितीयः ऋणावेशितो वर्तते। तृतीये न्यूट्रानतत्त्वे एतल्लक्षणं नास्ति। सर्वस्य विश्वस्य मूले इमे पदार्थाः सन्ति। एषां साहाय्येन निखिलं विश्वं निर्मितं वर्तते। भारतीयदर्शनेषु एतानि तत्त्वानि सत्त्वरजस्तम इति नामभिः प्रसिद्धानि सन्ति। निखिलं जगदेभिः तत्त्वैः सम्मिलितैः निर्मितं वर्तते। भगवान् कपिलः उक्तवान् यत् सत्त्वं प्रीतिरूपम्, अन्यमाकर्षयति। एतद्विपरीतमं रजः अप्रीतिरूपं विद्यते स दूरं भवति। आकर्षणविपरीतं भवति तस्य कार्यम्। तृतीयं तमः विषादरूपं वर्तते। अस्यार्थः तत् न प्रीतिरूपं न च अप्रीतिरूपम्। मूलतत्त्वविशेषेषु इमौ द्वावाधुनिकविज्ञानं भारतीयदर्शनशास्त्रं च कियन्मात्रसरलपरिभाषां स्पष्टयति स्म। यथा एषु

---

[१] **श्वेताश्वतरोपनिषद् १.१३**

[२] **शु०य० १९.७२**

त्रिषु पोट्रान् एलेक्ट्रान् न्यूट्रान् तत्त्वेषूत्पन्नविभिन्नसांख्यायां मात्रायां वा मिश्रितेषु नवीनाः पदार्थाः जायन्ते तद्वदेषां न्यूनाधिक्यगुणैः सम्मिश्रणेन जगदुत्पद्यते। अणुपदार्थस्य व्याख्याादिकाले प्रसिद्धा भारतीयः वैज्ञानिकः महर्षिः कणादमहाभागः तस्य स्वरूपनिरूपणं कृतवान्। ईसातः पूर्वस्यां षष्ठ्यां शताब्द्यां महर्षिः कणादः कल्पनां कृतवान् यत् पदार्थानां निर्माणं सूक्ष्मकणैः कृतमस्ति। एषामत्यधिकविभाजनमसम्भवमित्येनं परमाणुं सूक्ष्माणुं वा कथयन्ति।

पृथिव्या विभिन्नैरायोजितैर्यज्ञैर्धूमराशिरुत्पद्यते स राशिराकाशं गच्छति। तत्रस्थितैः विभिन्नैः सूक्ष्मकणैः सम्मिश्रणेन मेघः जायते, तैः मेघैर्वृष्टिर्भवति। ततः सस्यानि जायन्ते, तेभ्योऽन्नानि भवन्ति, ततः प्राणिनः जीवन्ति। एतदर्थं वयं राष्ट्रे जागृयाम पुरोहिताः स्याम।

**प्र पर्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसि च इयानाः। ता आववृत्रन्नधरागुदक्ता अहिर्बुध्न्यमनु रीयमाणाः। विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसि॥**[१]

प्राचीनकालादेव रासायनिकानां पदार्थरंगधातुप्रभृतीनां विभिन्नेष्वर्थेषु प्रयोगाः बहुशः वेदेषूपलभ्यन्ते। यथा स्वर्णरजतः ताम्रलौहप्रभृतयो धातवः प्रचुररूपेण ओषधिभ्यः प्रयुज्यन्ते। यथा–

**अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे श्यामं च मे लोहं च मे सीसं च मे त्रपु च मे यज्ञेन कल्पन्ताम्॥**[२]

पुरा भारतवर्षस्य धातुकर्माणि बहुविकसितानि आसन् भारतीयधातुकर्मकाराः लौहशस्त्रनिर्माणविधयः जानन्ति स्म। शस्त्रनिर्माणकलायां पारंगता आसन्। तदा स्वर्णरजतप्रभृतिभ्यो धातुभ्यः

---

[१] **शु०य० १०.१९**

[२] **शु०य० १८.१३**

चूर्णरसौषधीनां निर्माणविधिः प्रसिद्ध इति। प्राचीनतमे वैदिकवाङ्मये रसायनसम्बन्धिविविधानि विवरणान्युपलब्धानि सन्ति।

**प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम्।**
**याश्च ते हस्त इषवः परा ता भगवो वप॥**
**विज्यञ्धनुः कपर्दिनो विशल्यो बाणवाँ२॥ उत**
**अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः॥**
**या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः।**
**तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज॥**
**परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः।**
**अथो य इषुधिस्तवारे अस्मन्निधेहि तम्॥**
**अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे।**
**निशीर्य शल्यानां मुखा शिवो नः सुमना भव॥**
**नमस्त आयुधायानातताय धृष्णवे।**
**उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने॥**[१]

अत्र धनुर्ज्या–इषु–हेतिः–इषुधीः प्रभृतीनां लौहनिर्मितान्यस्त्राणि शस्त्राणि च वर्णितानि सन्ति। आधुनिकविज्ञानविधिः बहुकालानन्तरं प्राप्तो वर्तते। बहूनां रासायनिकतत्त्वानामन्वेषणकर्तारो भारतीया विद्वांसः सन्ति। विडम्बना वर्तते यत् पाश्चात्यविद्वांसः सर्वेषां रासायनिकतत्त्वानामन्वेषयितारः सन्ति। ते भारतीयानां विदुषां नामान्यपि कथयितुमसमर्थाः। भारतीयो विद्वान् नागार्जुनः रसायनशास्त्रस्य पूर्णमर्मज्ञः। सः रासायनिकप्रक्रियया पारदधातुतः स्वर्णनिर्माणे कुशलः। वस्त्रनिर्माणविधावपि भारतवर्षः सिद्धहस्त आसीत्। इतः क्षौमनिर्मितानि 'ढाके का मलमल' इति वस्त्राण्यपि विश्वे प्रसिद्धानि सन्ति। एतेषां निर्यातोऽपि विदेशेषु प्रचुरमात्रायामासीत्। विश्लेषणेन ज्ञातो भवति यत् प्राचीने भारते विज्ञानं, वैज्ञानिकपद्धतिः, वैज्ञानिकदृष्टिकोणश्च

---

[१] **शु०य०१६.९-१४**

विलक्षणमासीत्। भारतीयाः विविधाः स्वकलाः साम्प्रतं विस्मरन्ति, विश्वस्य विद्वांसः जानन्ति कथयन्ति च यत् सर्वं वैज्ञानिकतथ्यं पाश्चात्यजगति उपलब्धं वर्तते। वेदप्रभृतिप्राचीनग्रन्थानामध्ययनेन विश्लेषणेन च ज्ञातं भवति यत् वैज्ञानिकरासायनिकविधीनां प्रथमान्वेषणकर्ता प्रयोगकर्ता च भारतवर्ष इति। स्पष्टमेतत् तदा भारतवर्षः वैज्ञानिकरासायनिकज्ञाने च लब्धप्रतिष्ठ आसीत्। यथा –

**नृषदे वेडप्सुषदे वेड्बर्हिषदे वेड्वनसदे वेट् स्वर्विदे वेट्॥**[१]

जठराग्निरूपेण शरीरे वर्तमानाय अग्नये हविर्दत्तम्। वडवाग्निरूपेण जलेषु वर्तमानायाग्नये हविर्दत्तम्। औषधीषु रोगनिवारकायाग्नये हविर्दत्तम्। वनाग्निरूपेण वने वर्तमानायाग्यनये हविर्दत्तम्। अग्नेः पञ्चरूपाणि सन्ति। तेभ्यः मया आहुतयः प्रदीयन्ते।

जगतः सर्वेषां वस्तूनां मध्ये परिवर्तनं दृश्यते। यथा दुग्धे लौहे भोजनवस्तुषु। यदा एषु परिवर्तितेषु वस्तुषु विभिन्नरूपमापद्यते तदा पदार्थानां स्वरूपाणि परिवर्त्य नवीनानि रूपाणि भवन्ति। परिवर्तनेनैषु गुणयुक्तं रूपमापद्यते। परिवर्तनं स्थायि भवति। सरलतया वस्तुषु परिवर्तनं भवितुमशक्यं दृश्यते, एतदेव रसायनविज्ञानं यद्विभिन्नपदार्थानां रचना तथा तेषां गुणानामध्ययनमस्य शास्त्रस्य विषयमिति।

प्रकृतौ परमात्मना प्रदत्ता गतिश्चास्ति। सा गतिः वैज्ञानिकगतिरिति शक्तिश्च विद्यते। गतिरेव आन्दोलिता भूत्वा कार्यरूपे परिवर्तिता भवति। एषः सिद्धान्तः क्रान्तिरिति कथ्यते। कारणं प्रकृतिः कार्यं जगत् तयो मध्ये व्यापकः सम्बन्धः। प्रकृतिः साक्षात् नित्या कार्यं जगत्प्रवाहमपि नित्यं भवति। अस्याशयः परमात्मन इच्छा एव कार्यरूपं जगदुत्पत्तिरिति। यजुर्वेदस्य हिरण्यगर्भसूक्ते पुरुषसूक्ते च दृश्यते।

**हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।**
**स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम्॥**[१]

---

[१] **शु०य० १७.१२**

अन्यच्च–

**ततो विराडजायत विराजो अधि पूरुषः।**
**स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥**[2]

तदा अव्यक्तं जगत् व्यक्तरूपे दृश्यते। परमात्मा जगत् जीवश्च एतानि मूलतत्त्वानि विद्यन्ते। सृष्टारूपः परमात्मा सर्वेषु शास्त्रेषु प्रजापतिः ब्रह्मा पितामह इति नानारूपेण पठ्यते। एतदेव वैज्ञानिकविज्ञानस्य पल्लवनं वर्तमानकालिकभौतिकविज्ञानस्य विभिन्नासु शाखासु पठ्यन्ते। यथा भौतिकविज्ञानं रसायनविज्ञानमित्यादिप्रभृतयश्चेति। प्रजापतेरिच्छया एषु गुणेषु आन्दोलनमजायत। तेषां विभिन्नैरनुपातैः सम्मिश्रणेन सृष्टिरभवत्। ततः पूर्वं महत्तत्त्वमुत्पद्यते सत्त्वप्रधानमहतः सत्त्वगुणप्रधानानां जीवानामुत्पत्तिर्जायते। तेषु सद्गुणाः सन्तोषः निरभिमानः धैर्यमुत्साहः विश्वासश्च जायन्ते। रजसः रजोगुणप्रधानाः मनुष्यप्रभृतयो जीवाः उत्पद्यन्ते। तमसः तमोगुणप्रधानाः पशुपक्षिणः जायन्ते।

**पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः।**
**जुषन्तां यज्ञमद्रुहोऽनमीवा इषो महीः॥**[3]

ओषधीभ्यो मन्थनादुत्पन्नोऽयमग्निः नानाविधैः रोगैः अस्मान् रक्षति। अस्मभ्यं जीवनदानं ददाति। यथा परस्परं द्रोहरहिता स्वस्थाश्च भवेम।

**पर्जन्यो वा अग्निर्गौतम तस्य संम्वत्सर एव समिदभ्राणि धूमो विद्युदर्चिरशनिरङ्गारा ह्रादुनयो विष्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः सोमꣳ राजानं जुह्वति तस्या आहुत्यै वृष्टिः संभवति॥**[4]

---

[1] **शु०य० १३.४**

[2] **शु०य० ३१.५**

[3] **शु०य० १२.५०**

[4] **बृ०आ० ६.२.१०**

तत्त्वानां पारस्परिकसंयोजनेषु तेषां संरचनानां व्यवहाराणां चाध्ययनमेव रसायनविज्ञानमिति। रासायनिकक्षेत्रेभ्य आगतानां महतां व्यवहाराणामुद्देश्यं वर्तते यत् अणोः अपरस्मिन् अणौ सम्मेलनेन परस्मिन्नणौ परिवर्तनमिति। आवश्यकतानुसारं प्लास्टिक-ओषधि-ईन्धनरंगप्रभृतिषु वस्तुषु संमिश्रणेनान्यपदार्थनिर्माणं रसायनमिति। अनेन सर्वेषां खाद्यपदार्थानामनेकशः औषधीनां टेक्नालाजीप्रभृतिकर्मणां च प्रतिदिनं जीवनेष्वागतानामावश्यकासंख्यप्रकाराणां वस्तूनां निर्माणस्याधारः रसायनं वर्तते। प्राकृतिकचमकरहितानि बहूनि तत्त्वानि सन्ति यथा- द्रवठोसगैस इति वर्तते। एतेषां रासायनिकक्रियया बहूनि महत्त्वपूर्णानि वस्तूनि निर्मीयन्ते यानि मानवजीवनेषु महत्त्वपूर्णानि सन्ति। भोजननिर्माणमपि रासायनिकक्रिया वर्तते। यथा ऊष्माभिः रासायनिकक्रियाभिः विकिरणैः क्रियाभिश्च भोजननिर्माणं भवति। एतत् अजैविकभागेषु स्थानेषु स्थापितव्यं यथा हानिकरं मा भवेदिति।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे रसायनविज्ञानम्'** नाम द्वाविंशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

# अथ त्रयोविंशोऽध्यायः

# यजुर्वेदे जीवविज्ञानम्

**स्थावरं विंशतिर्लक्षं जलजं नवलक्षकम्।**
**कौर्मञ्च रौद्रलक्षं स्याद्दशलक्षं तु पक्षिणम्।।**

**किमस्ति जीवशास्त्रस्य विज्ञानम्?** तत्प्रकारकाणां सर्वेषां वस्तूनां विज्ञानमस्ति यानि स्वयमेव चलन्ति, स्वशरीरस्योपचयमपि कर्तुं समर्थाः भवन्ति। एवमेव क्रमिकविकासान्तर्गतागतेन प्रक्रमेण स्वस्य स्वरूपमपि परिवर्तयितुं शक्नोति। तथापि विशेषक्षेत्राणि सन्ति यानि जीवशास्त्रस्य विभागाः कथ्यन्ते। यथा प्राणिशास्त्रं (Zooilogy) वनस्पतिशास्त्रम् (Botany) आकृतिविज्ञानम् (Morphology) इत्यादीनि। प्राणिशास्त्रविभागे जन्तूजातीनामध्ययनं भवति। वनस्पतिशास्त्रे यत्र लघुभूतानां वृक्षाणामध्ययनं भवति। आकृतिविज्ञानं विभागः जीवितवस्तुनः स्वरूपसंरचनया सह सम्बन्धं रक्षति। शरीरक्रियाविज्ञानं (Physiology) शरीरस्य सामान्यक्रियया सह सम्बन्धितं वर्तते। "आत्मनो भोगायतनं शरीरम्" इति लक्षयन्तो आचार्याः चुतुर्विधानां शरीराणां विवेचनं कुर्वन्ति, तत्रापि च पार्थिवशरीराणि योनिजायोनिजभेदेन द्विविधानि प्रतिपादितानि। पुनरपि योनिजानि द्विविधानि जरायुजानि अण्डजानि च, अयोनिजानि चापि स्वेदजोद्भिजभेदेन द्विविधान्येवेति। मानवानां चतुष्पादानां पशूनां च शरीराणि जरायुजानि भवन्ति। पक्षिणां सरीसृपाणां जन्तूनां चाण्डजानि, क्रिमिकीटादीनां शरीराणि स्वेदजानि, तृणगुल्मादीनां चोद्भिज्जानीति। तत्र योनिजशरीराणां वृद्धिप्रक्रिया वस्तुतः परमाणूनां संघटनविघटनयोरेवाश्रिता, यतो हि परमाणुषु पाकेन ऊष्मणा वा शरीरं जायते।

**कौशिकाविज्ञानम्- (Cytology)** यत्र शरीरस्थानां सर्वेषामपि कौशिकानामध्ययनं क्रियते। अनुवांशिकी (Genetics) एतद्वारा पितृसम्बद्धानां लक्षणानां संरचनानामध्ययनं क्रियते। भ्रूणविज्ञानम् (Embryology) एतद्वारा तु अजातभ्रूणरूपात्मकशरीरस्याध्ययनमपरञ्च एतादृशानां बहूनामुपविभागानां संख्या वर्धन्त इति ज्ञायते।

प्रारम्भिकशिक्षणस्य सम्बन्धः (जीवशास्त्रम्) इत्येतच्छब्दान्तर्गतं बहूनि जीवनस्य रूपाण्यागच्छन्ति। परन्तु साम्प्रतमुच्चजीवनशास्त्रं बहुषु क्षेत्रेषु विभाजितमस्ति। **"त्रिंशल्लक्षं पशूनान्तु चतुर्लक्षञ्च वानरान्। ततो मनुष्यता प्राप्तिः ततः कर्माणि साधयेत्॥"** इति श्लोकानुसारेण प्रतीयते यदस्मिन् समये वास्तविकजीवशास्त्राणां सम्बन्धः मनुष्योच्चजातिभिः सह विद्यत इति। सर्वेषु क्षेत्रेषु कार्यकर्तारः नैरन्तर्येण मनुष्योच्चजन्तवः द्रव्यं विनाप्यपेक्षितानि वस्तूनि याचन्ते। वस्तुतस्तु ते रसायनभौतिकस्याधिकाधिकं समीपं गच्छन्तः सन्ति। अत एव जीवशास्त्रिणः यदा यदा अत्यधिकतया प्रक्रमं गच्छन्ति तदा तदा एतादृशानां विज्ञानानामधिकाधिकमावश्यकता भवति।

**मानवशरीरस्य मुख्याः प्रणाल्यः -**

अस्थीनां संरचना अथवा कंकालतन्त्ररक्तसंचरणतन्त्रं श्वासोपकरणपाचनपथतन्त्र- तन्त्रिकाजालप्रजननतन्त्रं बुद्धिश्चेत्यादयः मानवशरीरस्य मुख्याः प्रणाल्यः सन्ति। निश्चयमेव हि एतेषां सूक्ष्मतमानामन्यैस्सह संयोजने एका विस्तृतावस्था जायते। सर्वेऽपि उपायचयनप्रक्रियायां भागं गृह्णन्ति। सर्वेभ्यो यस्मिन् कस्मिन्नपि रूपे बुद्धिर्नियन्तृकर्तुरावश्यकता भवत्येव।

**अस्थितन्त्रस्य सिद्धान्तः -**

अस्थितन्त्रमधिकांशतया कस्यापि यन्त्रस्य विशेषभागोपरि परिवर्तितं भवति। अस्थीनि विभिन्नप्रकारेण लघुतमास्थिसाहाय्येन

परस्परसम्बद्धाः भवन्ति। शुष्काः नाड्यः स्वभारापेक्षायामत्यधिकाः प्रबलाः भवन्ति। तेषामन्तरङ्गे स्थाने मज्जा (Marrow) भवति। यः रक्तजन्यानधिकानवयवान् निर्मिमीते। कपाले (Cranivm) अस्थीनां विशेषाः नूतनाः संरचनाः भवन्ति। याः स्थूलरूपेण गोलाकारे तिष्ठन्ति यतः गोलाकरे स्वाकारं स्वभारं प्रत्यधिकं स्थानं भवति। एताश्च सर्वाधिकाः प्रबलाः भवन्ति। मेरुदण्डेषु केन्द्रीयान् तन्त्रिकाभागान् रक्षयति। शिरोभागं यन्त्ररूपे च साधयति च। अस्थीनि प्रकारैकेण दृश्यते चेत् पाषाणकणसदृशा प्रबलाश्रयाः भवन्ति। यानि दृढप्रबलनमनीयपदार्थजन्यानि भवन्ति।

अस्थिषु "कैल्सियमकार्वोनेट" "कैल्सियमफास्फेट" इति द्वौ पदार्थौ काठिन्यप्रदातारावुपास्थिप्रबलकौ संरचनायाः बाधकावपि भवतः। एतादृशेषु मुख्यतत्त्वेषु यस्य कस्यापि हानिर्भवति चेदस्थीनि निर्बलानि भवन्ति। केवलमस्थीनि शीर्षोपरि एव वृद्धियुक्ताः भवन्ति परन्तु मध्यभागे नैव वर्धते। ते च परिधौ एव विकसन्ति केन्द्रीयच्छेदस्तु अत्यधिको स्थूलो भवति। यदा एतेषु किमपि वृद्धिव्यवस्थायाः प्राक् वर्धने व्यवधानमागच्छति तदा व्यक्तेः वामनत्वं समागच्छति।

**वसातन्त्रम्**- वसाः तथा प्रकारकमेकं विशिष्टं मार्गमस्ति। तच्च संकुचितपदार्थद्वारा स्वशक्तेः प्रयोगं विदधाति। वसा तु रज्ज्वयवसदृशतन्त्वयवसमुदायैः निर्मिता भवति। वशीयशक्तेरुत्पत्तिस्तु "फास्फेटक्रियेटीन" इति नाम्नः रसायनिकपदार्थस्य विखण्डनादागच्छति यस्मिन् संकोचोत्पत्तिर्भवति। संकोचानन्तरं पूर्वावस्थास्थॉक्सीजनमाध्यमेन "ग्लाईकोजन" इत्यस्य खण्डनात् प्राप्तोर्जायाः कारणेन प्रथमक्रियाया उत्क्रमेण प्राप्तं भवति। तत्प्रकारेण फास्फेटक्रियेटीन इत्युभयोः पुनर्निमाणं भवति।

**श्वसनतन्त्रम्** - श्वसनतन्त्रस्य प्रकृतिरस्माकं हृदः एकं युग्मसदृशं तत्त्वमस्ति। तच्च स्वस्थबुद्धिस्थ उरीयजालस्य विकसनेन विकसति। श्वासवेलायां स्वच्छवायुः (ऑक्सीजन) शरीरे गच्छति, स हृदः विशेषस्थाने रक्तेन सह सम्मिश्रितो भवति। तस्मिन्नुपस्थिताः "हिमोग्लोविन" इत्यनेन सह सम्मिल्य एकं यौगिकं निर्मिमीते। इदञ्च तस्मात् धमनिकोशिकाद्वारा शारीरिकं कोशिकापर्यन्तं प्रेषयति। मध्ये समये कार्बनडाईअक्साईडशितमाध्यमेन हिमोग्लोविन कोशिकामाध्यमेन पुनरागच्छन्त्या धारया सम्बन्धं कृत्वा हृत्पर्यन्तं पुनर्गच्छति।

**तन्त्रिकाः** - अनुमष्तिष्कं (Cerebellum) अर्थात् मष्तिकस्य पृष्ठभागात् तन्त्रिकासम्बन्धीया एका रज्जुः मेरुस्तम्भे प्रविश्य तस्य नीचैः भागपर्यन्तं गच्छति। कशेरुकः (Vertebrae) इत्यस्य मध्यभागादतिसूक्ष्माः रज्जवः अवयवैः सह सम्बन्धं कृत्वा शरीरस्य विभिन्नेषु प्रदेशेषु प्रविशन्ति। एताः तन्त्रिका भिन्ना रज्जवः द्विविधा भवन्ति। यथा स्वायत्ततन्त्रिकाः (Autonomic chain) परमीयतन्त्रिका च (peripheral nerves) मष्तिष्कं सम्यक्सन्देशप्रेषणाय बहुप्रकाराणां तन्त्रिकाणामावश्यकता भवति।

**गन्धम्**- नासिकाग्रभागे स्थिताः घ्राणेन्द्रियावयवाः रसनेन्द्रियावयवापेक्षायामुत्तमाः भवन्ति।

**श्रवणेन्द्रियम्**- यदा ध्वनेः कम्पनं लघुतमानामस्थिनां जटिलां व्यवस्थां द्वाभ्यां प्रकाराभ्यां सम्पादयन्ति झिल्लिमाध्यमेन द्रवमाध्यमेन च। यदा द्रवमाध्यमेन परिभ्रमन्ति तदा लघुतमान् लोमान् (रोमान्) चालयन्ति। अनिवार्येण रूपेण श्रवणेन्द्रियस्य संवेदनं सुसंगठितस्पर्शस्य संवेदनं जायते।

**दृष्टिः** चक्षुरिन्द्रियं तु लेन्सयुक्तचित्रग्राहियन्त्रसदृशमस्ति। अस्य पृष्ठभागे तथाविधा जवनिका तिष्ठति यस्यां लेन्स इत्यस्य निर्माणं भवति। इमां

जवनिकां दृष्टिपटल (Retina) इति नाम्ना व्यवह्रियते। अस्यां तथाविधं सामर्थ्यं तिष्ठति यद्द्वारा प्रकाशवेगं परिवर्तनं कृत्वा तन्त्रिकां स्थापयितुं शक्यते। नेत्रं त्वेकमद्भुतं चित्रग्राहियन्त्रसदृशं इन्द्रियमस्ति। अस्याधिकानि छिद्राणि apertvre, f2 इति पदाभिधेयानि वर्तन्ते। इदं केवलं सार्धपलात्प्रागेव स्वदृश्ययोग्यवस्तु अभिलक्षयति। अस्य रङ्गयुक्तं चलचित्रं वारं वारं नूतनरूपेण स्वतः परिवर्तितं भवति।

**प्रजननस्य सिद्धान्तः** - प्रजननस्य कृते एकस्या युग्मजकोशिकाया आवश्यकता भवति, सा zygato इति आंग्लनाम्नापि ज्ञातुं शक्यते। अस्यां कोशिकायां तथाविधानि सर्वाण्यपि तत्त्वान्युपस्थितानि भवन्ति यान्यनन्तरं गत्वा व्यक्तेः निर्माणमपि सम्पादयन्ति। युग्मज इत्यस्य निर्माणं तु गर्भाधानसमये एकाकि मादा–कोशिका (डिम्बकोशिका) एका नरकोशिका च इत्युभयोः कोशिकयोः माध्यमेन शुक्राणु (Spere) माध्यमेन च भवति। एका कोशिका डिम्बकोशिकायाः भित्तौ प्रवेष्टुं शक्नोति। अनन्तरं डिम्बस्य भित्तिरन्यशुक्राणूनां कृते प्रवेशानर्हा भवति। डिम्बशुक्राण्वोः उभयोः प्रत्येकेषु चतुर्विंशतिश्रृङ्खला लघुतमजालसदृशानि तत्त्वानि भवन्ति। तानि तत्त्वानि "क्रोमोजोम" इति नाम्नापि ज्ञातुं शक्यन्ते। यदा द्विपक्षतः एव एतानि तत्त्वानि युग्मजमध्ये सम्मिलितानि भवन्ति तदा एतेषां संख्या अष्टचत्वारिंशत् भवति। एतानि क्रोमोजोम नामाभिधेयानि तत्त्वानि, येषु प्रत्येकस्मिन् सहस्राणि पितृसम्बन्धिवंशाणवः भवन्ति। युग्मजनिर्माणानन्तरं गर्भाशयमध्ये गच्छति अनन्तरं भित्तिना सह सम्बन्धं विदधाति। पुनः झटित्येव एका बहुकोशिकासंरचनायाः प्रारम्भिकदशायां "भ्रूण" अनन्तरं "गर्भ" (Fetvs) इति कथ्यते। भ्रूणविभाजनानन्तरमस्य वृद्ध्यर्थं यदध्ययनं क्रियते तं भ्रूणविज्ञानं कथयन्ति। कोशिकायाः गुणनमारम्भदशायां अत्यधिकेन वेगेन भवति। प्रसवात् प्राङ्मासेषु भ्रूणपदार्थस्य वृद्धिः द्विशतकोटिमात्ररूपेण भवति। प्रसवानन्तरं वयस्कतां यावत् सम्पूर्णा वृद्धिः

काठिन्येन विंशतिप्रतिशतमेव वर्धते। यदि युग्मजः केनापि कारणेन द्वयोः कोशिकयोः विभाजनात् किञ्चित्क्षणात् प्रागेव द्वयोः भागयोः विभजनं भवति तर्हि तदा स एकाकी युग्मजमाध्यमेन व्यवहरति। अपि च स्वस्य सामान्यविभाजने पृथक् पृथग्रूपेण पूर्णव्यक्तीनां निर्माणं करोति। एतादृशाः व्यक्तयः प्रायेण रूपेण युग्मजाः भवन्ति।

**पशुप्रजननसिद्धान्तः**– प्रजननं गोसदृशं वा वृषभसदृशं व्यक्तिं चिनोति यत्र मूल्यवत् लक्षणं स्यात्, यथा अधिकं दुग्धं बलिष्ठता शतायुः इत्यादयः स एव प्रजननं कारयति। यस्मिन् वंशजे तथाविधानि लक्षणानि नोपलभ्यन्ते स प्रजननस्य कृते अयोग्य इति कृत्वा भागग्रहणाय निषिध्यते। एवमेव प्रकारेण अन्ततो गत्वा पशूनां एतादृशा नाडी उत्पाद्यते यस्यामभीष्टानि सर्वाण्यपि लक्षणानि स्युः। कृत्रिमगर्भाधानमाध्यमेन कस्यापि सन्नद्धानि नाड्याः स्वामी स्वीयैः गोभिः सुन्दरं वत्सं प्राप्तुं शक्नोति।

**बुद्धिः (मस्तिष्कः)** – शरीरस्य केन्द्रीयनियन्त्रणयन्त्रस्थाने विचारविवेकभावस्य स्थाने वा मस्तिष्कं परिभाषयितुं शक्यते। मस्तिष्कः मनुष्यशरीरस्य सर्वाधिको विशिष्टः पदार्थोऽस्ति। मस्तिष्कस्य निर्माणं प्रायेण दशार्बुदसंख्यकाभिः कोशिकाभिः क्रियते। ताः कोशिकाः आंग्लभाषायां न्युरोन इति कथ्यन्ते। मस्तिष्कः विशालः अन्येऽपि शारीरिकप्रक्रमादायः अनुमस्तिष्काः cerebeilum अथवा कार्पासजडस्थपृष्ठभागद्वारा पूर्णरूपेण परिरक्षिताः अथवा नियन्त्रिताः भवन्ति। अन्तस्थोऽपि medvllg एकनियन्त्रणमाध्यमेनैव कार्यं कुरुते। अयमपि तस्य समीपे एव स्थितोऽस्ति। अस्य क्षेत्रसम्बद्धानि कार्याणि प्रायः रूपेण मस्तिष्कललाटबुद्धिरित्यादीनां नियन्त्रणे भवन्ति।

**विकासः**– अदृष्टवशात् शरीरस्य आत्मना संयोगो भवति, तदनन्तरं गर्भस्थस्य शिशोः शरीरं मात्राभुक्तस्यान्नस्य परिपाकेन पुष्टं सत्

विकसति। आदिमो विकासः सम्भाव्येन आजीवितरसायनिकयौगिकैः जीवितवस्तूनां शनैः शनैः भवनीया प्रगतिः या अनादिकालादेव प्रचलिता अस्ति, यस्याः फलस्वरूपं अधुना यावत् मनुष्यस्य निर्माणं चलदस्ति। अस्मिन् समये जीववैज्ञानिकस्य शोधस्य प्रचुरप्रमाणेनात्यधिकं विकासो जातः। विकास एतादृशं तथ्यं जातं यस्मात् मुक्तो नैव भवितुं पार्यते। विकासस्य सिद्धान्ताः ईश्वरमप्यङ्गीकुर्वन्ति। ते केवलमेतादृशं दिशानिर्देशं प्रददति सृष्टिनिर्माणकार्यं प्रारम्भिकदशायामेव कृतमासीदिति। यदा तेन ब्रह्माण्डस्यात्युपयुक्तानां पदार्थानां निर्माणं कृतं तदैव तथाविधाः नियमाः अपि निर्मिता जाताः येषामनुसारेण परस्परमुभयोः अन्तःक्रियात्मकं कार्यक्रमं भवति।

**मानवविज्ञानम्** - मनुष्यस्य विकासविज्ञानं तदा एवं प्रचलितं यदा बालकः निराधारो भूत्वापि स्वपादयोः एव सन्नद्धो भूत्वा स्वप्रतिष्ठां स्थापयति। एतादृशो विकासद्वारामनुष्याः वर्तमानयुक्तेः शनैः शनैः पुरातनेषु युगेषु सन्धानं करोति। एतस्य कृते स तथाविधानि पथचिह्नानि उपयुक्तानि यानि केवलमानवद्वारा प्राप्तानि भवन्ति। मानवविज्ञानं जीवनस्य समस्यामादाय एव अध्ययनं विदधाति। परन्तु जीवरसायनजीवविज्ञाने अन्यपथिभ्यः आगत्य स्वसम्बन्धान् स्थापयितुं शक्नुतः। पुरातनसत्यतायाः आधारे तात्कालिकमनुष्याणां संस्कृतिः तेषां गृहव्यवहारभोजनादिकं दृष्ट्वा अनुमीयते जीवनं किमस्ति? इति विषयोपरि अनुसन्धाने यजुर्वेदस्य स्थानं प्रमुखं विद्यते। प्रथमजन्म यद्यपि ऋषिमुनीनां जातमासीत् तथापि वनीयमानवानामादिमानवानां चित्रमधोलिखितं तथैव मानवजातेः विकासस्यापि।

प्रथमप्राणिनः अमीवादारभ्य मानवस्य विकासेतिहासोऽतीव लम्बायमानोऽस्ति। आदिमानवाः प्रायः वने एव निवसन्ति स्म। स्वपालनार्थं स्वनिकटस्थान् पशून् हत्वा बुभुजुः।

**जीवजन्तुपक्षिणश्च** - मानवजातेः जन्मनः प्रागेव जीवजन्तुपक्षिणां जन्म जातमासीत्। जलीयजन्तवः यथा मत्स्य-कच्छप-मण्डूकादयः। वर्तमाने 'जीराफ' इति प्रसिद्धस्य जीवस्य वंशजः, चतुर्दशमासपर्यन्तं स्वमातुर्गर्भे वसनान्तरमेव तस्य जन्म भवति।

**वनस्पतिविज्ञानम्** (botany) - यजुर्वेदे वृक्षवनस्पतीनामपि वर्णनं लभ्यते। तत्र तृण-गुल्मलतादीनां विवेचनं वर्तते। वनस्पतिविज्ञानस्य मूलमान्यतायाः सूक्ष्मसंकेतो यजुर्वेदे लभ्यते यद् वृक्षेषु चैतन्यं जीवन-मरण-स्पप्न-जागरण-रोग-भेषजप्रयोगादिकं प्राणवायोश्च सम्बन्धः, वृद्धिभग्नक्षतसंरोहणञ्चास्तीति। वनस्पतिशास्त्रस्यार्थः अस्ति लघुस्थूलवृक्षाणामध्ययनम्। वैदिककाले महर्षिधन्वन्तरिणा आचार्यचरकेण च वनस्पतिशास्त्रस्याध्ययनद्वारा प्रयोगेण च सम्पूर्णं जगदुपकृतम्। सांसारिकान् रोगानन्वेषयित्वा तेषां निवारणार्थमौषधानां निर्माणमपि कृतम्। एतादृशानामाचार्याणां तपसा एव अद्यावधि यावत् सम्पूर्णेऽस्मिन् जगति भारतवर्षमिदं वनस्पतिशास्त्रे प्रथमस्थाने राराजते। इमां वार्तां विश्वस्यान्ये वैज्ञानिका अपि मनसा कर्मणा वचसा चाङ्गीकुर्वन्ति। वनस्पतिद्वारा निर्मितेभ्य ओषधीभ्यः असाध्यरोगाणामपि समाधानं क्रियते। सत्ययुगे वैदिककाले च ऋषिभिरेकस्य वृक्षस्योपर्यनुसन्धानं विधाय तज्जन्यौषधीद्वारा मनुष्याः चिरञ्जीविनः अपि कृताः। आधुनिकानुसन्धानद्वारा वनस्पतिशास्त्रमिदानीं 'हर्बल' इति आंग्लपदेनापि व्यवह्रियते।

**वनस्पतेः प्रमुखक्षेत्राणि** -

१. पदार्थवर्गीकरणम्- पदार्थवर्गीकरणमध्ये वृक्षाणां लघुतमानां वृक्षाणां च वर्गीकरणं तथा तेषां ज्ञानं क्रियते।

२. पादपाधिकारिकी- अस्मिन् लघुवृक्षाणां संरचनायाः अध्ययनं क्रियते।

३. पादपशरीरम्– आधिकारिकी: एका प्रकृष्टा अवस्था यस्यां विशेषरूपेण वृक्षाणां पूर्णरूपेण विकास: विचारविषय: केन प्रकारेण तेषां रोपणं भवेत् येन तेषां वर्धनं शीघ्रातिशीघ्रतया स्यात्।

४. पादपक्रियाविज्ञानञ्च– अस्यान्तर्गतं वृक्षसम्बन्धिकार्याणामथवा क्रियाणाञ्चाध्ययनं भवति।

५. पादपरोगविज्ञानम्– अस्मिन् पादपरोगविज्ञाने वृक्षसम्बन्धिनां सर्वेषां रोगाणामध्ययनं क्रियते।

६. पुष्पप्रकृतिजगदन्तर्गतं सुसज्जीकरणाय प्रयोगार्हाणां पुष्पसम्बन्धिवृक्षाणामध्ययनं क्रियते।

७. फलविज्ञानम्– अस्मिन् विज्ञाने फलसम्बन्धिनां सर्वेषामपि विषयाणामध्ययनं विधीयते।

८. जीवाणुविज्ञानम्– अस्मिन् विज्ञाने जीवाणुसम्बन्धिविषयाणां सम्यगध्ययनं भवति। यथा मनुष्या: पशवश्च सम्पूर्णेऽस्मिन् जगत्येकीभूयापि स्वावयवाङ्गस्थाकृतिद्वारा भिन्नत्वेन प्रतीयन्ते। तथैव लघुवृक्षाणामपि एते तु स्वीयावयवपत्रपुष्पफलादिभि: भिन्नतया दृश्यन्ते। वृक्षाणि जनानां हिताय वायुं प्रसारयन्ति। विश्वेऽस्मिन् प्रायेण ३४३२२५ त्रिलक्षत्रिचत्वांरिशत्सहस्रपञ्चविंशत्युत्तरशतं प्रकारका वृक्षा: सन्ति। विशेषवैलक्षण्येन तेषां वर्गीकरणं क्रियते।

**जीवाणु**:– एते लघुवृक्षा: "विक्टोरिया" इति पदेन अपि व्यवह्रियन्ते। एते अतिसूक्ष्मा: साधारणभूताश्च भवन्ति। एते सामान्येन एककोशिकीया: भवन्ति। एतेषां लम्बायमानं परिमाणं द्वि इत्यत: आरभ्य पञ्च माइक्रोन पर्यन्तं भवति। एकं माइक्रोन इति १ २५००० इन्चपरिमाणस्य भवति। केषाञ्चिद् वैज्ञानिकानां मतमस्तीति यत् जीवाणु: पृथिव्यामजायत। एतेषां

जीवानामनेका आकृतयः सन्ति यथा गोलाकृतिः दण्डाकृतिः सर्पिलाकृतिः एवं तन्त्वाकृतिरपि। जीवाणूनां विशेषाः जातयः स्वपोषिताः भवन्ति। एतेषां वैशिष्ट्यं यदेते प्रकाशीयोर्जाद्वारा स्वभोजनं संश्लेषयन्ति।

**शैवालवृक्षाः** - अस्मिन् वर्गे एककोशीयलघुवृक्षादारभ्य विशालकोशिकीयवृक्षाः भवन्ति। शैवालवृक्षः जलयुक्तमृत्तिकया सह जलयुक्तस्थले सागरीयस्थले प्राप्यते। प्रायेण विंशतिसहस्रं शैवालवृक्षस्य जातयः भवन्ति। शैवालस्य प्रयोगः बहुषु स्थलेषु भोज्यपदार्थरूपेण बहुषु रसायनिकेषु क्रियते। अनावृत्तबीजवृक्षाः कृषिविज्ञानान्तर्गते आयान्ति। आवृतबीजान् वृक्षान् पुष्पपादप इति नाम्ना व्यवहारः क्रियते। आधुनिकानुसन्धानकर्तृणामनुसारेण तु वृक्षाणां सर्वापेक्षया स्थूलं वशमिति यस्मिन् सार्धद्वादशसहस्रं तथा सार्धद्विलक्षसंख्याकाः जातयः सम्भाविताः सन्ति। एतत्सम्बन्धिनो वृक्षाः विश्वस्य विभिन्नेषु स्थानेषु प्राप्यन्ते। प्रायः एते शीतयुक्तस्थलेषु समुद्रस्य तटवर्तिषु क्षेत्रेषु च दृश्यन्ते।

**अग्नियोसरवनस्पतिः**- अस्मिन् भोजनमावासीया सामग्र्यः वस्त्रौषधादयः पेयपदार्थाः वैतयुक्तपदार्थाः दैनिकजीवने प्रयोगार्हाः पदार्थाश्च प्राप्यन्ते। वृक्षाणां जडं तेषां रूपान्तरणञ्च मुसलाजडम्, अपस्थानिकजडानि, तर्कुरूपजडानि, कुम्भिरूपं जडं, कन्दिलजडानि, ग्रन्थिमयजडानि, दवसनमूलम्, अपस्थानिकजडानां रूपान्तरणं, कन्दगुच्छः, ग्रन्थिकामयः, मणिकायः, बल्ल्याकारस्तम्भमूलावस्तम्भमूलआरोहीणि जडानि कुश्ताजडानि चूपकजडानि वायवीयजडानि पालवीयजडरूपे अस्ति।

**पुष्पविज्ञानम्** एकस्मिन् पुष्पे चतुरधिकप्रकारकाः संरचनाः भवन्ति। एता अस्माभिः पुष्पपत्रमिति नाम्ना व्यवह्रियते। पुष्पेषु चत्वारि चक्राणि भवन्ति परपोषितानि चक्राणि द्विविधावपि भवतः। परजीवी मृतजीवी च। परजीवी यथा- अमरबेलगरुवाँसर्सपादपरैफलेशिया-बाँदा-इत्यादयः। मृतजीवी यथा- सर्वदा दुर्गन्धयुक्तेषु वस्तुषूत्पद्यन्ते। एतेषां जडानि

केनापि वृक्षेण सह सम्बन्धं स्थापयन्ति। मांसाहारिवृक्षाणां प्रायेण चतु:शतजातयः सन्ति। एतादृशाः मांसाहारिणो वृक्षाः प्रायेण कीटाहारिणो भवन्ति। अनेकप्रकारकेषु वृक्षेषु पर्णपातीवनं शंकुधारीवनम्, वर्षावनम्, सन्नद्धाः सन्ति। यस्मिन् वृक्षाणां जीवनं मनुष्यजीवनापेक्षयाधिकं लम्बायमानमस्ति। वैदिककालादारभ्याद्यावधिं यावत् प्राप्तानां वृक्षाणां वैलक्षण्यं भवत्सन्निधावस्ति। एतान् दृष्ट्वा एतत्स्पष्टतया स्फुटति यत् सर्वे वृक्षाः स्ववंशानुसारेण हि स्थूलाकारलघ्वाकारयुक्ताः भवन्ति।

जीवशास्त्रविज्ञानं किम्? तेषां सर्वेषां वस्तूनां क्रमिकज्ञानं विज्ञानं वर्तते। यत् स्वयमेव प्रचलति, स्वयमेव वर्द्धते स्वयमेव प्रजनयति तथा निजक्रमिकविकासेन सह स्वदशां परिवर्तयितुं स्वयमेव समर्थ इति। कानिचिदेव क्षेत्राणि सन्ति यानि जीवशास्त्रस्य विभागान्युच्यन्ते।

**प्राणिशास्त्रम्** - यत्र जीवजन्तूनां क्रमिकाध्ययनं वर्तते तत्प्राणिशास्त्रम् (zoology) इति।।

**वनस्पतिशास्त्रम् (Botany)** यत्र विविधानां गुल्मलताप्रभृतीनां वनस्पतीनां च क्रमबद्धमध्ययनं भवति तदेव वनस्पतिविज्ञानमिति।

**आकृतिविज्ञानम्** - यत्र जीवितानां प्राणिनां रूपैः संरचनाभिश्च सम्बन्धो वर्तते तदेव आकृतिविज्ञानम् (morpnology) इति।

**शरीरक्रियाविज्ञानम्**- यत्र शरीरस्य सामान्यक्रियाभिः सम्बन्धः, तदध्ययनञ्च भवति तदेव सामान्यक्रियाविज्ञानम् (phxsio sogy) इति।

**कोशिकाविज्ञानम्** - यत्र कोशिकानां क्रमिकरूपेणाध्ययनं भवति। तदेव कोशिकाविज्ञानम् (cytology) इति।

**आनुवांशिकीविज्ञानम्** - यत्र पैतृकलक्षणानां संचरणस्य क्रमिकाध्ययनं भवति तदेव (Gemetics) इति।

**भ्रूणविज्ञानम्** - यत्र अजातभ्रूणस्याध्ययनं भवति तदेव (Emlrryology) भ्रूणविज्ञानमिति कथ्यते। अत्र अन्ये बहवः विभागाः वर्तन्ते येषां संख्या प्रतिवर्षं वर्द्धते इति प्रतिभाति।

**प्राणिशास्त्रम्** - आध्यात्मिकज्ञानानामन्यतमाः शेवधिः उपनिषदिति। अस्मिन् वाङ्मयेऽभ्युदयस्य निःश्रेयससिद्धेश्च मार्गः लिखितः वर्तते। तत्र अनयोरत्यधिकसमन्वयः मिलति। ऋषिप्रज्ञायाश्चिन्तनं मानवस्य सम्पूर्णाभ्युदयिकचारित्रिकसांस्कृतिकविकासस्य च केन्द्रमिति। पुरुषः विधातुः सर्वसुन्दरा सर्वोत्तमा सृष्टिश्च विद्यते। अतः गर्भाधानसंस्कारः सन्ततिविज्ञानस्याधारशिला वर्तते। समावर्तनसंस्कारावसरे गुरुरन्तेवासिनमुपदिशति, सः भाविनं गृहस्थजीवनं जीवितुं जीवनकलाः शिक्षयति ''प्रजातन्तु मा व्यवच्छेत्सीः'' वंशपरम्पराया सूत्रं मा त्रोटय इति संदेशंमुपदिशति। प्रजातन्तुनैव वंशपरम्परायाः आतानवितानमिति प्रचलति।

महर्षिः सुश्रुतस्य कथनं वर्तते यत् यथा ऋतुः क्षेत्रम् अम्बु बीज इति, एतेषां चतुर्णां तत्त्वानां संयोगेन सम्मिश्रणेन च अंकुरः उत्पद्यते। तद्वत् स्त्रीपुरुषयोः "ऋतुः क्षेत्रमम्बुवीर्यम्" एतेषां संमेलनेन विधिपूर्वकसंयोगेन च सन्ततेरुत्पत्तिरर्भवति। स्त्रीणां किशोरावस्थायां योनिद्वारेण रक्तस्रावः भवति, एष एव अवस्था ''जीववैज्ञानिकावस्था'' विद्यते। स्त्रीषु रक्तस्रावकाल एव ऋतुकालः कथ्यते। यः गर्भधारणावस्थायाः सूचकः परञ्च गर्भधारणस्य योग्यता प्रथमर्तुकालानन्तरं वर्षद्वयं त्रयं वा व्यतीते सति समागच्छति। स्त्रीपुरुषयोर्मध्ये संयोगः जीवविज्ञानेन सह सांस्कृतिककारणैरपि भवति। अत एव संततिविज्ञाने गर्भाधानं प्रथमं मुख्यस्थानं विद्यते। तत्र स्त्रीषु ऋतुस्रावोऽपि मुख्यं तथ्यं वर्तते। यथा-

**गणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे निधीनां त्वां निधिपतिꣳ हवामहे वसो मम। आहमजानि गर्भधमा त्वमजासि गर्भधम्॥**[१]

**ता उभौ चतुरः पदः संप्रसारयाव स्वर्गे लोके प्रोर्णुवाथां वृषा वाजी रेतोधा रेतो दधातु॥**

**उत्सक्थ्या अवगुदं धेहि समञ्जिं चारया वृषन्।**
**य स्त्रीणां जीवभोजनः॥**

**यकाऽसकौ शकुन्तिकाऽऽहलगिति वञ्चति।**
**आहन्ति गभे पसो निगल्गलीति धारका॥**

**यकोऽसकौ शकुन्तक आहलगिति वञ्चति।**
**विवक्षत इव ते मुखमध्वर्यो मा नस्त्वमभिभाषथाः॥**

**माता च ते पिता च तेऽग्रं वृक्षस्य रोहतः।**
**प्रतिलामीति ते पिता गभे मुष्टिमतꣳ सयत्॥**[२]

यथा प्रकृतौ प्रजननाय ऋतुरनिवार्यः वर्तते तथैव क्षेत्रमपि महत्त्वपूर्णमस्ति। स्त्रीणां ऋतुकालस्य कार्यं वर्तते गर्भाशयं प्रक्षाल्य मलादिदोषाणां दूरीकरणं शुद्धरक्तसंचारमपि इति। आवश्यकमस्ति यत् 'गर्भाशयः' पुरुषद्वारा आधानकृतं बीजं ग्रहणार्थं समर्थो भवेत्, ऋतुकालस्य कार्यं वर्तते स्त्रीणां गर्भाशयस्य शुद्धक्षेत्रीकरणमिति।

एष एव रक्तस्रावः गर्भवतीनां स्त्रीणां स्तनेन दुग्धं निर्मितं करोति। सन्ततिप्रजननक्रियायामनिवार्यवस्तु बीजं वर्तते। अत्र विशेषरूपेणोल्लेखनीयं वस्तु वर्तते यत् रेतसः बीजस्य च निर्मितिः अन्नैर्भवति। 'अन्नैर्वीर्यस्योत्पत्तिः'।

---

[१] शु०य० २३.१९

[२] शु०य० २३.२०-२४

**योषा वा अग्निर्गौतम तस्या उपस्थ एव समिल्लोमानि धूमो योनिरर्चिर्यदन्तः करोति तेऽङ्गारा अभिनन्दा विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुत्यै पुरुषः सम्भवति स जीवति यावज्जीवत्यथ यदा म्रियते।।**[१]

**अथ यामिच्छेद् दधीतेति तस्यामर्थं निष्ठाय मुखेन मुखꣳ संधायापान्याभिप्राण्यादिन्द्रियेण ते रेतसा रेत आदधामीति गर्भिण्येव भवति।।**[२]

**अथास्या ऊरू विहापयति विजिहीथां द्यावापृथिवी इति तस्यामर्थं निष्ठाप्य मुखेन मुखꣳ संधाय त्रिरेनामनुलोमामनुमार्ष्टि विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिꣳशतु। आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते। गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके। गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ।।**[३]

शरीरस्य मूलमन्नमिति। मनुष्यः यदन्नमश्नाति तदेव जलस्य साहाय्येन द्रवीभूततामासाद्य जाठराग्नौ पाचनाय गच्छति। ततः रसरूपेण परिणतो भूत्वा रक्तं भवति। रक्तात्मांसम्। मासाद्मेदः मेदादस्थि ततः अस्थितः मज्जा भवति मज्जातः वीर्यं स्त्रीभिर्भुक्तानि अन्नानि परिणतानि भूत्वा रजोरूपं धत्ते। अन्नमयं शरीरमिति। अतः प्रजननाय ऋतुः क्षेत्रमम्बूनां महती आवश्यकता वर्तते। एषु ऋतुः क्षेत्रमम्बु च, इमानि त्रीणि तत्त्वानि स्त्रिभ्यः सम्बन्धितानि सन्ति। चतुर्थं तत्त्वं वीर्यं पुरुषसम्बन्धितं विद्यते। अतः पुत्रविषये कथनमस्ति यत् माता पूर्वरूपं पिता उत्तररूपञ्च वर्तते। प्रजा सन्धिः प्रजननं सन्धानमिति। गर्भाधानकाले

---

[१] **बृ०आ० ६.२.१३**

[२] **बृ०आ० ६.४.११**

[३] **बृ०आ० ६.४.२१**

पुरुषः समागमाय स्वपत्न्याः समीपं गच्छति। तदा सः इमं मन्त्रं जपन् आधानार्थं मैथुनं करोति।–

**अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे।**
**स त्वमङ्गकषायोऽसि दिग्धविद्धामिव मादयेमाममूं मयीति।।**[१]

पुत्रमन्थकर्मविधानमपि वर्तते। अनेन कर्मणा नानाविधाः पुत्रा जायन्ते। गर्भाधानकाल एव गर्भस्थशिशोर्लिङ्गनिर्धारणं तु भवत्येव। पुंसवनसंस्कारोऽपि अस्मिन् कर्मणि सहायको भवत्येव। संस्कारेण गर्भस्थशिशुः हृष्टः पुष्टः पौरुषयुक्तश्च जायते। गर्भिणी मातापि स्वास्थ्यं लभते। गर्भाधानसंस्कारप्रसङ्गे उल्लेखो मिलति यथा तण्डुलेषु दुग्धं दधि तिलमांसप्रभृतीनां वस्तूनां संमिश्रणेन तण्डुलभोजनैः नानाविधाः पुत्रा जायन्ते। भोजनं गुणात्मकं रसात्मकं च जायते। क्षीरौदनं दध्योदनमुदौदनं तिलोदनं मांसौदनमिति विविधानां भोजनानां निर्देशो वर्तते।

**सन्तानोत्पत्तिविज्ञानम्** –

**एषां वै भूतानां पृथिवी रसः पृथिव्या आपोऽपामोषधय ओषधीनां पुष्पाणि पुष्पाणां फलानि फलानां पुरुषः पुरुषस्य रेतः।।**[२]

**स ह प्रजापतिरीक्षाञ्चक्रे हन्तास्मै प्रतिष्ठां कल्पयानीति स स्त्रियꣳ ससृजे ताꣳ सृष्ट्वाध उपास्त तस्मात् स्त्रियमध उपासीत स एतं प्राञ्चं ग्रावाणमात्मन एव समुदपारयत्तेनैनामभ्यसृजत।।**[३]

**तस्या वेदिरुपस्थो लोमानि बर्हिश्चर्माधिषवणे समिद्धो मध्यतस्तौ मुष्कौ स यावान् ह वै वाजपेयेन यजमानस्य लोको भवति तावानस्य लोको भवति य एवं विद्वानधोपहासं चरत्यासाꣳ**

---

[१] **बृ०आ० ६.४.९**

[२] **बृहदारण्यकोपनिषद् ६.४.१-३**

[३] **बृ०आ० ६.४.२**

**स्त्रीणाᳫं सुकृतं वृङ्क्तेऽथ य इदमविद्वानधोपहासं चरत्यास्य स्त्रियः सुकृतं वृञ्जते॥**[१]

**वाञ्छितपुत्रोत्पत्तिः -**

**स य इच्छेत् पुत्रो मे शुक्लो जायेत वेदमनुब्रुवीत सर्वमायुरियादिति क्षीरौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै॥**[२]

अर्थात् - य इच्छेत् मम पुत्रः शुक्लवर्णः शतायुषः वेदज्ञः जायेत तदा जायापती गर्भाधानकाले घृतमिश्रितं क्षीरोदनमश्नीयाताम्।

**अथ य इच्छेत् पुत्रो मे कपिलः पिङ्गलो जायेत द्वौ वेदावनुब्रुवीत सर्वमायुरियादिति दध्योदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै॥**[३]

य इच्छेत् मम पुत्रः कपिलः पिङ्गलवर्णो वा शतायुर्वेदज्ञाता च जायेत। तदा जायापती घृतमिश्रितं दध्योदनं गर्भाधानकालेऽश्नीयाताम् इति।

**अथ य इच्छेत् पुत्रो मे श्यामो लोहिताक्षो जायेत त्रीन् वेदाननुब्रुवीत सर्वमायुरियादित्युदौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै॥**[४]

य इच्छेत् मम पुत्रः श्यामवर्णः अरुणनयनः वेदानां ज्ञाता विद्वान् जायेत। तदा जायापती गर्भाधानकाले घृतमिश्रितमोदनमश्नीयाताम्॥

**अथ य इच्छेद् दुहिता मे पण्डिता जायेत सर्वमायुरियादिति तिलौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै॥**[१]

---

[१] **बृहदारण्यकोपनिषद् ६.४.३**

[२] **बृहदारण्यकोपनिषद् ६.४.१४**

[३] **बृहदारण्यकोपनिषद् ६.४.१५**

[४] **बृहदारण्यकोपनिषद् ६.४.१६**

विदुषीं शतायुषीं कन्यां प्राप्तुं जायापती घृतमिश्रितमोदनं गर्भाधानकालेऽश्नीयाताम्।

**अथ य इच्छेत् पुत्रो मे पण्डितो विगीतः समितिंगमः शुश्रूषितां वाचं भाषिता जायेत सर्वान् वेदाननुब्रुवीत सर्वमायुरियादिति माꣳसौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवा औक्षेण वार्षभेण वा।।**[2]

यः कामयेत् मम पुत्रः प्रख्यातपण्डितः सभायां गच्छतीति प्रगल्भ इत्यर्थः। श्रवणसुखदाता वेदानां ज्ञाता शतायुश्च जायेत, तदा जायापती औषधीनां रसमिश्रितं घृतमिश्रितं च ओदनमश्नीयाताम्।। संस्कारानन्तरं जायापती कामनानुसारं भोजनं अश्नीयाताम्। शयनकाले मन्त्रं पठन् गर्भाधानं कुर्यात्।। यथा–

**अथैनामभिपद्यतेऽमोऽहमस्मि सा त्वꣳ सा त्वमस्यमोऽहं सामाहमस्मि ऋक् त्वं द्यौरहं पृथिवी त्वं तावेहि सꣳ रभावहै सह रेतो दधावहै पुꣳसे पुत्राय वित्तय इति।।**[3] अनेन विधिना पुत्रं प्राप्नुयात्।।

**वनस्पतिविज्ञानम्** –

भारतीयानां महर्षिणां महर्षयः वनस्पतयः प्राणवन्तः सजीवाश्च सन्ति इति तेषां मतमस्ति। तासु चैतन्यं मानववत् दृश्यते। अतः तासु देवत्वमाधानं ते कृतवन्तः। वनस्पतीनामुपचारकर्मणि प्रयोगत्वात् चिकित्सकाः यत्र तत्र सर्वत्र च ताः अन्वेषयन्ति। देववत् तासां पूजनमपि दृश्यते।

---

[1] **बृहदारण्यकोपनिषद् ६.४.१७**

[2] **बृ०आ०उ० ६.४.१८**

[3] **बृहदारण्यकोपनिषद् ६.४.२०**

**शतं वो अम्ब धामानि सहस्रमुत वो रुहः।**
**अधा शतक्रत्वो यूयमिमं मे अगदं कृत॥**

**ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः।**
**अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः॥**

**ओषधीरिति मातरस्तद्वो देवीरुपब्रुवे।**
**सनेयमश्वं गां वास आत्मानं तव पूरुषः॥**[1]

औषधीनां जातिभेदा बहवः सन्ति। अङ्कुराः सहस्रप्रकारकाः सन्ति। अत एव ता अस्माननेकशः रोगेभ्यः मुञ्चन्ति। यूताः पुष्पवत्यः फलवत्यश्च भवन्ति। अतः युष्माकं फलैः पुष्पैश्च वयं सततं तृप्तिं लभामहे। यथा संग्रामेषु अश्वा विजयशीला सन्ति। सारथिनो विजयं प्राप्तुं सततमुत्सुका वर्तन्ते। तद्वदोषधयः विविधरोगेभ्यः प्राणिनः रक्षन्ति। सततं व्याधितः ओषधयः जनान् परिपालयन्ति। ओषधीनां कृपया पुरुषा शतायुषः भवन्ति।

**अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता।**
**गोभाज इत्किलासथ यत्सनवथ पूरुषम्॥**

**यत्रौषधीः समग्मत राजानः समिताविव।**
**विप्रः स उच्यते भिषग्रक्षोहामीवचातनः॥**

**अश्वावतीᳬं सोमावतीमूर्जयन्तीमुदोजसम्।**
**आवित्सि सर्वा ओषधीरस्मा अरिष्टतातये॥**

**उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते।**
**धनᳬं सनिष्यन्तीनामात्मानं तव पूरुष॥**[2]

---

[1] शु०य० १२.७६-७८

[2] शु०सं० १२.७९-८२

वृक्षाणामोषधीपरकं महत्त्वं सिध्यति। वैदिकसाहित्ये वनस्पतिः औषधिश्च वृक्षाणां गणनया द्विविधत्वमपि प्रतिबिम्बितम्। ओषधीप्रमुखतः वृक्षगुल्म-औषधि-लताः इत्यादयः। बह्वः पुष्पिताः फलवत्यश्च, बह्वः अपुष्पिता अफलवत्यश्च सन्ति। वनस्पतीनां राजा सोमः सर्वविधपापेभ्यः मोक्षदः स्यात्। मानवजीवस्याधाराः वृक्षाः लताश्च सन्ति। पर्यावरणस्य संतुलनार्थं नियमितरूपेण वृष्ट्यर्थम्, जलवायुनियमनार्थं भूमिक्षरणनिवारणार्थं च वृक्षाणां संरक्षणं महत्त्वपूर्णमस्ति। वृक्षाः लताश्च प्रकृतिकसमाहारस्य कोषरूपे रक्षणीयाः सन्ति। मनुष्याणां वृक्षैः सह भावनात्मकसम्बन्धो वर्तते। अतः वृक्षाणां पीडनं नाशश्च पापरूपो मन्यते। वैज्ञानिकाः पुरुषाः "वृक्षेषु चेतनत्वं संवेदनञ्च विद्यते" इति निष्पादितवन्तः। चेतनत्वं तु अनुसन्धानेनैव स्वीकृतम्। प्रतिकूलपरिस्थितिषु तैः चिन्ताशोकभयपीडादय अनुभूयन्ते। अनुकूलपरिस्थितिषु वृक्षा अपि प्रसन्नाः हर्षिताः आह्लादिताश्च भवन्ति।

वृक्षाः जनेभ्यः फलानि पुष्पाणि छाया इन्धनानि च ददति। वृक्षच्छेदनमपराधमेव जनाः मन्यन्ते। धार्मिकस्थलेषु विद्यालयेषु वनेषु आरोपितानां वृक्षाणां छेदनं कर्तनं वा महापापं विद्यते। वृक्षेभ्यः यथाऽऽवश्यकमेव फलं पुष्पमिन्धनं च ग्रहणीयम्। वृक्षच्छेदनं तु महापराधो विद्यते। वृक्षा इह लोके परलोके च रक्षकाः सन्ति। तेषां संवर्धनं परिपालनं रक्षणं पुत्रवदेव कर्तव्यम्।

**यदिमा वाजयन्नहमोषधीर्हस्त आदधे।**
**आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा।।**
**यस्यौषधीः प्रसर्पथाङ्गमङ्गं परुष्परुः।।**
**ततो यक्ष्मं विबाधध्व उग्रो मध्यमशीरिव।।**

**मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत।**
**अथो यमस्य पड्वीशात्सर्वस्माद्देवकिल्बिषात्॥**[1]

बृहत्संहितायां बीजवपनस्य विशिष्टविधिः, कालः, भूसंस्कारः, सद्यः संवर्द्धनोपायः, विशिष्टोऽस्य फलप्राप्तिविधिः वृक्षारोपणविधिः वृक्षचिकित्सा वनस्पतिक्रिया विज्ञानं धान्यानां वृद्धिनिष्पत्तिविज्ञानं वृक्षाणां शुभाशुभलक्षणं सविस्तरं च विवेचिताः सन्ति। वनस्पतीनां संवर्द्धनस्य उर्वराभूमेः आवश्यकता वर्तते।

विद्वांसः कथयन्ति यदा कार्बनडायआक्साइडस्य मात्रायां वृद्धिर्भवति तदा वायुः प्रदूषणमासाद्य पर्यावरणं दूषयति। वनस्पतयः वृक्षाः लताप्रभृतय ओषधयश्च कार्बनडायआक्साइडं प्रगृह्य प्राणिभ्यः आक्सीजनप्रभृतिनिर्मलं वातावरणं प्रकटयन्ति। पर्यावरणशुद्धीकरणव्यवस्थायां वनस्पतीनां महद्योगदानं वर्तते। शकुन्तलायाः पतिगृहगमनकाले यादृशस्नेहः वनस्पतिभ्यः कालिदासेन प्रकटितः स श्लाघनीय इति।

**पातुं न प्रथमं व्यवस्यति जलं युष्माष्वपीतेषु या**
**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।**
**आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः**
**सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥**[2]

प्रशंसनीयोऽयं वनस्पतिस्नेहः। पर्यावरणसंरक्षणाय पालनीयश्च। फलवत्यः पुष्पवत्यः अपुष्पवत्यः अफलवत्यः सर्वाः ओषधयः पापात् नानाविधरोगाच्च रक्षन्ति। यथा-

---

[1] **शु०सं० १२.८५-२६, ९०**

[2] **अभिज्ञानशाकुन्तलम् ४.९**

**याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः।**
**बृहस्पतिप्रसूतास्ता नो मुञ्चत्वꣳहसः॥**[१]

सर्वा ओषधयोऽस्माकं जीवनेषु सततं मंगलकारिण्यः आयुःप्रदात्र्यश्च सन्ति॥ शुभम्॥

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे जीवविज्ञानम्'** नाम त्रयोविंशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

[१] **शु०य० १२.८९**

# अथ चतुर्विंशोऽध्यायः
# यजुर्वेदे आयुर्विज्ञानम्

रोगेभ्यः स्वजीवनरक्षणं रोगनिवृत्तिः आयुर्दीर्घीकरणमेव आयुर्वेदविज्ञानं कथ्यते। सृष्टेरारम्भादेव रोगाणां निर्वृतिर्यथा भवेत्, एतदर्थमुपायाः प्रचलन्तः सन्ति। अन्येषां विद्यानामिव आयुर्वेदविज्ञानस्यापि प्रमुखं प्रथमं द्वारं वेद एवास्ति। यजुर्वेदे आयुःप्रकरणमादाय बहुषु स्थलेषु चर्चा दृश्यते। दीर्घायुः इत्यस्य प्राप्त्यर्थं मन्त्रद्रष्टारः ऋषयः उपदिशन्ति प्रयत्नप्रार्थनाभ्यामायुर्दीर्घीकरणं भवतीत्युक्त्वा यजुर्वेदे बहुषु स्थलेषु प्राप्यत एव। यथा–

**ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतञ्जीवेम शरदः शतꣳशृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्।**[1]

**कुर्वन्नेवेह कर्माणि जीजीविषेच्छतꣳ समाः।**[2]

यजुर्वेदे प्रामुख्येन यक्ष्मादिरोगाणां चर्चा कृतास्ति। रोगाणां कारणत्रयं वेदेषु दृश्यते। यथा –

**प्रथमम्**– शरीरे शनैः शनैः संचितं भवति, विषयस्य मात्राधिक्ये शरीरे विकारो जायते। **द्वितीयम्**– द्वितीयं कारणं तु कृमिः एवं जीवाणुपुञ्जं स्वीकृतम्। एते जीवाणवोऽदृश्यरूपेण स्थिता भवन्ति। एतेषां स्थितिः शरीरस्य कृते कष्टकरा भवति।

---

[1] **यजुर्वेदसंहिता ३६.२४**

[2] **यजुर्वेदसंहिता ४०.२**

**तृतीयम्** - तृतीयं कारणं तु त्रिदोषमङ्गीकृतवान्। शरीरे रक्तसंचारस्य तथा च धमनि पदाभिधानां शिराणां शुद्धाशुद्धरक्तप्रवाहादिविषयाणां वर्णनमस्ति। अश्विनीकुमारद्वारा कृतशल्यादिचिकित्साद्वारा जातस्य चमत्कारस्यापि वर्णनमस्ति। अश्विनौ वै देवानां भिषजौ अश्विनीकुमारौ देवतानां वैद्यौ स्तः। केषाञ्चिद् ओषधीनामपि वर्णनं यत्र तत्र वेदे समुपलभ्यत एव। विषप्रकरणे स्थावरजङ्गमभेदेन विषस्य द्विविधत्वस्यापि वर्णनमुपलभ्यते। यथा सर्पे जङ्गमविषः तथैव जलचरस्थलचरवृश्चिकादिकीटेष्वपि। स्थावरविषस्तु कन्द एवं ओषधीषु प्राप्यते। तथैव पृथिवीभ्य एवं गोभ्यो अपि उत्पद्यते। वेदेषु रोगाणां निवारणं यथा स्यात् एतदर्थमग्निवायुजलसूर्यविद्यादीनामोषधरूपेण वर्णनं विहितम्। भिन्नभिन्नरोगाणां कृते प्रभावकारिणां वनस्पतीनां प्रयोगः प्राप्यते। यथा- अजशृङ्गी, अपामार्गः, अरुन्धन्ती, कुष्ठकेशदृंहणी, क्लीवकरणी, तलाशा, तौविलिका, पाटा, दशवृक्षम्, पिप्पली, सहस्रचक्षुः, पृश्निपर्णी, रोहिणी, लाक्षा, सहस्रपर्णी, सोमलता इत्यादयः। शरीरे वनस्पतिसम्बन्धिमणिधारणविधानस्यापि वर्णनं प्राप्यते। वनस्पतिजन्याः मणयः रोगनाशकाः, शत्रुनाशकाः, बलबुद्धिवर्धकाश्च भवन्तीति कृत्वा स्वीकृतमस्ति। वेदार्थस्य शैल्याऽचेतनमपि चेतनवत् सम्बोधयति। **चेतनावद्वद्धि स्तुतयो भवन्ति।**[१] मन्त्रद्रष्टारः ऋषयः वनस्पतिषु जडत्वमस्तीति ज्ञात्वाऽपि चेतनाश्रयवद् व्याख्यान्ति।

यजुर्वेदे शरीरस्य रोगाश्रयत्वं विषकृमिवातपित्तकफादिभिः स्वीकृतम्। अन्नजलदुग्धपदार्थेषु प्रवेशं कृत्वा यदा जीवाणवः शरीरमध्ये गच्छन्ति तदा ते शरीरं रोगयुक्तं कुर्वन्ति। यकृत्, क्लोमः तथा गवीनिकायाः वायव्यपदार्थेभ्यः चिकित्सां सम्पादयन् वरुणः पित्तं मिनाति, पित्तं सृजति इत्यर्थः[२] इति। अनेन मन्त्रेण एतदपि सिद्धं भवति

---

[१] **निरुक्तम् दै०का० ७ पृ.३३९**

[२] **यजुर्वेदः १९.८५**

यत् पित्तशान्त्यर्थं वेदः वायव्यद्रव्याणां प्रयोगकृते निर्दिशति। प्राणापानसमानव्यानोदान इत्यादिभेदेन पञ्चवातानां वर्णनमपि कृतमस्ति। यथा – **देवान् प्राणाय त्वोदाय त्वा व्यानाय त्वा**[१]। वैद्यस्य व्यवसाये सदाचारः परमावश्यकोऽस्ति। सदाचारेण भिषजः आत्मा उन्नतो भवति। तथैव रोगी अपि सदाचारेण प्रसन्न एवं स्वस्थो भवति। सद्वृत्तपूर्वकं मन्त्राणां जपनेनापि रोगी सदा रोगान्मुक्तो भवति। यजुर्वेदस्य काश्चनसूक्तयः द्रष्टव्याः सन्ति यथा– **ॐ क्रतोस्मर**[२]**, अग्नेनय सुपथा**[३]**, जगदयक्ष्मं सुमना असत्**[४]**, युयोध्यस्मज्जुहुराणमेनो**[५]**, दुरितानि परासुवः**[६]**, आयुर्यज्ञेन कल्पताम्**[७]**, तन्मे मनः शिवसंकल्पमस्तु**[८]**, मा गृधः कस्यस्विद्धनम्**[९]**, तेन त्यक्तेन भुञ्जीथाः**[१०]**, भूत्यै जागरणं अभूत्यै स्वप्नम्**[११]**, मृत्योर्मा अमृतं गमय**[१२]**, यस्यच्छायामृतम्**[१३]**, व्रतेन दीक्षामाप्नोति**[१४]**, श्रद्धया**

---

[१] **यजुर्वेदः १.२०**
[२] **यजुर्वेदः ४०.१५**
[३] **यजुर्वेदः ४०.१६**
[४] **यजुर्वेदः १६.४**
[५] **यजुर्वेदः ४०.१६**
[६] **यजुर्वेदः ३०.३**
[७] **यजुर्वेदः ९.२१**
[८] **यजुर्वेदः ३.१**
[९] **यजुर्वेदः ४०.१**
[१०] **यजुर्वेदः ४०.१**
[११] **यजुर्वेदः ३०.१७**
[१२] **श०ब्रा० १४.३.१.३०**
[१३] **यजुर्वेदः २५.१३**
[१४] **यजुर्वेदः १९.३०**

**सत्यमाप्यते**[१]**, स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव।**[२]

**भिषक्**– यजुर्वेदे वैद्यस्य कृते वैद्यस्थाने भिषक् इत्येतच्छब्दस्यैव प्रयोगः विहितोऽस्ति। भिषगिति चिकित्सिते इति भिषक्। अर्थात् यः रोगस्य प्रतिकारं करोति सः एव भिषक्। यजुर्वेदस्य श्रुतिः कथयति पवित्रतायाः कृते वैद्यस्य नियुक्तिः कृतास्ति। यथा पवित्राय भिषजमित्यादिभिः[३] एतेनेदं स्पष्टरूपेण आयाति यत् भिषजः व्यवसायः परमपवित्रोऽस्तीति। यजुर्वेदे सर्वतो महान् वैद्यरूपेण परमात्मा स्वीकृतः। यथा– **अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्**[४] इत्यादिभिः। यजुर्वेदे दैवमानुषभेदेन द्विविधौ भिषजौ आयातः। दैवभिषजः यथा– **अग्निरुद्रवरुणेन्द्राश्विनीकुमारमरुदित्यादयः**[५] मन्त्रेऽप्युक्तम्– **वरुणं भिषजां पतिम्**[६]**, वरुणो भिषक्।**[७]

**अश्विनौ**– अश्विना तेजसा चक्षुः प्राणेन सरस्वती वीर्यम्। व्वाचेन्द्रो बले नेन्द्राय दधुरिन्द्रियम्।।[८] अश्विनौ देवानां भिषजौ।[९] इन्द्रः– अथ यः स इन्द्रोऽसौ स आदित्यः।[१०] इन्द्रं देवभिषजम्।[११] देवतानां होतृभिः तत्सदृशमृदुप्रयाजदेवतानां सत्यस्वरूपदेवतानां वैद्यअश्विनीकुमारसरस्वत्योः

---

[१] **यजुर्वेदः १९.३०**

[२] **तै०आ० ७.९.११**

[३] **यजुर्वेदः ३०.१०**

[४] **यजुर्वेदः १६.५**

[५] **यजुर्वेदः ३४.२८–३०**

[६] **यजुर्वेदः २१.४०**

[७] **यजुर्वेदः २१.५८**

[८] **यजुर्वेदः २०.८०**

[९] **ऐतरेयब्राह्मणम् १.८**

[१०] **शतपथब्राह्मणम् ८.५.३.२**

[११] **शुक्लयजुर्वेदः २८.९**

निमित्ताय यजनं चकार। अनेन याजेन बाल्यावस्थावती अश्वा वत्ससहिता गौश्च चिकित्सकस्य कार्यं कुरुते। इन्द्रस्य निमित्तमश्वादिदक्षिणायमेते देवाः भिषजं पूर्णयन्ति। यजुर्वेदस्य एकविंशत्यध्यायस्य ऊनविंशन्मन्त्रादारभ्य चत्वारिंशन्मन्त्रं यावत् द्वादशमन्त्राः "प्रैष" इति। अस्मिन् प्रैषे अनेकेषां तेजःप्रदातृणामोषधीनां प्रयोगाय कृते निर्देशो विद्यते। अश्विनीकुमारौ सरस्वती इन्द्रदेवताभ्यां पूजिता भूत्वा जलस्य सारभूतं महौषधिभ्यः निष्कासितं सोमरसं घृतं मधु च पिबतः। अग्निवरुणेन्द्ररुद्राश्विनीसरस्वत्यः सप्त दैवभिषजः सन्ति। एते च प्रकृतेरशुद्धतां नाशयित्वा संसारमखिलं पवित्रं स्वास्थ्यसम्पन्नमपि कारयन्ति। एतेषां दैवभिषजां वर्णनं यजुर्वेदे बहुषु प्रसङ्गेषु प्राप्यते।

**कृमिः**- उच्छिष्टेषु स्थाल्यादिषु बहव एतादृशाः जीवाणवः तिष्ठन्ति ये शरीरे प्रविश्य शरीरे रोगमुत्पादयन्ति तेषां प्रक्षेपणमतिदूरे कर्तव्यम्। यथा-

**येन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्।**
**तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥**[1]

अन्यप्रकारकाः कृमयः ये जलौषधिपर्वतवनेषु तिष्ठन्ति। तथैव उदरवेष्टादिकृमयः मनुष्यपशुशरीरस्य मध्ये उत्पन्नाः भवन्ति। मलमूत्रादिजन्याः कृमयः ये स्वस्य विषस्थापनेन रोगानुत्पादयन्ति। ईदृशानां दृष्टादृष्टकृमीणां वर्णनं यजुर्वेदे प्राप्यते। तेषां गुणदोषकर्मद्वारा अनेकानि नामानि सन्ति। यजुर्वेदे राक्षसपिशाचयातुधानकिमिदिगन्धर्वाप्सरा इत्यादिपदानां साधारणतयैव प्रयोगः कृतः।

**कृमिचिकित्सा** - यजुर्वेदे कृमिचिकित्सासम्बन्धिवर्णनमपि बहुषु स्थलेषु प्राप्यते। दृष्टादृष्टकृमयः येऽनेकप्रकारकानुपद्रवानुत्पादयन्ति। तान् सूर्याग्निजलमरुन्मेघविद्युदजशृङ्गी-अपामार्ग-आञ्जन-औक्षगन्धी-कार्ष्मर्यकुष्ठ-गुग्गुलुनलदीपीतपृश्निपर्णीप्रतिसरप्रमन्दिनीशतावरशंखसर्षपसह

---

[1] **शुक्लयजुर्वेदः १६.६२**

स्नचक्षु:सीसकादिपदार्थाः दूरयन्ति। यथा- आपो वै रक्षोघ्नीः[१], इन्द्रः तत् (रक्षः) सीसेनावजघान[२], यदपामार्गहोमो भवति रक्षसामपहत्यै[३] एतं रक्षोहणं वनस्पतिमपश्यं काष्मर्य्यम्[४], कृमिचिकित्साप्रकरणे यातुधानः राक्षसः अत्री किमोदी इत्यादीनि पदानि कृमि इत्यस्य कृते प्रयोगभूतानि सन्ति।

**प्रत्युष्टꣳरक्षः प्रत्युष्टा अरातयो निष्टप्तꣳरक्षो निष्टप्ता अरातयः। उर्वन्तरिक्षमन्वेमि॥**[५]

एते राक्षसाः यातुधान इत्यादयः पदार्थाः तत्प्रकारकाणां दृष्टपुरुषाणां कृते अपि प्रयोगभूताः सन्ति। येषां जीवने केवलं परेषां हानिरित्यादीनि कुकर्माणि एव प्राप्यन्ते।

**ज्वराधिकारः**- यजुर्वेदे ज्वरस्य कृते ''तक्मा'' इति पदं प्रयुक्तमस्ति। 'तकि कृच्छजीवने' इत्यस्माद् धातोः "तक्मा" इति पदं निर्मितमस्ति यस्यार्थोऽस्ति जीवनस्य कष्टप्रदाता। शकलानां समूहः शाकल्यम्, शकल्यमिच्छतीति शकल्येट् (आमाशयाग्निः) तस्मिन् शकल्येषि। ज्वरस्तु रुद्रकोपाग्नितः उत्पन्नो भूत्वा सर्वान् प्राणिनः तापयति। **रुद्रकोपाग्निसम्भूतः सर्वभूतप्रतापनः**[६] तथैव चरकसंहितायाः प्रथमाध्याये ज्वरः महेश्वरस्य कोपाज्जायते इत्युक्तमस्ति। **ज्वरस्तु खलु महेश्वरकोपप्रभवः**[७], **यः रुद्रोऽस्ति सैवाग्निरिति**[८] रुद्रपशुपत्युग्रा-

---

[१] **तैत्तिरीयसंहिता ३.२.३.१२**

[२] **शतपथब्राह्मणम् ५.४.१.१०**

[३] **तैत्तिरीयब्राह्मणम् १.७.१.८**

[४] **शतपथब्राह्मणम् २.४.१.७**

[५] **शुक्लयजुर्वेदः १.७**

[६] **सुश्रुत् २०.२९.७**

[७] **चरकसंहिता अ० १**

[८] **शतपथब्राह्मणम् ५.२.४.३**

शनिभवमहादेवाः एतानि एव ''अग्निरूपाणि'' पूर्वोक्ताशनिभवसर्व इत्यादीनि सर्वाण्यपि अग्नेरेव रूपाणीति, एतेभ्यः वेदवाक्येभ्यः स्पष्टं भवति यत् रुद्रकोपाग्निरेवं महेश्वरकोपः जठराग्नेः विकृतयः सन्तीति। विश्वशरदोमलेरियाज्वरादयोऽतिभयङ्करा इति अङ्गीकृतम्। शरीरेऽस्य उदयमात्रेण कम्पनं भवति। ज्वरावस्थायां देहस्याग्निवज्ज्वलनं भवति। एवमेव रोगी उन्मत्त इव धावति, इतिविषयकवर्णनमपि मिलति। एतानतिरिच्य शरीरस्यान्तरिकबाह्यगतिषु शिथिलता एवं शिरोवेदना इत्यादयः उपद्रवाः अपि वर्णिताः सन्ति।

**ज्वरौषधम्** – अशरीकविशरीककफपुष्टीत्यादिरोगाणां शरदर्तौ प्रकुपितभविष्यविश्वशारदमलेरियाज्वरस्य च 'जंगीड''' इति नामकं औषधं निवारणं करोति। कुष्ठनामाख्यौषधिविशेषस्य नामान्तरं तद्भवति, तक्मानाशनमस्ति। अञ्जननामकौषधविशेषस्य प्रयोगेण ज्वरकफदाहादीनां नाशो भवति। यजुर्वेदे उक्तमस्ति यत् हे ओषधयः! गन्धर्वेण तव अनुसन्धानं कृतम्। बृहस्पतीन्द्राभ्यां तथैव सोमराज्ञापि तव सामर्थ्यस्यानुसन्धानं कृतं, युष्माकं प्रयोगेणैव यक्ष्मारोगेभ्यः मुक्तो जातः। युष्माकं गुणवेत्तारः तव प्रयोगेणानेकेभ्यः रोगेभ्यः मुक्ताः जाताः। यथोक्तम् –

**त्वां गन्धर्वा अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः।**
**त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्यत॥**[१]

**राजयक्ष्मा** – कृष्णयजुर्वेदीयतैत्तिरीयशाखायां क्षय (T.B.) इत्यस्य कृते राजयक्ष्मा [२] पापयक्ष्मा इत्युभयोः शब्दयोः प्रयोगः विहितो विद्यते। एतदतिरिच्य "जायेऽन्यः" शब्दस्यापि प्रयोगः तत्रैव प्राप्यते। यजुर्वेदीयमाध्यन्दिनशाखायाः शतपथब्राह्मणे क्षयशब्दप्रयोगः प्राप्यते।

---

[१] **शुक्लयजुर्वेदः १२.९८**

[२] **कृष्णयजुर्वेदतैत्तिरीयसंहिता २.३.५.२**

तैत्तिरीया श्रुतिः "जायेऽन्य" शब्दस्य व्याख्यां कुर्वन्ती कथयति। यः स्त्रीभ्यः उत्पन्नो भवति स एव जायेऽन्य अथवा जायान्याऽस्ति। ''यञ्जायाभ्योऽविन्दत् तञ्जायेन्यस्य'' अस्य निर्वचनस्य एतदेव तात्पर्यमस्ति अत्यधिकेन मैथुनेन शुक्रक्षयं कृत्वा रोगो जायते। आचार्यैं च राजयक्ष्मरोगस्य द्वौ हेतू वर्णितौ स्तः। यथा–

**प्रथमम्**– सः रोगः जीवाणुमाध्यमेन अन्ये प्रविशति। **द्वितीयम्**– कारणं शुक्रक्षयोऽस्ति। राजयक्ष्मा शरीरस्यास्थिमांसवीर्यादिषु स्वप्रभावं स्थापयित्वा रोगिणं शोषयति। जायोऽन्य एवं राजयक्ष्माणः ओषधरूपेण आञ्जनभक्षणं तथा सुगन्धितद्रव्याणां हवनं विहितमस्ति।

राजयक्ष्माणः चन्द्रेण सह सम्बन्धः। प्रजापतेः[१] अष्टाविंशति दुहितारः आसन्। सर्वासां पुत्रीणां प्रजापतिः चन्द्राय दानं कृतवान्। चन्द्रः प्रजापतेः अन्यपुत्रीः प्रति उदासीनो भूत्वा रोहिण्यामत्यन्तासक्तिं कृतवान्। अत एव चन्द्रशरीरे यक्ष्मारोगस्य प्रवेशो जातः[२]। सोमस्तु प्रतिनक्षत्रेषु निवसन् स्वमार्गचक्रं पूरयति, एतदेव चन्द्रमसः प्रजापतिपुत्रीष्वभिगमनमस्ति। अन्यनक्षत्रापेक्षया रोहिणीनक्षत्रे अधिककालं यापयति, इयमेव चन्द्रस्य रोहिणीं प्रत्यासक्तिरस्ति। चन्द्रस्य कलानां क्रमेण क्षयमेव राजयक्ष्मा अस्ति। प्रजापतिः कोऽस्ति? सृष्ट्यारम्भे यः तेजःपुञ्जगोलाकाररूपयुक्तः। स एव "हिरण्यगर्भः" इति नाम्ना यजुर्वेदे वर्णितोऽस्ति। स एव प्रजापतिरिति। यथा–

**ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्।**
**स दाधार पृथिवीन्द्यामुतेमां कस्मै देवाय हविषा विधेम॥** इति

---

[१] **यो ह्येव सविता स प्रजापतिः श०ब्रा० १२.३.५.१**

[२] **चरकचिकित्सास्थानम् ८**

यजुर्वेदः।[1] प्रजापतिर्वै हिरण्यगर्भः [2] प्रजारक्षणप्रजोत्पादकत्वात् सूर्य एव प्रजापतिनाम्ना ज्ञायते व्यवह्रियते च। ''यो ह्येव सविता प्रजापतिः।[3] प्रजापतिः सविता भूत्वा प्रजामसृत्।[4] प्रजापतिर्वा एषः द्वादशधा विहितः।

**ओषधयः एवं तासां प्रयोगप्रकारः**

रोगाणां शान्तये यजुर्वेदे प्राकृतिकखनिजसमुद्रजप्राणि-जोद्भिज्जद्रव्याणामोषधिरूपेण प्रयोगः प्राप्यते। प्राकृतिकेषु सूर्यचन्द्राग्निमरुज्जलखनिजद्रव्येषु आञ्जनशीशवर्णनम्। एवं समुद्रे शङ्खादिवर्णनम्। उद्भिज्जेष्वनेकवृक्षाणां वर्णनं प्राप्यते। यद्यपि एतेषां वर्णनं संक्षेपेण प्राप्यते, किन्तु उद्भिज्जादीनाम् ओषधीनां वर्णनमतिविस्तृतरूपेण प्राप्यते। यजुर्वेदे भिषजामेवं वनस्पतीनां रक्षणार्थं प्रार्थनापि प्राप्यते यथा-

**माऽपो मौषधीर्हिं सीर्धाम्नो धाम्नो राँजस्ततो वरुण नो मुञ्च। यदा हुरघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च। सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यं च वयं द्विष्मः॥**[5]

भिषजां प्रमुखं बलमोषधयः सन्ति। यस्य गृहे एतेषां संग्रहो अस्ति, एतेषां यः सम्यक् प्रयोगं जानाति स एव बुद्धिमान् भिषक्। यस्मिन् समये वैद्य औषधं हस्ते गृह्णाति तदैव रोगः दूरं प्रतिगन्तुं

---

[1] **यजुर्वेदः १३.४**

[2] **शतपथब्राह्मणम् ६.२.२.५**

[3] **शतपथब्राह्मणम् १२.३.५.१**

[4] **तैत्तिरीयब्राह्मणम् १.६.४.१**

[5] **शुक्लयजुर्वेदसंहिता ६.२२**

प्रारभते। औषधोत्पत्तिस्तु प्राणिनां सृष्टेः प्रागेव जाता आसीत्। यथा भगवती श्रुतिरपि कथयति–

**या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा।**
**मनै नु बभ्रूणामहꣳशतन्धामानि सप्त च॥**[1]

यजुर्वेदे औषधरूपेण व्यवहृतियोग्यानां वनस्पतीनां खनिजद्रव्याणाञ्चाकारादिक्रमेण वर्णनं विहितमस्ति तद्द्रष्टव्यमस्ति।

**अपामार्गः**– अपामार्गस्य वर्णनं यजुर्वेदे प्राप्यते। यथा–

**अपाघमपकिल्बिषमप कृत्यामपो रपः।**
**अपामार्ग त्वमस्मदप दुःस्वप्न्यꣳ सुवः॥**[2]

हे अपामार्ग! त्वमस्माकं मानसिकान् पापान् दूरीकरोतु। कीर्तेः नाशकानि शारीरकाणि पापान्यपि दूरीकरोतु। तथैव दुःस्वप्नेभ्य उत्पन्नानि दुःखरूपफलान्यपि दूरीकरोतु। जलदेवतौषधय अस्माकं कृते उपकारिणः भवन्तु। यथोक्तं मन्त्रे– **सुमित्रिया न आप ओषधयः सन्तु।**[3] अपामार्ग इति शब्दस्य पर्यायवाचिनः सन्ति यथा– अपामार्गकृत्या दौष्स्वप्न्यम्, दौर्जीवित्यम्, अगोतानपत्यता अक्षपराजयेत्यादयः।

**अजशृङ्गी**– अजशृङ्गी इति नाम्नः ओषधद्वारा गन्धर्वाप्सरो पिशाचराक्षसेत्यादयः कृमयः नश्यन्ति। इमामजशृङ्गीं हवनमाध्यमेन प्रयोगे स्वीकुर्वन्ति। एतस्य गन्धात् कृमयः बिभ्यति। अजशृङ्गेण पर्यायत्वमराटकीतीक्ष्णशृङ्गी इत्यत्रास्ति।

**आञ्जनम्**– वेदे आञ्जनं त्रिककुत्पदाभ्यां व्यवहृतम्। त्रिककुत् पर्वते जातत्वात् "त्रैककुद्" यमुनानद्यामुत्पन्नत्वात् "यामुन" मिति च

---

[1] **यजुर्वेदः १२.७५**

[2] **शु०यजुर्वेदः ३५.११**

[3] **शु०य० ३५.१२**

व्यवह्रियते। देवाञ्जनम्, पुरुषजीवनम्, यामुनम्, त्रैकुदम् इत्यादिभिः नामभिरपि व्यवहारो वेदे दृश्यते। यामुनोषधं विशेषरूपेण पुरुषाश्वगवाङ्कृते लाभकारी कथ्यते। अस्य प्रयोगेणायुः वर्धते। आञ्जनप्रयोगद्वारा शपथकृत्याऽभिशोचनविष्कन्धासन्मन्त्रदुष्वप्नदुष्कृतशमलदुहाद्रघोरचक्षुःज्वर बलासराजय- क्ष्मेत्यादिभ्यो जायमानान् कष्टान् दूरीकर्तुं शक्नुवन्ति। अस्य प्रयोगप्रकारः चतुर्विधोऽस्ति। नेत्रे स्थापनम्, शरीरे लेपनम्, भक्षणम्, शरीरे मणिरूपेण बन्धनम्। यजुर्वेदे पुरुषमेधयज्ञसम्पादनाय शीलस्य कृते आञ्जनविद्याज्ञातारं नियुक्तं कुर्वन्ति। यथा- शीलायाञ्जनीकारीम्[१], तैत्तिरीयब्राह्मणे[२], तैत्तिरीयसंहितायाम्,[३] शतपथब्राह्मणे च आञ्जनवर्णनं प्राप्यते। यजुर्वेदस्य चतुर्थाध्यायस्य तृतीयमन्त्रे अञ्जनेन सह प्रार्थनायाः वर्णनमस्ति। तत्र चोक्तम् हे आञ्जन त्वं वृत्रासुरस्य कृष्णमूर्तिसदृशोऽसि, चक्षुरिन्द्रियस्य शक्तिप्रदाता असि। अतः मह्यमपि दृष्टिं प्रददातु। **वृत्रस्यासि कनीनकश्चक्षुर्दा असि चक्षुर्मे देहि**[४] इति मन्त्रेणाध्वर्युः यजमानस्य नेत्रयोः अञ्जयति[5], वृत्रस्येति त्रिककुत्पर्वतीयेन सौवीराञ्जनेन यजमानस्याक्षिणी अञ्ज्यादध्वर्युः[6]।

**अरुन्धती** - अरुन्धत्यौषधप्रयोगः विशेषेण चतुष्पदां जन्तूनां कृते विहितोऽस्ति। अरुन्धती गवां दुग्धवर्धनाय सहयोगं करोति एवं दैवीयकोपेन गोषु यः कोऽपि रोगः आयाति तं परिहरति गाः रक्षति च।

---

[१] **शु०य० ३०.१४**

[२] **तै०ब्रा० ३.१२.६.४**

[३] **तै०सं० ६.१.१.५**

[४] **यजुर्वेदः ४.३**

[५] **कात्यायनश्रौतसूत्रम् ७.२.३०-३२**

[६] **कात्यायनश्रौतसूत्रम् ७.२.३१**

अरुन्धत्याः पर्यायिनः सन्ति- विश्वरूपासुभगासहदेवीजीवलाः इत्यादयः वेदे दृष्टाः।

**कुष्ठम्**- कुण्ठं "देवोत्तमः" एवं "विश्वभेषज" इत्युभयनामाभ्यां प्रसिद्धम्। अस्य प्रयोगस्तु तक्मे विशेषतः शिरोवेदनायुक्तज्वरे तृतीयकज्वरे सततज्वरे ऐकाहिकज्वरे च क्रियते। राजयक्ष्मणि शिरोरोगे कुष्ठामये सर्वगात्रवेदानायां भैषज्यमुच्यते। कुष्ठौषधस्योत्पत्तिः हिमालयभागे भवति तत्रैव च सोमस्यापि उत्पत्तिर्भवति।

**केशबृंहणी**- केशानां वर्धनाय दृढीकरणाय च केशबृंहण्याः वर्णनमायाति। अस्याः प्रयोगेण इन्द्रलुप्तरोगमपि दूरं कुर्वन्ति। केशाः अपि वर्धन्ते। अस्याः रसरूपस्य प्रयोगः सिरो भागे क्रियते।

**जलम्**- यजुर्वेदे जलस्य महत्ता ओषधरूपेण गीतास्ति। जलमेव जीवनम्, जलममृतम्, परमौषधञ्च। जले विभिन्नप्रकारका ओषधीशक्तयः विद्यमानाः सन्ति। इदं शरीरे पोषणमुत्पन्नं कृत्वा बलमभिवर्धयति। यथा भगवती श्रुतिरपि कथयति।

**आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे॥**
**यो वः शिवतमो रसस्तस्य भाजयते ह नः। उशतीरिव मातरः॥**
**तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥**[१]

यजुर्वेदे जलस्य प्रार्थना विहिताऽस्ति। एवं प्रकारेण हे आपः! त्वं मम मनः तर्पयतु, मम वाणीं तर्पयतु, मम प्राणं तर्पयतु, मम चक्षुर्द्वयं तर्पयतु, मम श्रोत्रद्वयं तर्पयतु, ममात्मानं तर्पयतु मम सन्तानं (वंशं) तर्पयतु, मम पशून् तर्पयतु, मम सहयोगिनं तर्पयतु, हे आपः! तव कृपया मम मित्राणि अष्मभ्यं विगततृष्णाः न भवेयुः। यथोक्तम्-

---

[१] **शुक्लयजुर्वेदः ११.५०-५२**

**मनो मे तर्पयत वाचं मे तर्पयत प्राणं मे तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयतात्मानं मे तर्पयत प्रजां मे तर्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मा वितृषन्॥**[१]

दिव्यप्रकारासु ऊर्जासु जले विशिष्टास्ति ऊर्जा। शुद्धपवित्रं च जलं शरीरं संरक्षयति। अभीष्टसिद्ध्यर्थमेवं पानीयं जलमस्माकं कृते सर्वदा सुखप्रदायकं भवेत्। सुखप्राप्त्यर्थमेवं रोगनिवारणार्थं जलं सर्वदाभीष्टकरं भवेत्। यथा–

**शं नो देवीरभीष्टय आपो भवन्तु पीतये। शं योरभिस्रवन्तु नः॥**[२] **श्वात्राः पीता भवत यूयमापो अस्माकमन्तरुदरे सुशेवाः। ता अस्मभ्यमयक्ष्मा अनमीवा अनागसः स्वदन्तु देवीरमृता ऋतावृधः॥**[३]

हे आपः! यूयमुदरे गत्वा आनुकूल्येन सुखं प्रदाय राजयक्ष्मादिरोगरहिता अन्यरोगरहिता निष्पापा द्योतमानामृतस्वरूपसत्यवर्धका भूत्वास्माकं कृते सर्वदा सुस्वादयुक्ता भवेत। जलस्य पर्यायवाचिनः शब्दाः– दिव्याः, स्रवन्तिः, स्वयञ्जा, हैमवती, अत्स्याः सन्निष्यदाः, वर्ष्याः, धन्वन्याः, अनूप्याः, खनित्रिमाः, कुम्भेरभिरावृताः, अनश्चेत्यादयः।

**पृश्निपर्णी** – अस्यापि वर्णनं यजुर्वेदे[4] एव आयाति। औषधोऽयं कण्वदुर्णामस्य कृमयः ये मनुष्यवृद्धिं निरोधयन्ति शरीरे प्रविश्य रुधिरं पिबन्ति तथा गर्भाशये हानिं कुर्वन्ति तेषां नाशं कुर्वन्ति। गुणभेदेनास्य नामान्तराण्यपि प्रसिद्धानि यथा– कण्वजम्भनी, सहस्वती, देवी,

---

[१] **शुक्लयजुर्वेदः ६.३१**

[२] **शुक्लयजुर्वेदः ३६.१२**

[३] **शुक्लयजुर्वेदः ४.१२**

[४] **शतपथब्राह्मणम् १३.८.१.१६**

सहमानेत्यादयः। सामयिकनिघण्टुग्रन्थेऽस्यानेके गुणाः प्रतिपादिताः सन्ति। यथा–

**पृश्निपर्णी त्रिदोषघ्नी वृष्योश्णा मधुरा सरा।**
**हन्ति दाह ज्वरश्वासरक्वातिसार तृड्वमीः॥**[1]

**सहस्रपर्णी**– सहस्रपर्णी एकोषधविशेषस्य नामास्ति। अस्मिन् ओषधे सहस्रपर्णानि विद्यन्ते। अत एव अस्य नाम सहस्रपर्णी वर्तते। अस्योषधस्य शताधिका उपरि विद्यमानाः शाखाः एवं त्रिंशत् नितानाः (अधोशाखाः) सन्ति ''शतं तव प्रतानास्त्रयस्त्रिंशन्नितानाः"। सामयिकनिघण्टौ दूर्वायाः कृते "सहस्रकाण्डा" एवं "सहस्रपर्णी" इत्युभौ शब्दौ व्यवहृतौ। गुणभेदेन सहस्रपर्णी, न्यस्तिका, शुभङ्करणी, संवननी, समुष्पला, कल्याणी, बभ्रु इत्यादयः पर्यायवाचिनः। ओषधोऽयं नरनारीणां सम्भोगेच्छावर्धनायापि प्रयुज्यते।

**सीसा**– यजुर्वेदे पाषाणमृत्तिकामहापर्वतपर्वतसिकतावनस्पति–स्वर्णरजतेत्यादिधातूनां वर्णनमस्ति। भगवती श्रुतिरपि कथयति–

**अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यञ्च मेऽयश्च मे श्यामं च मे लोहञ्च मे सीसं च मे त्रपु च मे यज्ञेन कल्पन्ताम्॥**[2]

ओषधरूपेण भोज्यार्थं सीसकस्य प्रयोगः प्राप्यते। सीसा इन्द्रियाणां कृते बलप्रदाता भवति। भगवती श्रुतिः कथयति यथा–

**होता यक्षदैव्या होतारा भिषजाश्विनेन्द्रं न जागृवि दिवा नक्तं न भेषजैः शूषꣳ सरस्वती भिषक् सीसेन दुह इन्द्रियं पयः सोमः**

[1] **कैयटदेवनिघण्टुः ४४**

[2] **यजुर्वेदः १८.१३**

**परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज** [१] इति। दैवीहोताग्निवायुवैद्याश्विनौ सरस्वतीनां च यजनमिति। अहोरात्रजागरणशीला सरस्वती इन्द्रकृते सीसेन शक्तिरूपभिषजं दोग्धि। दुग्धसोमसुराघृतमधुषु इन्द्रो व्याप्तः स्यात्। एतदर्थं हे होतः घृतेन जुहोतु। सीसकः अत्रिपिशाचयातुराक्षससम्बन्धिकृमीन् नाशयति। यथोक्तम्– **सीसेनावजघान तस्मात् सीसं मृदुसृतजवं हि**[२] इति।

**सोमलता** – यजुर्वेदे सोमवनस्पतेः अन्येषामपेक्षायामत्यधिको महिमा वर्णितोऽस्ति। सोमः ओषधीनां राजा। सोमस्तु सर्वेषामोषधीनां राजास्ति। तस्य पञ्चदशपर्णानि भवन्ति, यानि चन्द्रमसः सदृशमपक्षीयन्ते वर्धन्ते च। अस्मिन् औषधे पूर्णिमायाः रात्रौ पञ्चदशपर्णान्यवयवरूपेण स्थितानि भवन्ति, परन्त्वमावस्यायामोषधोऽयं निष्पर्णो भवति। यथोक्तम्–

**सोमो नामौषधिराजः पञ्चदशपर्णा सोम इव हीयते वर्धते च॥**

**तथा सर्वेषामेव सोमानां पत्राणि दश पञ्च च।**
**तानि शुक्ले च कृष्णे च जायन्ते निपतन्ति च॥**
**एकैकं जायते पत्रं सोमस्याहरहस्ततः।**
**शुक्लस्य पौर्णमास्यान्तु भवेत् पञ्चदशच्छदः॥**
**शीर्यते पत्रमेकैकं दिवसे दिवसे पुनः।**
**कृष्णपक्षक्षये चापि लता भवति केवला॥**[३]

यजुर्वेदे सोमवनस्पतेः महिमानेकेषु मन्त्रेषु विहितास्ति। "**सोमः परिश्रुता** [४]" पर्वतोऽयं स्थानीयो वनस्पतिरस्ति। पर्वतस्य पृष्ठभागे सोमो जायते। सोमोऽयमतिलम्बायमाने स्वरूपे उत्पद्यते अस्यानेका शाखा

---

[१] **यजुर्वेदः २१.३६**

[२] **शतपथब्राह्मणम् ५.४.१.१०**

[३] **चरकचिकि०स्था०अ० १**

[४] **यजुर्वेद 21.36**

ऊर्ध्वभागान्नीचैस्फुलन्ति। अस्य वर्णः हरित् भवति। सोमस्य शाखानां भरासं निनाय इति श्रूयते। ''भरासः करिणामिव'' सोमशाखान् बिभेद्य तस्य रसस्य प्रयोगः क्रियते। सोमरसस्य स्वादमतिमधुरं सुगन्धयुक्तं मदकारी सुस्वादु च भवति, भगवती श्रुतिरपि कथयति।

**स्वादिष्ठया मदिष्ठया पवस्व सोम धारया। इन्द्राय पातवे सुतः।**[१]

राक्षससंहारकर्ता विश्वस्य द्रष्टा सोमः द्रोणकलशे शान्तिपूर्वकं विराजते।

**रक्षोहा विश्वचर्षणिरभि योनिमयोहते। द्रोणे सधस्थमासदत्।।**[२]

सोमः पवित्रः पावितो (पवतिर्गत्यर्थः) भवति। तस्य गतिर्पात्रेषु दृश्यते, सः पात्रे गतिं करोति। स ब्राह्मणजात्याश्रयाणां क्षत्रियाणां यज्ञकर्तृयजमानानां कल्याणाय च पावितो भवति। सः अन्नवर्षायाः कृते पावितो भवति, येन ऊर्जायाः प्राप्तिर्यथा स्यात्, जलौषधीनां कृतेऽपि पावितो भवति। यथा मन्त्रेणोक्तम्–

**सोमः पवते सोमः पवतेऽस्मै ब्रह्मणेऽस्मै क्षत्रायास्मै सुन्वते यजमानाय पवत इष ऊर्जे पवतेऽद्भ्य ओषधीभ्यः पवते द्यावापृथिवीभ्यां पवते सुभूताय पवते विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः।।**[३]

वनस्पतिराजा सोमः वाजपेयराजसूययागयोः यज्ञरक्षाणाय आहूयते। **सोमꣳराजानमवसेऽग्निमन्वारभामहे। आदित्यान्विष्णुꣳसूर्यं ब्रह्माणञ्च बृहस्पतिꣳ स्वाहा।।** [४] अधोलिखिते मन्त्रे

---

[१] **यजुर्वेद 2६.25**

[२] **यजुर्वेदः २६.२६**

[३] **यजुर्वेदः ७.२१**

[४] **यजुर्वेदः ९.२६**

वनस्पतिराजसोमस्य प्रार्थनाया वर्णनमस्ति। श्रुतिः कथयति - हे राजन् सोम! त्वं सर्वासां प्रजानां सम्मानं करोतु। प्रजाः त्वामपि अभिनन्दयन्ति। **सोम राजन्विश्वास्त्वं प्रजा उपावरोह विश्वास्त्वां प्रजा उपावरोहन्तु॥**[१]

पवित्रादित्यः येन प्रकारेण सम्पर्कजलमाध्यमेन जलरूपात्मकं सोममेव पिबति तथैव दशायाः पवित्रेण चालयित्वा पिता सोमः इन्द्रियेभ्यो बलं प्रददाति।

**सोममद्भ्यो व्यपिबच्छन्दसा हꣳसः शुचिषत्। ऋतेन सत्यमिन्द्रियं विपानꣳशुक्रमन्धस इन्द्रस्येन्द्रिमिदं पयोऽमृतं मधु॥**[२]

त्रयाणां गवां दुग्धेन सुरायाः परिसेचनं क्रियते तदेव सोमक्रयणस्वरूपम्।

**सोमस्य रूपं क्रीतस्य परिस्रुत्परिषिच्यते।**
**अश्विभ्यां दुग्धं भेषजमिन्द्रायैन्द्रꣳ सरस्वत्या॥**[३]

सौत्रामणीययोगे कथितमस्ति यदभिषुतः राजा सोमः अमृतस्वरूपो जात इति, यतः तेन सोपानरूपे मृत्युमेव त्यक्तम्। दशापवित्रेण संशोध्य पीतं सोमरसं सत्यं बलं प्रददाति।

**सोमो राजामृतꣳसुत ऋजीषेणाजहान्मृत्युम्। ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु॥**[४]
भगवती श्रुतिरपि कथयति। सर्वेषां दिव्यपदार्थानां दाता सोम एवास्ति। यथा -

---

[१] यजुर्वेदः ६.२६
[२] यजुर्वेदः १९.७४
[३] यजुर्वेदः १९.१५
[४] यजुर्वेदः १९.७२

**सोमो धेनुꣳसोमो अर्वन्तमाशुꣳसोमो वीरं कर्मण्यं ददाति।**
**सादन्यं विदथ्यꣳसभेयं पितृश्रवणं यो ददाशदस्मै॥**[1]

**त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः।**
**त्वमा ततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ॥**[2]

हे सोम! त्वया एतेषां जलानामोषधीनां गवाञ्च उत्पत्तिर्विहिता। त्वया विसृतमिमन्तरिक्षं विस्तारितम्। त्वयैव ज्योतिषा तमः अपि निरसितम्।

**देवेन नो मनसा देव सोम रायो भागꣳसहसावन्नभियुध्य।**
**मा त्वातनदीशिषे वीर्यस्योभयेभ्यः प्रचिकित्सा गविष्टौ॥**[3]

उक्तेऽस्मिन् मन्त्रे राजानं सोमं प्रति प्रार्थना विहितास्ति। हे सोमदेव! हे बलवन्! भगवतः दिव्यया शक्त्या धनस्यैकमंशमस्मभ्यं प्रददातु। भवानेव बलस्याधिष्ठाता, अतः यज्ञे त्वमस्मान् रोगरहितान् कृत्वा उभयलोकयोग्या करोतु। शतपथब्राह्मणे सोमविक्रयणविषयस्य वर्णनमस्ति।

**चन्द्रं ह्येतच्चन्द्रेण क्रीणाति यत्सोमं हिरण्येन, शुक्रं ह्येतच्छुक्रेण क्रीणाति यत्सोमं हिरण्येन॥**[4]

वैदिककाले प्रसिद्धाः सोमवनस्पतिः समयेऽस्मिन् लुप्तप्रायोऽस्ति। शतपथब्राह्मणे आदारवनस्पतेः सोमस्य प्रतिनिधिरूपेण

---

[1] **यजुर्वेदः ३४.२१**

[2] **यजुर्वेदः ३४.२२**

[3] **यजुर्वेदः ३४.२३**

[4] **शतपथब्राणम् ३.३.३.६**

प्रयोगः निर्दिष्टोऽस्ति।[1] ताण्ड्यब्राह्मणेनापि साक्षान्निगदितमस्ति यत् – **यदि सोमं न विन्देयुः पूतीकानभिषुणुयुर्यदि न पूतिकानर्जुनानि।**[2]

चरकसुश्रुताद्यायुर्वेदस्य प्रामाणिकेषु ग्रन्थेष्वपि सोमरसायनस्य वर्णनं विस्तरेण कृतमस्ति। आचार्यसुश्रुतेन चतुर्विंशतिप्रकाराणां सोमानां वर्णनं विहितमस्ति।[3] शुक्लयजुर्वेदस्य चतुर्थाध्याये सोमवर्णनं कृतमस्ति[4]। अत्रैकोनविंशतिमन्त्रादारभ्य सप्तत्रिंशत्पर्यन्तं क्रीतसोमस्य शालाप्रवेशान्तमन्त्राः सन्ति। श्रुतिरपि कथयति–

**शुक्रं त्वा शुक्रेण क्रीणामि चन्द्रं चन्द्रेणाऽमृतममृतेन। सग्मे ते गौरस्मै ते चन्द्राणि तपसस्तनूरसि प्रजापतेर्वर्णः परमेण पशुना क्रीयसे सहस्रपोषं पुषेयम्।।**[5]

हे सोम! त्वां दीप्यमानस्वर्णद्वारा क्रीणामि। आह्लादकरं आह्लादकरेण, अमृतममृतस्वरूपस्वर्णेन क्रीणामि। हे सोमविक्रेतः! तव गृहेऽस्माकं गावः स्वर्णादयश्च भवेयुः, परञ्च अस्मद्गृहे आह्लादकसोमो भवेदित्याशासे। हे सोम! त्वं दिव्यपशुमेषादिभिः क्रीयमाणोऽसि परन्तु आगमेन वयं पशुपुत्रादिवर्धनद्वारा समृद्धिधनयुक्ताश्च भवेम। त्वं यजमानान् धनप्रदात्रा इन्द्रेण सह अस्य पक्षपातस्य कथनं कुरु। यथा–

**तेनास्मै यजमानयोरु राये कृध्यधि दात्रे वोचः।**[6]

यजुर्वेदे एकोनविंशत्यध्याये परिशोधितं सोमसम्बन्धिवर्णनमस्ति।[1]

---

[1] **शतपथब्राह्मणम् ४.५.१०.१-६**

[2] **ताण्ड्यब्राह्मणम् ९.५.३**

[3] **सुश्रुतचि० अ० २९**

[4] **यजुर्वेदः ४.१९-३७**

[5] **यजुर्वेदः ४.२६**

[6] **यजुर्वेदः ६.३३**

**सूर्यः**- यजुर्वेदः आदित्यदेवं सूर्यमदृष्टदृष्टानां कृमिनां नाशकरूपेण वर्णितवान्। उदितो भूत्वा सूर्यः व्याधीनां बाधनं करोति। यथोक्तम्- **अपामीवां बाधते वेति सूर्यम्।।**[2]

नवीनकिरणरूपात्मकः हस्तवान् प्राणवान् कल्याणस्तुतिकर्ता सुखप्रदाता एवं तेजवान् सूर्य अस्मदभिमुखो भवेत्। यातुधानान् अपसिद्धान् कुर्वन् प्रतिदिनं प्रतिरात्रं स्तूयमानः सूर्य ऊर्ध्वदेशे तिष्ठति। यथा-

**हिरण्यहस्तो असुरः सुनीथः सुमृडीकः स्ववा यात्वर्वाङ्।**
**अपसेधन्रक्षसो यातुधानानस्थाद्देवः प्रतिदोषं गृणानः।।**[3]

यजुर्वेदस्य दशमाध्याये राजसूययागस्य शेषकर्मणः प्रसङ्गे चरकसौत्रामणियज्ञस्य प्रसङ्गे च घर्मं सूर्यकान्तिमुक्तवान्। जलस्याधानकर्ता अपि सूर्य एवास्ति, श्रुतिरपि कथयति- **सूर्यत्वचस स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यत्वचस स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा।।**[4]

सवितृदेवतायाः वरणीयं तेजः अस्मद्बुद्धिं सत्कर्मानुष्ठानाय प्रेरयति।-

**तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।।**[5]

यजुर्वेदस्य त्रयस्त्रिंशदध्यायस्थात् त्रिंशत्संख्याकमन्त्रादारभ्य त्रिचत्वारिंशन्मन्त्रपर्यन्तं विश्ववन्द्यसूर्यदेवस्य स्तुतिः कृता विद्यते। द्युस्थानीयः सूर्यः कृष्णप्रकाशेन सह वर्तमाने मनुष्यदेवान् स्वस्वस्थाने प्रतिष्ठापयन् लोकलोकान्तरं दृष्ट्वा स्वरथेन सह सञ्चरति।

---

[1] **शुक्लयजुर्वेदसंहिता १९.७२-७९**

[2] **यजुर्वेदः ३४.२५**

[3] **यजुर्वेदः ३४.२६**

[4] **यजुर्वेदः १०.४**

[5] **यजुर्वेदः ३.३५**

**आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च।**
**हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥**[१]

**मणिधारणम्** – विभिन्नप्रकारकेभ्यः वृक्षेभ्यः वनस्पतिभ्यश्च निर्मीयन्ते। एतेषां गोलाकारं निर्माणं विधाय मध्ये एकं छिद्रं विधाय तत्र रज्जुस्थापनद्वारा बाह्वोः कण्ठे वा धारणार्हरूपेण वर्णनं प्राप्यते। यजुर्वेदे वर्णितानां केषाञ्चिन्मणीनां परिचयात्मकं वर्णनम्, धारणेन कश्च लाभ इति विषये विवरणं प्रस्तूयते।

**औदुम्बरमणिः**– औदुम्बरमणेः निर्माणमुदुम्बरकाष्ठेन भवति। सर्वेषु मणिष्वयमेव श्रेष्ठ इति पूर्वाचार्यैः स्वीकृतम्। अस्य धारणमात्रेण शरीरे ब्रह्मवर्चः वर्धते। धनं प्राप्यते। शत्रूणां नाशश्च भवति। उदुम्बरेण प्रजापतिः सर्वेभ्यः पापेभ्यः मुक्तो जात असीत्। प्रजापतेः सर्वप्रकारकेभ्यः पापेभ्यः मोचनेनैव अस्य नाम "उदुम्भर" इति कथितम्, परोक्षकाले इममुदुम्बर इति नाम्ना व्यवहृतम्। यथा शतपथब्राह्मणे उक्तम्–

**स (प्रजापतिः) अब्रवीदयं वा मा सर्वस्मात् पाप्मन उदभार्षीदिति यदब्रवीदुदभार्षीन्मेति तस्मादुदुम्भर उदुम्भरो ह वै तमुदुम्बर इत्याचक्षते परोक्षम्॥**[२]

यजुर्वेदीयतैत्तिरीयारण्यके ऊर्ग् (बलम्) उदुम्बर इति नाम्ना व्यवहृतम्। यथा– **उर्ग् वा उदुम्बरः**[३] शतपथब्राह्मणे एका आख्यायिका वर्णिता अस्ति यत् सर्वे वनस्पतयः असुराणां पार्श्वे गताः, परन्तु उदुम्बरेण देवताः नैव त्यक्ता अत एव देवता असुरान् जित्वा तान् वनस्पतीन् भिन्नान् कृतवन्तः। यथा –

---

[१] **यजुर्वेदः ३३.४३**

[२] **शतपथब्राह्मणम् ७.५.१.२२**

[३] **तैत्तिरीयारण्यकम् १.१.३.१०**

**ते ह सर्व एव वनस्पतयो सुरानभ्युरुदुम्बरो ह वै देवान्न जहौ ते देवा असुरान् जित्वा तेषां वनस्पतीनवृश्चत॥**[1]

एतेषां वनस्पतीनां भेदनेन (कर्तनेन) एतेषां मांसात् यद्बलमवहत् स एव उदुम्बरो जातः।

**मांसेभ्य एवास्योर्गस्रवत् स उदुम्बरो भवत्॥**[2]

एतेषु वनस्पतिषु यद्बलरूपात्मकरस आसीत् तमुदुम्बरे स्थापितवन्तः। तस्यैव ऊर्जया अद्यावधिं वनस्पतयः पचन्ति। अत एव स आर्द्रेण युक्तः सदुग्धश्चास्ति। अस्मादेव सर्वे वनस्पतयः सन्ति, यदुदुम्बरोऽस्ति–

**वनस्पतिषृग्र्यो रस आसीदुदुम्बरे तमदधुस्तस्येतदूर्जा सर्वान् वनस्पतीन् प्रति पच्यते तस्मात् स सर्वदार्द्रः सर्वदा– क्षीरी तदेतत्सर्वमन्नं यदुदुम्बरः सर्वे वनस्पतयः॥**[3]

**दर्भमणिः**– दर्भदूर्वावा कुशशब्दौ पर्यायवाचिनौ। दूर्वा इन्द्रस्य वर्म एवं क्षत्रवर्धकः, द्वेषिहृदयतापकः, शत्रुनाशकश्च भवति। यजुर्वेदे दर्भेण निर्मितान् पवित्रान् श्रीविष्णुसम्बन्धिन इत्युक्तमस्ति। यथा–

**पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः॥**[4]

यजुर्वेदश्रुतिर्वदति – हे दूर्वे! प्रत्येकाद् भागात्, प्रत्येकात्पर्वात्, यद्वा स्वयं प्रत्येकेषु काण्डेषु पर्वसु च अङ्कुरिता भवन्ती येन प्रकारेण भवन्ती

---

[1] **शतपथब्राह्मणम् २६.६.३.२**

[2] **श०ब्रा० १२.७.१.९**

[3] **श०ब्रा० ६.६.३.३**

[4] **यजुर्वेदः १.१२ एवम् १०.६**

स्वयमेव विस्तारं सम्प्राप्नुवन्त्यस्ति, तेनैव प्रकारेण यथा त्वं भवसि, एवमस्मान् अपि शतसहस्रसंख्याकैः पुत्रादिभिः विस्तारयेति।

**काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि।**
**एवा नो दूर्वे प्रतनु सहस्रेण शतेन च॥**[१]

दूर्वा देववर्मब्रह्मणस्पतिमपि कथ्यते। इमामिन्द्रविष्णुसम्बन्धिनीं राष्ट्ररक्षिकामपि कथयन्ति–

**त्वामाहुर्देववर्म त्वां दर्भ ब्रह्मणस्पतिम्।**
**त्वामिन्द्रस्याहुर्वर्म त्वं राष्ट्राणि रक्षसि॥**[२]

दीर्घायुषः प्राप्त्यर्थं तेजसः कृते च दर्भमणिं धारयामि। यः शत्रुं तापयति द्वेषि हृदयञ्च तापयति –

**इमं बध्नामि ते मणिं दीर्घायुत्वाय तेजसे।**
**दर्भं सपत्नदम्भनं द्विषतस्तपनं हृदः॥**[३]

दर्भस्तु समुद्ररूपात्मकमेघस्य विद्युता सह गर्जनेन वर्षाऽगमनेन चोत्पद्यते। यथोक्तम्–

**यत्समुद्रो अभ्यक्रन्दत् पर्जन्यो विद्युता सह।**
**ततो हिरण्मयो बिन्दुस्ततो दर्भोऽजायत॥**[४]

**प्रतिसरमणिः** – प्रतिसरमणिस्तु तिलकवृक्षेभ्यः निर्मीयते। अयञ्च कृत्यं नाशयति। तथा च कृत्या उत्पद्यते, अस्य धारणेन सा कृत्या वैपरीत्येन तस्मिन् स्वप्रभावं करोति। प्रतिसरमणिः सहस्रवीर्यवान्

[१] **शुक्लयजुर्वेदः १३.२०**
[२] **अथर्व० १९.३०.३**
[३] **अथर्व० १९.२८.९**
[४] **अथर्व० १९.३०.५**

ओजस्वच्छत्रुनाशकश्चौषधिषु उत्तम इति स्वीकृतम्।[1] तिलकवृक्षस्य प्रतिसरमणिः वीरोऽस्ति। अत एव वीरान् जनान् एव बाधयते। अयं मणिः शत्रुनाशकः सुमङ्गलश्चास्ति। श्रुतिरप्याह –

**अयं प्रतिसरो मणिर्वीरो वीराय बाध्यते।**
**वीर्यवत्यसपत्नहा शुरवीरः परिपाणः सुमङ्गलः॥**[२]

**गव्यम्** – आत्मनोऽभ्युदयार्थं यत्किञ्चिदपेक्षते तत्सर्वं गोमातरि विद्यते। गोमाता सर्वदा पूजनीयाऽस्ति। तस्याः दुग्धं, घृतं, नवनीतं, गोमयं, गोमूत्रञ्च स्वास्थ्यसमृध्य्यर्थं परिकल्पते। गोमातुः प्रसन्नतायां पुरुषार्थचतुष्टयस्य प्राप्तिर्भवति। यजुर्वेदश्रुतिर्वदति –

**अन्ध स्थान्धो वो भक्षीय मह स्थ महो वो भक्षीयोर्ज स्थोर्जँ वो भक्षीय रायस्पोष स्थ रायस्पोषं वो भक्षीय।**[३]

सिद्धान्ते त्वार्षप्रमाणेन कर्माङ्गगवामुपस्थानेऽस्य मन्त्रस्य विनियोगः। तत्तदधिष्ठात्र्या देवतायाः प्रसादादेव तत्तत्सेवनं काम्यते। सन्निधानात्कर्माङ्गभूतां गां गच्छेन्मन्त्रद्वयेन। भगवतः कात्यायनेनोक्तम् – **गां गच्छत्यन्धस्थेति**[४]। अन्धस्था रेवती रमध्वमिति यजुर्द्वयेन गां गच्छति, कर्माङ्गभूतां गामुपतिष्ठतीत्यर्थः। हे गावः! यूयमन्नरूपा भवथ। क्षीराज्यादिरूपस्यान्नस्य जनकत्वाद् गोष्वन्नत्वोपचारः। श्रुत्या तु लक्षणया अन्धपदेन वीर्यमुच्यते। अतो अन्धो वो युष्मत्सम्बन्धि वीर्यं भक्षीय भजेयम्। तथा यूयं महस्थ पूज्यरूपाः स्थ। महःशब्देन दशवीर्याण्युच्यन्ते। तानि यथा – गौर्वै प्रतिधुक्, तस्यै श्रुतं तस्यै शरस्तस्यै दधि तस्यै मास्तु तस्या आतञ्चनं तस्यै नवनीतं तस्यै घृतं तस्या आमीक्षा तस्यै

---

[१] **शа०ब्रा० ५.२.४.२०**

[२] **अथर्ववेदः ८.५.१**

[३] **शु.य.३.२०**

[४] **कात्यायनश्रौतसूत्रम् ४.१२.५**

वाजिनमिति महीधरभाष्ये उक्तानि सन्ति। तत्कालं दुग्धं प्रतिधुक्, उष्णं ततः श्रुतम्, शरो दुग्धमण्डः, मस्तु दधिरसः, आतञ्चनं दधिपिण्डः, आमिक्षा स्फुटितं दुग्धम्, वाजिनस्तच्छेषभूतं जलमिति महीधरभाष्यम्। एतद्दशवीर्यरूपा यूयं स्थ, पूज्यरूपाः अतोऽहं वः पूज्यत्वं भक्षीय सेवेय। स्मृतेर्गवां पूज्यत्वं प्रसिद्धमेव। गवां प्रसिद्धिं तित्तिरिः सूचयति – महसा महो वा भक्षीयेत्याह महो होता इति। यूयमूर्जः स्थ, बलरूपास्थ, गोक्षीरादेर्बलहेतुत्वाद् गोषु बलरूपत्वोपचारः। ऊर्ज बलप्राणनयोः, युष्माकमनुग्रहेण बहं सेवेय, तथा रायस्पोषाः स्थ, यूयं धनपुष्टिरूपाः स्थ, क्षीराज्यादिक्षेत्रापत्र(खाद)गोमूत्रगोमयादिद्वारा धनपुष्टिहेतुत्वात् तत्र रायस्पोषत्वोपचारः। युष्माकं प्रसादाद्वा धनपुष्टिं सेवेय।

**रेवती रमध्वमस्मिन् योनावस्मिन् गोष्ठेऽस्मिँल्लोकेऽस्मिन् क्षये। इहैव स्त मापगात॥**[१]

हे रेवती रेवत्यः धनवत्यो गावः! अस्मिन् दृश्यमाने योनौ अग्निहोत्रहविर्दोहनस्थाने रमध्वं क्रीडत। दोहनादूर्ध्वमस्मिन् गोष्ठे गृहाद् बहिर्विश्रम्भेण गवामावासस्थाने व्रजेऽस्मिन् यजमानलोके दृष्टिविषये लोकदर्शने रमध्वं रात्रौ अस्मिन् क्षये यजमानगृहे रमध्वम्। इहैव यजमानदृष्टिविषये स्त यूयं भवत मा अपगात इतः स्थानाद् अन्यत्र मा गच्छत। गौर्देवता, पुत्रपौत्राद्यभिवृद्ध्या धनयुक्ताः क्षीरदध्याज्यादियुक्ताः पशवो रयिमत्वात् पशवो देवता उच्यन्ते।

**सꣳहितासि विश्वरूप्यूर्जा माविश गौपत्येन। उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसि॥**[२]

अनेन मन्त्रेण यजमानो गामभिमृशति। सर्वं हितेत्यालभते[1] इति। हे गौः! त्वं क्षीराज्यहविर्दानेन संलग्नासि यज्ञकर्मभिः।

---

[१] **शु०य० ३.२१**

[२] **शु०य० ३.२२**

शुक्लकृष्णादिबहुरूपैर्युक्ता, विश्वं रूपं यस्याः सा विश्वरूपिणी। जात्यभिप्रायेण शुक्लकृष्णरोहितादिबहुरूपवती सा त्वमूर्जान्नरसेन गवां स्वामित्वेन मां यजमानमासमन्तात् प्रविश। त्वत्प्रसादान्मम बहुविधः क्षीराज्यादिरसो बहुविधं गोस्वामित्वं च सम्पद्यताम्।

**अग्नौ ह वै देवाः सर्वान् पशून्निदधिरे। ये च ग्राम्याः, ये चारण्याः विजयं वोपप्रयन्तः कामचारस्य वां कामायायं नो गोपष्ठो गोपायादिति वा तानु हाग्निर्निचक्रमे तैः संगृह्य रात्रिं प्रविवेश[२]।**

इतिहासानुसारेण दोषावस्तः! दोषा रात्रिस्तस्यामपि वसतीति दोषावास्तोऽग्निः। रात्रौ वसनशील हे गार्हपत्याग्ने हे तथाविधाग्ने! प्रतिदिनं श्रद्धावत्या बुद्ध्या वयं नमस्कारं सम्पादयन्त तव समीपे प्रत्यागच्छामः। संस्कृतभाषा विज्ञानावनिः। तस्मादनेकानि विज्ञानरत्नान्युत्पद्यन्ते प्रकाशन्ते च। तेष्विदमायुर्विज्ञानम्। ''प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते'' इति प्रसिद्धिः। आयुषः विज्ञानमिति आयुर्विज्ञानम्। महर्षिभिः देवैश्च संपादिते आयुर्विज्ञाने प्रयोजनं कियदिति वक्तुं न शक्यते।

कालोऽयं कलिपूर्णः तस्य प्रभावः रोगरूपेण दृश्यते। प्राचीनकाले पुरुषा स्त्रियश्च ये केचन मानवाः आसन् ते न अल्पायुषाः न रुग्णाश्च। अल्पमृत्युदोषोऽपि तदा न दृश्यते स्म। साम्प्रतं बहवो जना अकालमृत्युग्रस्ता दृश्यन्ते। एतस्मात् प्रमादादुद्धर्तुमायुर्वेद एव समर्थः। आयुर्विज्ञानं साम्प्रतमायुर्वेदनाम्ना प्रसिद्धं दृश्यते। आङ्ग्लविद्यामोहिताः भक्ताश्च जनाः आयुर्विज्ञानमूलभूतमायुर्वेदं न स्मरन्ति। बहूनि शास्त्राण्यायुर्वेदं पञ्चमवेद इति कथयन्ति। अस्य शास्त्रस्य प्रादुर्भावकालः– आयुर्विज्ञानं वैदिकवाङ्मयेऽपि संदृश्यते। प्रथमो वैद्य

---

[१] **का०श्रौ० ४.१२.६**

[२] **शु०ब्रा० २.३.४.१-२**

इति। वेदकालादारभ्य अश्विनीदेवते देववैद्यौ इति कथ्यते। धन्वन्तरिरपि देववैद्य इति। सो धन्वन्तरिक्षीरसागरमन्थनसन्दर्भे अमृतभाण्डमादाय उद्भूतः। स एव मूलभूतवैद्य इति वैद्यानां मतम्। क्षुधार्तः उपमन्युः अर्कपत्राणि अभक्षयत्। तस्मादन्धीभूय कूपे पपात। सायंकाले शिष्यमन्वेषयन् गुरुः आश्रममागत्य वृत्तान्तं श्रुत्वा ''अश्विनीकुमारौ देवौ मन्त्रैः स्तुतिविषयौ कुरुत'' इति शिष्यान् जगाद। तदा मन्त्रप्रभावेण तुष्टौ तौ देवविशेषौ तस्मै दृष्टिमदातामिति। यथा-

**मा वो रिषत्खनिता यस्मै चाहं खनामि वः।**
**द्विपाच्चतुष्पादस्माकꣳ सर्वमस्त्वनातुरम्।।**
**ओषधयः समवदन्त सोमेन सह राज्ञा।**
**यस्मै कृणोति ब्राह्मणस्तꣳ राजन्पारयामसि।।**[१]

आयुर्विज्ञानं यशवर्द्धकमायुरक्षकं पौष्टिकञ्च शास्त्रं वर्तते। अस्य शास्त्रस्य प्रभावं लक्ष्यं च ''रोगनिवारणम्'' इति। अतः रोगनिवारणादप्यधिकं ध्यानं भवेत् यद्रोगाः मा भवन्त्विति। वैदिकसंहितासु मानवजीवनानां दीर्घायुत्वाय लतावृक्षवनवनस्पतिनदीप्रभृति- प्राकृतिकानां तत्त्वानां महत्त्वं प्रतिपादितम्। यथा -

**सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः।।**[२]

**तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतꣳ श्रृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्।।**[३]

---

[१] **शु०य०सं० १२.९५-९६**

[२] **शु०य०सं० ३६.२३**

[३] **शु०य०सं० ३६.२४**

योगासनादिभिः शारीरिकमानसिकव्याधीनां निर्मूलनं क्रियते। प्राचीना सर्वे मानवाः योगाभ्यासरता अत एव ते सर्वे निरोगाः आसन्। इदानिं विरला एव योगाभ्यासशिक्षायां रताः वर्तन्ते। मूलिकावैद्यमत्यन्तप्राचनीतमो रोगनिवारकविधिः। तस्याघ्राणेनैव रोगनिवारणं जातम्। आयुर्विज्ञानशास्त्रे रोगपरीक्षका एव रोगनिवारकाः स्वनिर्मिताभिरौषधीभिः रोगान् निवारयन्ति स्म। शरीरस्य लक्षणानि दृष्ट्वैव चिकित्सा अभवत्। स्वरेणैव व्याधिनिर्धारणम्। रोगस्य कारणं वातपित्तश्लेष्मात्मकत्वेन तत्त्वत्रयं वर्तते। तत्त्वानां निर्धारणानन्तरं चिकित्सा भवति। ओषधयोऽपि गुणत्रयात्मकत्वेन वर्तन्ते तेन तद् विपरिणाममनुसृत्य चिकित्सा कर्तव्या। प्राणपरीक्षणार्थं शरीरपोषणार्थं च आयुर्विज्ञानशास्त्रमाविर्बभूव। तद्विधानमायुर्वेदे दृश्यते। रोगपरीक्षाविधाने स्त्रीपुरुषयोर्भेदो नास्ति। धमनीस्पन्दनेन वैद्यः सर्वं जानाति स्म। नाडीपरीक्षया एव गर्भस्थशिशुः बालः कन्या वा इत्यादि ज्ञातुं समर्थः। प्रजापतेरष्टाविंशतिः कन्याः आसन्। ताः सर्वाः पतित्वेन चन्द्रं स्वीकृतवत्यः। चन्द्रः केवलं रोहिण्यामासक्तः। अन्याः सप्तविंशतिः पत्न्यः तेन तिरस्कृताः। ताः सर्वाः पितरं प्रजापतिं जग्मुः। ततः चन्द्रः ताः पत्नीः पुनः अयाचत्। प्रजापतिः कन्याः समर्प्य उवाच। सम्मानेन सर्वाभिः पत्निभिः सह व्यवहर्तव्यम्। चन्द्रः स्वीचकार। पुनः रोहिण्यामासक्तः अन्याः तेन तिरस्कृताः। पुनः सर्वाः पितरं गतवत्यः। कुपितः प्रजापतिः चन्द्रं श्रापं दत्तवान्। त्वं राजयक्ष्मारोगगृहीतो भव। रोगगृहीतः चन्द्रमा प्रजापतिमगच्छत्। क्षमामयाचच्च। पत्न्यर्थं प्रार्थनामपि कृतवान्। प्रजापतिः आशीर्वादं दत्त्वा कन्याभिः सह चन्द्रं स्वस्थं चकार। यथा–

**यक्ष्मारोगोत्पत्तिः –**

**प्रजापतिर्वै सोमाय राज्ञे दुहितृरददान्नक्षत्राणि स रोहिण्यामेवावसत्तान्यनुपेयमानानि पुनरगच्छंस तस्मात् स्त्र्यनुपेयमाना**

**पुनर्गच्छति। तान्यवागच्छत्तानि पुनरयाचत् तान्यस्मै न पुनरददात् सोऽब्रवीत् सर्वेष्वेव समावद्वसाथ ते पुनः दास्यामि इति स रोहिण्यामेवावसतं तस्मिन्ननृतं यक्ष्मोऽगृह्णाच्चद्रमा वै सोमो राजा यद्राजानं यक्ष्मोऽगृह्णात्तद्राजयक्ष्मस्य जन्म। स तृणमिवाशुष्यत् स प्रजापतिः अयाचत सोऽब्रवीत् सर्वेष्वेव समावद्वसाथ त्वातो मोक्ष्यामीति तस्माच्चन्द्रमा सर्वेषु नक्षत्रेषु समावद् वसति।।** [१] **प्रजापतिर्वै हिरण्यगर्भः।।**[२]

ग्रहाणामुपग्रहाणां नक्षणात्रामादित्यानां च निर्मातृत्वात् प्रजापतिरेव पिता। स एव अष्टाविंशतिः नक्षत्राणां पिता प्रजापतिर्हिरण्यगर्भः। अन्यपक्षः सूर्य एव प्रजानामुत्पादकः पालकश्च वर्तते। तेन सः प्रजापतिः कथितः।

**यो ह्येव सविता सप्रजापतिः।।** [३] **प्रजापतिः सविता भूत्वा प्रजा असृजत्।।**[४]

सूर्यस्य प्रकाशः चन्द्रेण सह आगच्छति ततस्सः प्रकाशितो भवति। सोम प्रतिनक्षत्रेषु निवसन् स्वमार्गचक्रं पूरयति। एतदेव प्रजापतेः कन्यासु चन्द्रस्य अभिगमनं वर्तते। अन्यासां नक्षत्राणामपेक्षया रोहिणीनक्षत्रे किञ्चिदधिककालपर्यन्तं निवसति। एषा एव चन्द्रस्य रोहिण्यामासक्तिः। चन्द्रस्य कलानां क्रमशः अपक्षयः एव राजयक्ष्मा तस्य रोगः। अन्येषां बह्वीषु जायास्वमिगमनेन शुक्रस्य क्षयो भवति तेन राजयक्ष्मारोगोऽपि जायते। राजयक्ष्मारोगात् सुरक्षार्थं न सेवनीया परकीयजाया इति।

---

[१] **काठकसंहिता ११.३**

[२] **शतपथब्राह्मणम् ६.२.२.५**

[३] **शतपथब्राह्मणम् १२.३.५.१**

[४] **तैत्तिरीयब्रा० १.६.४.१**

**सविता भूत्वा प्रथमेऽहन् प्रवृज्यते तेन कामा इति यत् द्वितीयेऽहन् प्रवृज्यतेऽग्निर्भूत्वा देवानेति यत् तृतीयेऽहन् प्रवृज्यते वायुर्भूत्वा प्राप्नोति यच्चतुर्थेऽहन् प्रवृज्यते आदित्यो भूत्वा रश्मीनेति यत् पञ्चमेऽहन् प्रवृज्यते चन्द्रमा भूत्वा नक्षत्राण्येति यत् षष्ठेऽहन् प्रवृज्यते ऋतुर्भूत्वा सम्वत्सरमेति। प्रजापतिर्वा एष द्वादशधा विहितः॥**[१]

**क्षेत्रियरोगनाशनम्** -

एते द्वे द्युलोके देदिप्यमाने ''विचृतौ'' नामके आकाशमण्डले वर्तमाने तारके इह लोकस्य परलोकस्य च वर्द्धके (क्षेत्रिय) नामकरोगस्य विनाशके वर्तेते। अनयोर्द्वयोर्नक्षत्रयोः ''विचृतौ'' आकाशे वर्तमानयोः सत्योः तथा च रात्र्यां उषः काले आगते सति जलस्नानेन क्षेत्रियरोगेभ्यो निवृत्तिः, एतयोर्नाम ''विचृतौ। यथा-

**अमी ये सुभगे दिवि विचृतौ नाम तारके।**
**प्रेहामृतस्य यच्छतामेतत् वर्द्धक मोचनम्॥**[२]

**उन्मादरोगः**

मनस उद्भ्रान्तावस्थायाः नाम उन्मादरोगः

**गन्धर्वाप्सरसो वाएतं उन्मादयन्ति य उन्मादयति॥**[३]

गन्धर्वा अप्सरसश्च कृमयः पुरुषमुन्मादयुक्तं कुर्वन्ति।

**सर्वाङ्गसुन्दरबालकस्य जननम्**

[१] **तै०आ० ५.११.६**

[२] **तै०आ० २.६.१**

[३] **तै०सं० ३.४.८.४**

सर्वाङ्गसुन्दरं स्वस्थं च शिशुं जनयितुं गर्भाशयस्यापि स्वस्थतायाः स्वच्छतायाश्चावश्यकता वर्तते। यथा–

**यस्ये ते यज्ञियो गर्भो यस्यै योनिर्हिरण्ययो।**
**अङ्गान्यह्रुता यस्य तं मात्रा समजीगमꣳ स्वाहा॥**[1]

**शतायुःपर्यन्तजीवनम्**

गर्भस्थशिशुः स्वस्थो भूयात्!, सः शतवर्षपर्यन्तं जीवनधारको भूयात्! तर्हि गर्भवती माता गर्भकाले क्रोधं परुषवचनं च त्यजेत् यस्य कस्यापि चापमानमभिमानं च त्यजेत्। सर्वदा प्रसन्नतया तिष्ठेत्।

**आदित्यं गर्भं पयसा समङ्ग्धि सहस्रस्य प्रतिमां विश्वरूपम्।**
**परिवृङ्ग्धि हरसा माभिमꣳ स्थाः शतायुषं कृणुहि चीयमानः॥**[2]

पाचितेषु भोजनेषूच्छिष्टेषु पात्रेषु च संलग्ना विषधारकाः नानाजीवाः सर्पवृश्चिकमशककीटपतंगप्रभृतयः कृमयः जीवाणवश्च भोजनैः पानीयैश्च पदार्थैः सह संलिप्ता भूत्वा भोजनं पानं च सविषं विषपूर्णं वा विदधति। येन नानाविधाः रोगाः शरीरेषु जायन्ते। शरीराणि मृत्युं च भजन्ति।

**येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्।**
**तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥**[3]

अत्र आयुर्विज्ञानस्य शल्यचिकित्सायाश्च पर्याप्तो विकासोऽस्ति। रोगाणामुत्पत्तिकारणानि निदानोपायाश्च दर्शिताः। आहारविहारमनोव्यापारत्रयाणां समन्वयः जीवने आवश्यकं वर्तते। शयनं जागरणं शक्त्यनुसारं देशकालानुसारवस्त्रपरिधानव्यायामौचित्यादीनां

---

[1] **शु०य०सं० ८.२९**

[2] **शु०य०सं० १३.४१**

[3] **शु०य०सं० १६.६२**

प्रवृत्तीनां समन्वयः जीवने आवश्यको भवति। जीवनपद्धतिः मनोव्यापारः मन एव मनुष्याणां बन्धमोक्षस्य कारणमिति न्यायेन आचरणशुद्धिः जीवने अपेक्षिता।

**अवपतन्तीरवदन्दिव ओषधयस्परि।**
**यं जीवमश्नवामहै न स रिष्याति पूरुषः॥**

**या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः।**
**तासामसि त्वमुत्तमारं कामाय शꣳ हृदे॥**

**या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु।**
**बृहस्पतिप्रसूता अस्यै सन्दत्त वीर्यम्॥**[१]

प्रविधेरभिवृद्धिर्यथा प्रतिदिनं जायमाना वर्तते तथैव तं प्रविधिमाश्रित्य नूतनानि तथ्यान्याविष्क्रियन्ते। शरीरसंरचना शास्त्रस्याभिवृद्धिरपि प्रविधिशास्त्रेणोपस्क्रियते। शरीरसंरचना अनुपमा या विज्ञानिनामाधुनिकानामपि विस्मयावहा स्यात्। शरीरसंरचनातत्त्वस्य वैज्ञानिकपक्षमवलम्ब्यात्रयजुर्वेदे किं चिन्तनमासीत्। तथ्यमिदं यथाशास्त्रं यथाधीतं प्रकाशितं वर्तते।

एतद् सर्वविदितं तथ्यं वर्तते यत् भारतीयाः तत्त्वज्ञाः ऋषयः प्रायः सर्वेषु क्षेत्रेषु बहुचिन्तनं कृतवन्तः। यादृशं चिन्तमत्र भारते प्रवृत्तं तादृशं चिन्तनमन्यत्र जगति कुत्रापि न दृश्यते। मानवजीवनमेवाधारीकृत्य ज्ञानविज्ञानयोरुपयोगः दृश्यते।

मानवजीवनं यदा रोगरहितस्वस्थञ्च भवति तदा एव सर्वमेव जागतिकमाध्यात्मिकञ्च कार्यं सम्पादयितुं समर्थं भवति। एतस्य कृते आयुर्विज्ञानशास्त्रं चिकित्साविज्ञानशास्त्रं च साधनमस्ति।

---

[१] **शु०य०सं० १३.९१-९३**

अस्मामकमायुर्विज्ञानशास्त्रे सर्वेषां प्राणिनां हितकरोपदेशा वर्णिताः सन्ति। साम्प्रतमध्येतव्याः अनुकरणीयाश्च सन्ति।

**हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्।**
**मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते।।**[1]

साम्प्रतिके काले प्राणायामः अतिमहत्त्वपूर्णः दृश्यते। यत्र तत्र चायुर्विज्ञानशास्त्रे निर्दिष्टो वर्तते।

**चले वाते चलं चित्तं निश्चले निश्चलं भवेत्।**
**योगी स्थाणुत्वमाप्नोति ततो वायुं निरोधयेत्।।**[2]

प्राणवायोः चलायमानत्वेन चित्तमपि चलायमानं भवति। प्राणवायोः निश्चलायमानत्वेन निश्चलत्वमापद्यते। प्राणवायोः चित्तस्य च द्वयोः निश्चलत्वेन योगिनः स्थाणुत्वमासाद्य दीर्घजीविनः आसन्निति।

**दीर्घजीवनोपायः**

य स्वप्रकृत्यनुकूलं ऋत्वनुकूलं च सीमिताहारभोक्ता ऋत्वनुकूलवस्त्रधारयिता, सम्यक् सद् विचार्य निखिलकार्यकर्ता, सत्पात्रदानकर्ता, मनसा वचसा कर्मणा च सत्पथानुरागी ज्ञानिनां सज्जनानाञ्च संगतिकर्ता, उद्विग्नतारहितः क्षमाशीलः स्वस्थः निरोगः सः शतवर्षपर्यन्तं जीवति च वर्तते।

**भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।**
**स्थिरैरङ्गैस्तुष्टुवाꣳ सस्तनूभिर्व्यशेमहि देवहितं यदायुः।।**
**शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम्।**
**पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः।।**[1]

---

[1] **चरकसूत्रम् १.४०**

[2] **योगशास्त्रम्**

प्राकृतिकवातावरणस्य दुरुपयोगैः उत्पन्नस्वास्थ्यसमस्यानां प्राकृतिकौषधिनिदानमे- वायुर्विज्ञानशास्त्रम्। वैदिककालत आधुनिककालपर्यन्तं मानवाः स्वस्वास्थ्यं प्रति सचेताः जागृताश्च वर्तन्ते। प्रारम्भकालात् अद्यावधिं यावत् विविधानि वैज्ञानिकानि वर्त्मानि आविष्कृतवन्तः। स्वास्थ्यरक्षणाय नानाविधाः चिकित्सापद्धतयश्च प्रचलिताश्च सन्ति।

वैदिककाले लताविशेषः सोम आसीत्। श्रौतयज्ञसंपादने अस्य बहुशः प्रयोगः पुराणेषु दृश्यते। अस्य रसं वस्त्रेण गलितं कृत्वा द्रोणप्रभृतिपात्रेषु स्थापितं कृतवान्।

यज्ञावशिष्टस्य रसस्य पानेन शरीरेषु कान्तिः ओजः बलं वीर्यस्य च वृद्धिरभवत्। घृतमिश्रितं मधुमिश्रितं कृत्वा स्वादिष्टं विधाय जनाः पीत्वा बलिनः अभवन्। पानेन जनाः शतायुषः भवन्ति स्म, तेषां शरीरेषु अग्निजलविषशस्त्रास्त्राणां च प्रभावः नाभवत्। आगच्छति बलवीर्यवर्धकोऽयं सोमरस इति।

**सोममद्भ्यो व्यपिबच्छन्दसा ह꣡ꣳ सः शुचिषत्। ऋतेन सत्यमिन्द्रियम्०**[२]

**सोमस्य त्वा द्युम्नेनाभिषिञ्चाम्यग्नेर्भ्राजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेण। क्षत्राणां क्षत्रपतिरेध्यति दिद्यून्पाहि॥**[३]

**सोमस्य रूपं क्रीतस्य परिश्रुत्परिषिच्यते।**
**अश्विभ्यां दुग्धं भेषजमिन्द्रायैन्द्रꣳ सरस्वत्या॥**[४]

---

[१] **शु०य०सं० २५.२१-२२**

[२] **शु०य० १९.७४**

[३] **शु०य० १०.१७**

[४] **शु०य० १९.१५**

विशिष्टौषधिरसेन पयसा मधुघृतादिना वा सिक्ताः पादपाः तद्गुणान् धारयन्ति। आधुनिकवनस्पतिविज्ञानेऽपि विशिष्टरसायनप्रयोगेणैव वनस्पतीनां गुणाः परिवर्त्यन्ते परिवर्द्ध्यन्ते च। पुत्रवत्सला श्रुतिर्वदति– **संवपामि समाप ओषधीभिः समोषधयो रसेन॥**[1]

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे आयुर्विज्ञानम्'** नाम चतुर्विंशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

[1] **शु०य० १.२१**

# अथ पञ्चविंशोऽध्यायः
# यजुर्वेदे ज्योतिर्विज्ञानम्

वेदार्थज्ञानं विना भारतीयविज्ञानवैशिष्ट्यं ज्ञातुं न शक्यते। ज्योतिर्विज्ञानं वेदाङ्गेषु परिगण्यते। यत्र वेदाङ्गत्वेन प्राचीनत्वं दृश्यते। तत्रैव वर्तमानलोकजीवने ज्योतिर्माध्यमेन स्वकार्यसाधनार्थमद्यापि प्राचीनता प्रमाणीक्रियते। वेदेषु ज्योतिर्विज्ञानशास्त्रस्य मूलभूतं बीजं सन्निहितमस्ति। ज्ञानोत्पादकं प्रकाशोत्पादकञ्च विवरणमुपलभ्यते। ज्योतिर्विज्ञानेन यज्ञानां कालनिर्धारणं भवति। यज्ञाः सुष्ठु काले कृता एव सफला भवन्ति। अशुभकाले कृतं कर्म निष्फलं ज्ञेयम्। वेदाङ्गस्य स्वरूपनिदर्शनपूर्वकं ज्योतिषः श्रेष्ठत्वं प्रोक्तमस्ति। इदं शास्त्रं मूर्ध्नि स्थितमेवास्ति। विशेषतः ज्योतिर्विज्ञानं ग्रहनक्षत्राण्यधिकृत्य कृतो ग्रन्थः, येन तमसि स्थितपदार्थानां ज्ञानं दीपमाध्यमेन भवति तथैव ज्योतिर्माध्यमेन प्राक्जन्मार्जितकर्मणः प्रभावः कालज्ञापकेनैव शास्त्रेण ज्ञायते। ज्योतिर्विज्ञानं विद्यास्वर्थकरीविद्यारूपेण परिगण्यते। परन्त्वत्रार्थातिरिक्ता बहवः पक्षाः विचारणीयाः सन्ति।

ज्योतिर्विज्ञाने कालमानपुरःसरं संवत्सरमासाऽहोरात्रादीनां तथा च पूर्णिमाऽष्टमीसहितानां तिथीनां वर्णनं प्राप्यते। एवमेव नक्षत्राणां चन्द्रेण सह सम्वत्सराणां नक्षत्रेण ऋतूनां सम्वत्सरेण तथा मासानां ऋतुभिः सह सम्बन्धः प्रतिपादितो वर्तते। तैत्तिरीयब्राह्मणे नक्षत्राणामुल्लेखः स्पष्टतया लभ्यते। यत्रेदं शास्त्रं यज्ञविधानं वर्णयति तत्रैव मानवस्य मार्गनिर्देशकत्वेन स्पष्टोद्देश्यमपि। एतच्छास्त्रं वेदस्य निर्मलचक्षुः, यज्ञार्थं शुभकालज्ञानमावश्यकं वर्तते। ज्योतिर्विज्ञानस्य प्रयोगः यज्ञसम्पादनाय कालगणार्थमस्ति। यथा–

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालाभिपूर्वा विहिताश्च यज्ञाः।**
**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञम्॥**[१]

ज्योतिर्विज्ञानस्य सर्वाणि विषयाणि वेदेषु सन्ति। यथा– **कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः॥**[२]

समाशब्दः वर्षवाचकः। एकस्मिन् वर्षे द्वादशमासाः सन्ति।

**मासनामानि -**

**मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषश्चोर्जश्च सहश्च सहस्यश्च। तपश्च तपस्यश्चोपयामगृहीतोऽसि सँ सर्पोऽस्यँ हस्पत्याय त्वा॥**[३]

मधुः, चैत्रः, माधवः, वैशाखः, शुक्रः, ज्येष्ठः, शुचिः, आषाढः, नभः, श्रावणः, नभस्यः, भाद्रपदः, इषः, आश्विनः, उर्जः, कार्तिकः, सहः, मार्गशीर्षः, सहस्यः, पौषः, तपः, माघः, तपस्यः, फाल्गुनः इमानि द्वादशमासनामानि सन्ति। संसर्पः अधिमासश्च वर्तते।

अहंस्पतिः– क्षयमासः वर्तते। यदा कदा समागच्छति। सूर्यः षट्मासपर्यन्तमुत्तरायणे षट्मासपर्यन्तं दक्षिणायने च तिष्ठति। माघः फाल्गुनः चैत्रः वैशाखः ज्येष्ठः आषाढः उत्तरायणस्य मासाः सन्ति। श्रावणः भाद्रपदः आश्विनः कार्त्तिकः मार्गशीर्षः पौषः दक्षिणायनस्य मासाः सन्ति। उत्तरायणस्य दक्षिणायनस्य चोल्लेखः तैत्तिरीयसंहितायां वर्तते।

**तस्मादित्यः षण्मासो दक्षिणायने षडुत्तरेण॥**[४]

---

[१] **वेदाङ्गज्यौतिषम्**

[२] **शु०य०सं० ४०.२**

[३] **तै०सं० १.४.१४**

[४] **तै०सं० ६.५.३**

ऋतूनां कारणं सूर्यः। ऋतुगमनं कृत्वा पृथिव्याः पूर्वादिदिशां निर्माणं करोति भगवान् भाष्करः। वेदेषु षण्णामृतूनां निर्देशः दृश्यते। वसन्तर्तूनां मुखं वर्तते। तस्य ते वसन्तः शिरः ग्रीष्मो दक्षिणपक्षः, वर्षा पुच्छम्, शरदुत्तरः पक्षः, हेमन्तो मध्यमः।[1] हेमन्तशिशिरयोः समासेन वेदे पंचर्तूनां वर्णनमस्ति। हेमस्य शिशिरस्य च चत्वारः मासाः शीतप्रधानाः सन्त्यतः पंचर्तवः वर्तन्ते।

पक्षः– तैत्तिरीयब्राह्मणे शुक्लकृष्णपक्षयोः दिनानां रात्रीणां च वर्णनं वर्तते। **सज्ञानं विज्ञानं दर्शा दृष्टेति।** एतावनुवाकौ पूर्वपक्षस्याहोरात्राणां नामधेयानि। प्रस्तुतं विष्टुत्सुतौ सुन्वतीति।। एतावानुवाकावपरपक्षस्याहोरात्राणां नामधेयानि।[2] यस्यां चन्द्रः उदेति एवं यस्यामस्तं गच्छति सा तिथिः वर्तते। चन्द्रमा वै पञ्चदश। एष हि पञ्चदश्या क्षीयते। पञ्चदश्यामापूर्यते।।[3] पञ्चदश्यां चन्द्रः क्षीणः यस्यां पञ्चदश्यां क्षीणः सा अमावस्या, यस्यां पञ्चदश्यां पूर्णो भवति सा पौर्णमासी तिथिः। दिनान्यपि भवन्ति यथा–

**आदिप्रत्नस्य रेतसो ज्योतिष्पश्यन्ति वासरम्। परो यदिध्यते दिवा।।**[4]

सूर्यः यदा प्रकाशते तत् दिनम्। यदा न प्रकाशते सा रात्रिः। दिवसस्य रात्रेश्च पञ्चदश पञ्चदश मुहूर्ताः सन्ति। यथा–

**अथ यदाह चित्रः केतु दाता प्रदाता सविता प्रसविताभिशास्तानुमन्तेति। एष एव तत्। एष ह्येव ते मुहूर्ताः।।**[5]

**मुहूर्तानां नामानि–**

---

[1] **तै०ब्रा० ३.१०.४.९**

[2] **तै०ब्रा० ३.१०.१०.२**

[3] **तै०ब्रा० १.५.१०**

[4] **ऋ०सं० ८.६.३०**

[5] **तै०ब्रा० ३.१०.९**

**दाता प्रदाता नन्दो मोदः। आवेश यन्निवेशयन् संवेशनः। संशान्तः शान्तः आभवान् प्रभवन् सम्भवन् सम्भूतो भूतः॥**[1]

प्रत्येके मुहूर्ते तु पंचदश सूक्ष्मा मुहूर्ताः सन्ति। यथा– **अथ यदाह। इदानीं तदानीमिति। एष एव तत्। एष ह्येव ते मुहूर्तानां मुहूर्ताः॥**[2]

निरुक्तकारः यास्कः नक्षत्रशब्दस्य निर्वचनं कुर्वन्नाह– नक्षत्राणि नक्षत्रेर्गतिकर्मणः।

**सलिवं वा इदमन्तरासीत्। यदेतान्। तत्तारकाणां तारकत्वम्, यो ह वा इह यजते। अमुं स लोकं नक्षत्रे। तन्नक्षत्राणां नक्षत्रत्वम्। देवगृहा वै नक्षत्राणि। य एवं वेद। गृह्येव भवति। यानि वा इमानि पृथिव्याश्चित्राणि। तानि नक्षत्राणि। तस्मादश्लीलनामश्चित्रे नावस्येन्न यथा पापाहे कुरुते। तादृगेव तत्॥**[3]

मध्ये जलमेवासीत्। तां तर्तुं कामनायै तारकाणां तारकत्वम्। य यत्र यजते स देवलोकं याति। अतः नक्षत्राणां नक्षत्रत्वम्। नक्षत्राणि देवानां गृहाणि सन्ति। यः एतादृशं जानाति। स गृहवान् गृहस्वामी वा भवति। यानि इमानि भूचित्राणि तानि सर्वाणि नक्षत्राणि सन्ति। तेषु देवकार्याणि यज्ञानि वा न कुर्यात्। यदि कुर्यात् तदाशुभानि भवन्ति, पापपूर्णानि वा भवन्ति। शुभे मुहूर्ते निखिलानि कार्याणि कर्तव्यानि। तैत्तिरीयसंहितायां नक्षत्राणामुल्लेखः तेषां स्वामिभिः सह वर्तते। यथा –

**कृत्तिकानक्षत्रमग्निर्देवताग्नेरुचस्थ प्रजापतेर्धातुः सोमस्यर्चे त्वा रुचे त्वा मासे त्वा ज्योतिषे त्वा रोहिणी नक्षत्रं प्रजापतिर्देवता मृगशीर्षं नक्षत्रं सोमो देवतार्द्रानक्षत्रं रुद्रो देवता पुनर्वसुनक्षत्रमदितिर्देवता तिष्यो नक्षत्रं बृहस्पतिर्देवताश्लेषानक्षत्रं सर्पादेवता मघानक्षत्रं पितरो**

---

[1] **तै०ब्रा० ३.१०.१.५**

[2] **तै०ब्रा० ३.१०.९.९**

[3] **तै०ब्रा० १.५.२**

**देवता फाल्गुनीनक्षत्रमर्यमादेवता उत्तराफाल्गुनीनक्षत्रं भर्गो देवता हस्तो नक्षत्रं सविता देवता चित्रानक्षत्रमिन्द्रो देवता स्वातीनक्षत्रं वायुर्देवता विशाखे नक्षत्रमिन्द्राग्नी देवतानुराधानक्षत्रं मित्रो देवता ज्येष्ठानक्षत्रमिन्द्रो देवता विचृतौ नक्षत्रं पितरो देवताषाढा नक्षत्रमापो देवताषाढानक्षत्रं विश्वेदेवा देवता श्रोणा नक्षत्रं विष्णुर्देवता श्रविष्ठा नक्षत्रं वसवो देवता शतभिषड्नक्षत्रमिन्द्रो देवता प्रोष्ठपदा नक्षत्रमज एकपाद्देवता प्रोष्ठपदा नक्षत्रमहिर्बुध्नियो देवता रेवतीनक्षत्रं पूषादेवता अश्वयुजौ नक्षत्रमश्विनौ देवता परभरणीनक्षत्रं यमो देवतापूर्णापश्चाद्यते देवा आददुः॥**[१]

मन्त्रज्योतिषदृष्ट्या नक्षत्राणामपि संकेतः प्राप्यते। सम्पूर्णाऽऽकाशमण्डलं ३६० अंशेषु कल्पितः वर्तते। ३० अंशान्येकराशिः तथा १३ अंशानां २० कलानामेकनक्षत्रमस्ति। २७ अथवा २८ नक्षत्राणां चतुर्थांशः ९० अंशानामस्ति यत् ७ नक्षत्रोपरि भवति। सर्वेषु नक्षत्रेषु मध्यभागः १४ नक्षत्रं चित्रा अस्ति। यस्य स्वामी इन्द्रः तथा तस्य सम्मुखे रेवती नक्षत्रं वर्तते। यस्य स्वामी पूषा वर्तते। द्वयोर्भागयोः चतुर्थांशं श्रवणनक्षत्रं पुष्यनक्षत्रं च वर्तते। ययोः स्वामी - प्रथमस्य नक्षत्रश्रवणस्य स्वामी विष्णुः वर्तते तथा द्वितीयभागस्य चतुर्थांशस्य पुष्यनक्षत्रस्य स्वामी बृहस्पतिः वर्तते। अतः अस्य नक्षत्रस्य माध्यमेन चतुर्नक्षत्राणां स्वामिनां वर्णनं मिलति। तत्र मन्त्रः निम्नलिखितो विचारणीयः-

**स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।**
**स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥**[२]

---

[१] **तै०सं० ४.४.१०**

[२] **य०वे०सं० २५.१९**

प्रायः अयम् मन्त्रः पठन् याज्ञिकाः यजमानायाशिषः ददति मन्त्रमाध्यमेन चतुर्णां देवानां आशीर्वादकर्मणि सहायकत्वं भविष्यतीति। वैदिककाले सप्तर्षयः कक्षा अपि उच्यन्ते।

**उर्ध्वसप्तऋषीनुपनिष्ठस्व।।**[१]
**सप्तर्षानु ह स्म वै पुरर्क्षा इत्याचक्षते।।**[२]
**ऋतवो ह वै देवेषु यज्ञे भागमीषिरे।।**[३]

अत्र ऋतुशब्दस्य प्रयोगः दृश्यते। ससृजानस्य प्रजापतेः शरीरस्य सन्धयः शिथिलाः जाताः। सम्वत्सरः प्रजापतिः। दिनानि रात्राणि अमावस्या पूर्णमासी प्रत्येकस्य ऋतोरारम्भकालः तस्य शरीरस्यावयवाः (सन्धयः ) सन्ति।

**प्रजापतेर्ह वै प्रजाः ससृजानस्य। पर्वाणि व्विसस्रᳪ सुः स वै संव्वत्सरऽएव प्रजापतिस्तस्यैतानि पर्वाण्यहोरात्रयोः सन्धी पौर्णमासी चामावस्या चऽर्त्तुमुखानि।।**[४]

पुरा हि सृष्टिकाले ससृजानस्य प्रजापतेः शरीरस्य अवयवानि शिथिलानि जातानि। सम्वत्सर एव प्रजापतिः दिनानि रात्राणि पौर्णमासीः अमावस्या ऋतोः आरम्भकालश्च तस्य शरीरस्यावयवाः सन्ति। अत्र सम्वत्सरदिनरात्र्यृतूनां च प्रयोगः दृश्यते। सूर्यादिनवग्रहाणां मन्त्राः वैदिककालतः अद्यावधिपर्यन्तं ग्रहशान्तिप्रभृतिपुस्तकेषूपलब्धाः सन्ति। तेषां प्रयोगाः दृश्यन्ते। नवग्रहाणामुल्लेख एतेषां ग्रहाणां वर्तते। उपर्युक्तविवरणेन वैदिककाले ज्योतिर्विज्ञानं स्वकीयं स्वरूपं जग्राह। एतद्विज्ञानं वेदाङ्गरूपेण स्वस्थानं जग्राह –

---

[१] **ता०ब्रा०१.५.५**

[२] **श०ब्रा० २.१.२.४**

[३] **श०ब्रा० १.४.५.५**

[४] **श०ब्रा० १.५.६.३.३५**

**अद्‌भ्यः संभृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे।**
**तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे॥**[१]

विश्वात्मनः विश्वस्मिन् विश्वे व्यापकत्वात् चराचरसृष्टेरुत्पत्तिस्थितिलयक्रमः सनातनरूपेण सततं संसरत्येव। न केवलं प्राणिन एवापितु इन्द्राद्याः सकलाः देवा अपि क्षीणे पुण्ये मर्त्यलोकं विशन्ति। तदनन्तरं धाता यथापूर्वमकल्पयदिति सिद्धान्तमनुसृत्य जीवोऽत्युग्रपुण्यपापानामिहैव फलमश्नुते। विचित्रोऽयं क्रमः पुराणेष्वपि बहुत्र निर्दिष्टो वर्तते। प्राणिनां जननमरणादिकं यथा भवति तथैव स्थावराणां जंगमानामपि विलक्षणगतिक्रमः भागवतादिषु पठ्यतेऽस्माभिः। अद्य च जडचेतनानामुत्पत्तिविनाशादिकं तेषां कार्यानुसारि एव भवति। कर्मणां फलप्रदानमपि भगवदधीनमेव। पुनः पुनः जननमरणादिकर्म निरन्तरं प्रचलति। सुखदुःखोपभोगादिकं सुनियतमस्ति। भगवतः विचित्रमायाक्रमस्यास्य भूतभविष्यद्वर्तमानादिकमखिलमृषिप्रवरैः पूर्वमेव वैदिकवाङ्मये सुनिबद्धम्। प्रमुखं वेदाङ्गं ज्योतिर्विज्ञानमेव। विश्वज्ञानं कालज्ञानं गतिज्ञानं क्रियाज्ञानं परिणामज्ञानं च दृश्यते। यथा–

**सहमानाय निव्याधिन आव्याधिनीनां पतये नमः।**[२]
**इमा रुद्राय तवसे पर्दिने क्षयद्वीराय प्रभरामहे मतीः।**
**यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्॥**[३]

**सर्वेषां स्थावरजङ्गमशकलजीवनिकायानां रोगा नश्यन्तु सर्वे पुष्टत्वं लभेयुः। जगतः आतुरता विनश्यतु॥ शतं जीवन्तु शरदः**

---

[१] **शु०य० ३१.१७**

[२] **शु०य०सं० १६.२०**

[३] **शु०य०सं० १६.४८**

**सुरुचीस्तिरोमृत्युं दद्महे पर्वतेन। इमा नारीरविधवारसु पत्नीरञ्जनेन सर्पिषा संमृशन्ताम्॥**[1]

मृत्युरुपलक्षणमस्माकं पार्श्वे मा आगच्छतु। स्त्रियः विधवा मा भवन्तु। शुद्धाहारविहारादिभिः परिपूर्णा भवेम। निरोगाः दुःखरहिताश्च भवेम। अस्माकं शत्रवः नश्यन्तु। वयं सुखिनः भवेम।

**अप नश्शोशुचदघमग्ने शुशुद्धया रयिम्। अप न श्शोशुचदघं सुक्षेत्रिया सुगातुया वसूया च यजामहे। अपनशोशुचदघं प्रयद् भन्दिष्ठ एषां प्रास्माकासश्च सूरयः। अदनश्शोशुचदघम्। प्रयदग्नेस्सहस्वतो विश्वतो यन्ति सूरयः। अप नश्शोशुदघम्। प्रयत्ते अग्ने सूरयो जायेमहि प्र ते प्र ते वयम्। अप नश्शोशुचदघम्॥**[2] वयं सुखिनो भवेम।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे ज्योतिर्विज्ञानम्'** नाम पञ्चविंशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

---

[1] **तै०आ० ४.१०.२४**

[2] **तै०आ० ४.१०.२५**

# अथ षड्विंशोऽध्यायः
# वैश्विकदृष्ट्या यजुर्वेदे वैज्ञानिकपरिकल्पनायाः समीक्षणम्

यजुर्वेद एवात्र विचारविषयः। विविधानामन्यविज्ञानामिव भौतिकविज्ञानस्यापि प्राचीनभारते पूर्णविकास आसीत्। दुःखस्य क्षोभस्य चापि विषयो यत् सम्प्रति भारतीयविज्ञानस्योपर्यपेक्षितं ध्यानं न दीयते। एवं प्रतीयते यत् पाश्चात्यविज्ञानं पूर्णतया विकासप्राप्तमस्ति। तत्तुलनया भारतीयप्राचीनवाङ्मये निहितस्य विज्ञानस्य अद्य काप्युपयोगिता नास्तीति भ्रान्तिः। किन्तु एषा भ्रान्ता धारणा नूनमेव अपगता भविष्यति यद्यस्माभिः प्रयत्नपूर्वकं प्राचीनभारतीयविज्ञानविषयेऽन्वेषणदृष्ट्या किञ्चित् कर्तुं केचन प्रकल्पाः प्रकल्प्येरन्।

पाश्चात्यविज्ञानविषये पूर्वाग्रहं परित्यज्य विचारेण स्पष्टं परिज्ञायते यत् तेषां सर्वोपरि शोधविधिः बहुमूल्येषु यन्त्रेषु अन्यासु शोधसामग्रीषु निहितो विद्यते। अत्र बाह्यसंसाधनापेक्षा अतितरां विद्यते। विज्ञानविदपेक्षयाधिकं महत्त्वं यन्त्राणां तत्प्रयोगविधेश्चास्ति। प्राचीनभारतीयविज्ञानेषु नैषा स्थितिः, अत्र ज्ञानस्य प्रयोगस्य च मध्ये अविच्छेद्यः सहजश्च सम्बन्धो वर्तते। बहुमूल्यसाधनानां यन्त्राणां काप्यपेक्षा नास्ति। प्रयोगशालापि नापेक्ष्यते प्राचीनभारतीयविज्ञानानि यन्त्राधारितानि नासन्। अपि तु प्रकृतेः सहजसुलभान् पदार्थान् स्वकीयज्ञानोपकरणविषयीभूतान् निर्धाय भारतीयविज्ञानविदः स्वचिन्तितस्य साधनासमुद्भूतस्य निष्कर्षान् लोकसमक्षं प्रस्तोतुं सहजतया प्रयोगपरा बभूवुः। अत एव भारतीयवैज्ञानिकानां कृते प्रयोगशालारूपेण सेयमनन्तानन्तसामग्रीसम्भरणशीला वसुन्धरा संलग्ननक्षत्रतारादिभिः

समलङ्कृतमन्तरिक्षमुभयोर्मध्ये पक्षुपशिरूपाः चराः पर्वतादिरूपाः अचरा एव आसन्।

प्राचीनभारतीयविज्ञानेष्वन्यतमं भौतिकविज्ञानमेव विशेषरूपेण विवेचनविषयोऽस्ति। प्रसङ्गतः तत्सम्बन्धितान्यविषया अपि यथावसरं विवेचिताः सन्ति। सृष्टिप्रक्रियायां सर्वप्रथमं जलतत्त्वस्यैवोत्पत्तिरभूत्। जलतत्त्वादाकाशः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी। सृष्टेरेव क्रमः विविधेषु शास्त्रेषु निद्रिष्टोऽस्ति।[1] ज्ञाने विज्ञानमुपलभ्यते। न हि विनेया एकपद एवास्य बहुधा विभिन्नस्य जगतो मूलमेव ग्राहयितुं शक्ताः। विज्ञानसाहाय्येन तु शक्ताः। अतिमहतो वृक्षस्यातिलघुबीजात्मकतां तस्य प्ररोहादिक्रमेण नानारूपता निदर्शनपुरस्सरमेव कथञ्चित् ग्राहयितुं शक्ताः। नास्त्युपायान्तरम्।।

यजुर्वेदः जीवनमान्दोलितं कारयितुं विज्ञानकोषोऽस्ति। "विशेषभावानुगतं विशेषभावाभिन्नं विविधं ज्ञानमेव विज्ञानम्" इति विज्ञानशब्दस्य लक्षणम्। विज्ञानशब्दस्य "वि" "ज्ञानम्" इति द्वौ विभागौ सर्वविदितौ। व्युपसर्गस्य विशेषः, विविधः, विरुद्ध इति त्रयोऽर्थाः भवन्ति। यथा व्युपसर्गयुक्तस्य विकर्मशब्दस्य विशेषकर्म, विविधकर्म तथा विरुद्धकर्म इति त्रयोऽर्थाः भवन्ति, अर्थस्तु यथाप्रकरणं ज्ञातव्यम्। अनया दृष्ट्या विज्ञानशब्दस्यापि त्रयोऽर्थाः सम्भाविताः भवन्ति, येषां लक्षणं निम्नरूपेण कर्तुं शक्यते– **विशेषं ज्ञानं विज्ञानम्, विविधं ज्ञानं विज्ञानम्, विरुद्धं ज्ञानं विज्ञानञ्च।**

एकं ज्ञानं ज्ञानमेवं विविधं ज्ञानं विज्ञानम्। भारतराष्ट्रस्य यस्याः ऋषिप्रज्ञाया अखण्डज्ञानप्रतिष्ठाया आधारेण सृष्टिस्वरूपसंरक्षकेण लोकाभ्युदयप्रवर्तकेन समस्तैश्वर्यसंसाधकेन सर्वप्रथमं यं विज्ञानसूर्यमभिव्यक्तीकर्तुं महान् गौरवः प्राप्तः आसीत् तस्याः

---

[1] **तैत्तिरीयोपनिषद् २.१**

ऋषिप्रज्ञाया: दायादभोगकर्तु: वर्तमानभारतराष्ट्रस्यास्तिकप्रज्ञा विज्ञानशब्दश्रवणमात्रेणापि अद्य उन्मुग्धा भवति। पाश्चात्यवैज्ञानिकाद् बहुकालपूर्वमेव ब्रह्माण्डस्य विषये अस्माकं वैदिकै: ऋषिभि:, मुनिभि: बहु कथितमासीत्। महाभारतस्य युद्धे येषां शस्त्राणां प्रयोग उक्त:, सोऽपि विज्ञानद्वारैव प्रदत्त आसीत्। महाभारते दिव्यदृष्टे: कथा विज्ञानमेवासीत्। ज्योतिर्विद्भि: सहस्त्रवर्षाणां तिथय:, सूर्यग्रहणचन्द्रग्रहणयोर्विषये च स्पष्टरूपेण उल्लिखितमासीत्, अद्य तदेव सर्वं सत्यं प्रतिभाति। सौरमण्डलस्य अर्थादाकाशगङ्गाया: ज्ञानं सर्वप्रथमं भारतवर्षेणैव विश्वे प्रदत्तमासीत्।

मूलब्रह्मज्ञानेन साकं विज्ञानशब्दस्य विशिष्टभावसूचक: व्युपसर्गसम्बन्धोऽस्ति। उपसर्गाधारेणैव क्षरब्रह्मात्मसापेक्षज्ञानमेव "विशिष्टं ज्ञानं विज्ञानम्" इति प्रथमलक्षणानुसारेण विज्ञानशब्दात् व्यवहृतं भवति। एतद्विज्ञानं कीदृशम्? अनन्तविश्वविकाराणां स्वरूपेण प्रतिक्षणमुत्पाद्यमानं सदपि स्वस्वरूपेण सर्वथा नित्यम्, अत एव स्वस्य अनेन स्वमहिमाभावेन सर्वथा नित्यम्, "नित्यं विज्ञानमानन्दं ब्रह्म" इति श्रुतिवचनमपि अस्य नित्यमहिमारूपविशिष्टतमस्याक्षरब्रह्मण: एव निरूपणं करोति। द्वितीयं लक्षणं वर्तते "विविधं ज्ञानं विज्ञानम्" इति। यस्य भौतिकविश्वात्मकयज्ञविज्ञानेन सम्बन्ध: स्वीक्रियते। यज्ञात्मकं विकारविज्ञानमेव वैकारिकनिरुढपदार्थस्य स्वरूपसम्पादकं भवति। अत एव एतद्वक्तुं शक्यते यत् यज्ञविज्ञानात्मकं विविधभावापन्नं विकारविज्ञानमेव वैकारिकं भूत्वा प्रवर्तको भवति। "विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते" इत्यादिश्रुतिवचनमपि वैविध्यभावापन्नं विकारविज्ञानात्मकं यज्ञविज्ञानं प्रत्येव सभ्यसमाजस्य ध्यानमाकर्षयति। तस्मादेव कारणात् भगवत्या श्रुत्या अपि "विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते" इत्यादिरूपेण उपक्रान्तस्य यज्ञविज्ञानस्य 'विज्ञानमित्युपास्व' इति रूपेणैव उपसंहार: कृत:। '**अथातो**

**ब्रह्मजिज्ञासा**'[1] रूपेण ब्रह्मविज्ञानस्य जिज्ञासया एव सम्बन्धोऽस्ति। यतो हि एतत्तु केवलं ज्ञातव्यं विज्ञानमस्ति, परन्तु ब्रह्मविज्ञानस्याधारेण प्रतिष्ठितं यज्ञविज्ञानं तु उपास्यं भवति। एवम्प्रकारेण द्विविधया विज्ञानधारया सह क्रमशः विशेषभावापन्नं प्रथमलक्षणमेवं विविधभावापन्नं द्वितीयलक्षणञ्च यथावस्थितरूपेण समन्विते भवतः। ब्रह्मविज्ञानात्मकमौलिकविज्ञानस्य कृते सापेक्षः ज्ञानशब्दः व्यक्तो जातः, यः सम्पूर्णविश्वस्य किं वा यज्ञात्मकभूतानां मूलविज्ञानमस्ति। सम्पूर्णविश्वमपि पाञ्चभौतिकं विवर्ततया स्वीक्रियते। अस्य भौतिकजगतः मौलिकाः परिभाषाः, मौलिकसमन्वयाः यस्मिन् मूलाधारे सुव्यवस्थिताः सन्ति, तदेव विश्वाधारभूतक्षरनिबन्धनं मौलिकतत्त्वमेव अत्र ब्रह्मविज्ञानं कथ्यते।

प्रजापतेः ब्रह्मणः स्वरूपप्रदर्शनाय अनिरुक्तभावप्रधानः वाग्व्यवहारः एव उपयुक्तः स्वीकृतः। "क"कारः अनिरुक्तभावस्यैव संग्राहकः, कः इति शब्देन अव्यक्तभावः एव प्रतिध्वनितो भवति। अनेनैव अव्यक्तभावानुबन्धेन अनिरुक्तप्रजापतेः सङ्केतिकं स्वीकृतं "कः"(ककारः) इति। कः प्रजापतिः? इति प्रश्नस्य यदि अनिरुक्तभावसम्बन्धोऽस्ति, तर्हि उत्तरमपि कः प्रजापतिरित्येव भविष्यति। यजुर्वेदस्य "कस्मै देवाय हविषा विधेम" इति प्रश्नस्य उत्तरमपि तदेव भविष्यति। प्रश्नदशायां कस्मै शब्दस्यार्थः भविष्यति कस्य कृते वयमाहुतिं प्रदद्मः? उत्तरदशायां तु कस्मै शब्दस्यार्थो भविष्यति ककारव्याहृतियुक्ताय प्रजापतये वयमाहुतिं प्रदद्म इति। यथा –

**हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।**
**स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥**[2] इति।

---

[1] **ब्र०सू० १.१**

[2] **शु०य० १३.४ एवं २५.१०**

एतामुत्तरगर्भितामेव श्रुतिं प्रश्नश्रुतिरिति कथयन्ति। अत एव केवलं क्षरविज्ञानस्यैव नाम ब्रह्मविज्ञानं नास्ति अपितु एतत्क्षरविज्ञानं नित्यसापेक्षेण स्वाव्ययेन तथा अक्षरेण साकं समन्वितो भूत्वा तिसृषु अवान्तरधारासु परिणतो भूत्वा च समाजस्य सम्मुखे उपस्थितो भवति। यस्य निष्कर्षार्थो भवति यत् – 'अव्ययविज्ञानं अक्षरविज्ञानमेवं क्षररविज्ञानञ्च' एतानि त्रिणी विज्ञानानि समन्वितान्येव ब्रह्मविज्ञानानि कथ्यन्ते।

यज्ञविज्ञानस्याधारभूतस्य ब्रह्मविज्ञानस्य समन्वयविषये यजुर्वेदे बहु प्रतिपादितमस्ति। उपबृंहणभाव एव ब्रह्मणः समन्वयार्थः, एकमेव तत्त्वं, तिसृषु धाराषु विभजनमेव तस्य उपबृंहणम्, एवमेतदेवोपबृंहणं ब्रह्मणः ब्रह्मत्वम्। "आत्मा उ एकः सन्नेतत् त्रयं त्रयं सदेकमयमात्मा" इत्यादिश्रौतसिद्धान्तानुसारेण एकस्यैव भागत्रये परिणमने सत्यपि एकेनैव भावेन विद्यमानत्वमेव ब्रह्मणः ब्रह्मत्वमस्ति। तात्पर्यन्तु एतदेव जातं यद् एकस्यैव मूलभूततत्त्वस्य साक्षीरूपता, "निमित्तमेवमुपादानम्" इति रूपेण परिणमनमेव तस्य तत्त्वस्य उपबृंहणमस्ति। तदेव दर्शनभाषायां विवर्त्तपदेनोच्यते, पारिभाषिकदृष्ट्या यः "विवर्त्तः, विभूतिः, महिमा" आदि नामत उपवर्णितोऽस्ति। भगवती श्रुतिः कथयति –

**किꣳ स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीत्।**
**यतो भूमिञ्जनयन्विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः॥**[१] इति।

ब्राह्मणस्य सृजनवेलायां तस्य विश्वकर्मणः निवासस्थानं किमासीत्? क्रिया कासीत्? तथैव चक्रादीनि उपकरणानि कानि आसन्? यदा भूमिरुत्पादनबेलायां सर्वद्रष्ट्रा विश्वकर्मणा स्वमहिमाद्वारा अस्य द्युलोकस्य आच्छादनं कृतमासीत्। सः विश्वकर्मा ऋषिः, यस्य सर्वत्र चक्षुः, सर्वत्र मुखम्, सर्वत्र बाहुः एवं सर्वत्र पादौ स्तः। एकाकी एव

---

[१] **शु०य० १७.१८**

परमात्मा द्यावापृथिवीमुत्पादयन् एतां स्वभुजदण्डेन चरणाभ्यां च प्रताड्य तत्स्वरूपां करोति, तस्य परमात्मनः कृते बाह्योपकरणस्य अपेक्षा न भवति। तदाह–

**विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्। सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः**[१] **इति।** एवमेव

**कि॑ꣳ स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः। मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन्**[२] इत्याद्युत्तरगर्भितप्रश्नात्मकमन्त्रेण समन्वितो भवति। तत् कीदृशं वनमासीत्? अस्य प्रश्नस्य समाधानं भवति अनिरुक्तम् इति, अत एव "किं" रूपमेव वनमासीत्। येन वनेन विश्वकर्मणा अस्याः द्यावापृथिव्याः निर्माणं कृतं तद्वनं कीदृशमासीत्। मनीषिणः जनाः स्वमनसा एतत्प्रश्नं पृच्छन्तु यत् कस्याधारस्य परमात्मना भुवनधारणबेलायामाश्रयणं कृतमासीत्? तस्य कोऽप्याधारो नासीत्, सः सर्वेषामाधारः सृष्टा चासीत्।

सूर्यचन्द्रव्योमवाय्वग्निसलिलपृथिवीविद्युद्ग्रहनक्षत्रोल्काधिष्ण्यावज्र धूमकेत्वादयः पदार्थाः यदि विश्वेश्वरस्य ब्रह्मविज्ञानस्य सीमायामन्तर्भूताः सन्ति तर्हि हाइड्रोजननाइड्रोजनाक्सीजनकार्बनादयः वर्तमानभूतविज्ञानपदार्था अपि लोकान्तरस्य वस्तुनः न सन्ति। फलतः सूर्यादिविज्ञानतत्त्वं येन प्रकारेण ब्रह्मविज्ञानत्वेन अनुप्राणितोऽस्ति तथैव वर्तमानयुगस्य ऑक्सीजनादिभूतविज्ञानमपि ब्रह्मविज्ञानस्य सीमायामेव अन्तर्भूतं भवति। मानवानां विज्ञानं स्वयमेव बृहत्पवित्रमाराध्यभूतं तत्त्वमस्ति, पुनश्च तत् ब्रह्मविज्ञानं भवेदथवा भूतविज्ञानमेव वा। भारतीयमहर्षयः विज्ञानमुपास्यत्वेन स्वीकृतवन्तः, एषास्य ब्रह्मविज्ञानधारा "नित्यं

---

[१] **शु०य० १७.१९**

[२] **शु०य० १७.२०**

विज्ञानमानन्दं ब्रह्म" इत्युच्चोद्घोषणया साकं मनुष्यस्य शाश्वतानन्दस्य मुख्यकारणत्वेन स्वीकृता।

दर्शनात्मकं निरीक्षणं ज्ञानभावोऽस्ति एवमेव आचरणात्मकं परीक्षणं विज्ञानभावोऽस्ति। ब्रह्मणः विज्ञानं परीक्षणं न भवति अपितु निरीक्षणमेव भवति। भूतातीतस्य अत्यन्तसूक्ष्मस्य ब्रह्मणः सूक्ष्मदृष्ट्या ईक्षणमेव सम्भवति, तदेव निरीक्षणमुच्यते न तु परीक्षणम्। अत एव ब्रह्मविज्ञानमीक्षणात्मकं ज्ञानमित्येव कथनं समीचीनं भवति। प्रयोगात्मकपरीक्षणस्य, आचरणात्मकव्यवहारस्य च भूतभावेन सम्बन्धोऽस्ति। अत एव परीक्षणात्मकविज्ञानस्य भूतात्मकयज्ञविज्ञानेन सह सम्बन्धः स्वीकर्तुं शक्यते। ब्रह्मविज्ञानस्य परीक्षणं न भवति, अपितु ईक्षणमेव भवति। एतदेव भारतीयदर्शनशास्त्रस्य मूलमस्ति, यस्य सम्बन्धः आचरणात्मिकया आचारमीमांसया सह नास्ति। परन्तु यज्ञविज्ञानस्य ईक्षणं न भवति अपितु विज्ञानं भवति, नाम परीक्षणं भवति। एतदेव भारतीयविज्ञानशास्त्रस्य मूलभित्तिरस्ति, यस्याः आचरणात्मिकया यज्ञमीमांसया सह एव प्रधानसम्बन्धो वर्तते। वस्तुगत्या एकस्यैव विज्ञानस्य द्वे धारे भवतः, "दर्शनं विज्ञानञ्च", यस्य कृते वेदशास्त्रे "ब्रह्म" एवं "यज्ञः" एतौ द्वौ पारिभाषिकशब्दौ नियतौ स्तः। यज्ञः ब्रह्मणि प्रतिष्ठितः एवं ब्रह्म अपि यज्ञद्वारैव विभूतिभावे परिणतं भवति। यज्ञेन विना ब्रह्म अपि अप्रतिष्ठितं भवति, यथा – **तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्**[१] इति।

पाश्चात्यभाषायां दर्शनस्य कृते "फिलासफी" (Philosophy) शब्दः नियतः, एवं विज्ञानस्य कृते "साइन्स" (Science) शब्दः नियतः। किन्तु एतौ द्वौ शब्दौ तत्त्वतः पाश्चात्यक्षेत्रे एव प्रसिद्धौ। यस्य तत्त्ववादस्य परीक्षणात्मकविज्ञानेन एवं तदनुगताचरणेन च कोऽपि

---

[१] **श्रीमद्भगवद्गीता ३.१५**

सम्बन्धो नास्ति, तदेव "फिलासफी" अस्ति। वैदिकदर्शनं तु मौलिकतत्त्वात्मकं तादृशं दर्शनमस्ति यस्याधारेण यौगिकतत्त्वात्मकविज्ञानस्य विचारो भवति। अत एव वैदिकदर्शनं विज्ञानस्य किं वा "साइन्स" इत्यस्यापि मूलभूत आधारोऽस्ति। "साइन्स" (Science) यस्य कृते क्रमशः "फिजिक्स" (Physics), "केमेस्ट्री" (Chemistry) इति द्वौ शब्दौ प्रयुङ्क्तौ, तौ द्वौ शब्दौ विज्ञानात्मकस्य "साइन्स" क्षेत्रादेव अनुप्राणितौ स्तः, एताभ्यां द्वाभ्यां साकं ज्ञानाय "ब्रह्म", "यज्ञः" इति द्वौ शब्दौ समन्वितौ भवितुं शक्नुतः। मूलतत्त्वविज्ञानमेव तत्र "फिजिक्स" (Physics) कथ्यते, एवं रासायनिकसम्मिश्रणात्मकं यौगिकतत्त्वविज्ञानमेव तत्र "केमेस्ट्री" (Chemistry) कथ्यते।

ब्रह्मतत्त्वं भौतिकविज्ञानं (Physics) एवं यज्ञतत्त्वं रसायनविज्ञानं (केमेस्ट्री) कथ्येते। अनेकतत्त्वानां सङ्गतिकरणात्मकं यौगिकरूपमेव यज्ञशब्दस्य मौलिकी परिभाषा अस्ति। सम्मिश्रणस्यैव नाम संस्कृतभाषायां यजनमिति भवति। यजनमेव यज्ञः, द्वयोः, त्रयाणाम्, चतुर्णामथवा अनेकतत्त्वानां तथा सम्मिश्रणं ये मिश्रितानि सर्वाणि तत्त्वानि स्वपूर्वस्वरूपं परित्यज्य नवीनमपूर्वस्वरूपे परिणताः भवन्ति, स एव यज्ञः। उदाहरणार्थम् - शुक्रे शोणिते च विद्यमानं "पुंभ्रूणं" तथा "स्त्रीभूणं" यदा उपमद्रनात्मकेनान्तर्यामिसम्बन्धेनोत्पन्नसन्ततिरूपेण जायते तदेव यज्ञः स्वीकृतः। येन मिश्रणेन अपूर्वता भवति, तेन साकमेकीभावसूचकः समुपसर्गः संयुज्यते। एवं तदा एतन्मिश्रणं सम्मिश्रणं भवति, यस्यापरं नाम "याग" इत्यप्यस्ति। एवम्प्रकारेण मिश्रणं तथा सम्मिश्रणमिति भेदेन पदार्थे योगयागभेदेन प्रकारद्वयेन सम्बन्धः प्रक्रान्तः तिष्ठति, ययोः सम्मिश्रणात्मकयाग एव यज्ञस्वरूपस्य समर्थकः स्वीक्रियते। सङ्गतिकरणात्मकसम्मिश्रणात्मकं पारस्परिकं मेलनं यत्र यज्ञशब्दस्य मूलभूतया यजनप्रक्रियया प्रतिध्वनितो भवति तथैव तत्र

तत्सदृश एव "केमेस्ट्री" (Chemistry) शब्दात् सम्बन्धितः रासायनिकः सम्मिश्रणात्मकसम्बन्धोऽपि "केमेस्ट्री" (Chemistry) शब्दात् प्रतिध्वनितो भवति। मुख्यतः यज्ञस्य लक्षणं प्रकारत्रयेण कर्तुं शक्यते। आध्यात्मिकयज्ञः, आधिदैविकयज्ञः, आधिभौतिकयज्ञश्चेति।

**आध्यात्मिकयज्ञः** – अन्नोर्कप्राणानामन्योऽन्यग्रहणादुत्पद्यमानं धारावाहिकं संक्रमणमेव यज्ञो वर्तते। **अन्नोर्कप्राणानामन्योऽन्यपरिग्रहो यज्ञः** इति लक्षणमाध्यात्मिकयज्ञस्य भविष्यति, यस्यापरं नाम शारीरिकयज्ञः इत्यप्यस्ति। वैविध्यलक्षणः विज्ञानभावः विविधभावापन्नः अनेकतत्त्वानां सम्मिश्रणात्मकः यज्ञादेव अनुप्राणितो भवति। अन्नोर्कप्राणानां विविधभावेन समन्वितकर्मणामनया दृष्ट्या एव शारीरिकयज्ञः अथवा आध्यात्मिकयज्ञः कथ्यते। शारीरिकयज्ञे अन्नस्याहुतिः भुक्तान्नात् प्रारभ्य शुक्रपर्यन्तप्रकान्तयुक्तायाः रसमालानुगतायाः विशलनप्रक्रियायाः क्रमधारातः "रस–असृक–मांस–मेद–अस्थि–मज्जा–शुक्राः" एतेषां सप्तधातूनां स्वरूपनिष्पत्तिर्भवति, यस्य पार्थिवेन ध्रुवतत्त्वेन सह प्रधानसम्बन्धोऽस्ति।

रसात्मके ओजधातौ दिव्यः रसः समाविष्टोऽस्ति। एतदेव तत् प्रवर्ग्यभूतं चान्द्रसौम्यं रसरूपमस्ति, तदाह – **यो वः शिवतमो रसः**[१] इति। एष एव शिवतमः दिव्यप्राणात्मकः सुसूक्ष्मः रसः, भारतीयविज्ञानपरिभाषायां स एव सर्वेन्द्रियाधिष्ठातृरूपेण प्रज्ञाननामकमतीन्द्रियं मनः कथ्यते। भगवती श्रुतिः कथयति –

**चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत।**
**श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥**[२]

---

[१] **शु०य० ११.५१**

[२] **शु०य० ३१.१२**

यजुर्वेदः मनसः उत्पत्तिं चन्द्रमसा मनुते, यस्य कृते "अन्नमयं हि सौम्य मनः" इत्येषः औपनिषदः सिद्धान्तः स्थापितो वर्तते, सः अस्यैव ओजसः सूक्ष्मावस्थारूपः दिव्यचान्द्ररसोऽस्ति। यस्य इत्थंभूतशिवतमतत्त्वभावोऽन्नविशुद्धौ एव अवलम्बितोऽस्ति। अत एव सात्त्विकराजसतामससदृशानि यादृशानि अन्नानि भुज्यन्ते तदनुसारेणैव तदनुपातेन विशकलनस्यान्तिमसीमायां प्रज्ञानमयः सत्त्वरजस्तमोभावेन परिणमितो भविष्यति। सात्त्विकान्नानुगतः चान्द्ररस एव मनसः सहजसिद्धशिवतमरसरूपसात्त्विकभावस्य मूलप्रतिष्ठा भविष्यति, तदा अस्माकं मनः शिवसङ्कल्पस्य अधिष्ठाता भविष्यति। स्वकीयया सत्त्वगुणान्वितया आहारादिव्यवस्थया मनस्तन्त्रमेतां शिवतमरसात्मिकां मङ्गलकामनामभिव्यक्तां कृत्वा यजुर्वेदः कथयति –

**यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु।**
**यस्मान्न ऋते किञ्च न कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु॥**[१]
इति।

**आधिदैविकयज्ञः एवं आधिभौतिकयज्ञः** – सृष्टिमूलायाः विश्वविधायाः रहस्यपूर्णविज्ञानसिद्धान्तानुसारेण प्रकृत्या स्थिरः सूर्योऽपि तत्त्वतः आत्यन्तिकरूपेण स्थिरो नास्ति, अपितु परिभ्रममाणां सचन्द्रां पृथिवीं स्वज्योतिर्मयहिरण्यमण्डलस्य महिम्नः गर्भे प्रतिष्ठाता भगवान् सूर्यनारायणः आपोमूर्त्तिं परमेष्ठिनं सर्वतः हिरण्यमयरथात् परिक्रामति। तदाह –

**आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च।**
**हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥**[२]

---

[१] **शु०य० ३४.३**

[२] **शु०य० ३४.३१**

परमेष्ठी एभिः विवर्तैः साकं स्वयम्भुवः सर्वतः परिक्रमां करोति। अनयोः सारपरमेष्ठिनोः परिभ्रमणविद्याधारेण दशमहाविद्यानां प्रादुर्भावः जातः। स्वयम्भूसत्यः सर्वथा स्थिरोऽस्ति, स एव परमाकाशत्वेन स्वीकृतः। भूपिण्डं प्रचण्डरूपेण परिभ्रममाणमस्ति। एतदेव गतिरूपं परिभ्रमणं परस्परमण्डलपिण्डेषु परस्परादानविसर्गसम्बन्धं प्रक्रमति। आदानविसर्गात्मिका एषा विश्वप्रक्रिया आधिदैविकनित्ययज्ञस्य एकप्रकारकः दृष्टिकोणोऽस्ति। अत एव सौरप्राणेन भूताग्निना च सह सहजसिद्धः महान् अन्नकोशः यः अजस्राहुतिना सम्बद्धोऽस्ति, स एव सौरप्राणात्मकस्य देवभावस्यापेक्षया यत्र आधिदैविकः यज्ञः कथितोऽस्ति तत्र तत्र सौरभूताभावानुबन्धेन अधिभौतिकयज्ञः अपि कथ्यते। एवम्प्रकारेण सौरयज्ञः उभयोः यज्ञसंस्थानयोः आधारभूमिरस्ति।

**निष्कर्षः** - मौलिकतत्त्वात्मकं ब्रह्मविज्ञानं विज्ञानस्य प्रथमा धारा वर्तते। तथा अस्य तत्त्वात्मकब्रह्मविज्ञानस्याधारेण प्रतिष्ठिं यौगिकं तत्त्वं सम्मिश्रणात्मकं विश्वस्वरूपसम्पादकं यज्ञविज्ञानं विज्ञानस्य द्वितीया धारा अस्ति। प्रथमधारा पुरुषविज्ञानात्मिका ज्ञानधारा स्वीकृता अस्ति तथा द्वितीया धारा प्रकृतिविज्ञानात्मिका विज्ञानधारा कथ्यते। यज्ञस्य पदार्थस्वरूपभेदेन खण्डखण्डात्मकाः अवान्तराः असंख्याः भेदाः जायन्ते। पूर्वोपवर्णितयज्ञस्य समन्वयतारम्येन एव आध्यात्मिकाधिदैविकयज्ञौ, आध्यात्मिकाधिभौतिकयज्ञौ, आधिभौतिकाधिदैविकयज्ञौ, दैवात्मिक-भौतिकयज्ञौ, आधिनाक्षत्रिकयज्ञः, ग्रह-वाजपेय-राजसूयचयन-अग्निष्टोम- अत्यग्निष्टोम-अप्तोर्य्यामस्तोम-षोडशीस्तोम-अतिरात्रस्तोम-अश्वमेध-राष्ट्रभृतपुरुषमेध-गोमेध-गोसवपञ्चदशाह-नवाह-अभिप्लव-पृष्ठ्यतानूनप्त्र-सौत्रामणी-इष्टि-चातुर्मास्य-दर्शपूर्णमास-पशुबन्ध-ज्योतिष्टोम-गोष्टोम-आयुष्टोम-छन्दोमास्तोम-अयुग्मस्तोमादि भेदात् असंख्यविवर्तभावेषु परिणमितं भारतीययज्ञविद्याविज्ञानमत्यन्तः समृद्धः महान्कोशोऽस्ति।

वृक्षयज्ञ–वनस्पतियज्ञ–जन्तुयज्ञ–धातुयज्ञ–ऋषि–पितृ–देवता–असुर –गन्धर्व–यक्ष–राक्षस–पिशाच–सर्वविधप्रजावर्गादियच्चया–वत्स्थावरजङ्गमात्मकं भूतभौतिकं विवर्त्तरूपमस्यां यज्ञसीम्नि एव अन्तर्भूतमस्ति। विज्ञानेन यज्ञस्य तथा कर्मणः विस्तारो भवति –

**विज्ञानं यज्ञं तनुते। कर्माणि तनुतेऽपि च।।**[१]

वेदानां विज्ञानपरकव्याख्या अधुनातनविज्ञानस्यावधारणया सह मिलति। प्रायः आधुनिकविज्ञानस्य सर्वाः शाखाः प्रयोगे अवलम्बिताः सन्ति, एवमेव तैत्तिरीयारण्यकोऽपि[2] विज्ञानद्वारैव कर्मणां विस्तारः भवतीति स्वीकरोति। आधुनिकविज्ञानस्य प्रयोगमूलकता एवं वैदिकविज्ञानस्य कर्ममूलकता समानमेव एकं तत्त्वं प्रति संकेतयतः। अत एव ज्ञानस्य विज्ञानस्य च क्रमशः ब्रह्मज्ञानं यज्ञाविज्ञानञ्चार्थौ भवतः।

विद्यामविद्यां च यः मनुष्यः उभयं सह जानाति, स अविद्यया मृत्युं तीर्त्वा विद्यया अमृतस्य उपभोगं करोति। भाष्यकारेण उव्वटेन अस्य व्याख्यायां निगदितं यत् – “विद्यां च आत्मज्ञानं देवताज्ञानं वा अविद्या कर्म च तदुभयं विद्याविद्यारूपं द्वयं येन सह एकीभूतं कर्मकाण्डं ज्ञानकाण्डस्य गुणभूतम् अथ कर्मकाण्डं ज्ञानकाण्डं एकीकृत्य अविद्यया कर्मकाण्डेन मृत्युं तीर्त्वोत्तीर्य कृतकृत्यो भूत्वा विद्यया ब्रह्मपरिज्ञानेनामृतत्वं मोक्षमश्नुते प्राप्नोति” इति। यज्ञविद्या केवलं कर्मकाण्डं नास्ति अपितु यज्ञस्य पश्चाद्विद्यमाना एका विश्वदृष्टिरस्ति। ब्राह्मग्रन्थेषु प्रत्येककर्मानन्तरमेका उपपत्तिः प्रदत्ता अस्ति, एषा एव कर्मकाण्डानन्तरं विद्यमाना विश्वदृष्टिरस्ति। भगवती श्रुतिः नामरूपयोः मिथ्यात्वं न मनुते प्रत्युत सत्यमेव मनुते। यथा – **नामरूपे सत्यम्**[३]

---

[१] **तै०उ० २.५.१**

[२] **तै०आ० ८.५.१**

[३] **श०ब्रा० १४.४.४.३**

इति। वेदविज्ञानं निःश्रेयसा साकमभ्युदयमपि इष्टं मनुते। अस्यैव परिणामो वर्तते यत् धर्ममोक्षयोः समानमेव कामार्थौ अपि पुरुषार्थत्वेन स्वीकृतौ, तथा अन्याश्रमसदृशः गृहस्थाश्रमस्यापि मान्यता वर्तते। श्रौतयज्ञस्याधिकारस्तु केवलं गृहस्थेन एव प्राप्यते। विद्यामृतज्ञानानि पर्यायवाचिनः तथा अविद्यामृत्युकर्माणि पर्यायवाचीनि। यत्र ज्ञानं वर्तते तत्र कर्म वर्तते, यत्र कर्म वर्तते तत्र ज्ञानमपि वर्तते[१]। ज्ञानकर्मणोः परस्परमविनाभावः सम्बन्धोऽस्ति। वेददृष्ट्या आत्मा सर्वव्यापकः, विविधतायाः मध्ये या एकता सैव भगवत्या श्रुत्या आत्मशब्देन बोधिता–

**अत्र ह्येते सर्व एकं भवन्ति तदेतत् पदनीयं सर्वस्य यदयमात्मा**[२] इति।

अस्यैव आत्मनः व्याख्यां कृत्वा श्रुतिः पुनः कथयति– **अयमात्मा वाङ्मयो मनोमयः प्राणमयः**[३] इति।

अर्थात् वाङ्मनःप्राणानां त्रिपुटी (एकीभावः) एव आत्मा इति। वाङ्मनःप्राणानामेषः अन्तरान्तरीभावः अविनाभावसम्बन्धस्य सूचकोऽस्ति। अस्यैव अविनाभावसम्बन्धस्य कारणेन ज्ञानविज्ञानस्य समन्वयः सम्भावितो भवति। ज्ञानस्य सम्बन्धः चेतनातः वर्तते परन्तु विज्ञानं तु सामान्यतः भौतिकविज्ञानं कथ्यते। प्राणमनसोः अविनाभावः सम्बन्धः श्रुतौ यत्र तत्र प्राप्यते। यथा –

**इमे वै प्राणा मनोजाताः मनोयुजः**[४] इति। तथा च **मनो वै प्राणानामधिपतिर्मनसि हि सर्वे प्राणाः प्रतिष्ठिताः**[५] इति।

---

[१] **अन्तरं मृत्योरमृतं मृत्यावमृतमाहितम् (श०ब्रा० १०.५.२.४)**

[२] **श०ब्रा० १४.४.२.१८**

[३] **श०ब्रा० १४.४.३.१०**

[४] **श०ब्रा० ३.२.२.१३**

[५] **श०ब्रा० १४.३.२.३**

मनस्प्राणवाचामस्यैव अविनाभावसम्बन्धस्य कारणेन वेदः पाषाणमपि सम्बोधयति– **श्रुणोतु ग्रावाणः**[1] इति। वेदः स्वीकरोति यत् पाषाणे वाक्प्राणौ उपस्थितौ, एवम्प्रकारेण पशुपक्ष्यादयोऽपि ससंज्ञकाः एव, यतो हि तेष्वपि मनःप्राणवाचः त्रयः व्यक्ताः सन्ति। वनस्पतयः अन्तस्संज्ञकाः सन्ति, तेषु प्राणवाचौ व्यक्ते स्तः, मनस्तु अव्यक्तम्। पाषाणः असंज्ञकः, अत एव पाषाणे केवलं वाक् व्यक्ताऽस्ति, प्राणमनसी अव्यक्ते स्तः।

विश्वस्य पञ्च पर्वाणि शतपथब्राह्मणे कथितानि सन्ति – शरीरस्य समानान्तरा पृथिवी, मनसः समानान्तरः चन्द्रमा, बुद्धेः समानान्तरः सूर्यः, महतः समानान्तरा परमेष्ठी एवं स्वयम्भुवः समानान्तरमव्यक्तम्[2] इति। आधुनिकविज्ञानपिण्डस्य ब्रह्माण्डस्य च मध्ये अधुना यावत् एतावती समानान्तरता न दृष्टा। आधुनिकविज्ञानपरमाणुसौरमण्डलयोः समानान्तरता तथा सूक्ष्मबृहत्स्तरयोः कार्यकरणनियमयोः समानान्तरता अपि दृष्टा।

अस्मिन् समये वेदविज्ञानस्य तथा आधुनिकभौतिकविज्ञानस्य समन्वितभवनस्य आवश्यकता अस्ति। अनेन च विद्यायाः अविद्यायाः, सम्भूतेः असम्भूतेः, ज्ञानस्य कर्मणः साकं परस्परं सामञ्जस्येन पुरुषार्थचतुष्टयस्य प्राप्तिर्भविष्यति।

सनातनधर्मे धर्मार्थकाममोक्षाणां पुरुषार्थचतुष्टयानां प्राप्तिः मानवमात्रस्य साध्यं कथितमस्ति। यजुर्वेदे वीरबलशालिनोः सन्तत्योः प्राप्तिः स्यात् इति कामना कृता वर्तते – **अस्माकं वीरा उत्तरे भवन्तु**[3] इति। मनुष्याय शतवर्षपर्यन्तं जीवित्वा पुरुषार्थकरणस्य प्रेरणा वेदेन प्रदत्ता। भगवती श्रुतिः कथयति –

---

[1] **कृ०य०तै०सं० १.३.१३.१**

[2] **श०ब्रा० १०.१.६.१४-२०**

[3] **शु०य० १७.४३**

**तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत। पश्येम शरदः शतञ्जीवेम शरदः शतꣳ श्रृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्**[१] इति। भगवती श्रुतिः मनुष्याय निरन्तरं कर्मकरणस्य प्रेरणा प्रददाति –

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः।**
**एवन्त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥**[२]

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'वैश्विकदृष्ट्या यजुर्वेदे वैज्ञानिकपरिकल्पनायाः समीक्षणम्'** नाम षड्विंशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

---

[१] **शु०य० ३६.२४**

[२] **शु०य० ४०.२**

# अथ सप्तविंशोऽध्यायः

## श्रौतयज्ञानां वैश्विकचिन्तने योगदानम्

यस्यानुष्ठानद्वारा इन्द्रादिदेवगणाः प्रसन्नाः भवेयुः, स्वर्गादीनां प्राप्तिः सुलभा भवेत्, आध्यात्मिकाधिदैविकाधिभौतिकविपत्तयः समाप्ताः भवेयुः तथा सम्पूर्णविश्वस्य कल्याणं भवेत् तदेवानुष्ठानं यज्ञ इति कथ्यते। यजुर्वेदे यज्ञपदेन विविधविज्ञानानां ग्रहणं कृतं वर्तते। श्रौतयज्ञः कल्पशास्त्रस्य विषयोऽस्ति। कल्पेऽपि यानि गृह्यकर्माणि सन्ति तेषां वर्णनं गृह्यसूत्रेषु कृतं वर्तते तथा श्रौतयज्ञानां वर्णनं श्रौतसूत्रे।

अत्यन्तप्रबलवेगशालिना विशालजालस्वरूपभयङ्करसर्पेण ग्रसिते अस्मिन् विकराले कलिकाले यज्ञ एव एतादृशः अपूर्वपदार्थोऽस्ति, यं प्राप्य एव अनादिकालेन तीक्ष्णवासनया व्याप्तान्तःकरणयुक्तः त्रिविधतापतः तप्तः मानवः स्वदुःखनिवृत्त्यर्थमभिलाषां करोति। मनुष्यः यज्ञद्वारैव दुस्तरसंसारसागरं सामान्यतया एव पारं करोति।[१] यः सनातनधर्मावलम्बी यज्ञं न करोति तस्य यज्ञहीनस्य पुरुषस्य तेजः नष्टो भवति – **अयज्ञियो हतवर्चा भवति**[२]**।** यः सनातनधर्मावलम्बी यज्ञेषु श्रद्धां न करोति सः विविधानर्थकानां फलभोक्ता भवति। जगद्गुरुणा भगवता श्रीकृष्णेन द्रव्ययज्ञतपोयज्ञयोगयज्ञस्वाध्याय[३]यज्ञानामुल्लेखं कुर्वता एते सर्वे यज्ञा इति स्वीकृताः।

---

[१] **मुण्डकोपनिषद् १.२.७**

[२] **अथर्ववेदः १२.२.३७**

[३] **श्रीमद्भगवद्गीता ४.२८**

यज्ञशब्दस्य यौगिकव्युत्पत्त्या कल्पवृक्षवत् समस्ताभीष्टानां परिपूर्त्यर्थं पूर्णतया समर्थः तथा सर्वातिशायी विलक्षणार्थप्रतिपादनाय अत्यन्तमहत्त्वपूर्ण इत्यर्थः सिद्ध्यति। "यज देवपूजासङ्गतिकरणदानेषु" इति देवपूजा, सङ्गतिकरणमेवं दानार्थे पठितः यजधातुतः **यजयाचयतविच्छप्रच्छरक्षो नङ्**[1] इति पाणिनिसूत्रेण नङ्प्रत्ययकरणे सति यज्ञशब्दस्य सिद्धिर्भवति। सः यज्ञः विष्णुरुद्रब्रह्माचण्डीलक्ष्म्यादिदेवतानां यथाविधिपूजनेन, ऋषिमहर्षिमुनिसत्पुरुषाणां सत्सङ्गत्या एवं देवतोद्देशेन दधिसोमब्रीहियवाद्युत्तमद्रव्याणां प्रदानेन सम्पादितो भवति। तस्य महामहिमशालिनः श्रौतयज्ञस्य अनुष्ठानं यज्ञाधिकारिणा मनुष्येण कर्तव्यरूपेण अवश्यं विधातव्यम्। यथाविधिश्रौतयज्ञानुष्ठानेन मनुष्यस्य आध्यात्मिकाधिदैविकाधिभौतिकानां तापानां समूलतया नाशो भवति। श्रीमन्महर्षिकात्यायनप्रणीतकात्यायनश्रौतसूत्रस्य परिभाषानिरूपणाध्याये एषः प्रश्नः जागर्ति को यज्ञः? महर्षिकात्यायनेन ग्रन्थारम्भे एव **अथ यज्ञं व्याख्यास्यामः**[२] एवम्प्रकारेण प्रतिज्ञां कृत्वा यज्ञस्य परिभाषा प्रतिपाद्यते – **द्रव्यं देवता त्यागः**[३]॥ द्रव्यं देवता त्यागश्च त्रीण्येव यज्ञस्य लक्षणानि भवन्ति। द्रव्यं कः पदार्थः? अस्योत्तरं स्मार्त्तोल्लासनामके ग्रन्थरत्ने लिखितमस्ति –

**तैलं दधि पयः सोमो यवागूरोदनं घृतम्।**
**तण्डुलाः फलमापश्च दश द्रव्याण्यकामतः॥**[४]

तात्पर्यं यत् तैलम्, दधि, पयः, सोमलता, यवागूः, ओदनम्, घृतम्, तण्डुलाः, फलम्, जलम् एतानि दश द्रव्याणि वैदिकयज्ञेषु

---

[१] **पा०सू० ३.३.९०**

[२] **कात्यायनश्रौतसूत्रम् १.२.१**

[३] **कात्यायनश्रौतसूत्रम् १.२.२**

[४] **दे०प०पृ० १२७**

देवतानां प्रीत्यर्थं प्रयुक्तानि भवन्ति। देवताः षडैश्वर्यसम्पन्नाः भवन्ति, याः देवताः यज्ञं सर्वथा व्याप्तं कृत्वा मन्त्ररूपेण अभिव्यक्ताः भवन्ति। महामुनिः यास्कः वदति –

**यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते। तद्दैवतः स मन्त्रो भवति।**[1] आशयोऽयं यत् यस्य कामनया ऋषिः यां देवतां प्रति स्वप्रयोजनस्य सफलतामिच्छन् स्तुतेः प्रयोगं करोति, तस्याः देवतायाः स्वरूपमेव सः मन्त्रो भवति। श्रौतयज्ञ एकं विधानमस्ति येन यजमानः देवतां सन्तृप्य स्वाभिलषितमानन्दं प्राप्नोति। स्वर्गलोकस्य प्राप्तिः श्रौतयज्ञानुष्ठानस्य मुख्यमुद्देश्यमस्ति। तद्यथा – **दर्शपूर्णमासाभ्यां यजेत स्वर्गकामः॥** [2] इत। यद्यपि यजुर्वेदे अनेकश्रौतयज्ञानां विधानमस्ति तथापि श्रौतयज्ञाः मुख्यतः पञ्च एव सन्ति। ते च – **१.** अग्निहोत्रम्, **२.** दर्शपूर्णमासः, **३.** चातुर्मास्यम्, **४.** पशुयागः, **५.** सोमयागः। एतेषामवान्तरभेदाः बहवः सन्ति। तद्यथा – सोमयागस्य भेदाः अश्वमेधः, नरमेधः, सर्वमेधः, एकाहः, अहीनयज्ञः। दिनद्वयादारभ्य एकादशरात्रिपर्यन्तमहीनयागः भवति तथा त्रयोदशरात्रितः सहस्रसंवत्सरपर्यन्तमनेकयागाः भवन्ति, ते यागाः एव सत्रमिति पदेनोच्यन्ते।

श्रीमन्महर्षिकात्यायनेन यजुर्वेदे एवं शतपथब्राह्मणे वर्णितश्रौतयज्ञस्य पद्धतयः सूत्रबद्धरूपेण कृताः, तदेव ग्रन्थरत्नम् “कात्यायनश्रौतसूत्रम्” इति नाम्ना विख्यातमस्ति। कात्यायनश्रौतसूत्रे प्रतिपादिताः **सप्तपाकयज्ञसंस्थाः** – औपासनहोमः, वैश्वदेवः, पार्वणः, अष्टकाश्राद्धम्, मासिश्राद्धम्, श्रवणाकर्म एवं शूलगवः एताः सप्त पाकसंस्थाः सन्ति। एतेषामनुष्ठानं परिगृहीतस्मार्ताग्नौ विधीयते।

---

[1] **निरुक्तम्** ७.१ पृ.३२५

[2] **आप०श्रौ० ३.१४.८**

**सप्तहविर्यज्ञसंस्थाः** – अग्निहोत्रम्, दर्शपूर्णमासौ, आग्रयणम्, चातुर्मास्यानि, निरूढपशुबन्धः, सौत्रामणी, पिण्डपितृयज्ञादयो बहिर्होमा इति सप्त हविर्यज्ञसंस्थाः।

**सप्तसोमयज्ञसंस्थाः** – अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, आप्तोयमिः इति सप्त सोमसंस्थाः। एवम्प्रकारेण प्रथमं पाकयज्ञः, हविर्यज्ञः, सोमयज्ञः इति भेदत्रयं प्रदर्श्य प्रत्येकं सप्तधा विभज्य एकविंशतिप्रकारकश्रौतयज्ञानां विस्तृतं प्रतिपादनं कात्यायनश्रौतसूत्रे कृतम्।

**हविर्यज्ञसंस्थाः** –

**अग्निहोत्रयज्ञः** – अग्नेः तृप्त्यर्थं श्रौताग्नौ यः यज्ञः विधीयते स एव अग्निहोत्रयज्ञ इति नाम्ना प्रसिद्धमगात्। श्रौतविधिना श्रौताग्निग्रहणे सति तस्यानुष्ठानं विधीयते। अग्निहोत्रकर्ता अग्निहोत्रद्वारा स्वर्गरूपस्येष्टस्य साधना कर्तव्या। एकबारं प्रारभ्यते चेत् यावज्जीवनं तस्य निर्वाहः कर्तव्यः। प्रातःकाले सायङ्काले च अग्निहोत्रहवनं कर्तव्यम्। प्रतिदिनं प्रातःकाले सायङ्काले च अग्निहोत्रहवनमवश्यमेव कर्तव्यम्। तद्यथा– **प्रातर्जुहोत्यनुदिते।।**[१]

सायङ्कालस्य अग्निहोत्रहवनमेवं प्रातःकालस्य अग्निहोत्रहवनमुभौ मिलित्वा एकं कर्म भवति। सायंप्रातरग्निहोत्रं जुहोति। प्रातःकाले सायङ्काले चेदमनुष्ठीयते। अग्निहोत्रहवनं स्वयं यजमानेनैव कर्तव्यम्। विशेषपरिस्थितौ अध्वर्युरपि कर्तुं शक्नोति, यदि अध्वर्युरपि उपलब्धो नास्ति चेत् पत्नीपुत्रशिष्यप्रभृतयः कर्तुं शक्नुवन्ति।

**कामनापरके हवने समयद्रव्याग्नीनां स्थितिः** – यदि स्वर्गस्य कामना अस्ति चेत् सूर्यास्तादनन्तरमुदयानन्तरञ्चं तत्काले एव हवनं कुर्यात्।[२]

---

[१] **का०श्रौ० ४.१५.१**

[२] **का०श्रौ० ४.१५.११**

आयुषः इच्छा अस्ति चेत् सायङ्काले अन्धकारे सति प्रातःकाले यदा अन्धकारः समाप्तिं याति तस्मिन्नेव समये हवनं कुर्यात्।[1] धनप्राप्त्यभिलाषा वर्तते चेत् जनानां निद्रात्यागात् पूर्वं प्रातःकाले हवनं कुर्यात्। तद्यथा – **शयाने श्रीकामस्य प्रातः॥**[2] इति। राजा अथवा प्रशासकः प्रजायाः शोषणं करोति तदा धूमयुक्ताग्नौ आहुतिं दद्यात् – **प्रथमसमिद्धे धूप्यमाने प्रजासु निहत्येव सहसाऽन्नमत्स्यतः॥**[3] इति।

यदि राजा बलपूर्वकं प्रजायाः अन्नादिद्रव्यग्रहणं करोति चेत् ज्वालायुक्ताग्नौ आहुतिं दद्यात् – **भूयिष्ठार्चिषि गृहीत्वेव सहसा॥**[4] भगवत्याः लक्ष्म्याः यशसः कामना अस्ति चेत् प्रदीप्ताग्नौ आहुतिं दद्यात्– **प्रदीप्ततमे श्री-यशस्कामस्य॥**[5] ब्रह्मवर्चसः कामना अस्ति चेत् प्रदीप्ताङ्गारे आहुतिं दद्यात् – **अङ्गारेषु चाकश्यमानेषु ब्रह्मवर्चसस्कामस्य**[6]**॥** स्वर्गपशुमनोरथादिपूर्त्यर्थं दुग्धेन, ग्रामस्य कामनया यावग्वा, बलकामनया तण्डुलैः, स्वस्थेन्द्रियकामनया दध्ना एवं तेजः प्राप्तये आज्येन हवनं कुर्यात्। तथा हि श्रुतिः –

**पयसा सर्वकामस्य, दध्नेन्द्रियकामस्य, आज्येन तेजस्कामस्य, तैलेन श्रीकामस्य, ओदनेन प्रजाकामस्य, यवाग्वा ग्रामकामस्य, तण्डुलैर्बलकामस्य, सोमन ब्रह्मवर्चस्कामस्य, मांसेन पुष्टिकामस्य, उदकेनायुष्कामस्य॥**[7]

---

[1] **का०श्रौ० ४.१५.१२**
[2] **का०श्रौ० ४.१५.१४**
[3] **का०श्रौ० ४.१५.१५**
[4] **का०श्रौ० ४.१५.१६**
[5] **का०श्रौ० ४.१५.१७**
[6] **का०श्रौ० ४.१५.१९**
[7] **वै०श्रौ० ४३.९.१८**

एकवर्षपर्यन्तं विधिपूर्वकं हवनं क्रियते चेत् सिद्धिप्राप्तिर्भवति – **संवत्सरं जुहुयादेतेषामेकैकेन कामसंयोगे** [१] ॥ यद्यपि नित्याग्निहोत्रहवनस्य कृत्यं नियमञ्च यावज्जीवनं क्रियते तथापि कामनाविशेषेण यदि क्रियते चेत् तर्हि कामनापूर्तिपर्यन्तमेवाग्निहोत्रयागः कर्तव्यः। कामनापूर्त्यनन्तरं त्रेताग्नेः विसर्जनं भवति, किन्तु अग्निहोत्रहवनस्य सामान्यकृत्यानि नियमानि च अग्निहोत्रकर्त्रा यावज्जीवनं क्रियते। एतद्विश्वकल्याणार्थमावश्यकम्।

**दर्शपौर्णमासयज्ञः** – प्रत्येकमासस्य अमावस्यायां पूर्णिमायाञ्च अनुष्ठितत्वात् यज्ञस्य नाम दर्शपौर्णमास इत्यस्ति। दर्शपौर्णमासयज्ञः समस्तश्रौतयागानां प्रकृतियागोऽस्ति। अत एव प्रकृतिरूपेण स्थिततत्वात् यजुर्वेदे सर्वप्रथममस्यैव यागस्य विधानं कृतमस्ति। प्रकृतिशब्देन अत्र तात्पर्यमस्ति यत् यः यागः अनुष्ठानसमये अन्ययागस्य अपेक्षां न करोति। दर्शपौर्णमासे अन्यस्य कस्यापि यागस्य विधिः प्रयुक्तो न भवति, किन्तु अन्ययागाः दर्शपौर्णमासविधिना उपकृता भवन्ति। समस्तकामनासिद्धये दर्शपौर्णमासयागः कर्तव्यः – **सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ** [२] ॥ अग्निहोतृणा पुरुषेण दर्श एव पौर्णमास इति यागद्वयं क्रमशः अमावस्यायां पूर्णिमायाञ्च नित्यरूपेण कर्तव्यमिति विधानमस्ति। अग्निपरिग्रहानन्तरं पौर्णमासयोगेनैव यज्ञानुष्ठानस्य प्रारम्भो भवति। दर्शपौर्णमासयागे प्रथमं व्रतोपायनविधिं कृत्वा यजमानेन तस्य पत्न्या च संयमपूर्वकं रात्रेः कालः व्ययीकर्तव्यः। शतपथब्राह्मणस्य प्रारम्भे एव व्रतोपायनविधेः उल्लेखोऽस्ति। द्वितीयदिने यज्ञस्य सर्वाङ्गानुष्ठानं भवति। अग्नेः परिग्रहस्य समयः अमावस्या एवं पौर्णमासी उभे एव स्तः। एतादृश्यां परिस्थितौ यदि अमावस्यायामग्निपरिग्रहः कृतोऽस्ति चेत्

---

[१] **का०श्रौ० ४.१५.२६**

[२] **वैखा०श्रौ० १४.१**

नियमानुसारेण पूर्णिमातिथेः प्रतीक्षा कर्तव्या। अमावस्यायाः द्वितीयदिने दर्शयागः विधातव्यः। यदि पौर्णमास्यामग्निपरिग्रहः कृतोऽस्ति चेत् प्रथमपौर्णमास्यां प्राप्तत्वात् तस्य नाम पौर्णमासयागः स्वाभाविकः। दर्शपौर्णमासशब्दे **"अल्पाच्तरम्"** [१] इति पाणिनिसूत्रेण दर्शशब्दस्य अल्पाच्त्वात् पूर्वपाठो भवति। अमावस्यायां तिथौ अग्निदेवतायै पुरोडाशः, इन्द्रदेवतायै दधि, द्रव्यं तथा पयो त्यागरूपाः त्रयः यागाः भवन्ति। पूर्णिमायां प्रथमः अग्निदेवतासम्बन्धी अष्टकपालयुक्तः पुरोडाशयागः, द्वितीयः अग्निसोमदेवतासम्बन्धी आज्यद्रव्ययुक्तः उपांशुयागः, तृतीयः अग्निसोमदेवतासम्बन्धी एकादशकपालयुक्तः पुरोडाशयागो भवति। एवम्प्रकारेण दर्शपौर्णमासयागे षड् यागाः भवन्ति। दर्शपौर्णमासयज्ञस्यानुष्ठानम् अग्निहोत्रं त्रिंशद्वर्षं यावत् कर्तव्यम्– **त्रिꣳशतं वर्षाणि दर्शपूर्णमासाभ्यां यजेत** [२] इति। दर्शपौर्णमासद्वारा स्वर्गरूपफलयुक्ताग्निहोत्रकर्म अपि सम्पन्नं याति। यस्मिन् दिने अपराह्णे अमावस्यातिथिरागच्छति तस्मिन् दिने पिण्डपितृयज्ञः कर्तव्यः। तस्या अमावस्यायाः द्वितीयदिने दर्शयागः क्रियते। यस्याः पूर्णिमायाः द्वितीयदिने सङ्गवकाले प्रतिपदा आगच्छति तस्मिन् दिने पौर्णमासयागः कर्तव्यः। दर्शपौर्णमासयागं यजमानः, यजमानपत्नी, ब्रह्मा, होता, अध्वर्युः एवं आग्नीध्रः ऐते मिलित्वा सम्पन्नं कुर्वन्ति। दर्शयागे पौर्णमासयागे च हविर्द्रव्यं व्रीहयः यवाश्च भवन्ति। यवव्रीहिमध्ये यस्य परिग्रहः प्रथमं क्रियते तेनैव यागस्य समाप्तिं यावत् विधातव्यः।

**समीक्षात्मकनिष्कर्षः** – दर्शपौर्णमासयागस्य ये जनाः अधिकारिणः सन्ति ते अद्य दर्शपौर्णमासयज्ञस्य विधिविधानानुसारेण अनुष्ठाने रताः सन्ति चेत् विश्वसमाजे देवत्वस्य प्रतिष्ठा भविष्यति एवं वैदिकसनातनधर्मस्य रक्षया साकमिहलोकं परलोकमपि समुन्नतं कर्तुं

---

[१] **पा०सू० २.२.३४**

[२] **का०श्रौ० ४.२.४७**

शक्नुवन्ति। यज्ञानुष्ठानेन याज्ञिकयजमानः स्वर्गं प्राप्नोति। स्वर्गलोके च किमपि भयं नास्ति, यदिच्छति तच्झटिति एव प्राप्नोति, इच्छामात्रेण समस्तपितरः प्रियजनाश्च उपस्थिताः भवन्ति एवं तैः साकं स्वर्गीयसुखानामुपभोगं प्राप्नोति। सदा सर्वदा नवयौवनस्यानन्दमनुभवति, रोगशोकमोहादीनां तु लेशोऽपि न भवति स्वर्गलोके।

महत्त्वपूर्णं तथ्यमिदमस्ति यत् लोके द्वे वस्तूनि स्तः – सत्यं मिथ्या च। देवताः सत्यप्रियाः भवन्ति, मनुष्याः असत्यप्रियाः भवन्ति। **देवो भूत्वा देवं यजेत्** इति श्रुतिवाक्यानुसारेण अहं व्रतग्रहणानन्तरं देवो भूत्वा देवयजनाधिकारी भवामि। दर्शपौर्णमासयागस्य दीक्षां यः स्वीकरोति सः एतादृशीं प्रतिज्ञां करोति। व्रतग्रहणानन्तरं व्रतविसर्जनं यावत् सत्यसम्भाषणमेव कर्तव्यम्। व्रतस्य प्रारम्भे यजमानः अग्निं पश्यन् व्रतस्य सङ्कल्पं करोति। भगवती श्रुतिरपि कथयति –

**ॐ अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयन्तन्मे राध्यताम्। इदमहमनृतात्सत्यमुपैमि**[१]**॥**

दर्शपौर्णमासयागकालः आधिभौतिकलोकस्य मध्ये आधिदैविकद्वीपवत् भवति। यज्ञवेदी, समिधा, दर्भम्, यज्ञपात्रं तथा अन्यान्ययज्ञाङ्गभूतमुपकरणानि सर्वाण्यपि अभिमन्त्रितानि भवन्ति तेन देवत्वमयः सम्पद्यते। एतादृशदिव्यपरिस्थितौ स्थितः यजमानः, यजमानपत्नी, ब्रह्मा, होता, अध्वर्युः आग्नीध्रः अपि देवत्वमयाः भवन्ति। दर्शपौर्णमासयागानुष्ठानस्य परिणामस्वपेण अदृष्टरूपेण परिणतकर्मफलपरिपाकेन दिव्यलोकप्राप्तिर्भवति। यस्मिन् कर्मविशेषे देवता, हवनीयद्रव्यम्, वेदमन्त्रः, ऋत्विक् एवं दक्षिणा एतेषां पञ्चोपादनानां संयोगो भवति स एव यज्ञः[२] इति कथ्यते। यज्ञस्य

---

[१] **शु०य० १.५**

[२] **देवानां द्रव्यहविषामृक्सामयजुषां तथा।**

विधिवदनुष्ठानेन चराचरात्मकं सम्पूर्णं जगत् तृप्तं भवति। श्रौतयज्ञानुष्ठानं सकाम एवं निष्काम उभाभ्यामपि क्रियते। श्रीमद्भागवते, अग्निमत्स्यभविष्यादिपुराणेषु येषां यज्ञानां तेषां विधीनां च विस्तृतविवेचनं प्राप्यते तत्सर्वं वेदब्राह्मणोपनिषदारण्यककल्पसूत्रेष्वेव वर्णितं दृश्यते।यज्ञद्वारा भगवतो नारायणस्यैव आराधना भवति। अस्मिन् विषये भगवता वेदव्यासेनापि उल्लिखितम् -

**यस्य राष्ट्रे पुरे चैव भगवान् यज्ञपूरुषः।**
**इज्यते स्वेन धर्मेण जनैर्वर्णाश्रमान्वितैः॥**
**तस्य राज्ञो महाभाग भगवान् भूतभावनः।**
**परितुष्यति विश्वात्मा तिष्ठतो निजशासने॥**[१]

श्रौतयज्ञानां फलं लौकिकं पारलौकिकञ्च वर्तते। श्रौतयज्ञानुष्ठानेन सर्वाङ्गीणाभ्युदयो भवति। यजुर्वेदस्य प्रथमाध्यायादारभ्य द्वितीयाध्यायस्य एकत्रिंशन्मन्त्रं यावत् तथा कात्यायनश्रौतसूत्रस्य द्वितीयाध्यायारम्भतः तृतीयाध्यायसमाप्तिं यावत् तथा शतपथब्राह्मणस्य सम्पूर्णप्रथमे काण्डे दर्शपौर्णमासयागस्य प्रतिपादनं कृतं वर्तते।

**आग्रयणेष्टिः** - आग्रयणेष्टिः वर्षे वारचतुष्टयं भवति। आग्रहायणेष्टिः नवान्नेष्टिनाम्ना अपि व्यपदिश्यते। यज्ञस्य समयः क्रमेण शरद्वसन्तवर्षाग्रीष्मर्तवः भवन्ति। एतेषु चतुर्षु ऋतुषु मुख्यरूपेण यस्यान्नस्य पाको भवति, तस्यैवान्नस्य नाम्ना एताः इष्टयः भवन्ति। एताः इष्टयः सन्ति - यवाग्रयणेष्टिः, व्रीह्याग्रयणेष्टिः, श्यामाकाग्रयणेष्टिः, वैणवाग्रयणेष्टिः इति। अस्य यागस्यानुष्ठानस्योद्देश्यमस्ति यत् व्रीहियवप्रभृत्यन्नानामुत्पत्तिः वृष्टिद्वारा भूमौ भवति, अतः अन्नं द्यावापृथिव्याः रसोऽस्ति। शतपथब्राह्मणस्य श्रुतिः कथयति -

---

**ऋत्विजां दक्षिणानाञ्च संयोगो यज्ञ उच्यते॥ (मत्स्यपुराणम्)**

[१] **श्रीमद्भागवतम् ४.१४.१८-१९**

**अनयोर्वा अयं द्यावापृथिव्यो रसोऽस्य रसस्य हुत्वा देवेभ्योऽथेममश्नामेति तस्माद्वा आग्रयणेष्ट्या यजते॥**[१] अत एव आग्रयणेष्टिद्वारा सम्पूर्णविश्वस्य कल्याणार्थं नवीनान्नं सर्वप्रथमं देवतायै समर्पणीयम्।

**चातुर्मास्ययज्ञः** - चातुर्मास्ययागे चत्वारि पर्वाणि भवन्ति। प्रत्येकस्य पर्वणः चतुर्षु मासेषु अनुष्ठानत्वात् अस्य यागस्य नाम चातुर्मास्यमिति कथ्यते - **चतुर्षु मासेषु भवन्ति इति व्युत्पत्त्या**[२] इति। प्रथमं वैश्वदेवपर्व, द्वितीयं वरुणप्रघासपर्व, तृतीयं साकमेधपर्व एवं चतुर्थं शुनासीरीयपर्वनाम्ना प्रसिद्धम्। चातुर्मास्ययागस्य फलं स्वर्गप्राप्तिरिति कथ्यते। तथा च जैमिनिसूत्रम् - **चातुर्मास्यैः स्वर्गकामो यजते**[३] तथा च **अक्षय्यं ह वै सुकृतं चातुर्मास्ययाजिनो भवति**[४] इति। सविध्यङ्गसहितचातुर्मास्ययागानुष्ठानेन स्वर्गलोकस्य प्राप्तिर्भवति।

**निरूढपशुबन्धयागः** - एतत् श्रौतकृत्यमिष्टिः यज्ञश्चेति उभयात्मकमस्ति। ब्राह्मणश्रुतिः कथयति - **इष्टिः पशुबन्धा महायज्ञा इति। तस्य प्रयाजा एव प्रातः सवनम्। अनुयाजास्तृतीयसवनम्। पुरोडाश एव माध्यन्दिनं सवनम्॥**[५] आहिताग्निना पुरुषेणास्यानुष्ठानं वर्षे एकवारमथवा वारद्वयं कर्तव्यम्। अस्य यागस्यानुष्ठानं स्वनिवासभवने एव कर्तव्यम्[६]। इन्द्राग्नी, सूर्यः, प्रजापतिः एतासु त्रिषु देवतासु काप्येका देवता निरूढपशुबन्धयागस्य प्रधानदेवता मन्तव्या। अस्मिन् यागे हविर्द्रव्यस्य स्थाने अजाग्रहणं क्रियते। आहिताग्निः अश्वमेधयागकरेण यं

---

[१] **श०ब्रा० २.३.५.१**

[२] **का०श्रौ०भा० ५.१.१**

[३] **जै०सू० ११.२.१२**

[४] **श०ब्रा० २.५.४.१**

[५] **श०ब्रा० ११.४.८.२-३**

[६] **गृहेषु। का०श्रौ० ६.१.३**

लोकं जयति तमेव पशुबन्धयागानुष्ठानेनापि जयति। ब्राह्मणश्रुतिः कथयति – **यावन्तमश्वमेधेनेष्ट्वा लोकं जयति तावन्तमेतेन जयति**[1] इति।

**सौत्रामणीयागः** – इन्द्रदेवतानिमित्तं विधीयमानयागः सौत्रामणीयागः कथ्यते – **सुत्राम्ण इयं सौत्रामणी** इति। अस्मिन् यागे अग्निचयनमपि यागस्याङ्गं कथितमस्ति। सप्तहविसंस्थासु एषः यागः एका हविसंस्था अस्ति। नित्यनैमित्तिककाम्यभेदेन अस्य यागस्य त्रयः भेदाः भवन्ति। उद्देश्यविशेषरहितोऽनुष्ठीयमानो यागः नित्यः, सोमस्य वमने सति यः यागः क्रियते सः नैमित्तिकः सौत्रामणीयागः कथ्यते। यदा ऋद्धिरूपफलप्राप्तिकामनया अस्यानुष्ठानं क्रियते तदा काम्यसौत्रामणीयागः कथ्यते। एवम्प्रकारेण अस्यापरं नाम ब्राह्मणयज्ञमप्यस्ति – **तस्मादेष ब्राह्मणयज्ञ एव यत्सौत्रामणी**[2] तथैव **ब्राह्मणयज्ञः सौत्रामण्यृद्धिकामस्य**[3] इति। सौत्रामणीयागं यज्ञशरीरस्य आत्मा कथ्यते – **आत्मा वै यज्ञस्य सौत्रामणी बाहू ऐन्द्रश्च वयोधाश्च**[4] इति।

काम्यसौत्रामणीयागस्यानुष्ठानं केवलं ब्राह्मणेनैव कर्तुं शक्यते। किन्तु अग्निचयनयागस्याङ्गरूपेण कर्तव्यमस्ति चेत् त्रयाणां वर्णानां जनाः अधिकारिणः भवन्ति। राज्यात् च्युतः राजा पुनः स्वराज्यप्राप्तये सौत्रामणीयागस्यानुष्ठानं करोति।[5] भौतिकसंसाधनानां कामनया अपि सौत्रामणीयागस्य विधानं क्रियते।

---

[1] **श०ब्रा० ११.४.१३.५**

[2] **श०ब्रा० १२.४.३.१**

[3] **का०श्रौ० १९.१.१**

[4] **श०ब्रा० १२.४.५.१६**

[5] **का०श्रौ० १९.१.३**

**अग्निष्टोमयागः** - स एव यज्ञो भवति यः त्रिभिर्वेदैः सम्पादितो भवति- **स त्रिभिर्वेदैर्विधीयते**[१] इति। समस्तकामनासिद्धये अग्निष्टोमयागः कर्तव्यः - **सर्वकामोऽग्नि- ष्टोमः**[२] इति। यस्मिन् यज्ञे सोमलतायाः रस आहुतित्वेन प्रदीयते स एव सोमयज्ञः इति।[३] अग्निष्टोमशब्दः संस्थापरकोऽस्ति। अहिताग्निना यजमानेन दर्शपौर्णमासः, चातुर्मास्यम् एवं पशुबन्धप्रभृतियज्ञानन्तरमग्निष्टोमयागः विधातव्यः[4]। अग्निष्टोमानन्तरमपि पूर्वोक्ताः यागाः कर्तुं शक्यन्ते[5]। आहिताग्नये दर्शपौर्णमासवत् अग्निष्टोमयागोऽपि नित्यः यागोऽस्ति। अग्निपरिग्रहानन्तरमेव सोमयागः विधातव्यः। अत एव सोमयज्ञस्यानुष्ठानसमये एतदवश्यमेव द्रष्टव्यं यत् सोमयागकर्तुः पित्रा एवं पितामहेन च सोमयागः कृतो न वा इति। सोमयज्ञकर्तुः पूवजैः यदि सोमयागः न कृतः तर्हि **दौर्ब्राह्मण्य**[६] संज्ञकः दोषः प्राप्यते। अत एव सोमयज्ञकर्त्रा दौर्ब्राह्मण्यनामकदोषनिवृत्तये ऐन्द्रागनपशुयागः परमावश्यरूपेण कर्तव्यः - **ऐन्द्रागनं पुनरुत्सृष्टमालभ्य द्विपुरुषा सोमपीथिनः**[७] इति। अग्निष्टोमयज्ञः वसन्ततौं शुक्लपक्षे एकादश्यां प्रारभ्य पूर्णिमायां समाप्तिं गच्छति। यजमानेन ऋत्विजां यथाविधिवरणादिकं कृत्वा तेभ्यः देवयजनस्य याचनां कुर्यात्। स्वारणौ अग्नेः समारोपं कुर्यात् -

---

[१] **आ०श्रौ० २४.१.३**

[२] **सत्या०श्रौ० ७.१.१**

[३] **का०श्रौ० १०.९.२५**

[४] **का०श्रौ० ७.१.१**

[५] **का०श्रौ० ७.१.२**

[६] **यस्य वेदस्य वेदी च विच्छिद्येते त्रिपूरुषम्।**
**स वै दुःब्राह्मणो नाम ब्रह्मवादिषु गर्हितः॥ ( सं०श्रौ०टीका ७.१ )**

[७] **का०श्रौ० ७.१.६**

**समारोह्याग्नी शालास्तम्भं पूर्वार्द्धयं गृहीत्वाऽरणिपाणिराहेदमगन्मेति**[1] । यज्ञस्योपयोगिन्यः सोमलताः[2], अरणीत्यादयः सामाग्र्यः शकटद्वारा देवयजनभूमौ नयेत्। धर्मपत्न्या, ऋत्विजा एवं परिचारकेण साकं मङ्गलवाद्यमेवं मङ्गलवेदमन्त्रस्य पाठं कुर्वन् यज्ञभूमिं प्रति प्रस्थानं कुर्यात्। यजमानः विधिवदग्निष्टोमयज्ञसम्पादनपूर्वकं यज्ञस्य सम्पूर्तये एकसहस्रब्राह्मणभोजनं कारयेत् तथा ब्राह्मणेभ्यः सुवर्णमथवा अनड्वाहं दक्षिणायां दद्यात्– **हिरण्यं दक्षिणाऽनड्वान्वा**[3] इति।

**अत्यग्निष्टोमयज्ञः** – अत्यग्निष्टोमयज्ञः सोमयागस्य द्वितीया संस्था अस्ति – **षडुत्तरेऽत्यग्निष्टोम उक्थ्यः, षोडशी वाजपेयोऽतिरात्र आप्तोर्यामः**[4] **।** एषः अग्निष्टोमयागस्य विकृतिरस्ति। विशेषविधिं विहायान्ये विधयः प्रकृतिभूताग्निष्टोमयज्ञवत् भवन्ति।

**उक्थ्ययज्ञः** – सोमयज्ञस्य तृतीया संस्था उक्थ्यसंज्ञकोऽस्ति। पशोरभिलाषया उक्थ्ययागः कर्तव्यः – **उक्थ्येन पशुकामो यजेत**[5]**।**

**षोडशीयज्ञः** – षोडशीनामकः यज्ञः सोमयज्ञस्य चतुर्थी संस्था अस्ति। एषोऽपि अग्निष्टोमयागस्य विकृतिरस्ति। विशेषविधानं विहाय षोडशीयागे अन्यान्यनुष्ठानानि प्रकृतिवद् भवन्ति। वीर्यकामेन षोडशीयागः विधातव्यः – **षोडशिना वीर्यकामः**[6]**।**

---

[1] **का०श्रौ० ७.१.३०**

[2] **का०श्रौ० ८.७.१६**

[3] **का०श्रौ० १०.९.१९**

[4] **का०श्रौ० १०.९.२७**

[5] **स०श्रौ० ९.७**

[6] **स०श्रौ० ९.७**

**वाजपेययज्ञः** – वाजपेयसंज्ञकः यज्ञः सोमयागस्य पञ्चमी संस्था अस्ति। एषः यागः षोडशीनामिका चतुर्थी सोमसंस्थाया विकृतिरस्ति। साम्राज्यकामनया वाजपेययागः विधातव्यः – **वाजपेयेनेष्ट्वा सम्राड् भवति**[१] इति। शरदि ऋतौ वाजपेययागस्यानुष्ठानं क्रियते – **वाजपेयः शरदि**[२]। वाजपेययागात् पूर्वमेवं वाजपेययागानन्तरं बृहस्पतिसवसंज्ञकयागकरणस्य विधानमस्ति – **उभयतः शुक्लपक्षौ बृहस्पतिसवनेन यजेत**[३] इति। वाजपेययागेन यजमानः सम्राट्पदेन विभूषितो भवति। यजमानस्य नामोच्चारणमेवं शर्म उच्चारणं कृत्वा एषः सम्राट्, एषः सम्राट्, एषः सम्राट् इति एवम्प्रकारेण उच्चस्वरेण घोषणा कर्तव्या – **सम्राडयमसावित्याह नामग्राहं त्रिरुच्चैः॥**[४]

**अतिरात्रयज्ञः** – अतिरात्रयज्ञः सोमयज्ञस्य षष्ठी संस्था अस्ति। अतिरात्रयज्ञस्य प्रकृतिः अग्निष्टोमयागोऽस्ति। ब्रह्मवर्चसकामेन अतिरात्रयज्ञः कर्तव्यः – **अतिरात्रेण ब्रह्मवर्चसकामः**[५] इति। अतिरात्रयागस्य निमित्तं विहितं विशेषविधिं विहायावशिष्टान्यङ्गानि अग्निष्टोमयागवद् भवन्ति।

**आप्तोर्यामयज्ञः** – आप्तोर्यामयज्ञः सोमयज्ञस्य सप्तमी संस्था अस्ति। आप्तोर्यामसंज्ञकः यागः अतिरात्रयागस्य विकृतिरस्ति – **अतिरात्रविकारोऽऽप्तोयामस्य**[६]। आप्तोर्यामयज्ञे कथितं विधिं त्यक्त्वा शेषानुष्ठानानि अतिरात्रयागवत् सम्पादितानि भवन्ति।

---

[१] **श०ब्रा० ५.१.१.१४**

[२] **का०श्रौ० १४.१.१**

[३] **का०श्रौ० १४.१.२**

[४] **का०श्रौ० १४.५.२५**

[५] **स०श्रौ० ९.७**

[६] **दे०प०पृ० ३७१**

**सोमयागाङ्गभूतमग्निचयननिरूपणम्** –

**अग्निचयनयज्ञः** – अग्निशब्दस्यार्थः अग्न्याधारस्वरूपा इष्टिका अस्ति[१]। यस्मिन् यज्ञे विशेषविधानेन इष्टिकां संयोज्य चितिनिर्माणं क्रियते स एव अग्निचयनयाग इति कथ्यते। अग्निचयनयागे आहवनीयस्थानीयोत्तरवेदेः निर्माणमकृत्वा तत्स्थाने चितिनिर्माणं क्रियते। प्रत्येकं चितेः पञ्चप्रस्ताराः भवन्ति। चितिनिर्माणार्थं प्रथमं इष्टिका निर्मातव्या[२]। अग्निचयनयज्ञस्य इष्टिकानां निर्माणं विधानेन भवति।

**श्येनयागः** – स्वर्गप्राप्तिकामनया श्येनयागस्य विधानं क्रियते[३]। श्येनचितेः आकारः श्येनपक्षीवत् भवति। अस्य पञ्च प्रस्ताराः भवन्ति, प्रत्येकप्रस्तारे शिरः, आत्मा, दौ पक्षौ, एकं पुच्छञ्च भवति।

**द्रोणचितिः** – अन्नस्य कामनया द्रोणचितेः चयनस्य विधानं कृतमस्ति। द्रोणे अन्नं पूर्यते।

**रथचक्रचितिः** – शत्रुद्वारा आक्रान्तं आहिताग्निं पुरुषं रथचक्रचितेः चयनं कर्तव्यम् – **रथचक्रचितिं चिन्वीत भ्रातृव्यानिति परिमण्डलो भवति**[४] इति एवम्प्रकारेण प्रउगचितेः एवमुभयतः प्रउगचितेः चयनमपि शत्रोः नाशार्थं कर्तव्यम्।[५]

**राजसूययज्ञः** – राजसूययज्ञं केवलं चक्रवर्ती क्षत्रियः राजा एव कर्तुं शक्नोति।[६] अयं यज्ञः सर्वप्रथमं राज्ञा हरिश्चन्द्रेण वरुणदेवात् प्राप्त

---

[१] **का०श्रौ०क०भा० १६.१.१**

[२] **श०ब्रा०ह०भा० ६.३.६.१**

[३] **का०श्रौ० १६.५.९**

[४] **सं०श्रौ०१२.८.८**

[५] **स०श्रौ० १२.८.६-७**

[६] **का०श्रौ० १५.१.१ एवम् श०ब्रा० ५.२.२.४१**

आसीत्। हरिश्चन्द्रद्वारा अनुष्ठिते राजसूययज्ञे विश्वामित्रः होता, अङ्गिरस उद्गाता एवं जमदग्निरध्वर्युरासीत्।[1]

**अश्वमेधः** – अश्वमेधयागस्य सार्वभौमः क्षत्रियः राजा एव अधिकारी भवति – **राज्ञोऽश्वमेधः सर्वकामस्य**[2]। समस्तप्रकारककामनानां पूर्तिः अश्वमेधयागेन भवति[3]। ब्रह्महत्याप्रभृतिसमस्तमहापातका अपि अस्य यज्ञस्यानुष्ठानेन दूरीभवन्ति। कृष्णयजुर्वेदीया तैत्तिरीया श्रुतिः कथयति – **सर्वस्य वा एषा प्रायश्चित्तिः सर्वस्य भेषजं सर्वं वा एतेन पाप्मानꣳ तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते, य उ चैनमेवं वेद॥**[4]

अश्वमेधयज्ञः पवित्रतीर्थे पवित्रनद्याः तटे विधातव्यः। फाल्गुनशुक्लाष्टम्यामथवा नवम्यां तिथौ अश्वमेधयागः प्रारम्भणीयः।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'श्रौतयज्ञानां वैश्विकचिन्तने योगदानम्'** नाम सप्तविंशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

---

[1] **शां०श्रौ०भा० १५.२०.२१**

[2] **का०श्रौ० २०.१.१**

[3] **स०श्रौ० १४.१.२**

[4] **कृ०य०तै०सं० ५.३.१२**

# अथाष्टाविंशोऽध्यायः

# स्मार्तयज्ञानां वैश्विकचिन्तने योगदानम्

कर्मकाण्डोपासनाकाण्डज्ञानकाण्डविषयाणां वर्णनं यजुर्वेदे प्राप्यते। कर्मकाण्डे यज्ञयागादिविभिन्नक्रियाकलापानां प्रतिपादनमस्ति। यज्ञान्तर्गतानि देवपूजा, देवतुल्यानामृषिमहर्षीणां सङ्गतिकरणं तथा दानम् एतानि भवन्ति। वैदिकमन्त्रद्वारा देवतानां तृप्त्युद्देश्येन कृतं द्रव्यदानमेव यज्ञ इति कथ्यते – **द्रव्यं देवता त्यागः**[१]।।

यज्ञाः नित्यनैमित्तिकभेदेन द्विविधा भवन्ति। येन कर्मणा विशेषफलस्य प्राप्तिर्न भवति किन्तु अकरणे तु प्रत्यवायो भवति स एव नित्ययज्ञः इति कथ्यते। यथा – सन्ध्यावन्दनम्, पञ्चमहायज्ञाः, एकादशीव्रतादयः।

पञ्चमहायज्ञान्तगतः ब्रह्मयज्ञः, देवयज्ञः, भूतयज्ञः, पितृयज्ञः, मनुष्ययज्ञश्चागच्छति। वेदानां स्वाध्यायः ब्रह्मयज्ञत्वेन कथ्यते, इष्टदेवतायाः उपासना तथा परब्रह्मपरमात्मनः निमित्ताय कृतोपासनादयः देवयज्ञः, कृमिकीटपशुपक्षीणां सेवा भूतयज्ञः, परलोकगामिनां पितृणां कृते कृतं पिण्डदानादिश्राद्धमेवं तपर्णं पितृयज्ञः, यस्य कस्यापि मनुष्यस्य गृहागमने सति भोजनादिद्वारा कृतः सत्कारः मनुष्ययज्ञ इति कथ्यते।

नैमित्तिकयज्ञः मुख्यतया द्विविधः – श्रौतः स्मार्तश्च। श्रुतिप्रतिपादितः यज्ञः श्रौतयज्ञः तथा स्मृतिप्रतिपादितः यज्ञः स्मार्तयज्ञ इति कथ्यते। स्मार्तयज्ञेषु वैदिकपौराणिकतान्त्रिकमन्त्राणां प्रयोगो भवति।

---

[१] **कृ०य०तै०सं० १.२.२**

परमात्मनः निःश्वासभूतवेदस्य मुख्या प्रवृत्तिः यज्ञस्यानुष्ठानविधाने अस्ति। यज्ञेन समुद्भूता पर्जन्यादिवृष्ट्या संसारस्य पालनं भवति। परमात्मा यज्ञस्य शक्तितः एव विश्वस्य सृष्टिं तथा संरक्षणं करोति। मानवस्य तथा यज्ञस्य परस्परं सम्बन्धः सृष्टेः प्रारम्भकालादेव प्रचलति। मानवजातेः जीवनस्य प्रारम्भः यज्ञद्वारैव भवति। तद्यथा –

**सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।**
**अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्॥**
**देवान् भावयतानेन ते देवा भावयन्तु वः।**
**परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥**[१]

ब्रह्मणा यज्ञकर्मार्थमेव यज्ञस्य श्रेष्ठसाधनत्वेन चातुर्वण्यरूपेण मानवस्य रचना कृता। भगवान् वेदव्यासः कथयति –

**यज्ञनिष्पत्तये सर्वमेतद् ब्रह्मा चकार ह।**
**चातुर्वर्ण्यं महाभाग यज्ञसाधनमुत्तमम्॥**[२]

सर्वप्रथमोत्पन्नस्य भगवत्स्वरूपस्य तस्य यज्ञस्य इन्द्रादिदेवताभिः, सृष्टिसाधनयोग्यैः प्रजापत्यादिसाध्यैः तथा मन्त्रद्रष्टृभिः ऋषिभिः यज्ञरूपस्य[३] भगवतः यजनं कृतम्। भगवती श्रुतिः कथयति –

**तँयज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः।**
**तेन देवा अयजन्त साध्या ऋषयश्च ये॥**[४]

प्रजापतिना स्वप्रतिमारूपेण सर्वप्रथमं यज्ञस्योत्पत्तिः कृता। ब्राह्मणश्रुतिः कथयति –

---

[१] **श्रीमद्भगवद्गीता ३.१०-११**

[२] **पद्मपुराणम्, सृष्टिखण्डः ३.१२३**

[३] **शु०य० ३१.१६**

[४] **शु०य० ३१.९**

**अथैनमात्मनः प्रतिमामसृजत यद् यज्ञम्, तस्मादाहुः प्रजापतिर्यज्ञ इत्यात्मनो ह्येनं प्रतिमामसृजत**[१]**।।** भगवती तैत्तिरीयश्रुतिरपि कथयति –

**जायमानो वै ब्राह्मणस्त्रिभिऋणैत्रऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः।**[२] आशयोऽयं यत् द्विजः जन्मतः एव ऋषि–ऋणस्य, देव–ऋणस्य, पितृ–ऋणस्य च ऋणी भवति। ब्रह्मचर्येण ऋषि–ऋणात्, यज्ञेन देव–ऋणात् तथा सन्तत्या पितृ–ऋणात् मुक्तो भवति। भगवता श्रीकृष्णेन सिद्धान्तस्योपस्थापनं कुर्वता कथितमस्ति यत् – यज्ञदानतपोरूपकर्माणि न त्यागयोग्यानि, अपितु तानि अवश्यं कर्तव्यानि। यतो हि यज्ञदानतपःकर्माणि बुद्धिमन्तं पुरुषं पवित्रं कुर्वन्ति। तद्यथा –

**यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत्।**
**यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्।।**[३]

शास्त्रविहितयज्ञादिश्रेष्ठकर्माणि कृत्वैव जीवः जगति शतवर्षपयन्तं जीवनस्य इच्छां कुर्यात्। एवम्प्रकारेण क्रियमाणानि कर्माणि शरीरयुक्तयाज्ञिकमनुष्ये लिप्तानि न भवन्ति। एतदतिरिक्तो नान्यः मार्गः येन मनुष्यः कर्मणा मुक्तो भवेत्।[4] पुत्रवत्सला भगवती श्रुतिः पूर्वोक्तप्रमाणद्वारा अस्मिन् कर्मयुक्ते संसारे सर्वे मनुष्याः कर्मठाः भवन्तु इति श्रावयति। तेषां कल्याणायैव श्रीमद्भगवद्गीता अपि मातृवत् मानवानाम् उपदेशं करोति –

---

[१] **शοब्राο ११.१.८.३**

[२] **तैοसंο ३.१०.५**

[३] **श्रीमद्भगवद्गीता १८.५**

[४] **शुοयο ४०.२**

**अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।**
**यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः॥**[१]

अनेन कथनेन सिद्धं भवति यत् व्यावहारिकाणि पारमार्थिकाणि सर्वाण्यपि कार्याणि यज्ञाद्युत्तमक्रियाकलापानामुपरि निर्भराणि भवन्ति। आम्नायः यज्ञानुष्ठानाय भवति, अत एव यज्ञभावनया हीनाः विषयाः निरर्थकाः, अधर्माः भवन्ति।[२]

वैदिकयुगे अन्तःकरणस्य ग्रन्थीनां शिथिलीकरणे तथा भगवत्प्राप्तये व्यक्तीनां जन्मत आरभ्य मृत्युपर्यन्तं जीवनं संस्कारेण संस्कृतमासीत्। यजुर्वेदस्य गृह्यसूत्रसाहित्यं बहुव्यापकमस्ति, यस्य कारणेन अस्माकं देशस्य विस्तृतभूभागः, विविधाः भाषाः, विविधधर्माः, विविधजातेः आचारादयः सन्ति। आचारविविधतायाः कारणेन अनेकपद्धतयः तथा अनेकगृह्यसूत्राणि अस्माकं संस्कृतेः पोषकाणि सन्ति।

यजुर्वेदे एकादशगृह्यसूत्राणि सन्ति। शुक्लयजुर्वेदे द्वे गृह्यसूत्रे स्तः पारस्करं वैजवापञ्च। कृष्णयजुर्वेदस्य नव गृह्यसूत्राणि सन्ति – बौधायनम्, भारद्वाजम्, आपस्तम्बम्, हिरण्यकेशीयम्, वैखानसम्, मानवम्, अग्निवेश्यम्, वाराहं तथा काठकञ्च। यजुर्वेदीयगृह्यसूत्रेषु सदाचारस्य विधयः प्रतिपादिताः सन्ति। गृहस्थस्य गर्भाधानादिसंस्काराः स्मार्त्तयज्ञान्तर्गताः भवन्ति।

गृह्यसूत्रेषु तथा पुराणेषु वर्णितस्मार्त्तयज्ञेन प्रमाणितं भवति यत् राजतः रङ्कं यावत् सर्वेषामपि परम्परागतस्मार्त्तयज्ञेषु श्रद्धा आसीत्। अनेनैव कारणेन भारते समये समये आक्रमणकारिभिः कृतानि क्रूरतापूर्णाक्रमणान्यपि निष्फलानि जातानि। एतान्येव वैदिकानामृषीणां

---

[१] **श्रीमद्भगवद्गीता ३.१४**

[२] **आम्नायस्य क्रियार्थत्वादनर्थक्यमतदर्थानाम् ( जै०सू० १.२.१ )**

वैश्विकामरयोजनानि, एतान्येव योजनानि देशमप्यखण्डितं कुर्वन्ति। वयमेतादृशसंस्कृतेन सम्बद्धत्वात् सर्वे एकतायामाबद्धाः स्म।

यजुर्वेदीयगृह्यसूत्रेषु गृहस्थानां दैनिकस्मार्त्तयज्ञेषु सन्ध्यावन्दनं तथा वने गवां चारणार्थं नयनम्, अग्नये तथा प्रजापतये दीयमानाहुतय आगच्छन्ति। ततः परं पञ्चमहायज्ञानां विधानं वर्तते। यथा– **अथातः पञ्चमहायज्ञाः॥**[१] प्रातःकाले तथा सायङ्काले वैश्वदेवाहुतयः अग्नौ विश्वकल्याणार्थं सोमेन्द्राग्निप्रजापतिविश्वदेवेभ्यः प्रदीयन्ते। तदनन्तरं तेभ्यः देवेभ्यः एवं वास्तोष्पतये बलिप्रदानमपि क्रियते। वैदिकदेवेभ्यः आहुतयः तथा बलिप्रदानमपि क्रियते।

श्रावणमासे यदा वर्षा प्रारभ्यते तदा सर्पाणां भयमधिकं भवति तदा सर्पाः शान्ताः भवन्तु इति दक्षिणाग्नौ स्मार्तसर्पयज्ञस्य विधानं क्रियते। एतदतिरिक्तं नवीनलौकिकाग्निं प्रज्वालितं कृत्वा तत्र अनेकदेवेभ्यः आहुतयः प्रदीयन्ते, यत्र पृथिवीसत्वभौमवर्षाश्रावणाग्निसूर्यवायुविष्ण्वादयः देवताः सम्मिलिताः भवन्ति। यज्ञस्य द्वितीयभागं सर्पाणां सम्बोधनं कृत्वा विधीयते, अन्ते त्रयाणां लोकानां सर्पेभ्यः बलिरपि प्रदीयते[२]। गृहं परितः सर्पाः दूरीभवन्तु इति धिया जलधाराः त्याज्यन्ते।[३]

भाद्रपदस्य पूर्णिमायामेकसूत्रे इन्द्राय इन्द्राण्यै, अजायै, एकपादे, अहिर्बुध्न्याय तथा प्रोष्ठपदस्याभिमानिदेवेभ्यः बलिः प्रदीयते, अन्ते मरुद्गणेभ्यः आहुतिः तथा बलिविधानं क्रियते।[४] आश्विनपूर्णिमायां पशुपतये बलिः प्रदीयते। बलिनिर्माणं दुग्धेन साकं घृतमिश्रणेन भवति।

---

[१] **पा०गृ० २.९.१**

[२] **पा०गृ० २.१४**

[३] **शु०य० १३.६८**

[४] **पा०गृ० २.१४.२२**

एषः स्मार्त्तयागः सम्पूर्णविश्वस्य पशुसमूहस्य कल्याणाय क्रियते, पुरोहितः यजमानश्च प्रसादकस्य भागग्रहणं करोति, तथा गोभ्योऽपि अस्य एकः भागः प्रदीयते, ततः परं सवत्सा गावः साकं एकत्रं बन्धनस्य विधानमस्ति [१] । आग्रहायणी स्मार्त्तकर्म मार्गशीर्षमासस्य पूर्णिमायाः दिने भवति। एषः नववर्षस्य प्रारम्भोत्सवोऽस्ति, तथा गृहस्य सम्पूर्णतया पवित्राय क्रियते।

गृहस्थाः आयुःक्रमेण अग्नेः पश्चिमे कुशासने तिष्ठन्ति। अत्रापि सर्पादिदेवेभ्यः बलिः प्रदीयते। [२] अतिथिगुरुपुरोहितस्नातकाचार्यजामातृ–प्रजापालनेऽधिकृतः क्षत्रियः मित्राणाञ्चार्घ्याद्युपचारैः पूजां करोति। [३] एषः स्मार्त्तयागः विश्वशान्तये सद्भावाय चावश्यकः। पशुधनस्य वृद्धये अनेकस्मार्त्तयज्ञानामुल्लेखः प्राप्यते। शूलगवनामकः [४] स्मार्त्तयागः सम्पत्तिं प्रददाति, अस्य स्वकीयं विशिष्टरूपमस्ति।

अनेकप्रकाराणामुपद्रवाणां शान्तये तथा पुरुषार्थचतुष्टयप्राप्तये रुद्रयागस्य विधानमस्ति। त्रिविधतापनिवारणाय तथा धर्मार्थकाममोक्षप्राप्तये विष्णुयज्ञस्य विधानं कृतमस्ति। विभिन्नकामनापूर्तये चण्डीलक्ष्मीन्द्राणीरुद्राणीशर्वाणीभवान्यादीनां शक्तियागानां विधानमप्यस्ति। कार्तिकपूर्णिमायां अनडुहत्यागस्य स्मार्त्तानुष्ठानं गोशालायामग्निप्रज्वालितं कृत्वा पूष्णः कृते आहुतयः प्रदीयन्ते तथा अनड्वाहं अलङ्कृतं कृत्वा रुद्रदेवं सम्बोधितं कृत्वा मन्त्रपाठेन साकमनड्वान्  त्यज्यते।

---

[१] **पा०गृ० २.१६.५**

[२] **पा०गृ० ३.२.४**

[३] **पा०गृ० १.३.१**

[४] **पा०गृ० ३.८.१**

सम्पूर्णविश्वस्य भरणपोषणार्थं कृषिसम्बद्धस्य स्मार्त्तसीतायज्ञस्य[१] यजुर्वेदीयगृह्यसूत्रे विधानं कृतमस्ति। सीतायज्ञे विभिन्नदेवेभ्यः तृप्त्यर्थमाहुतयः तथा बलिविधानमपि कृतमस्ति।[२] नवान्नयज्ञानां सम्बन्धः श्रौतकर्मकाण्डेन साकं स्मार्त्तयज्ञेन गृह्यकर्मकाण्डेनापि वर्तते। अस्मिन् यागे विभिन्नसमये तण्डुलैः इन्द्रब्रह्मवासुकिदेवेभ्यः बलिः प्रदीयते। एवम्प्रकारेण नानाविधबलीनामपि विधानमस्ति।[३]

मनुष्यः स्वप्रयोजनसिद्धये यज्ञं करोति तथा अपराधे सत्यपि क्रोधः न आगच्छेदिति प्रार्थनां करोति। अस्माकं यज्ञं नष्टं न करोतु, यजमानं नष्टं न करोतु इति हे देव! भवान् अस्माकं कृते कल्याणकारी भवतु।[४] स्मार्त्तयज्ञानां विधानं साधकाय संयमितजीवनयापने शिक्षां प्रददाति, एषा शिक्षा विश्वशान्तये अत्यन्तोपयोगिनी अस्ति।

स्मार्तयज्ञानां प्रभावेण चरणशीलवायुः संयमपूर्वकं त्रिषु लोकेषु प्रवहति। सूर्ययज्ञस्य माध्यमेन यजमानः सूर्यदेवस्य उपासनां करोति तया च उपासनया सूर्यदेवः स्वतेजसा सम्पूर्णचराचरात्मकं जगदभिभूतं करोतु। यजमानः दशगुणितं, शतगुणितं, सहस्रगुणितं दानं दातुं समर्थो भवतीति कामनया सूर्ययज्ञं करोति।[५] वैदिकस्मार्त्तयज्ञेन समेषां जीवानां रक्षा भवेत् इति प्रार्थना विधीयते। समस्तजीवानां तृप्तिविधानमपि कृतमस्ति।

निष्कर्षरूपेणैतद्वक्तुं शक्यते यत् विष्णुयज्ञः भवेत्, रुद्रयज्ञः भवेत्, सूर्ययज्ञः भवेत् अथवा चण्डीयज्ञः अथवा लक्ष्मीयज्ञः भवेत् येन केनापि यज्ञेन चराचरात्मकजगतः कल्याणं भवतुमर्हति, यतो हि विश्वस्य

---

[१] **पा०गृ० २.११**

[२] **पा०गृ० २.७**

[३] **पा०गृ० ३.१.१**

[४] **पा०गृ० १.२**

[५] **पा०गृ० २.१.१६**

सम्पूर्णानि कार्याणि यज्ञाधारितानि सन्ति। स्मार्त्तयज्ञानां विधिविधानपूर्वकानुष्ठानेन समस्तमनःकामनानां पूर्तिरवश्यं भवति।

स्मार्त्तयज्ञानां मन्त्रेषु परमात्मनः मुख्यतया द्वे आज्ञे स्तः – **१.** मनुष्यः कर्मशीलो भवतु, निरुद्यमी न भवतु। **२.** वेदशास्त्राणामाज्ञानुकूलं कर्म कुर्यात्, तत्प्रतिकूलरूपेण न कुर्यात्। येन मनुष्यः सत्कर्मी भवेत् असत्कर्मणां च त्यागं कुर्यात्। अस्यैवापरं नाम कर्मयोग इति वर्तते। एवम्प्रकारेण स्मार्त्तयज्ञकरणेन पृथिव्यप्सूर्यादिसर्वे देवगणाः सर्वे पदार्थाः साधकाय यज्ञकर्त्रे कल्याणकारिणः भवन्ति।

यतो हि संसारस्य रचना कर्मफलभोगाय वर्तते, मनुष्येण असत्कर्मणां त्यागः कर्तव्यः, सत्कर्मणाञ्चानुष्ठानं कर्तव्यम्। गृह्यसूत्राणां तात्पर्यं संस्कारस्य प्रतिपादनेऽस्ति। ऐतेषां स्मार्त्तयज्ञानां संस्काराणां कारणेन वा सम्राट् राजा याज्ञिकस्य चरणस्पर्शपूर्वकं स्वजीवनं धन्यं मनुते स्म, तथैव क्षत्रियापेक्षया ब्राह्मणः पूज्यतरत्वेन स्वीकरोति स्म।

एतदपि ज्ञातव्यं यत् प्राचीनकाले शकहूणमुगलप्रभृतिशासकैः भारते सहस्त्रवर्षं यावदाक्रमणं कृतं तथापि अस्माकं सुरक्षा एतैः स्मार्त्तयज्ञैरेव कृता। यज्ञाः अस्माकं गौरवस्य प्रतीकाः सन्ति, अत एव वैश्विकचिन्तने भारतीयवैदिकस्मार्त्तयज्ञानामतुलनीयं योगदानमस्ति। उपासनायाः निमित्तमग्नेः परिग्रहः अग्न्याधान इति कथ्यते।

स्मार्त्ताग्नेः परिग्रहः स्मार्ताधान इति कथ्यते, स्मार्ताधानेन विना श्रौताधानं न भवितुं शक्नोति। उपनयनसंस्कारानन्तरं विधिवद्वेदाध्ययनं कृत्वा आचार्यस्यानुज्ञया ब्रह्मचारिणः समावर्तनसंस्कारो भवति। तदा सः स्नातकः विवाहं कृत्वा द्वितीये गृहस्थाश्रमे प्रवेशं करोति।

सहधर्मिण्या पत्न्या साकमेव अग्नेः परिग्रहः कर्तव्यः। पाणिग्रहणसंस्कारानन्तरं द्विजः अग्नेः आधानस्याधिकारी भवति।[१] स्मार्ताग्निपरग्रहानन्तरं स्मार्ताग्नेरुपासना कर्तव्या, तदा सः द्विजः स्मार्ताग्नौ विधीयमानसप्तपाकसंस्थानुष्ठानस्याधिकारी भवति।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'स्मार्तयज्ञानां वैश्विकचिन्तने योगदानम्'** नाम अष्टाविंशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

[१] **पा०गृ० १.२.१-२**

# अथैकोनत्रिंशोऽध्यायः

## यजुर्वेदे उपासनाविषयकसमीक्षणम्

**गायत्री उपासना** – ब्रह्मतेजःप्राप्त्यर्थं गायत्र्युपासना दृश्यते।

**तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।**
**धियो यो नः प्रचोदयात्॥**[1]

द्योतनात्मकस्य सवितुः सर्वप्रेरकस्यान्तर्यामिणो विज्ञानानन्दस्वभावस्य हिरण्यगर्भोपाध्यवच्छिन्नस्य वा आदित्यान्तरपुरुषस्य वा ब्रह्मणः वरणीयं सर्वैः प्रार्थनीयं भर्गः सर्वपापानां सर्वसंसारस्य च भर्जनसमर्थं तेजः सत्यज्ञानानन्दादिवेदान्तप्रतिपाद्यं वयं धीमहि ध्यायामः। स सविता अस्माकं बुद्धिं सत्कर्मणि प्रकर्षेण प्रेरयति। सत्कर्मानुष्ठानाय अस्माकं मतिं प्रेरयति। भर्गः पापं भृज्जति दहति। वीर्यं वै भर्गः।

**सहस्रपरमां देवीं शतमध्यां दशावराम्। गायत्रीं यः पठेद्विप्रो न स पापेन लिप्यते॥**[2]

**विष्णूपासना** –

**विष्णोर्नुकँ वीर्याणि प्रवोचँयः पार्थिवानि विममे रजाꣳसि। यो अस्कभायदुत्तरꣳ सधस्थँविचक्रमाणस्त्रेधोरुगायो विष्णवे त्वा॥**[3]

विष्णोरेव वीर्याणि कर्माण्यहं प्रवोचं प्रब्रवीमि। यो विष्णुः पार्थिवानि रजांसि निर्मितवान् तथा महात्मनां साधुजनानां कृते

---

[1] **शु०य० ३.३५**

[2] **कर्मठगुरुः गायत्रीजपप्रकरणे**

[3] **शु०य० ५.१८**

उत्कृष्टलोकं वैकुण्ठं स्तम्भितवान्। इदं निखिलं ब्रह्माण्डं द्यूलोकभूलोकपाताललोकरूपेण त्रिधा विभजितवान् अथवा एषु लोकेषु अग्निवायुसूर्यरूपैः पदत्रयं निदधानः सः विष्णुर्महात्मभिर्गीयमानोऽस्ति। यत्र तत्र सर्वत्र विष्णोः महत्त्वस्य वर्णनं भवति। सः असाधारणवीरकर्मणा सर्वत्र सर्वैः प्रस्तूयते।

**प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः।**
**यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा॥**[१]

स पापिजनानां कृते सिंह इव भयंकरः। मत्स्यादिरूपेण विचरणशीलः अथवा पृथिव्यां सर्वत्र व्यापकः। अन्तर्यामिरूपेण वेदवाणीषु वर्तमानः। यस्य विष्णोः पादत्रयमप्रक्षेपणस्थानेषु सर्वाणि भुवनानि निवसन्ति।

**विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा॥**[२]

हे प्राणिनः ऋत्विजश्च यज्ञाधिष्ठातुर्विष्णोः सृष्टिपालनसंहाररूपकर्माणि यूयं अवलोकयन्तु। सः यैः कर्मभिः भवदीयलौकिकवैदिककर्माणि निर्मितवान्। सः इन्द्रस्य वृत्रवधादिकर्मसु मित्रवत् उपकारकः वर्तते। तस्य विष्णोः साहाय्येन इन्द्रः वृत्रं जघान।

**तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्॥**[३]

वेदान्तपारगाः विद्वांसो विष्णोः तस्य उत्कृष्टस्थानं गोलोकं वैकुण्ठं वा अवलोकयन्ति। तद्स्थानमाकाशे निरावरणे चक्षुरिव व्याप्तमस्ति। अतः स महात्मा सर्वैः उपासनीयः इति।

**अग्न्युपासना** –

---

[१] **शु०य० ५.२०**

[२] **शु०य० ६.४**

[३] **शु०य० ६.५**

**अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः।**
**यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रँविभ्वँविशेविशे॥**[1]

अयमग्निः कर्मानुष्ठानेषु मुख्यः आधानकर्तृभिः होता देवानामाह्वाता तथा यज्ञेषु परमपूज्य इति। अप्नवानप्रभृतयो भृगव अथवा भृगुगोत्रोत्पन्ना ऋषयः सपुत्राः यज्ञेषु अग्निरूपेण जलेषु वाऽग्निरूपेण जलीयविद्युद्रूपेण वा, वनेषु, वनाग्निरूपेण अरण्येषु वा विविधकर्मोपयोगित्वेन आश्चर्यकारिणमेनमग्निं दीपयन्ति स्म। विभूतिशक्तियुक्तं प्रत्येकमनुष्येषु वर्तमानं स्तूयन्त इति।

**तनूपा अग्नेऽसि तन्वं मे पाह्यायुर्दा अग्नेऽस्यायुर्मे देहि वर्चोदा अग्नेऽसि वर्चो मे देहि। अग्ने यन्मे तन्वा ऊनन्तन्म आपृण॥**[2]

अग्निः यजमानानां शरीराणां पालकः आयुर्दा वर्चोदा वर्तते। तेषां शरीरेषु यत् न्यूनमस्ति तस्य पूरको वर्तते। सूर्यसदृशः तेजस्वी, अपमृत्युविनाशकः, यजमानस्य शत्रूणां विहिंसको वर्तते। सः शत्रुविजेता च वर्तते। अग्नेः प्रसादात् यजमानाः सर्वत्र विजयिनः भवन्ति तथा आयुषा वर्चसा प्रजया रायस्पोषेण च संयुक्ता जायन्ते।

**राजन्तमध्वराणां गोपामृतस्य दीदिविम्। वर्धमानꣳ स्वे दमे॥**[3]

यज्ञेषु शोभमानः सत्यस्य रक्षकः सत्यप्रकाशः निरन्तरं देदीप्यमानोऽग्निर्दृश्यते।

**प्रजापतेरुपासना** -

[1] **शु०य० ३.१५**

[2] **शु०य० ३.१७**

[3] **शु०य० ३.२३**

**प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते। तस्य योनिं परिपश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा॥**[१]

प्राणधारिणां शरीरेषु प्रजापतिः संचरति तथा विविधरूपेण स एव दृश्यते। विद्वांसः तस्य स्थानं जानन्ति। प्रजापतिः प्रणवरूपेण सर्वेषां शरीरेषु निवसति। स एव सर्वत्र विराजमानो दृश्यते।

**प्रजापतिर्विश्वकर्मा मनो गन्धर्वस्तस्य ऋक्सामान्यप्सरस एष्टयो नाम। स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा॥**[२]

प्रजापतिः विश्वस्य रचयिता वर्तते। यो मनोरूपो गन्धर्वः स न इदं ब्रह्म क्षत्रं च पातु। तस्य गन्धर्वस्य ऋक्साम अप्सरसः गुणानां कर्मणां च गायकाः सन्ति। स एव ब्राह्मणजातेः क्षत्रियजातेश्च तथा सर्वेषां जीवधारिणां रक्षकः वर्तते। अतो वयमाहुतिभिः पूजयामहे स्वाहा।

**प्रजापतये पुरुषान्हस्तिन आलभते वाचे प्लुषींश्चक्षुषे मशकाञ्छ्रोत्राय भृङ्गाः॥**[३]

प्रजापतेः गुणगायकाः पुरुषाः सन्ति। सः सर्वेषु जीवधारिजनेषु जीवरूपेण विविधं प्रकाशते। सर्वे महिमानं गायन्ति स एव सर्वेषां जीवधारिजनानां निखिलब्रह्माण्डस्य रचयिता वर्तते।

**रुद्रोपासना** –

**नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च॥**[४]

---

[१] **शु०य० ३१.१९**

[२] **शु०य० १८.४३**

[३] **शु०य० २४.२९**

[४] **शु०य० १६.४१**

शिवः प्राणिनां सुखस्य आनन्दस्य दाता मुक्तिस्वरूपस्य च प्रदाता विद्यते। मोक्षरूपसुखस्य दाता लौकिकभौतिकसुखस्य च कर्ता विद्यते। कल्याणरूपः निष्पापः वर्तते। अत एव सर्वान् प्राणिनः निष्पापान् विदधाति। अत एव जनैः आराधनीय इति।

**इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः।**
**यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्।।**[१]

बलवतः जटाजूटधारीणः शत्रुपक्षीयवीराणां नाशकश्च रुद्रः वर्तते तस्य वयं स्तुतिं कुर्महे। तस्य प्रासादात् यजमानानां द्विपाद् चतुष्पाद् सर्वे अनातुराः जायन्ते। यज्ञरूपस्य तस्य स्तुतिः भवति यथा सर्वमनातुरमुपद्रवरहितं स्वस्थं च भवेत्।

**परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः।**
**अथो य इषुधिस्तवारे अस्मिन्निधेहि तम्।।**[२]

भगवतः रुद्रस्य बाणाः अस्मान् सर्वतः रक्षतु। हे रुद्र! तव इषुधिः अस्मत् सकाशात् दूरदेशे स्थापय। वयं सुरक्षिताः भवेम न कोऽपि शत्रुः अस्माकं ताडने समर्थो भूयात्।

**मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्।**
**मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः।।**[३]

निखिलपरिवारजनानां नानाविधहिंसातः रक्षार्थं रुद्रस्य स्तुतिरत्र दृश्यते। गर्भस्थस्य शिशोः सुरक्षार्थमपि प्रार्थनात्र वर्तते। सामाजिकजीवने रुद्रस्य महदुपकारः वर्तते।

**इन्द्रोपासना –**

---

[१] **शु०य० १६.४८**

[२] **शु०य० १६.१२**

[३] **शु०य० १६.१५**

**अभि गोत्राणि सहसा गाहमानोदयो वीरः शतमन्युरिन्द्रः।**
**दुश्च्यवनः पृतनाषाडयुध्योऽस्माकꣳ सेना अवतु प्र युत्सु॥**[१]

असुरकुलं मेघसमूहं वा इन्द्रः प्राणिनां कल्याणार्थं व्यापादयति। इन्द्रः शत्रुसेनानां विनाशको भूत्वा देवसेनानां सततं रक्षकस्तथा तेषां नेता वर्तते। एतस्य महात्मनः नेतृत्वे देवसेना शत्रूणां राक्षसानामनर्थकारिणां वा कृते सदा समर्था अस्ति। इन्द्रस्य नेतृत्वे वर्तमाना देवसेना सर्वत्र विजयं प्राप्तवती शत्रुसंघारकर्त्री च वर्तते। मरुत्संज्ञका देवा अपि अग्रे अग्रे गच्छन्ति एते अपि देवसेनासहायकाः सन्ति। ये रथे वर्तमानाः वीराः सन्ति तेऽपि सर्वत्र विजयं लब्ध्वा उच्चस्वरेण विजयघोषणां कुर्वन्ति।

**अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकँ या इषवस्ता जयन्तु।**
**अस्माकँवीरा उत्तरे भवन्त्वस्माँ२॥ उ देवा अवता हवेषु॥**[२]

शत्रुसमूहमध्ये इन्द्रः प्राणिनां रक्षकः वर्तते। यः युद्धे सततं विजयं लभते। वीरा विजयशीलाः जायन्ते। देवानां युद्धेषु सततं रक्षकाः भवन्ति। शत्रवः शोकेन गम्भीरान्धकारे पतन्ति विविधयातनां च लभन्ते। महामनसां भुवनच्यवानां देवानां विजयघोषः इन्द्रस्य नेतृत्वे सर्वत्र श्रूयते।

**समिद्ध इन्द्र उषसामनीके पुरोरुचा पूर्वकृद्वावृधानः।**
**त्रिभिर्देवैस्त्रिꣳशता वज्रबाहुर्जघान वृत्रं वि दूरो ववार॥**[३]

अद्भुतकर्मकर्ता इन्द्रः देदीप्यमानः पूर्वदिशोऽधिपतिः सोमरसपानेन प्राप्तवृद्धिः वृत्रासुरं देवकामाय जघान। मेघं सम्भिद्य जलेन पृथिवीमपूरयत् आर्द्रं चकार। लोकः हर्षतां प्राप्तः। देवैरीडितः। हविषा आजुह्वान्। अतिवलशाली इन्द्रः पुरन्दरः बज्रबाहुः सन् अस्माकं यज्ञे सोमपानाय हविप्राप्तये आगच्छति सोमं पीत्वा मोदं च लभते।

---

[१] **शु०य० १७.३९**

[२] **शु०य० १७.४३**

[३] **शु०य० २०.३६**

अतिख्यातिप्राप्त इन्द्रः ऊरुप्रथाप्रथमानः सर्वत्र यज्ञेषु प्राप्तख्यातिः सर्वान् यजमानान् धनैः प्रापूरयत्।

**सरस्वत्युपासना –**

**पावका नः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धियावसुः॥**[१]

निखिलं संसारं पावयित्री यज्ञक्रियायाः अधिष्ठात्री सर्वासां विद्यानां स्वामिनी सरस्वती देवी अस्माकं यज्ञे समागच्छत्। यज्ञं कामयतां वा। यजमानान् अन्नैर्धनैः पुत्रपौत्रादिभिश्च सम्पन्नान् करोतु। यस्याः बुद्धौ अन्नैः धनैश्च यजमानानां सम्पन्नतां कर्तुं संकल्पः विद्यते। सरस्वत्याः ये पूजकाः सन्ति ते धनधान्यैर्विद्याबुद्धिभिर्वा सम्पन्नाः भवन्ति।

**चोदयित्री सूनृतानां चेतन्ती सुमतीनाम्। यज्ञं दधे सरस्वती॥**[२]

सदा सत्यकथनाय जनान् प्रेरयित्री सद्बुद्धिप्राप्त्यर्थं चेतनाया दात्री सरस्वती देवी अस्मान् सन्मार्गं प्रापयतु। अश्वमेधवाजपेयसोमप्रभृतियज्ञानां सम्पादनाय यजमानानां सदा प्रेरयित्री सा सरस्वती भगवती सुमना भवतु। प्रियसत्यवचनानां शोभनमतीनां च दात्री भगवती सरस्वती मानवेभ्यः सद्बुद्धिसम्पादनाय सततमिच्छति।

**महो अर्णः सरस्वती प्रचेतयति केतुना। धियो विश्वा विराजति॥**[३]

भगवती सरस्वती वाचामधिष्ठात्री देवी मानवेभ्यः सुकर्मसम्पादनाय सद्बुद्धिप्रदानाय सततं यतते। महत्सम्पत्तिप्राप्त्यर्थं प्रचेतयति। सर्वाः धियः सर्वप्राणिनां बुद्धिं दीपयति, सत्कर्म कर्तुं सर्वान् प्रेरयति। देवानां मध्ये शुभ्रवर्णैः विराजते।

---

[१] **शु०य० २०.८४**

[२] **शु०य० २०.८५**

[३] **शु०य० २०.८६**

**अश्विना पिबतां मधु सरस्वत्या सजोषसा।**
**इन्द्रः सुत्रामा वृत्रहा जुषन्ताꣳ सोम्यं मधु॥**[१]

अश्विनीकुमारौ इन्द्रप्रभृतयो देवाः सरस्वत्या सह मधुरस्वादं सोमरसमस्माकं यज्ञे पिबतां सोम पानं कृत्वा इन्द्रः वृत्रं व्यापादयति। अश्विनीकुमारौ देव्या भगवत्या सरस्वत्या सह समानप्रीतिभाजनौ भवताम्। सोमरसस्य पानाय सरस्वत्या सह अश्विनीदेवकुमारदेवौ अपि भवताम्। यज्ञे सदा आगच्छताम्।

**अर्यमणं वरुणꣳ सोममश्विना सरस्वती नः सुभगा मयस्करत्॥**[२]

यजमानः अर्यमणं देवं वरुणं सोममश्विनौ देवौ च वेदवाणीं पठन् स्वकल्याणाय सततं प्रार्थयते। एते देवा भगवत्या सरस्वत्या सह अस्मभ्यं सुखं प्रयक्षन्तु। ऐश्वर्यादिसहिता परमभाग्यशालिनी सरस्वती अस्माकं सुखं करोतु। सामाजिकजीवने एतेषां देवानां महती उपकारिता दृश्यते।

**प्रजापतिरुपासना** –

**प्रजापतिर्विश्वकर्मा मनो गन्धर्वस्तस्य ऋक्सामान्यप्सरस एष्टयो नाम। स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा॥**[३]

विश्वकर्मा प्रजापतिः इदं सर्वं जगत् निर्मितवान्। स ऋक्सामअप्सरसःप्रभृतिनामभिः प्रसिद्ध इति। तस्य स्तुतौ बहवो मन्त्राः कथिताः वर्तन्ते। सर्वेषामुपाषकानामभीष्टं पूरयन्ति। सः प्रजापतिः ब्राह्मणजातिं क्षत्रियजातिमन्यमपि रक्षति। तस्मै प्रजापतये वयं हविषा परिचरेम स्वाहा। वयं यजमाना अप्सराभ्यः गन्धर्वेभ्यश्च आहुतीः दद्मः।

---

[१] **शु०य० २०.९०**

[२] **शु०य० २५.१६**

[३] **शु०य० १८.४३**

**स नो भुवनस्य पते प्रजापते यस्य त उपरि गृहा यस्य वेह।**
**अस्मै ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ स्वाहा॥**[1]

चतुर्दशानां भुवनानां स्वामी विश्वकर्मा प्रजापतिः विद्यते। तस्य निवासः सर्वेषां भुवनानामुपरि ब्रह्मलोके विद्यते। ततः सर्वेषां प्राणिनां रक्षां करोति। तस्य गृहमतीव गोपनीयं वर्तते। विद्वांसः एव जानन्ति। सः ब्राह्मणजातीनां क्षत्रियजातीनामन्यासां जातीनामपि बृहत्सुखं ददाति पालयति च। तस्मै प्रजापतये सुहुतमस्तु।

**प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने।**
**स्वाहाकृतेन हविषा पुरोगा याहि साध्या हविरदन्तु देवाः॥**[2]

प्रजापतिः तपस्यया वृद्धिं प्राप्तः। अरण्योः सकासादुत्पन्नः सद्यो जातोऽग्निः यज्ञं पूरयति। अग्ने! तव वयं यजमानाः स्तुतिं कुर्मः। स्वाहाकरेण सह आहुतिं दद्मः। यागभूमौ त्वं सर्वप्रथमं गच्छसि यत्र साध्यसंज्ञकाः देवविशेषाः हविषां स्वादं लभन्ते। इन्द्रादयो देवा अपि हविः अदन्ति, तेभ्यः हविः सर्वश्रेष्ठं विद्यते। अग्नेः यज्ञभूमौ आगते सति सर्वे देवा आहुतयः गृह्णन्ति।

**अपामुपासना -**

**आपो अद्यान्वचारिषꣳ रसेन समसृक्ष्महि।**
**पयस्वानग्न आऽगमं तं मा सꣳसृज वर्चसा प्रजया धनेन च॥**[3]

अद्य अहमवभृथकर्मणा जलेन स्नानं कृतवानस्मि। यज्ञस्य पूर्णतायां प्राप्तायामवभृथस्नानं कृतवानस्मि। अतः हे अग्ने! पयसा घृतेन

---

[1] **शु०य० १८.४४**

[2] **शु०य० २९.११**

[3] **शु०य० २०.२२**

मधुना धनेन वयमुदकवन्तः स्म। अवभृथजलस्नानेन सर्वलाभः सङ्कल्पसिद्धिः सर्वपूर्तिः सर्वसम्पन्नता च सञ्जायन्ते।

**आपो देवीः प्रतिगृभ्णीत भस्मैतत्स्योने कृणुध्वꣳ सुरभा उ लोके। तस्मै नमन्तां जनयः सुपत्नीर्मातेव पुत्रं बिभृताप्स्वेनत्॥**[१]

हे देदीप्यमानाः आपः देव्यः! एतद् भस्म धारयत, यूयं स्वागतादिभिः प्रतिगृह्णीत। सुखावहे पुष्पधूपादिभिः शोभनगन्धयुते स्थाने एतद्भस्म स्थापयत। वृक्षोत्पत्त्यादिद्वारा आपः सुपत्नीः भवन्ति तस्मै भस्मरूपायाग्नये प्रह्वीभवन्तु। हे आपः देव्यः! यूयं वृक्षाणामुत्पत्तिविषये कारणं स्थ। मातृवत् सर्वेषामखिलजीवनिकायानां पालयित्र्यः आपः सन्ति।

**अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे। गर्भे सन् जायसे पुनः॥**[२]

**आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे॥**[३]

हे आपः! यूयं स्नानपानादिहेतुत्वेन सुखोत्पादकसुखप्रदात्र्यः भवथ। तादृश्यो यूयमस्मान् रसाय भवदीयरसानुभवार्थं स्थपयत। त्वत्प्रसादात् सर्वस्य रसस्य भोक्तारो वयं भवेम। महते रमणीयाय ब्रह्मसाक्षात्कारलक्षणं दर्शनं कारयत। य भवदीयः कल्याणकारको रसः वर्तते तस्य रूपस्य भोक्तारो वयं भवेम। रमणीयदर्शनार्थं रमणीयवस्तुप्राप्त्यर्थं च ब्रह्मसुखं स्थापयत। एतदर्थमेषा स्तुतिः।

**यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥**[४]

हे आपः! युष्माकं शान्तितमः सुखैकहेतुः रसो विद्यते इह लोके स्थितानस्मान् तस्य रसस्य भागिनः कुरुत। प्रीतियुक्ताः मातरः यथा

---

[१] **शु०य० १२.३५**

[२] **शु०य० १२.३६**

[३] **शु०य० ३६.१४**

[४] **शु०य० ३६.१५**

स्वकीयस्तन्यरसं बालान् पाययन्ति तद्वत् वयं तव प्रसादात् कल्याणकारकस्य रसस्य भोक्तारो भूयास्म।

**तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः।।**[1]

हे आपः! युष्मत्सम्बन्धिनीं तृप्तिं वयं प्राप्नुयाम। आनन्दविषये वैतृष्ण्यं भजेम। यस्य आहुतिपरिणामभूतरूपस्य क्षयस्य निवासस्यैकदेशेन प्रीतिं कुरुत। पञ्चाहुतिपरिणामक्रमेणेदं ब्रह्मादिस्तम्बपर्यन्तं जगत् भोक्तृत्वेन प्रजोत्पत्तिसमर्थं कुरुत। जनान् प्रजोत्पत्तिसमर्थतान् आप एव कुर्वन्ति इति जलस्य महिमा वर्तते।

**वायोरुपासना -**

**वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम्।**
**ओ३म् क्रतो स्मर। क्लिबे स्मर। कृतꣳ स्मर।।**[2]

सप्तदशात्मकलिंगरूपः प्राणोऽध्यात्मपरिच्छेदं हित्वाधिदैवतरूपं सर्वात्मकममृतं सूत्रात्मानं वायुः प्रतिपाद्यताम्। इदं स्थूलं शरीरमग्नौ हुतं सत् भस्मरूपं भूयात्। प्रतीकात्मकत्वात् सत्यात्मकमग्न्याख्यब्रह्माभेदेनोच्यते। संकल्पात्मकं यन्मम कर्तव्यं तत् स्मरणं कुरु। यन्मया कृतं तत्स्मरणं कुरु। यन्मम सामर्थ्यं तदपि स्मरणं कुरु। पुण्यलोकः मया प्राप्तव्यः तस्मै क्लिप्ताय लोकाय पुण्याय प्राप्तये स्मर। बाल्यकालात् अद्यावधि यत् कृतं तदपि स्मर। अस्यान्ते शरीरे सर्वं वायुतत्त्वे समायाति, इदं वायोः महिमानं तदपि स्मर।

**वायुरग्रेगा यज्ञप्रीः साकङ्गन्मनसा यज्ञम्। शिवो नियुद्भिः शिवाभिः।।**[3]

---

[1] **शु०य० ३६.१६**

[2] **शु०य० ४०.१५**

[3] **शु०य० २७.३१**

वायुः देवता यागभूमौ सर्वप्रथममागच्छति। यज्ञेन सह तस्य महती प्रीतिः वर्तते। सदा मनसा यज्ञविषयकविचारं चिन्तयति। यजमानानां सर्वप्राणिनां च शिवः सततं कल्याणकारकः। कल्याणकारिषु युक्तेषु रथेषु स्थित्वा यज्ञभूमौ रक्षार्थं मङ्गलकरणार्थं च आगच्छति। वायोः अस्माकं जीवने महती उपयोगिता दृश्यते। अतः सः प्रार्थनीयः पूजनीयश्च वर्तते। अत एव हे वायो! तव सहस्रसंख्यका रथाः सन्ति। तैः रथैः अस्माकं यज्ञे सोमपानाय आगच्छ। तथा च श्रुतिः -

**वायो ये ते सहस्त्रिणो रथासस्तेभिरागहि। नियुत्वान्सोमपीतये।।**[१]

**।। प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ।।**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्य-देवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे उपासनाविषयकसमीक्षणम्'** नाम एकोनत्रिंशोऽध्यायः।

**।। बलं विष्णोः प्रवर्धताम् ।।**

[१] **शु०य० २७.३२**

# अथ त्रिंशोऽध्यायः
# सामाजिकजीवने वैदिकदेवतानां वैश्विकदृष्ट्या समीक्षणम्

यजुर्वेदे सर्वोत्कृष्टं तत्त्वं देवशब्दवाच्यमस्ति। ब्रह्माण्डस्य मूले एका एव शक्तिः विद्यमाना अस्ति, स एव ईश्वरः कथ्यते।[१] सः "एकमेवाद्वितीयम्" अस्ति। तस्यैवैकस्य ब्रह्मणः नानारूपेण विविधशक्तीनामधिष्ठातृत्वेन च स्तुतिः कृता अस्ति। नियन्ता तु एक एव, अस्याः मूलसत्तायाः विकासाः सम्पूर्णदेवाः सन्ति। देवतानां स्वामी ईश्वरः, यथा जीवात्मनः स्वामी सन्नपि परमात्मा एवं जीवात्मा एक एवास्ति, तथैव देवानां स्वामी सन्नपि ईश्वरः देवश्च एक एव। अनेन "सर्वं खल्विदं ब्रह्म", "ॐ खं ब्रह्म"[२] इत्येषः वैदिकोद्घोषः सार्थको भवति। वेदस्य प्रत्येकस्मिन् मन्त्रे देवतातत्त्वं समाहितमस्ति। सम्पूर्णवैदिककर्मकाण्डस्य ध्येयं देवतातत्त्वमेव। वैदिकऋषिभिः यया कमनया यस्मिन् मन्त्रे यस्याः देवतायाः स्तुतिः क्रियते, तस्य मन्त्रस्य स एव देवता स्वीक्रियते। निरुक्तस्य प्रणेत्रा महर्षियास्केन निगदितं यत् – **यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति।**[३]

अमुकदेवतायाः प्रसादेन अमुकार्थस्य स्वामी भविष्यति इति सङ्कल्पेन साकं यस्मिन् मन्त्रे यस्य देवतायाः स्तुतिः विहिता अस्ति,

---

[१] **बृहद्देवता १.६१-६५**

[२] **शु०य० ४०.१७**

[३] **निरुक्तम् ७.१.**

तस्य मन्त्रस्य स एव देवता भविष्यति। मन्त्रेषु चतुर्धा स्तुतिः विहिता अस्ति – नाम्ना, बन्धुना, कर्मणा, रूपेण। तात्पर्यमेतदस्ति यद् यस्मिन् मन्त्रे अग्नीन्द्रवरुणरुद्रादीनां नामोल्लेखपूर्वकं तेषां स्तुतिः विहिता, तेषां मन्त्राणाम् अग्नीन्द्ररुद्रादयः देवताः भवन्ति। यस्मिन् मन्त्रे अग्नीन्द्ररुद्रादीनां बन्धूनां नामग्रहणं कृत्वा स्तुतिः विहिता, तेषां मन्त्राणामपि मुख्यतः अग्नीन्द्ररुद्रादयः एव देवताः भविष्यन्ति। यस्मिन् मन्त्रे अग्नीन्द्ररुद्रादीनां क्रियाकलापवर्णनात्मिका स्तुतिः वर्तते, तेषां मन्त्राणामपि मुख्यतः अग्नीन्द्ररुद्रादयः एव देवताः भविष्यन्ति। एवञ्च यस्मिन् मन्त्रे अग्नीन्द्ररुद्रादीनां रूपाणामाधारेण स्तुतिः विहिता, तेषां मन्त्राणामपि मुख्यतः अग्नीन्द्ररुद्रादयः एव देवताः भविष्यन्ति। एवम्प्रकारेण नामबन्धुकर्मरूपेषु येन प्रकारेण यस्मिन् मन्त्रे यस्य स्तुतिः विहिता, तस्य मन्त्रस्य ता एव देवताः भविष्यन्ति। अनेन स्पष्टं भवति यत् नामबन्धुकर्मरूपैः यस्मिन् मन्त्रे यस्या देवतायाः लक्षणं प्रतीतं भवति तस्य मन्त्रस्य सा एव देवता भविष्यति। यस्मिन् मन्त्रे नामबन्धुकर्मरूपाणां वर्णनाभावे देवतानां स्वरूपनिर्देशः भवितुं न शक्नोति तस्य मन्त्रस्य देवता प्रजापतिः अथवा यज्ञदेवता भविष्यतः। महर्षियास्कः वदति –

**यद्दैवतः स यज्ञो वा यज्ञाङ्गं वा तद्देवता भवन्ति**[१] इति। अर्थात् यस्य यज्ञस्य यः देवता तस्मिन् यज्ञे विनियुक्तानामनादिष्टदेवतालिङ्गमन्त्राणामपि स एव यज्ञीयदेवता भविष्यति। यथा अग्निष्टोमयज्ञः अग्निदेवताकोऽस्ति, तत्र विनियुक्तानि अनादिष्टदेवताकमन्त्राण्यपि अग्निदेवताकानि भविष्यन्ति – "प्रकरणाद्धि संदिग्धदेवताषु देवता नियमः" इति। "अथान्यत्र यज्ञात्"[२] इति यज्ञात् भिन्नस्थले विनियुक्तेषु अनादिष्टदेवताकमन्त्रेषु देवतायाः परिज्ञानं कथं

---

[१] **निरुक्तम्** ७.१ पृ.३३२

[२] **निरुक्तम्** ७.१.

भविष्यति? इति प्रश्ने सति उत्तरमाह– **अनिरुक्तो हि प्रजापतिः** इति। अस्य सिद्धान्तानुसारेण तादृशाः मन्त्राः प्राजापत्याः भविष्यन्ति[१] इति। एवञ्च तेषां मन्त्राणां देवता प्रजापतिः[२] भविष्यति। एतत् याज्ञिकानां मतम्, नैरुक्तस्य सिद्धान्तोऽस्ति यदनादिष्टदेवताकमन्त्राः नाराशंसाः[३] भवन्ति इति। नाराशंसोऽर्थात् यज्ञः अथवा अग्निः। **यज्ञो वै विष्णुः, विष्णुर्वैः यज्ञः** इति। अनेन स्पष्टं भवति यदेषां मन्त्राणां देवता विष्णुः अथवा अग्निरस्ति।

सिद्धान्तकौमुद्याम् **सास्य देवता**[४] सूत्रस्य वृत्तौ देवताशब्दस्य द्वे लक्षणे प्रदत्ते स्तः। प्रथमम्– त्याज्यमानद्रव्ये उद्देश्यविशेषो देवता। द्वितीयम्– मन्त्रस्तुत्या च। प्रथमलक्षणस्य तात्पर्यमस्ति यस्योद्देश्येनाज्यादिहविर्द्रव्यस्य यागः क्रियते स एव देवता कथ्यते। द्वितीयलक्षणस्य तात्पर्यमस्ति मन्त्रेण यस्य स्तुतिः क्रियते स एव देवता इति। दिवादिपरस्मैपदी दिवुधातोः अच्प्रत्यये सति देवशब्दो निष्पद्यते। पाणिनीयधातुपाठे **दिवुधातो दशार्थाः** परिगणिताः सन्ति[५]। यस्यानुसारेण देवशब्दस्यार्थो भवति– दीव्यति, व्यवहरति, द्योतते मोदते वा इति देवः। व्यावहारेण सत्ता, द्युतिना प्रकाशः, मोदेन आनन्दः सूचितो भवति। अत एव देशशब्दस्यार्थः सच्चिदानन्दस्वरूपं ब्रह्मतत्त्वं जातम्। महर्षियास्केन निरुक्तशास्त्रे देवशब्दस्य चमत्कारपूर्णोऽर्थः कृतः, यथा – **देवो दानाद्वा। दीपनाद्वा। द्योतनाद्वा। द्युस्थानो भवतीति वा यो देवः सा दवेता।**[६]

---

[१] **प्राजापत्या इति याज्ञिकाः (निरुक्तम् ७.१ पृ.३३२)**

[२] **तै०सं० २.१.४.३**

[३] **नाराशंसा इति नैरुक्ताः (निरुक्तम् ७.१)**

[४] **पा०सू० ४.२.२४**

[५] **पा०धा०पा० ११०७**

[६] **निरुक्तम् ७.४ पृ.३५५**

इति। दाता, वरप्रदाता, द्योतमानः, तेजःपुञ्जमूर्त्तिः, द्युलोकस्य निवासिनः व्यक्तिविशेषाः देवतापदवाच्याः भवन्ति।

पाश्चात्यविद्भिः ब्रह्माद्वैतप्रतिपादके वेदे बहुदेवताकवादस्य कलङ्कस्थापने व्यर्थमेव कुचेष्टा कृता। वेदे तथा वेदानुगामिन्यां बृहद्देवतायाम्, निरुक्तादिवैदिकग्रन्थेषु च एकदेवतावादमेव प्रतिपादितं वर्तते। भगवती श्रुतिरपि कथयति –

**चित्रन्देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः।**
**आप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च॥**[१]

अर्थात् एषः आदित्यमण्डलगतः परमात्मा जडजङ्गमजगतोः आत्मा अस्ति। सृष्टेः पूर्वं स एव प्रजापतिः हैमाण्डभावेन सर्वत्र विद्यमान आसीत्। यजुवेदस्य श्रुतिः कथयति –

**हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।**
**स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम**[२] इति।

ऋग्वेदस्य श्रुतिः कथयति – **एकं सद्विप्रा बहुधा वदन्ति**[३] इति। अर्थात् सच्चिदानन्दस्वरूपं परब्रह्मतत्त्वं विद्वान् यमवरुणाद्यनेकदेवतारूपेण व्यवहृतं मनुते। एवम्प्रकारेण स्पष्टं परिलक्षितं भवति यत् वेदे एकदेवतावादस्य प्रतिपादनं कृतमस्ति। अत एव एका एव देवता, देववर्गस्तु तस्यैव प्रपञ्चः अथवा विस्तारः।

सम्पूर्णो विश्वः परमात्मना एव उत्पन्नोऽस्ति, परमात्मनः अतिरिक्तं चराचरात्मकजगतः कोऽपि पालकः, अथवा अधिष्ठाता नास्ति। न केवलं भारतीयाः, अपितु सम्पूर्णस्य विश्वस्य जनाः

---

[१] **शु०य० १३.४६**

[२] **शु०य० १३.४**

[३] **ऋ०सं० १.१६४.४६**

फलकामनया ईश्वरस्य उपासनां कुर्वन्ति, तथा च यया कमनया ईश्वरमुद्देश्यं कृत्वा आज्याद्याहुतीनां प्रक्षेपात्मकं यज्ञं कुर्वन्ति, परमात्मनः कृपयैव साधकं तदेवाभीष्टफलं प्राप्तं भवति। भगवती श्रुतिः कथयति –

**प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्त्वयममुष्य पितासावस्य पिता वयꣳ स्याम पतयो रयीणाꣳ स्वाहा। रुद्र यत्ते क्रिवि परन्नाम तस्मिन्हुतमस्यमेष्टमसि स्वाहा**[१] इति। अनेन मन्त्रेण स्पष्टं भवति यत् यां देवतामुद्दिश्य हवनस्तवनादिकं क्रियते, या प्रसन्ना भूत्वा आराधकस्य अभीष्टसिद्धेः कारणं भविष्यति, सा एव देवता। वैदिकदेवताः परस्परं केवलमविरोधाभावेन एव न अपितु उन्नायकभावेन अपि चराचरजगतः शाश्वतः यः नियमः तस्यैवानुसारेण सत्यस्य ऋतस्य च पालनं कुर्वन्त्यः स्वकर्त्तव्यानां विधिर्पूकं निर्वहणं कुर्वन्ति, एवमस्मभ्यं प्रेरणां प्रददति यत् सम्पूर्णमानवजातिः शाश्वतनियमानां विधिवत्पालनं कुर्वन्ती द्वन्द्वद्वेषयोः त्यागं कृत्वा परस्परमेकीभूय सत्कर्म कृत्वा पवित्रतापूर्णजीवनयापनं करोतु।[२] देवतानां समग्राः प्रवृत्तयः जगतः कल्याणार्था सन्ति। एताः देवताः अज्ञानान्धकारयोः दूरे प्रकाशरूपाः सन्ति, सततं कर्मशीलाश्च सन्ति। अतः मानवमात्रस्य कल्याणं देवताभिः साकं सायुज्यस्थापने एव भविष्यति। वैदिकदेवतावादः प्राकृतशक्त्या सह मनुष्यजीवनस्य सामीप्यतायाः तथा एकरूपतायाः अवश्यकतापरिज्ञानमपि कारयति। मनुष्यमात्रेण आत्मकल्याणार्थं वैदिकदेवतानां सर्वदा समाराधनं कर्तव्यम्। सुधनसम्पन्नाः देवाः त्रयः, एकादश, त्रयस्त्रिंशत् सन्ति। यजुर्वेदस्य श्रुतिः कथयति–

---

[१] **शु०य० १०.२०**

[२] **देवा भागं यथा पूर्वे संजानाना उपासते ( ऋक्० १०.१९१.२ )**

**त्रया देवा एकादश त्रयस्त्रिꣳशाः सुराधसः।
बृहस्पतिपुरोहिता देवस्य सवितुः सवे। देवा देवैरवन्तु मा॥**[१]

देवतानां संख्यायां परिवर्तनं न भवति, यावन्त्यः देवताः आसन्, तावत्यः अद्यापि सन्ति[२]। देवतानां निवासस्थानानि बहूनि कथितानि सन्ति- पृथिवी[३]स्थानीयाः द्विपञ्चाशत् देवताः सन्ति। यथा -

अग्निः, जातवेदाः, इडः, बर्हिः, द्वारः, उषासानक्ता, दैव्यौहोतारः, त्वष्टा, तिस्त्रोदेवीः, अश्वः, वनस्पतिः, स्वाहाकृतयः, शकुनिः, मण्डूकाः, अक्षाः, नाराशंसः, ग्रावाणः, रथः, दुन्दुभिः, इषुधिः, हस्तघ्नः, अभीषवः, धनुः, ज्या, इषुः, वृषभः, अश्वाजनी, उलूखलम्, द्रुघणः, पितुः, नद्यः, आपः, ओषधयः, रात्रिः, अरण्यानि, श्रद्धा, पृथिवी, अप्वा, अग्नायी, उलूखलमुसले, हविर्धाने, द्यावापृथिवी, विपाट्छुतुद्री, आर्त्नी, शुनासीरौ, देवी जोष्ट्री, देवी ऊर्जाहुती[४]।

**अन्तरिक्षस्थानीयाः अष्टषष्टिः देवताः सन्ति** - इन्द्रः, वायुः, वरुणः, रुद्रः, पर्जन्यः, बृहस्पतिः, ब्रह्मणस्पतिः, क्षेत्रस्यपतिः, वाष्तोष्पतिः, वाचस्पतिः, मित्रः, यमः, अपांनपात्, सरस्वान्, विश्वकर्मा, तार्क्ष्यः, मन्युः, दधिक्राः, सविता, त्वष्टा, वातः, वेनः, असुनीतिः, ऋतः, इन्दुः, प्रजापतिः, अहिः, अहिर्बुध्न्यः, श्येनः, सोमः, सुपर्णः, पुरुरवाः, चन्द्रमा, मृत्युः, वैश्वानरः, मरुतः, विधाता, धाता, रुद्राः, ऋषभः, पितरः, अङ्गिरसः, अथर्वाणः, भृगवः, आप्त्याः, अदितिः, सरमा, सरस्वती, वाक्, अनुमतिः, राका, सिनीवाली, कुहूः, यमी, उर्वशी, अग्निः, रोदसी,

---

[१] **शु०य० २०.११**

[२] **श०ब्रा० ८.७.१.९**

[३] **श०ब्रा० १४.३.२.४**

[४] **निरुक्तस्य निघ० ५.१-३**

पृथिवी, इडा, गौः, इन्द्राणी, गौरी, धेनुः, अघ्न्या, पथ्या, उषाः, स्वस्तिश्च[१]।

**द्युस्थानीयाः एकत्रिंशद्देवताः निरुक्तवेदाङ्गे कथिताः** - सूर्यः, विष्णुः, अश्विनौ, उषाः, सूर्या, वृषाकपायी, सरण्यूः, त्वष्टा, सविता, भगः, पूषा, विश्वानरः, वरुणः, केशी, केशिनः, वृषाकपिः, यमः, अजएकपात्, पृथिवी, समुद्रः, अथर्वा, मनुः, दध्यङ्, द्वादशादित्याः, सप्त ऋषयः, देवाः, देवपत्न्यः, वाजिनः, विश्वेदेवाः, साध्याः, वसवश्च[२]।

**तैत्तिरीयारण्यश्रुत्यनुसारेण सर्वाः देवताः वेदविद्ब्राह्मणे वासं कुर्वन्ति**[३] **। प्रत्यक्षदेवता ब्राह्मण एवास्ति**[४] । ब्राह्मणः सर्वदेवस्वरूपोऽस्ति[५] । प्रजापतिना देवताभ्यः अमरत्वं प्रदत्तम्[६] । अमरत्वप्राप्त्यनन्तरमेव देवताः स्वर्गलोके अधस्तात् प्रविष्टाः जाताः[७]। देवगणाः यज्ञमाध्यमेन स्वर्गलोकं प्राप्नुवन्तः[८] । यज्ञद्वारैव देवताभिः असुरोपरि विजयः प्राप्य स्वर्गलोकः जितः[९]। देवताः आहुतितः प्रसन्नाः भवन्ति[१०] । मनुष्यः यादृशं व्यवहारं देवतां प्रति करोति, तादृशमेव व्यवहारं देवता अपि करोति। मनुष्यः यज्ञयागादिद्वारा देवतामाहुतिं प्रददाति तर्हि देवता अपि स्वर्गाद्वृष्टिं प्रददाति अन्यथा न[११] । देवताः

---

[१] **निरुक्तस्य निघ० ५.४-५**

[२] **निरुक्तस्य निघ० ५.६**

[३] **तै०आ० २.१५.९**

[४] **कृ०य०तै०सं० १.७.१.३**

[५] **कृ०य०तै०सं०१.४.४.२**

[६] **कृ०य०तै०सं०२.३.२**

[७] **श०ब्रा० ८.६.१.२३**

[८] **तै०सं० ६.३.४.७**

[९] **श०ब्रा० २.४.३.२**

[१०] **मै०सं० १.४.६**

[११] **मै०सं० १.७.५**

सर्वदा मनुष्ये स्वदृष्टिं स्थापयन्ति[१]। देवताः यशस्कामाः कथिताः, ताः कान्तिमत्यः तेजस्विन्यः भवन्ति[२]। देवगणस्य अग्निः नेत्रमस्ति[३] तथा देवतानां कान्तिः सूर्ये दृष्टिगोचरी भवति। भगवती श्रुतिः कथयति –

**या वो देवाः  सूर्ये रुचो  गोष्वश्वेषु या रुचः।**
**इन्द्राग्नी ताभिः सर्वाभी रुचन्नो धत्त बृहस्पते॥**[४]

अर्थात् हे देवाः! युष्माकं कान्तयः सूर्ये, गोषु, अश्वेषु च सन्ति, हे इन्द्र–अग्नि–बृहस्पतयः! अस्मान् भवन्तः कान्तियुक्तान् कुर्वन्तु। एताः स्तुतयः वैश्विकदृष्ट्या जीवमात्रस्य कृते प्रासङ्गिकाः सन्ति। देवतानां स्वतन्त्रं राज्यमस्ति, यस्य राजा इन्द्रदेवोऽस्ति, एवमन्यदेवगणाः प्रजा भवन्ति। देवगणाः आनन्दात्मकाः सन्ति तथा तेषां नियमाः सत्यामूलाः शाश्वताश्च सन्ति।[५] बृहस्पतिः देवानां पुरोहितोऽस्ति[६]। देवश्रुनामकः देवतानां नापितोऽस्ति[७]। देवताः परोक्षप्रियास्तथा परोक्षकामाः भवन्ति[८]। सर्वाः देवताः क्षीणशक्तिनः (यातयाम्नी) सन्ति, केवलं प्रजापतिः अक्षीणशक्तिसम्पन्नः (अयातयामः) अस्ति[९]। यद्यपि देवताः असुराश्च एकस्यैव प्रजापतेः पुत्राः[१०] तथापि देवतानामसुरैः सह शाश्वतः विरोधोऽस्ति। दिनं देवतानामस्ति एवं रात्रिः असुराणामस्ति[११]। यज्ञकर्म

---

[१] **शoब्राo ८.४.२.५**
[२] **तैoसंo ३.८.७.३**
[३] **शoब्राo ७.५.२.४**
[४] **शुoयo १३.२३**
[५] **कृoयoतैoसंo १.२.१**
[६] **शoब्राo ५.३.१.२**
[७] **कृoयoतैoसंo १.२.१**
[८] **शoब्राo ६.१.१.२**
[९] **मैoसंo ४.८.९**
[१०] **तैoसंo १.४.१.१**
[११] **काठoसंo ७.६**

असुरा अपि कुर्वन्तः आसन्, परन्तु यज्ञविधिमुत्सृज्य यज्ञकर्माणि कुर्वन्तीति ते परास्ताः भवन्ति स्म। असुराणां पुरोहिताः काव्योशना, शण्डः तथा मर्काश्चासन्[१]। देवताभिः यज्ञबलेनैव वृत्रं मारितमासीत्[२]। धर्मार्थकाममोक्षाणां पुरुषार्थचतुष्टयप्राप्तये देवतानां वैश्विकदृष्ट्या अत्यन्तं महत्त्वपूर्णं स्थानमस्ति।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'सामाजिकजीवने वैदिकदेवतानां वैश्विकदृष्ट्या समीक्षणम्'** नाम त्रिंशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

[१] **काठ०सं० २७.८**

[२] **मै०सं० ४.३.४**

# अथैकत्रिंशोऽध्यायः
# यजुर्वेदे धर्मनीतिः

**स नैव व्यभवत्तच्छ्रेयोरूपमत्यसृजत धर्मं तदेतत्क्षत्रस्य क्षत्रं यद्धर्मस्तस्माद्धर्मात्परं नास्त्यथो अबलीयान्बलीयाꣳसमाशꣳसते धर्मेण यथा राज्ञैवं यो वै स धर्मः सत्यं वै तत्तस्मात्सत्यं वदन्तमाहुर्धर्मं वदतीति धर्मं वा वदनतꣳसत्यं वदतीत्येतद्ध्येवैतदुभयं भवति॥**[1]

**अयं धर्मः सर्वेषां भूतानां मध्वस्य धर्मस्य सर्वाणि भूतानि मधु यश्चायमस्मिन् धर्मे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं धार्मस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳसर्वम्॥**[2]

अयं धर्म इत्यप्रत्यक्षोऽपि धर्मः कार्येण तत्प्रयुक्तेन प्रत्यक्षेण व्यपदिश्यते अयं धर्म इति प्रत्यक्षवत्। धर्मस्य श्रुतिस्मृतिलक्षणवेद्यत्वेऽपि ब्रह्मक्षत्रादीनामपि नियन्त्रकत्वात्  जगतो वैचित्र्यकर्तृत्वात् पृथिव्यादीनां परिणामहेतुत्वात् प्राणिभिरनुष्ठीयमानरूपत्वाच्चायं धर्मः प्रत्यक्षेण व्यपदेशः।

सत्यधर्मयोश्चाभेदेन निर्देशः कृतः, शास्त्राचारलक्षणयोः इह तु भेदेन व्यपदेश, एकत्वे सत्यपि दृष्टादृष्टभेदरूपेण कार्यारम्भकत्वात्। यज्ञस्त्वदृष्टोऽपूर्वाख्यो धर्मः स सामान्यविशेषात्मना अदृष्टेन रूपेण कार्यमारभते सामान्यरूपेण पृथिव्यादीनां प्रयोक्ता भवति विशेषरूपेण

---

[1] **बृ०उ० १.४.१४**

[2] **बृ०उ० १.५.११**

चाध्यात्मकं कार्यकारणसङ्घातस्य। तत्र पृथिव्यादीनां प्रयोक्तरि यश्चायमस्मिन् धर्मे तेजोमयः तत्राध्यात्मं कार्यकरणसंघातकर्तरि धर्मे भुवि धार्यः। वेदे धर्मस्य त्रयः स्कन्धाः समुपस्थापिताः। यज्ञः, अध्ययनं, दानं च। नैष्ठिकब्रह्मचर्यः, तपश्च। यज्ञस्य महत्त्वं नाधिकमभवत्। यज्ञेन स्वर्गप्राप्तिः तदपि सम्मतासीत्। किन्तु स्वर्गच्युतिमयं दर्शयित्वामृतपदं मोक्षपदमेव तपसा श्रद्धया च समीहितम्। तद्यथा–

**विद्याञ्चाविद्यान्च यस्तद्वेदो भयꣳ सह।**
**अविद्यया मृत्युन्तीर्त्वा विद्ययामृतमश्नुते॥**[1]

अत एव ब्रह्म एव ज्ञेयम्। विद्वान् ब्रह्मज्ञानेनामरपदं लभते। ब्रह्मज्ञानेन सर्वेभ्यो दुःखेभ्यो मुच्यते च। आराममस्य पश्यन्ति न तं पश्यति कश्चनेति।

**दुर्भिषज्यꣳ हास्मै भवति यमेष न प्रतिपद्यते। अथो खल्वाहुर्जागरितदेश एवास्यैष इति यानि ह्येव जाग्रत् पश्यति तानि सुप्त इत्यात्रायं पुरुषः स्वयं ज्योतिर्भवति। सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षाय ब्रूहीति॥**[2]

ब्रह्मचर्यः धर्मस्य मूलम्। ब्रह्मनिष्ठता तेनैव प्राप्यते। ब्रह्मचर्यस्य सम्यक् परिपालनाय वानप्रस्थसन्यासयोर्योजनं कृतम्। ब्रह्मलोकं गमनाय ब्रह्मचर्यः सोपानमेव। एतदर्थं जीवनमेव यज्ञः। ब्रह्मज्ञानप्राप्तिरेव धर्मस्य मूलम्। अतः सर्वैः ब्रह्मतत्त्वमवाप्तव्यम्। विद्वद्भिः ब्रह्मतत्त्वप्राप्तये सततं प्रयत्नः करणीयः। येन समेषां लोकानां कल्याणं भविष्यतीति वैदिकी दृष्टिः विद्यते।

---

[1] **शु०य० ४०.१४**

[2] **बृ०उ० ४.३.१४**

**सम्भूतिञ्च विनाशञ्च यस्तद्वेदोभयꣳ सह।**
**विनाशेन मृत्युन्तीर्त्वा सम्भूत्त्यामृतमश्नुते।।**[१]

सर्वसाधारणेभ्यो धर्म एव मूलं, तत्र दानमृतं, सत्यं, तपः, दमः, शमः, अग्निहोत्रं स्वाध्यायप्रवचनादीनि च सहायकानि भवन्ति। तथा हि– **मनीषिणः कामनासीत्। यशोजनेऽसानि। श्रेयावस्य सोऽसानि। तं त्वा भग प्रविशानि। समा भग प्रविशम्। धातः प्रतिवेशोऽसि प्रभा भहि। प्रभा पद्यस्व।।**[२]

पापस्यापाकरणं पुण्येन भवतीति प्रतिपादितम्। पुण्यन्तु तपसा यज्ञेन च भवति। यज्ञस्तु मनसा वाचा कर्मणा भवति। तीर्थयात्रायाः महत्त्वमपि धर्मे प्रतिपादितम्। सर्वेभ्यो वर्णेभ्यो तीर्थयात्रायाः अधिकारः समानमेव। तीर्थयात्रातः भावस्य नैर्मल्यं धार्मिकदृष्ट्या विलक्षणं भवतीति श्रुतिप्रसिद्धम्। तद्यथा–

**पुनन्तु मा देवजनाः पुनन्तु मनसा धियः।**
**पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा।।**

**पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत्। अग्ने क्रत्वा क्रतूँ१।। रनु।।**[३]

अग्निसोमविश्वेदेवद्यावापृथिवीप्रभृतयो देवाः अस्माकमहर्निशं पूज्याः भवन्ति। इन्द्रवरुणलक्ष्मीगणेशदेवास्तु मंगलकर्तारः सन्ति। सर्वेषां चराचराणां दृश्यादृश्यानां च कृते भरणपोषणं च देवानां प्रसादाद् भवति। देवानां प्रसादाद्विश्वस्य जनाः सामाजिकसंस्कारेण सर्वविषयककल्याणेन च सम्बद्धाः भवन्ति। तत्र यद्यपि प्राणिनः देवप्रसादात् सर्वविधकल्याणमनुभवन्ति, तथापि संज्ञावैलक्षण्यात् केचन शिवस्योपासकाः, केचन च विष्णोरुपासकाः भवन्ति। प्रायशः

---

[१] **शु०य० ४०.११**

[२] **तै०शि०व० ९.१**

[३] **शु०य० १९.३९-४०**

शिवसायुज्यप्राप्तिकामनया शिवोपासका देवासुरनागपिशाचयातुधाननरादयः सन्ति। शिवस्योपासनामिमे कुर्वन्तीति शैवाः भवन्ति। तथैव विष्णोरुपासकाः मनुष्यकिन्नरयक्षगन्धर्वराक्षसदेवदानवादयः भवन्ति, तेषां मते विष्णुःसर्वेषामधीश्वरः, अत इमे वैष्णवा इति लोके प्रसिद्धाः भवन्ति।[१]

**अग्निः सोमो वरुणो मित्र इन्द्रो बृहस्पतिः सविता यः सहस्री।**
**पूषा नो गोभिरवसा सरस्वती त्वष्टा रूपाणि समनक्तु यज्ञैरिति।।**[२]

**त्वष्टा रूपणि ददती सरस्वती पूषा भगꣳ सविता मे ददातु।**
**बृहस्पतिर्ददिन्द्रो बलं मे मित्रः क्षत्रं वरुणः सोमोऽग्निरिति।**[३]

**अग्निरन्नादोऽन्नपतिरन्नाद्यमस्मिन्यज्ञे मयि दधातु स्वाहा। सोमो राजा राजपती राज्यमस्मिन्यज्ञे मयि दधातु स्वाहा, वरुणः सम्राट् सम्राट्पतिः साम्राज्यमस्मिन्यज्ञे मयि दधातु स्वाहा, मित्रः क्षत्रं क्षत्रपतिः क्षत्रमस्मिन्यज्ञे मयि दधातु स्वाहा, इन्द्रो बलं बलपतिर्ब्रह्मवर्चसमस्मिन्यज्ञे मयि दधातु स्वाहा, बृहस्पतिर्ब्रह्म ब्रह्मपतिर्ब्रह्मवर्चसमस्मिन् यज्ञे मयि दधातु स्वाहा, सविता राष्ट्रꣳ राष्ट्रपती राष्ट्रमस्मिन्यज्ञे मयि दधातु स्वाहा, पूषा भगं भगपतिर्भगमस्मिन्यज्ञे मयि दधातु स्वाहा, सरस्वती पुष्टिं पुष्टिपतिः पुष्टिमस्मिन्यज्ञे मयि दधातु स्वाहा, त्वष्टा रूपाणाꣳ रूपकृद्रूपपती रूपेण पुष्टिमस्मिन्यज्ञे मयि दधातु स्वाहा।।**[४]

---

[१] का०श्रौ०सू० ५.१०.११

[२] का०श्रौ०सू० ५.१२.११

[३] श०ब्रा० ११.४.३.७ एवं का०श्रौ०सू० ५.१२.१२

[४] का०श्रौ०सू० ५.१३.१

**ये भूतानामधिपतयो विशिखासः कपर्दिनः।**
**तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि।।**[१]

महर्षयः स्वदिव्यतपोबलैः योगबलैः ज्ञानोत्कर्षैश्च धर्मतत्त्वस्य साक्षात्कारं कृतवन्तः। धर्मतत्त्वप्रकाशकाः सर्वे वेदमन्त्राः सर्वाः श्रुतयः, स्मृतयः सर्वाणि शास्त्राणि च भवन्ति। धर्मस्य ये खलु साक्षात्कारकर्तुमसमर्थाः भवन्ति तेषां कृते वेदः वेदाङ्गानि चैते लिपिरूपेण निबद्धाः सन्ति। कार्यकारणयोस्तादात्म्यमिति निर्देशात् तद् हेतोस्तद्भावः। अनया दृष्ट्या कारणेषु कार्याणामारोपं कृत्वैव प्रायः धार्मिकविधयः धार्मिकक्रियाः संस्काराः यज्ञाः सत्यं दया दानानि चेति सत्कर्मेभ्यः धर्मशब्दस्य प्रयोगः भवतीति अवलोक्यन्ते।

**यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।**
**ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः।।**[२]

**साक्षात्कृतधर्माण ऋषयो बभूवुः। तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः। उपदेशाय ग्लायन्तोऽवरेबिल्म् ग्रहणायेमं ग्रन्थं समाम्नासिषुः वेदं च वेदाङ्गानि च।।**[३] **चोदनालक्षणोऽर्थो धर्मः।।**[४]

क्रियायाः प्रवर्तकं निवर्तकं वा यद्वाक्यं सा चोदना। चोदनया यो लक्ष्यते सोऽर्थः। पुरुषं निःश्रेयसेन संयुनक्ति। चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टं चेत्येवं ज्ञातोऽयमर्थः। शक्नोत्यवगमयितुम्। चोदनाप्रवर्तकं निवर्तकं च विधिनिषेधात्मकं वैदिकं वचनम्। तयैव धर्मो लक्ष्यते साक्षात् बोध्यते। सैव लक्षणं प्रमाणं वा

---

[१] **शु०य० १६.५९**

[२] **शु०य० ३१.१६**

[३] **निरुक्तम् १.६**

[४] **जै०सू० १.२**

यस्मिन् सः धर्मः। तथा 'अग्निहोत्रं जुहुयात्। अहरहः सन्ध्यामुपासीत' इत्यादिविधिविहितकर्तव्यताकम्। अग्निहोत्रादिकं कर्म धर्मशब्देनाभिधीयते। धर्मस्तु निखिलसंसारस्य प्रतिष्ठायाः आधारस्तम्भः। धर्मात्मा धर्मेण पापमपनुदति। जगतः संरक्षणाय धर्मः परमं कारणं भवतीति श्रुतिभिः श्रूयते। तथाहि –

**धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजाः उपसर्पन्ति। धर्मेण पापमपनुदति। धर्मे सर्वं प्रतिष्ठितम्। तस्मात् धर्मं परमं वदन्ति।**[1]

**यो वै स धर्मः सत्यं वै तत्। तस्मात् सत्यं वदन्तम्। आहु धर्मः वदति इति। धर्मं वा वदन्तं सत्यं वदति इति। तत् ह एव एतत् उभयं भवति॥**[2]

**सत्यं वै चक्षुः। तस्मात् यत् इदानीं द्वौ विवदमानौ स्याताम् अहं अदर्शम्, अहम् अश्रौषम् इति। यः एवं ब्रूयात् अहमद्रर्शम् इति तस्मै एव श्रद्धाम्। तदेव एतत् समर्धयति॥**[3]

अशोकः प्रियदर्शी देवानां प्रियो विश्वस्तो राजा आसीत्। स एवमाह शास्त्रादिसाहाय्येन राज्यलोलुपतया च यः भवति स विजयो यथार्थविजयो भवितुं नार्हति। धर्मविजय एव विजयः। धर्मेण राजा खलु परोपकारपरायणं भूत्वा प्रजानां हृदयं विजयते। हृदयविजय एव लोके श्रेयो भवति। स्थापितविनयो हि राजा महीयते।

**अदृश्रमस्य केतवो विरश्मयो जनाँ२॥ अनु।**
**भ्राजन्तो अग्नयो यथा॥**[1]

---

[1] **तै०आ० १०.६.३**

[2] **श०ब्रा० १४.४.२.३६**

[3] **श०ब्रा० १.३.४.२७**

**यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः।**
**स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः।।**[२]

**चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक्।**
**भूतं भव्यं भविष्यं च सर्वं वेदात् प्रसिध्यति।।**[३]

**सेनापत्यं च राज्यं च दण्डनेतृत्वमेव च।**
**सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति।।**[४]

शिष्टाः खलु विगतमत्सराः निरहङ्काराः कुम्भीधान्याः अलोलुपाः दम्भदर्पलोभमोहक्रोधविवर्जिताः भवन्ति। यथा –

**धर्मेणाधिगतो यैस्तु वेदः सपरिबृंहणः।**
**ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुति प्रत्यक्षहेतवः।।**[५]

एते सर्वेषु सामाजिकेषु कर्मसु समर्थाः भवन्ति। स्वयं सिद्ध एव सिद्धधर्मो भवति। तथाहि यथा – **''रामो विग्रहवान् धर्मः''**[6] तथा कृष्णः धर्मः सनातनम्' । एभिः बहुभिः प्रमाणैः पूर्णपरब्रह्मपरमात्मा एव सिद्धधर्मः। नास्ति सः पुरुषाणां प्रयत्नैः साध्यः। स स्वतः नित्यः सिद्धः।

**धर्मे मतिर्भवतु सततोत्थितानां सह्येक एव परलोकगतस्य बन्धुः। अर्थाः स्त्रियश्च निपुणैरपि सेव्यमाना नैवाप्तभावमुपयान्ति नच स्थिरत्वम्।।**[७]

---

[१] **य०वे०स० ८.४०**

[२] **मनु० २.७**

[३] **मनु० १२.९७**

[४] **मनु० १२.१००**

[५] **मनु० १२.१०९**

[६] **श्रीमद्वाल्मीकिरामायणम्**

[७] **म०भा०आ०प० २.३९१**

## *यजुर्वेदे धर्मनीतिः*

वेदो धर्ममूलम्। तद्विदां च स्मृतिशीले। वेदविदां मन्वादीनां या स्मृतिस्तत्प्रणीतं धर्मशास्त्रं तच्च तेषां शीलमनुष्ठानं ते धर्मशीले अस्मदादीनां प्रमाणम्। तेषां तु तदानीं विद्यमानत्वेन सम्प्रदायविच्छेदाच्च वैदिकानुष्ठानं वेदमूलमेव। स्वतः प्रमाणस्य हि शब्दस्य न वक्तृदोषनिबन्धनप्रामाण्यम्। तदिहास्मदादीनां धर्मज्ञसमयः प्रमाणम्। धर्मज्ञानां तु वेदाः प्रमाणम्। वेदाः धर्माधर्मयोः मूलप्रमाणम्।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे धर्मनीतिः'** नाम एकत्रिंशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

# अथ द्वात्रिंशोऽध्यायः
# यजुर्वेदे अर्थनीतिः

द्वितीयः पुरुषार्थः अर्थः। येन मानवानामिहलोकस्य परलोकस्य च सर्वेषां प्रयोजनानां सिद्धिर्भवति स एवार्थः। अर्थ एव मानवानां भोगस्यारोग्यस्य धर्मस्य च मुख्यं साधनं वर्तते अतः अर्थलाभाय सर्वे सततं यतन्ते।

**अर्थार्थं प्रवर्तते लोकः॥**[1]
**प्राणिनां सुखस्य मूलं धर्मः धर्मस्य मूलम् अर्थः॥**[2]
**वृत्तिमूलमर्थः। अर्थमूलौ धर्मकामौ॥**[3]

अनया दृष्ट्या भूमिः, धनं, द्रव्यं, विद्या, कला, कृषिः, पशुपालनं, स्वर्णं, रजतं, नानाविधपात्राणि, लौहधातुनिर्मितानि, लाङ्गलप्रभृतिद्रव्याणि, वायुयानप्रभृतिसर्वाणि द्रव्याणि चार्थ एव। अयं संसारः कर्मभूमिः, जीविकायाः साधनभूतानां कर्मणां सर्वत्र प्रशंसा दृश्यते। कृषिः वाणिज्यं गोरक्ष्यं विविधानि शिल्पानि अर्थप्राप्तेः साधनानि सन्ति। यथा–

**सँवर्चसा पयसा सन्तनूभिरगन्महि मनसा सꣳशिवेन।**
**त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम्॥**[4]

---

[1] वा०सू० ७.२८
[2] चा०सू० १.१.२
[3] चा०सू० १.८९-९०
[4] शु०य० २.२४

ऊर्क् च मे सूनृता च मे पयश्च मे रसश्च मे घृतञ्च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रञ्च म औद्भिद्यञ्च मे यज्ञेन कल्पन्ताम्।[१]

रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे पूर्णं च मे पूर्णतरं च मे कुयवं च मेऽक्षितं च मेऽन्नं च मेऽक्षुच्च मे यज्ञेन कल्पन्ताम्॥[२]

वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथ्यं च म ऋद्धं च म ऋद्धिश्च मे क्लिप्तं च मे क्लिप्तिश्च मे मतिश्च मे सुमतिश्च मे यज्ञेन कल्पन्ताम्॥[३]

व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम्।[४]

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे श्यामं च मे लोहं च मे सीसं च मे त्रपु च मे यज्ञेन कल्पन्ताम्॥[५]

अग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्याश्च मेऽकृष्टपच्याश्च मे ग्राम्याश्च मे पशव आरण्याश्च मे वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे यज्ञेन कल्पन्ताम्॥[६]

---

[१] शु०य० १८.९

[२] शु०य० १८.१०

[३] शु०य० १८.११

[४] शु०य० १८.१२

[५] शु०य० १८.१३

[६] शु०य० १८.१४

**वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च मे एमश्च म इत्या च मे गतिश्च मे यज्ञेन कल्पन्ताम्॥**[1]

एतानि अस्माकं जीविकायाः साधनानि, अर्थस्य मूलस्रोतांसि च भवन्तीति। धनधान्यवस्त्रगृहसम्पत्तिप्रभृतीनां सर्वेषां जीवनोपयोगिनां पदार्थानां जनयित्री भूमिरेव, सैव सकलानां प्राणिनां सुस्थिरा आधाररूपा भवतीति श्रुत्या गीयते। अतः वैदिकवाङ्मये भूमेः अर्थरूपेण सर्वाधिकमहत्त्वं वरीवर्ति।

**वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे। यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म साविषत्॥**[2]

मनुष्याणां सर्वाः क्रियाः अर्थमूलाः भवन्ति। तस्योपार्जने महान् प्रयत्नः विधातव्यः। गुणवतामपि निर्धनानां मनुष्याणां नास्ति समाजे परिवारे वा आदरः, स्त्रीः पुत्राः पितरश्च तं न हि यथोचितादरं प्रयच्छन्ति। अतः सदुपायैः एतत् साहसैश्चार्थोपार्जने प्रयत्नः कर्तव्यः। यथा पर्वतेभ्यः नानाविधनद्यः निर्गच्छन्ति तद्वत् न्यायोपार्जितेभ्यः वित्तेभ्यः धर्मस्य पुण्यस्य यशसश्च श्रोतांसि निर्गच्छन्ति। धर्मकामयोः पुरुषार्थयोः सिद्धिः अर्थेन सिद्ध्यति। द्वयोः पुरुषार्थयोः मूलमर्थः। धर्मकामयोः पुरुषार्थयोः प्राण अर्थ इति श्रुतिः श्रूयते। अर्थस्य यथार्थं फलं धर्मः। सदुपार्जितस्य अर्थस्य विनियोगः सदा धर्माय कर्तव्यः येन सर्वविधं कल्याणं भविष्यतीति पुराणं निगदति। तथाहि– **नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः॥**[3]

---

[1] **शु०य० १८.१५**

[2] **शु०य० १८.३०**

[3] **भा०म०पु० १.२.९**

अर्थः सततं सर्वान् आकर्षयति। अर्थं परित्यज्य किमपि कार्यं नैव निर्वहति। अतः कार्यसिद्धये अर्थस्योपार्जनं सन्मार्गेण कर्तव्यम्।

**वाजो नो अद्य प्रासुवाति दानं वाजो देवाँ२॥ ऋतुभिः कल्पयाति। वाजो हि मा सर्ववीरं जजान विश्वा आशा वाजपतिर्जयेयम्॥**[1]

शास्त्रमस्त्रं विना शूरता स्त्रियं विना गार्हस्थ्यं च यथा न शोभते तथैव अर्थं विना धर्मकामावपि नहि शोभेते। अर्थस्य धर्मणि विनियोगे कृते सति मोक्षप्राप्तेः साधनमपि सुकरं भवति। अर्थवतां दोषाः अपि गुणाः भवन्ति। ज्ञानवृद्धाः तपोवृद्धाः वयोवृद्धाश्च अर्थं विना नहि शोभन्ते। धनीनां पार्श्वे सेवका धनात्मकगुणस्य सत्त्वात् स्वयमेव समागच्छन्ति। अर्थेषु विलक्षणं सामर्थ्यं तथा दृश्यते यथा धनिकानामधीनं सर्वं जगत् इति। केवलमेकेनैव वित्तेन जनाः लोकपूज्याः जायन्ते। गुणग्राहिणः भ्रमरा यथा पुष्पविहीनमाम्रवृक्षं न हि गच्छन्ति तथैव कृपणः धनिकान् जनान् न हि त्यजन्ति निरन्तरं तेषां गुणकीर्तनं कुर्वन्ति।

यद्यपि लोके अर्थस्य दासाः जनाः भवन्ति तथापि नास्ति अर्थः कस्यापि दासः। उत्तमकुले समुत्पन्नोऽपि सदाचारसम्पन्नोऽपि निर्धनः जनः। संसारे स एव महान् स एव कुलीनश्च भवति योऽर्थवान् इति। केचन विरक्ताः सन्यासिनोऽपि धनरागात् धनीनां चाटुकाराः भवन्तीति अवलोक्यते।

**महेन्द्रमपि अर्थहीनं न बहु मन्यन्ते लोकाः॥**[2]
**अधनः स्वभार्ययापि अवमन्यते॥**[3]

**वाजः पुरस्तादुत मध्यतो नो वाजो देवान् हविषा वर्धयाति। वाजो हि मा सर्ववीरं चकार सर्वा आशा वाजपतिर्भवेयम्॥**[1]

---

[1] **शु०य० १८.३३**

[2] **चा०सू० ४.३३**

[3] **चा०सू० ४.६०**

**धानाः करम्भः सक्तवः परीवापः पयो दधि।**
**सोमस्य रूपꣳ हविष आमिक्षा वाजिनं मधु॥**
**धानानाꣳ रूपं कुवलं परीवापस्य गोधूमाः॥**
**सक्तूनाꣳ रूपं बदरमुपवाकाः करम्भस्य॥**[2]

निर्धना मनुष्याः सततं निराशाः असहायाश्च भवन्ति। धनैर्बान्धवैश्च हीनेभ्यो जनेभ्यो नगरस्य भूमिरपि अटवीव शून्या प्रतिभाति तथा श्रीमतामरण्यमपि राजधानी भवति। अधनाः निर्बुद्धयो भवन्ति। निर्धनता सर्वासामापत्तीनां जननी भवति।

**दारिद्र्यं खलु पुरुषस्य मरणम्॥**[3]
**दारिद्र्यात् ध्रियमेति ह्रीः परिगतः सत्वात् परिभ्रश्यते।**
**निःसत्वः परिभूयते परिभ्रमन्निर्वेदमापद्यते।**
**निर्विण्णः शुचमेति शोकपिहितो बुद्ध्या परित्यज्यते**
**निर्बुद्धिः क्षयमेत्यहो निर्धनता सर्वापदामास्पदम्॥**[4]

दरिद्रतापरिहाराय एषा उक्तिः -

**इदꣳ हविः प्रजननं मे अस्तु दशवीरꣳसर्वगणꣳस्वस्तये। आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि। अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतो अस्मासु धत्त॥**[5]

इदं पयोलक्षणं हविः मम पुत्रोत्पादनक्षमम्, अन्नोत्पादनक्षमम्, सामर्थ्योत्पादनक्षमं भवतु। मम कल्याणाय भवतु। अनया हविषा मम दशपुत्राः भवन्तु। अथवा प्राणापानादिप्राणसमूहानां बलेन स्वास्थ्यलाभकरो

---

[1] शु०य० १८.३४
[2] शु०य० १९.२१-२२
[3] चा०सू० ४.५८
[4] हितोपदेशमित्रलाभः १२५
[5] शु०य० १९.४८

भवतु। अस्माकं पुत्रपौत्रसेवकप्रभृतिपरिवारजनानाञ्च कृते मंगलप्रदं भवतु। वयमात्मबलं प्राप्नुयामः पुत्रपौत्रादिभिः सम्पन्ना भवेमः, गोबलीवर्दपशुभिः सम्पन्नाः भवेमः, जनानां मध्ये प्रतिष्ठा प्राप्नुयामः, सर्वत्र निर्भयो भूत्वा विचरामः, अग्निः अस्माकं पुत्रपौत्रपरिवारजनानां वृद्धिं करोतु। अन्नेन धनेन बलेन आयुषा गोरसेन च संयुक्ताः परिपूर्णाश्च भवेम। अस्माकं पुत्रपौत्रपरिवारजनेषु बलपौरुषवीर्यस्य च वृद्धिः जायताम्।

**सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे विश्वं च मे महश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे यज्ञेन कल्पन्ताम्।**[१]

**ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुखं च मे शयनं च मे सूषाश्च मे सुदिनं च मे यज्ञेन कल्पन्ताम्।।**[२]

अर्थस्य निरन्तरमागमनात् मानवाः वृद्धाः न भवन्ति। अर्थे एतादृशं बलं दृश्यते यत् वृद्धापि पुरुषाः तरुणाः भवन्ति। संसारस्य निखिलं कार्यमेकमात्रमर्थाधीनं भवति।

**अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च।**
**वश्यश्च पुत्रोऽर्थकरी च विद्या षड् जीवलोकस्य सुखानि राजन्।।**[३]

**त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे यज्ञेन कल्पन्ताम्।**[४]

---

[१] शु०य० १८.५

[२] शु०य० १८.६

[३] हितोपदेशे मित्रलाभः श्लो० १९

[४] शु०य० १८.२६

**पष्ठवाट् च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे वेहच्च मेऽनड्वाँश्च मे धेनुश्च मे यज्ञेन कल्पन्ताम्॥**[1]

सर्वैः मानवैः न्यायमार्गेण स्वकर्तव्येन च अर्थस्य उपार्जनं कर्तव्यम्। अर्थप्राप्तिविषये पूर्णसन्तोषः कदापि मा विधातव्यः। अर्थतोषिणं पुरुषं लक्ष्मीः परित्यजति। अर्थैषणा दुर्व्यसनं नास्ति प्रत्युत अर्थोपार्जनं सर्वोत्तमं पुरुषार्थम्। अर्थस्य दोषान् परित्यज्य यदि न्यायेन स्वकर्मणा चार्थोपार्जनं भवेत् तर्हि नास्ति तस्य समः कश्चित् पुरुषार्थः नास्ति कश्चित् सद्‌गुणः। अर्थैः मानवानां सर्वाणि शुभकर्माणि सरलतया सिद्ध्यन्ति। दीर्घजीवनयापनाय धनागमोऽपि आवश्यकः, महत्तरं दुःखं जीवने निर्धनता। नास्ति लोके तस्या सदृशी व्याधिः। धनोपार्जनाय सततं प्रयत्नशीलैर्भाव्यम्। एतदर्थं कृषिः, पशुपालनम्, वाणिज्यम्, राजसेवाप्रभृतीनि कर्माणि कर्तव्यानि।

**तिस्रः एषणाः पर्येष्टव्याः भवन्ति। प्राणैषणा, धनैषणा, परलोकैषणा इति॥**[2]

द्वितीया धनैषणामापद्येत। प्राणेभ्यो ह्यनन्तरं धनमेव पर्येष्टव्यं भवति। न ह्यतः पापात् पापीयोऽस्ति। यदनुपकरणस्य दीर्घमायुः। तस्मादुपकरणानि पर्येष्टुं यतेत। तत्रोपकारोपायाननुव्याख्यां करिष्यामि। तद्यथा–

**कृषिपाशुपाल्यवाणिज्यराजोपसेवादीनि। या निचान्यान्यपि सतामविगर्हितानि कर्माणि वृत्तिपुष्टिकराणि विद्यात्तान्यारभेत कर्तुम्। तथा कुर्वन् दीर्घजीवितं जीवत्य न वमतः पुरुषो भवतीति द्वितीया धनैषणा व्याख्या भवति।**[3]

---

[1] **शु०य० १८.२७**

[2] **चरकसंहिता ११.३**

[3] **चरकसंहिता १०.५**

ये जीविकायाः अन्ये उपायाः सन्ति तेऽपि ज्ञातव्याः कर्तव्याश्च सन्ति। यतः अर्थोपार्जनं कुर्वन् जनः दीर्घजीवी सम्माननीयश्च भवति। अर्थोपार्जनं मनुष्येभ्यः धर्मोपार्जनमिव प्रतिदिनमपेक्षितमस्ति। अर्थोपार्जनार्थमर्थस्यैव आवश्यकता भवति। धनहीनाः बहुभिः प्रयत्नैरर्थोपार्जने समर्थाः भवितुं नार्हन्ति।

गजेन गजबन्धनमिव अर्थेनार्थोपार्जनं केवलाभ्यां बुद्धिपौरुषाभ्यां न भवितुं शक्नोति। अर्थप्राप्तेः तथा तस्य सुरक्षायाः मूलकारणं विनयमेव। विनयेन मनुष्याः अर्थप्राप्तेः अधिकारिणो जायन्ते।

जितेन्द्रियता विनयस्य मूलकारणमिन्द्रियसंयम एव सर्वेषां गुणानां पुरुषार्थानां च प्राप्तये मूलसाधनमिति। उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः। सम्पत्तयः गुणवन्तं विद्याविनयसम्पन्नं पुरुषं वरणं कुर्वन्ति। अर्थोपार्जनार्थं स्वस्वकर्तव्यानुरूपसद्विद्यया सेवया शूरतया कृषिकर्मणा व्याजेन वाणिज्येन विविधया कलया प्रतिग्रहेणान्यैः प्रयत्नैश्च यथासाध्यं प्रयत्नः विधातव्यः। यथा–

**होता यक्षत्समिधाऽग्निमिडस्पदेऽश्विनेन्द्रꣳ सरस्वतीमजो धूम्रो न गोधूमैः कुवलैर्भेषजं मधु शष्पैर्न तेज इन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज॥**[१]

**अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः। वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमꣳ रयिं दाः। तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः॥**[२]

उद्योगिपुरुषाणां पार्श्वे नास्ति आजीविकायाः भयम्। अतः आलस्यं परित्यज्य उत्साहसम्पन्नो भूत्वा भाग्यं परमात्मानं च विश्वसन्

---

[१] **शु०य० २१.२९**

[२] **शु०य० २५.४७**

उद्यमशीलो भवितव्यः। एतादृशं जनं लक्ष्मी स्वयं वृणुते। यदा कदा गुणवतामपि साफल्यं संसारे न हि दृश्यते अत्र उद्यमो विचारणीयः। गुणवन्तः विवेकिनः विद्वांसो अपि धनाभावेन दुःखानि अनुभवन्ति। अर्थप्राप्तेः मुख्योपायः धर्मः। यः इच्छेत् महतीं श्रियं सः पुण्यं संचयेत्। अजरामरवत् पुरुषः धनमर्जयेत् संचयेच्च। सद्बुद्धिरपि अर्थप्राप्तेः महत् साधनमस्ति। बुद्धिं विना अन्यैः उपायैः अर्थस्याभिवृद्धिर्न हि जायते। बुद्धिमतामर्थं दिने दिने वर्द्धते। शूरतया नीत्या बलेन धनेन च पशुपक्षिणोऽपि वशवर्तिन्यः भवन्ति।

भूमिः गृहं धनं सम्पत्तिः विद्या कला प्रभृतीनां जीवनोपयोगिनां वस्तूनां नामानि अर्थ इति, अतः जीवनाय सर्वेषामुपार्जनमेवार्थः। श्रद्धया सोद्यमाः पुरुषाः सर्वथार्थोपार्जने समर्था भवन्ति। उद्योगेन कृषकाः अन्नानि लभन्ते। व्यवसायिनः धनानि प्राप्नुवन्ति, राजानः राज्यलक्ष्मीं, विद्यार्थिनः उत्तमविद्यां, भृत्याः वेतनानि, इन्द्रादयो देवा अमृतं, तपस्विनः उत्तमानि लोकानि च प्राप्नुवन्ति। अतः जगति उद्यमेन किं किं न हि प्राप्यते। उत्साहहीनाः निरुद्योगिनः नपुंसकाः अभिमानिनः लोकोक्तिभिर्भयभीताः कायराः शठाः मायिनश्चार्थं न हि लभन्ते। असमृद्धिमसफलतां च वीक्ष्य जनैः स्वापमानेन नहि भवितव्यम्, भाग्यहीनं कदापि नहि ज्ञातव्यम्। अर्थः दुर्लभ इति न मन्तव्यम्, मरणपर्यन्तमर्थाय प्रयतितव्यम्। यथा–

**अपो अद्यान्वचारिषꣳ रसेन समसृक्ष्महि। पयस्वानग्न आगमन्तं मा सꣳसृज वर्चसा प्रजया च धनेन च॥**[१]

परमेश्वरः दूरे निकटे च सर्वत्र व्यापकः वर्तते। सर्वाणि भूतानि आत्मवत् पश्यति। परमेश्वरः सर्वव्यापकः निराकारश्च वर्तते।

---

[१] **शु०य० २०.२२**

कर्ममार्ग–अध्यात्मवाद–भौतिकवादानां समन्वयो विधेयः। तदैव लोकपरलोकश्च सुखदः स्यात्। विद्यया अमृतत्वं लभ्यते–

**अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते॥**[1]

ओमित्येव सर्वव्यापी सर्वरक्षकः। शरीरं नश्वरम्। निम्नाङ्किते मन्त्रे कथितं वर्तते यत् परमात्मा आकाशवत् सर्वव्यापकः, सूर्ये या शक्तिः वर्तते सा शक्तिः अस्मिन् शरीरेऽपि विद्यते।

**योऽसावादित्ये पुरुषः सोऽसावहम्॥ ओ३म् खं ब्रह्म॥**[2]

विद्या स्वार्था परार्था च भवति। तस्यास्तद्विषयत्वात् यद्यस्मदर्थमीश्वरो विद्योपदेशं न कुर्यात्तदा अन्यतरपक्षे सा निष्फला स्यात्। तस्मादीश्वरेण स्वविद्याभूतवेदस्योपदेशेन सप्रयोजनता सम्पादिता। यथा परमकारुणिकेन परमेश्वरेण प्रजासुखार्थं कन्दमूलफलतृणादिकं रचितं तथैव तेन सर्वमुखप्रकाशिका वेदविद्या अपि प्रकाशिता। परमेश्वरेण पुस्तकस्था वेदविद्या नाऽऽदौ समुत्पादिता किन्तर्हि अग्निवाय्वादित्यांगिरसां ज्ञानमध्ये प्रेरिता। ते न खलु ज्ञानरहिताः जडाः अपि तु ते सृष्ट्यादौ मनुष्यदेहधारिणः आसन्। कुतः जडे ज्ञानकार्यासम्भवात्। यत्रार्थसम्भवो नास्ति तत्र लक्षणा भवति।

विद्याप्रकाशसम्भवो मनुष्येष्वेव भवितुमर्हति तथात्र प्रमाणम् –

**तेभ्यस्तप्तेभ्यस्त्रयो वेदा अजायन्ताऽग्नेर्ऋग्वेदो वायोः यजुर्वेदः सूर्यात् सामवेदः॥**[3] एषामग्निवायुसूर्याणां ज्ञानमध्ये प्रेरयित्वा तद्द्वारा परमेश्वरेण वेदाः प्रकाशिताः। आदिसृष्टिमारभ्याद्यपर्यन्तं

---

[1] **शु०य० ४०.१४**

[2] **शु०य० ४०.१७**

[3] **शतपथब्राह्मणम् ११.५.२-३**

ब्रह्मादिभिः सर्वाः सत्यविद्याः श्रूयन्तेऽनया सा श्रुतिः। न कस्यचिद् देहधारिण सकाशात् कदाचित् कोऽपि वेदानां रचनां दृष्टवन्तः।

**उभा वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै।**
**उभा दातारविषाꣳ रयीणामुभा वाजस्य सातये हुवे वाम्॥**[१]

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे अर्थनीतिः'** नाम द्वात्रिंशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

[१] **तै०सं० १.१.१४**

# अथ त्रयस्त्रिंशोऽध्यायः

# यजुर्वेदे दण्डनीतिः

दुराचारात् चरित्रस्य हानिर्भवति तेन राष्ट्रस्य महती क्षतिर्जायते। दुराचारिणः पुरुषाः अनियन्त्रितं भूत्वा राष्ट्रीयसम्पत्तीनां लोकमर्यादानां च विनाशं कृत्वा समग्रं राष्ट्रं विध्वंसयन्ति। अतः लोकरक्षणाय राज्ञां कर्तव्यमस्ति यत् दुराचारिणं भ्रष्टाचारिणं राष्ट्रसम्पत्तिनाशकान् च सः दण्डयेत् नियन्त्रयेच्च। अपराधनियन्त्रणरहितेषु दण्डक्रियायामसमर्थेषु नृपेषु प्रजाजनाः नानुरागं कुर्वन्ति। सज्जनैस्ते अनादृता भवन्ति। अस्य दुष्परिणामः राष्ट्रविप्लवम्। नृपा अपि विनष्टा जायन्ते। लोकोऽपि उद्विजते।

अनेन कारणेन महर्षिः कौटिल्योऽपि दुचाराचारस्य भयंकरान् परिणामान् चिन्तयन् उवाच सर्वोच्चाश्रमवासिनः विरक्ताः सन्यासिनोऽपि सदाचारात् विरुद्धमाचरन्ति तदा राज्ञां कर्तव्यानि सन्ति तान् दण्डयन्तु। बलात् अनाचारिणं कदाचारिणं दुराचारिणञ्च दण्डयन्तु। यथा राष्ट्रेषु अधर्मः मा प्रसरतु। शासकाः यदि एतादृशान् जनान् उपेक्षयन्ति। ततः कलुषितो धर्मो राष्ट्रं राष्ट्रनायकं च विनाशयति।

ब्राह्मणप्रभृतयो देवर्षिपितृऋणतः ऋणिनः सन्ति, ते यज्ञात् वेदाध्ययनात् सन्तानोत्पत्तितः त्रिभिः ऋणैर्मुच्यन्ते। ये एतान् उपेक्षयन्ति त एव घोरान्धकारे पतन्ति। यथा–

**ऋणैस्त्रिभिर्द्विजो जातो देवर्षिपितॄणां प्रभो।**
**यज्ञाध्ययनपुत्रैस्तान्यनिस्तीर्य त्यजन् पतेत्॥**[1]

**निद्रग्धꣳ रक्षो निद्रग्धा अरातयो ध्रुवमसि पृथिवीं दृꣳहाऽऽयुर्दृꣳह प्रजां दृꣳह सजातानस्मै यजमानायं पर्यूह धर्त्रमस्यन्तरिक्षं दृꣳह प्राणं हꣳहापानं दꣳह सजातानसमै यजमानाय पर्यूह धरुणमसि दिवं दृꣳह चक्षुर्दृꣳह श्रोत्रं दृꣳह सजातानस्मै यजमानाय पर्यूह धर्मासि दिशो दृꣳह योनि दृꣳह प्रजा दृꣳह सजातानस्मै यजमानाय पर्यूह चितः स्थ प्रजामस्मै रयिमस्मै सजातानस्मै यजमानाय पर्यूह भृगूणामङ्गिरसा तपसा तप्यध्वम्॥**[2]

मानवसमाजे सर्वविधसदाचारस्य प्रथमप्रवक्तारः सम्प्रवर्तकाश्च मुख्यतया सप्तर्षिवर्गाः स्वयम्भूमनुः प्रजापतयश्चासन्। परमात्मनः प्रेरणया विश्वव्यवस्थासंचालनाय सर्वविधसदाचारं प्रचारयन्ति स्म। तेषामृषिमहर्षिमहापुरुषाणां परम्परयैव विश्वेषु देशेषु सर्वविधसदाचाराणां लोकव्यवहाराणां प्रचलनं साम्प्रतं दृश्यते।

एतेषां परम्परागतसदाचाराणां रक्षणाय देशे देशे राष्ट्रे राष्ट्रे महापुरुषाः स्वसदाचारैः जगतितलं पावयन्ते। प्रातः स्मरणीयाः विद्यागुरवः स्वसदाचारैः अन्तेवासिनः शिक्षयन्ति उपदिशन्ति च। यथा–

**देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि। तानि सेवितव्यानि। नो इतराणि। यान्यस्माकꣳसुचरितानि। तानि त्वयोपास्यानि॥**[3]

---

[1] **भा०म०पु० १०.८४.३९**

[2] **तै०सं० १.७.७**

[3] **तै०उ० १.११.२**

सदाचार एव मनुष्याणामुन्नतेः मूलकारणं विद्यते। एतस्याभावेनैव मानवाः दानवा इव आचरन्ति, साम्प्रतं दुराचारादेव सर्वत्र समाजे भ्रष्टाचाराः, अनुशासनहीनताप्रभृतयो दुर्गुणाः दृश्यन्ते। सर्वत्र हाहाकारः विलापः कोलाहलश्च विद्यते। दुराचाराणि असंयमाः लुब्धाः ईर्ष्यालवः असन्तुष्टाश्च राष्ट्रस्य रोगाः सन्ति। एतेषां दमनार्थमेव वेदशास्त्रे प्रचुरो निर्देशः दृश्यते।।

**अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्। अहींश्च सर्वान् जम्भयन् सर्वाश्च यातु धान्योऽधराचीः परासुव।।**[१]

**नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमः सृकायिभ्यो जिघाꣳसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्तानां पतये नमः।।**[२]

पुनः पुनः क्रियमानः पापः बुद्धिं विनाशयति। बुद्धिविनष्टे सति सततमधः पतनं च भवति। मानवसमाजे जनाः भूतप्रेतपिशाचादि विषयमवलम्ब्य परस्परं वादविवादं कुर्वन्ति, तथा च सति भयं रोगाः विविधा अनर्थक्रियाश्च जायन्ते। तत्र च बुद्धेरपराधः। एतदतिरिक्तं ईर्ष्याशोकमोहभयक्रोधाभिमानद्वेषप्रभृतयो विकाराश्च जायन्ते। तैः प्रभावितो जनः समाजे नानासामाजिकव्यवस्थां विनाशयति, क्वचित् लुण्ठति क्वचित् हन्ति क्वचित् हिंसां विदधाति, क्वचिच्च कलहं करोति। तदनन्तरं दण्डभागी भूत्वा इतस्ततो विचरति, एते अपराधाः प्राणिनामवनतेः कारणमिति।।

---

[१] **शु०य० १६.५**

[२] **शु०य० १६.२१**

**अभि गोत्राणि सहसा गाहमानोदयो वीरः शतमन्युरिन्द्रः।**
**दुश्च्यवनः पृतनाषाडयुध्योऽस्माकꣳसेना अवतु प्र युत्सु॥**[1]

**अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि।**
**अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम्॥**[2]

बुद्धिदोषैः देशनगरनिगमजनपदानामधिकारिणः लोभात् धर्मं सदाचारञ्चातिक्रम्य अधर्मे प्रवृत्ताः भवन्ति। अपराधे पातयन्ति च। तेषामाश्रिता पुरवासिनः देशवासिनः नगरवासिनश्च अधर्मे निमग्नाः भवन्ति।

तान् देवा अपि त्यजन्ति। अधर्मस्य प्रधाने सति ऋतूनामपि परिवर्तनं जायते। काले कालेऽवर्षणसमये उल्कापाताः दुष्कराः विविधाः रोगाश्च उत्पद्यन्ते भूमिरपि विकृता भवति। देशे देशे अशान्तिः अनाचारः दुराचारः हाहाकारादयश्च दृश्यन्ते। ओषधयोऽपि रोगविनाशने अक्षमा जायन्ते। परस्परं स्पर्शदोषेण आहारविहारा अपि दुषिताः भवन्ति।

धमेष्वधर्मप्राधान्यात् देवताः ऋतवश्च व्यापद्यन्ते। तेन नापो यथाकाले वर्षन्ति। वाता न सम्यगभिवान्ति। क्षितिः स्वगुणं परिहायापद्यते विकृतिम्। तत नश्यन्ति जनपदाः। स्पृस्याभ्यवहार्यदोषात्[3] इति।

प्राणिनां दुःखस्य अवनतेश्च मूलं कारणमधर्मः। सर्वेषामधर्माणामुत्पत्तेः कारणं दुराचारः। ये दुराचारिणः सन्ति ते दुर्बुद्धयः दुःसाहसिकश्च। ते दुष्टाः दुर्जनाः दुष्टात्मानः खलाः पापिनश्च इति नाम्ना जगतीतले प्रसिद्धाः।

---

[1] **शु०य० १७.३९**

[2] **शु०य० १७.४४**

[3] **चरकविज्ञानस्थानम् ३.आ० २१.२२**

आचरणस्य हीनतया मनुष्याणां सद्विचाराः प्रतिभा व्यक्तित्वं च सर्वं विनश्यति। दुराचारिणां मनांसि सदैव कुविचारैः चलायमानानि सन्ति। ते लोके निन्दिताः भवन्ति। अधर्मग्रस्ताः सदैव दुःखभागिनः रोगग्रस्ताः अल्पायुश्च सन्ति।

तेषां दुष्कर्म तमनुवर्तते। तद्बलेन तेषां प्रतिभा प्रगतिः सौन्दर्यं च भस्मसात् भवति। अविवेकिनः पापाचारिणः अधोगतिं लभन्ते। एतादृश्यां व्यवस्थायां राजा चतुरो वर्णान् धर्मे सदाचारे च स्थापयेत्। तेषु अपचरत्सु दण्डं धारयेत्।

सुविज्ञानं चिकितेषु सच्च सच्च वचसी पस्पृधाते। तयोर्यत्सत्यं यतरदृजीयस्तद्वित्सोमोऽवति हन्त्यासन्। पापिष्ठजनरहितं राष्ट्रमपि दिदृक्षोर्दण्डप्रियस्य सुप्रजस्य राज्ञः कर्तव्यमिदं सुनिश्चितं यदसौ शासनादेशपालकान् राष्ट्राभ्युदयसमर्पितमनोवचने हितार्थप्राणान् यज्ञादिश्रेष्ठकर्मव्यापृतान् सत्पुरुषान् पुरस्कुर्यात्। दुष्टेभ्यस्तु सूर्य इव तेजस्वी भूत्वा दण्डं दद्यात्। वेदे स्थाने स्थाने दण्डव्यवस्थाविवक्षायां विराजन्ते ते मन्त्राः।

ये प्रकृष्टगुणा सम्पन्नाः राजानो न्यायाधीशा दण्डाधिकारिणो वा पदे पदे विबोधिताः। समाधिमास्थाय याथातथ्यं मन्त्रार्थानां साक्षात्कर्त्रा वेदभाष्यकारेण महीधरेण वेदानां सर्वविद्याबीजाधिष्ठानत्वमङ्गीकुर्वता स्ववेदभाष्ये ये ये शब्दाः न्यायाधीशपक्षे व्याख्याकृताः। त एव वैदिकदण्डप्रक्रियान्वेषणपराणां साहाय्यमाचरन्ति।

**मापो मौषधीर्हिंꣳसीर्धाम्नो धाम्नो राजँस्ततो वरुण नो मुञ्च।**
**यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च॥**[१]

---

[१] **शु०य० ६.२२**

हे राजन् वरुण यस्मात् यस्मात् त्वदीयपाशसमन्वितात् स्थानात् वयं विभेमः तस्मात् तस्मात् स्थानात् अस्मान् मुञ्च। वेदस्मृतिलोकवाक्यानि अघ्न्या अहन्तव्या कथयन्ति तद्विषये यत् एनं मया कृतं तस्मात् त्वं मोचय। अत्र मन्त्रे वरुणः राजा वर्तते। वयं पापकर्तारः तस्मात् पापात् अस्मान् मोचय। अत्र वरुणः राजा न्यायाधीशश्च भवति।

**शन्नो मित्रः शँवरुणः शन्नो भवत्वर्यमा।**
**शन्न इन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः।।**[१]

अर्यमा यमः वर्तते यम्यते नियम्यते इति यमः। पापिनः दण्डयति अत एव अर्यमा न्यायाधीशः। एवं न्यायपक्षाक्षिप्तार्थान्वितानां शब्दानामवबोधनेन सहजतया वेदानां दण्डप्रक्रिया विबुधबोधगम्यासिद्धापराधानां बहुविधापराधकारिणां यथापराधदण्डानां दण्डविधानव्याख्यानात् प्राक् खल्वेतद् विचारयोग्यमस्ति, यद्येवं करकलितदण्डाधिकाराः न्यायाधीशाः न्यायकरणव्यापृतमतयः सुमतयः सुमतिना नृपतिना न्यायकर्मणि नियुक्ता भवन्ति।

ते कैस्तैर्गुणैर्विभूषिता भवेयुर्यल्लोके दण्डान् दण्डयतो लब्धकीर्तयो भवन्तु। यद्यपि वेदे विवृततया व्याख्यातेषु बहुष्वपि न्यायाधीशगुणेषु प्रथमतमो अयं गुणो वर्तते यत् दण्डाधिकारिणामशिथिलदण्डेन सत्यान्वेषकेण च भाव्यम्।

यतो हि तस्य पुरस्तात् सत्यासत्यवृत्तवन्तावुभावपि पुरुषौ विवदमानौ वर्तेते। तत्र सत्यं निगूढं परीक्ष्य निर्दोषमभिरक्षेत् सदोषं तु यथामतमभिदण्डयेत्। यथा वेदे स्फुटमुपलभ्यन्ते मन्त्राः-

**दृष्ट्वा रूपे व्याकरोत्सत्यानृते प्रजापतिः।**
**अश्रद्धामनृतेऽदधाच्छ्रद्धाꣳ सत्ये प्रजापतिः।।**[१]

---

[१] **शु०य० ३६.९**

प्रजापतिः मूर्तिमन्तो सत्यानृतौ दृष्ट्वा व्याकरोत्। इदं सत्यं रूपमिदं सत्यरूपं पृथक् पृथक् कृतवान्। अनृते अश्रद्धां नास्तिक्यं स्थापयत्। अनृतस्याश्रद्धानिमित्तत्वात् सत्ये श्रद्धा आस्तिक्यं स्थापयत्। श्रद्धा आस्तिक्यबुद्धिः।

अत्र प्रजापतिः न्यायाधिकारी वर्तते। तस्य श्रद्धाया आस्तिक्यस्य अश्रद्धायाः नास्तिक्यस्य च निर्णयो दृश्यते। पापिष्ठजनरहितं राष्ट्रमभिदिदृक्षोद्रण्डप्रियस्य सुप्रजायाः राज्ञः कर्तव्यमिदं सुनिश्चितं भवति, यदसौ पालकान् राष्ट्राभ्युदयसमर्पितमनोवचनेन हितार्थं प्राणान् यज्ञादिश्रेष्ठकर्मव्यापृतान् सत्पुरुषान् पुरस्कुर्यात्। दुष्टांस्तु सूर्यमिव तेजस्वी भूत्वा पृथिवीव धृतिमान् भूत्वा सदसद्विवेकपरिवृढो न्यायनिष्ठो बलिष्ठश्च सन् निराकुर्याददतितराम्।

**सुप्रजाः प्रजाः प्रजनयन् परीह्यभि रायस्पोषेण यजमानम्। सञ्जग्मानो दिवा पृथिव्या मन्थी मन्थिशोचिषा निरस्तो मर्को मन्थिनोऽधिष्ठानमसि।।**[2]

लोके ये पापिष्ठाभृशमुत्पातमभिवर्धयन्तो जनानां प्राणेषु प्रहरन्ति जीविकामपहरन्ति पुरुषं विरूपयन्ति तेषामसतां बधायाग्निरूपो नृपतिरभ्यर्थयतेऽनुदिनं प्राणरक्षार्थमागतेराभिजात्यवर्गैः।

केचन दुरभिसन्धानदक्षाः दम्भोलिघटितहृदया निद्रयाः कस्यचिदपि सज्जनस्य विषये मिथ्यारोपं परिकल्प्य येन मिथ्यारोपेण तमाच्छाद्य दण्डयितुमीहन्ते तदा सदसद्वृत्तयः सुवृत्तो नृपतिरिन्द्र इव पाकशासनः सन् मिथ्यारोपनिपीडितं सज्जनमवति। मिथ्यारोपकर्तरि सतां द्वेष्टारं मुष्टिगतबलमिवापगतसत्त्वं दुष्टं तु निहन्ति। एतेन मिथ्यावादिना

---

[1] **शु०य० १९.७७**

[2] **शु०य० ७.१८**

दुराचारपरिकल्पकानां कृते मृत्युदण्डव्यवस्था देशत्यागव्यवस्था वा विज्ञाता भवति।

**अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः।**
**दुश्च्यवनः पृतनाषाडयुध्योऽस्माकꣳ सेना अवतु प्र युत्सु॥**[१]

ऋजुमार्गगामिनामतिसन्धातारं निरीहाणां हन्तारं सर्वैः सह शत्रुवदाचरन्तं कुत्सिदाचारं दुर्जनं राजप्रेरिताः प्रबुद्धारः प्रणिधयः सुगुप्तादपि स्थानादाहृत्य अग्निरूपधारिणो न्यायकारिणः राज्ञो दण्डद्रष्ट्रायां निरस्यन्ति यथोचिताचाराय।

**बृहस्पते परि दीया रथेन रक्षोहामित्राँ२ अपबाधमानः।**
**प्रभञ्जन्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम्॥**[२]

ये जनाः जनसम्पदं चोरयन्ति, नाशयन्ति, हिंसां वा कुर्वन्ति तानपि राजा भृशं दण्डयति। पिशाचवृत्तिमाकलय्य प्रवर्तमानान् मांसभक्षिणो दुर्जनान् सर्वत्र विनियुक्तानां गुप्तचराणां चक्षुषा विलोक्य न्यायपालो दण्डाधीशो जनाधिपस्तान् मृत्युदण्डेन दण्डयेत् सर्वस्वमपहृत्य वा निर्वासयेद्वा।

**अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि।**
**अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम्॥**[३]

राज्ञो दण्डव्यवस्था न्यायव्यवस्था वा न केवलं नगरे ग्रामे वा प्रभावं जनयति अपि तु राष्ट्रे समन्तात्प्रभावमुद्भावयति। न्यायनिष्ठदण्डव्यवस्थायां द्वेषमाविष्कुर्वन् कश्चिदपि राष्ट्रद्रोही न भवति दण्डपाशविमुक्तः। यदा कश्चित् दण्डाधिकारी अपराधं कर्तुं दण्डं

---

[१] **शु०य० १७.३९**

[२] **शु०य० १७.३६**

[३] **शु०य० १७.४४**

विनिश्चित्य तं दण्डयितुं दण्डदात्रे समर्पयति तदा दण्डदानात् प्राग् दण्डस्य पित्रोर्नामपि श्राव्यते। अद्यत्वे केवलं अभियुक्तस्य पितुर्नाम तेन सहोच्चार्यते।

परं वेदे त्वस्योभयोरपि नामग्रहणव्यवस्था विलोक्यते। अपराधी कस्मिन् वंशे जातः, पूर्वजाश्च तस्य के, धारापदवाच्योऽपराधप्रकारश्च कः कः खलु निश्चितो दण्डः दण्डदाता च क इति सर्वमुल्लिखितं भवेत्।

असत्यवादीनां कृते वेदे महती दण्डव्यवस्था कृता विद्यते। सत्यस्वरूपान् जनान् निर्वस्त्रान् विधाय समेषां पुरस्तात् असीमितभूभागे निपात्योदरभागेन दूरं विकर्षयति। मध्ये मध्ये च पृष्ठभागे दृढं प्रहरन्ति दण्डदातारः। ये जनाः निजं दुरभिलषितं पूरयितुं पवित्रं जनमपवित्रं कुर्वन्ति निन्दन्ति तन्नाशाय वा षड्यन्त्रं कुर्वन्ति तान् स्वार्थान्धान् शान्तचित्तो धर्माधिकारी कठोरदण्डरूपेण मृत्युदण्डम् आवृतद्वारे कारावासे वा निक्षिपेत्।

केचन राष्ट्रद्रोहिणो जनाः एकान्ते निवासं विधाय प्रच्छन्नतया स्थाने स्थाने राजदूर्गे वा मृत्युकरान् रोगानुत्पादयन्ति विविधैर्दूषणोपायैः। शुद्धमपि स्थानं संदूष्य विकृतं कुर्वन्ति। एवं विधा जनाः राज्ञा दण्डनीयाः।

वर्तमानकाले प्रायशो अधर्मवृत्या भिक्षां चरन्ति। कुकृत्यं कुर्वाणाश्चेतस्ततः पर्यटन्तः सर्वत्र दूषितभावान् प्रसारयन्ति। अकर्मण्याश्च भूत्वा दस्यव इव दृश्यन्ते। एवं विधानां वेदविरुद्धाचरणानां विकर्मिणां विनाशस्य संकेतो वेदे दृश्यते। यथा–

**अवसृष्टा परापत शरव्ये ब्रह्मसꣳ शिते॥**
**गच्छामित्रान् प्रपद्यस्व मामीषां कंचनोच्छिषः॥**[1]

ये दुर्जनाः राजानः अन्नजलादिव्यवस्थां आत्मवशीकृत्य जनानां गवादिपशून् हठाद् आहृत्य निर्बलान् पीडितान् धनहीनान् पुरुषान् स्वदासान् मत्वा सकलान् विकलयन्ति दासप्रथां प्रथयन्ति हरन्ति च पुंसां जन्मसिद्धाधिकारान् एवं विधास्ते परजनशोषणकर्तारः निर्दयभूताः राजानः सन्ति। तेषां कृतेऽपि दण्डव्यवस्था करणीया, तादृशी दण्डव्यवस्था यमराजेन कृता इति श्रुतिः श्रूयते।

ये पुरुषा ऋजुवृत्तिमपाकृत्य षड्यन्त्रमाकलय्य रहसि जनवधं विधाय सन्त्रासमुत्पादयन्ति तेषामातंककारीणां कृते हस्तभंगस्य पादभंगस्य द्वयोर्भङ्गस्य वा दण्डव्यवस्था वेदानुमोदिता विद्यते।

**प्रपादीन यथायति प्रहस्तौ न यथाशिधयत्। यो मलिम्लुरूपायति ससंपिष्टो अपायति। अपायति स्वपायति शुष्के स्थाणाय पायति।**[2]

शासनस्य संचालनाय संरक्षणाय समृद्धीनां संवर्धनाय च सुघटितं सुस्थापितुं प्रतिभासम्पन्नं कुशलं दौत्यकर्म आवश्यकीयं यजुर्वेदे दृश्यते। यथा–

**सर्मापणिसंवादः**

**कुक्कुटोऽसि मधुजिह्व इषमूर्जमावद त्वया वयꣳसंघातꣳसंघातं जेष्म वर्षवृद्धमसि प्रति त्वा वर्षवृद्धं वेत्तु परापूतꣳ रक्षः परापूता अरातयोपहतꣳ रक्षो वायुर्वो विविनक्तु देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना॥**[3]

---

[1] शु०य० १७.४५

[2] अथर्व० १९.४९.१०

[3] शु०य० १.१६

मनो राज्ञः एको वृषभ आसीत्तस्मिन्नसुरघ्नी वाक् स्थिता तस्मिन् शब्दं करोति तं श्रुत्वैव असुराः म्रियन्ते। ततः किलात्ताकुलीनामानावसुरयाजकौ मनुं गत्वा तेनैव ऋषभेणायाजयतामृषभे हते सा वाङ् मनो जायां प्रविष्टा। तौ पुनस्तयापि मनुमयाजयतां ततः सा वाग्यज्ञपात्राणि प्रविष्टेत्यसुरपराभवाय तद् वाक् प्रकटनार्थं शम्यया दृषदुपलहननमिति।

प्रजारक्षणं मुख्यं कर्म नृपाणां वर्तते। नृपाणां दण्डनीतेः प्रयोगः दुष्टानां हृदये भयोत्पादनार्थं भवति। अपराधविहिते सति दण्डप्रयोगः आवश्यकः। दण्डविषये नृपाणां स्वेच्छाचारिता वर्जनीया निन्दनीया च वर्तते। बाह्यशक्तिभ्यः राष्ट्रं सुरक्षितं भवेत् एतदर्थं सततं प्रयत्नशीलं भवितव्यम्। राज्यव्यवस्थायां सैन्यसंचालनमपि नृपाणां मुख्यं कर्म दृश्यते। शत्रूणां दमनमपि नृपैः कर्तव्यम्। यथा–

**महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः। दुराधर्षं वरुणस्य।।**[१]

प्रजाधीनो यदा नृपः नृपाधीना च प्रजा भवेत्तर्हि राष्ट्रं कुशलं स्यादन्यथा स्वेच्छाचारी नृपः राष्ट्रं विनाशयेत्। स्वेच्छाचारिणो प्रजा अपि राष्ट्रं पातयेयुः।। यथा–

**यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरतः सह।**
**तँल्लोकं पुण्यं प्रज्ञेषं यत्र देवाः सहाग्निना।।**[२]

यत्र समीचीना न्यायव्यवस्था दण्डव्यवस्था च नास्ति तत्र राष्ट्रे विप्लवो भवति। मत्स्यन्यायं सर्वत्र दृश्यते क्वचित् हाहाकारः क्वचिदार्तनादः क्वचित् बलात्कारश्च दृश्यते।

---

[१] **शु०य० ३.३१**

[२] **शु०य० २०.२५**

**राष्ट्रमेव विश्याहन्ति तस्माद्राष्ट्री विशं घातुकः। विशमेव राष्ट्रायाद्यां करोति तस्माद्राष्ट्रो विशमत्ति न पुष्टं पशुं मन्यते इति।।**[१]

कल्याणकारिणः राज्यस्यादर्शरूपवर्णनमत्र यजुर्वेदे दृश्यते। वैदिकव्यवस्थायामनेकतायामेकतायाः दृष्टिः अवलोक्यते। आधुनिकव्यवस्थायामेकतायामनेकता दृश्यते। वैदिकदृष्टिकोणे प्रगतेरर्थः मानवानामात्मिकशान्तिः।

**द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि।।**[२]

**असम्मोहाय मर्त्यानामर्थसंरक्षणाय च।**
**मर्यादा स्थापिता लोके दण्डसंज्ञा विशाम्पते।।**[३]

चाणक्यस्य मतेन आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च एता चतस्रः विद्याः सन्ति। परन्तु दण्डनीतिरेका विद्येत्यौशनसः। दण्डनीतिं विना लोकव्यवहारः समीचीनः स्यात् इति असम्भवः। दण्डनीतिरेव सर्वस्य लोकव्यवहारस्य आधार इति।

**यस्माददान्तान्नमयति अशिष्टान्दण्डयत्यपि।**
**दमनाद्दण्डनाच्चैव तस्मात् दण्डं विदुर्बुधाः।।**[४]

साम्प्रतं राज्यशासनं महत् त्रुटिपूर्णमस्ति। सर्वत्र दुष्टानां प्रभुत्वं दृश्यते। चरित्रहीनतायाः पराकाष्ठा वर्तते। लोलुपाः मत्सराः कुटिलाः चौरा छद्मरूपेण यत्र तत्र स्वयं नायका इति मत्वा भ्रमन्ति। अस्यैव

---

[१] **शत०का० १३. प्रा० २ प्रा 3 क० ७.८**

[२] **शु०य० ३६.१७**

[३] **महाभारतम्, शा०प० १५.१०**

[४] **महाभारतम्, शा०प० १५.१०**

फलं हाहाकार इति। यदा दण्डस्य सम्यग्व्यवस्था भविष्यति तदैव भारते रामराज्यमिति।

**दण्डनीत्या यदा राजा सम्यक् कार्त्स्न्येन वर्तते तदा कृतयुगं कालः श्रेष्ठः प्रवर्तते। अवध्यो वै ब्राह्मणस्सर्वापराधेषु ब्राह्मणस्य ब्रह्महत्या गुरुतल्पगमनस्वर्णस्तेयसुरापानेषु तप्तेनाऽऽयसा ललाटेऽङ्कयित्वा विषयान्निधर्मनम्॥**[१] **तेषामेव तुल्यापकृष्टवधे यथाबलमनुरूपान् दण्डान् प्रकल्पयेत्॥**[२]

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे दण्डनीतिः'** नाम त्रयस्त्रिंशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

[१] **बौधा०सू० १.१०.१८.१७-१८**

[२] **बौधा०सू० १.१०.१८.२०**

# अथ चतुस्त्रिंशोऽध्यायः

# यजुर्वेदे राजनीतिः

**राज्ञि धर्मिणि धर्मिष्ठा पापे पापाः खले खलाः।**
**राजानमनुवर्तन्ते यथा राजा तथा प्रजाः।।**[1]

यदि राजा धर्मात्मा तर्हि प्रजा अपि धर्मशीलाः, राजा पापाचारी तर्हि प्रजा अपि पापाचारिण्यः। राजा यदि खलः तर्हि प्रजा अपि खलाः। प्रजाः राजानमनुकुर्वन्ति। राज्ञः आचरणस्य प्रभावः प्रजाजनेषु पतति। एतद्ध्रुवसत्यं यत् राजानमनुर्वन्ति प्रजाजनाः।

**धर्माधर्मप्रवृत्तौ तु नृप एव हि कारणम्।।**[2]

पञ्चाल्यदेशे प्रायः द्विजवरा एव निवसन्ति। काम्पील्यराजधान्यां महर्षिः आत्रेयः ग्रीष्मान्तकाले शिष्येण सह वनभूमौ गङ्गासमीपे विचरन् स्वशिष्यमग्निवेशं प्राह– साम्प्रतं नक्षत्राणि ग्रहगणाः सूर्यचन्द्रौ अग्नयः सर्वाः दिशः विकृतभावमापद्यन्ते। एतेषां लक्षणानि ऋतुषु विकृतभावमुत्पाद्यन्ते, विरसा पृथिवी तर्हि न हि भविष्यति फलानां परिपाकः सुष्ठुतरः। अस्यैव प्रभावः जनेषु रोगाः व्याधीनामुन्नतिः यत्र तत्र सर्वत्र आतंकः जनपदः विध्वंसमनुगच्छति। अग्निवेश उवाच ज्ञातुं मम जिज्ञासा वर्तते। यत् एकेनैव रोगेन भिन्नानां भिन्नानां प्रकृतीनां भिन्नानां भिन्नानामाहाराणां भिन्नानां भिन्नानां शरीराणां बलानां रुचीनां

---

[1] **महा०भा०शा०पर्वपुरुषार्थचतुष्टयम् पृष्ठ० ११५.१**

[2] **शुक्रनीतिः १.१८**

भिन्नानां भिन्नानामवस्थानां नानाप्रकारस्थप्रकृतीनां स्वभावानां पुरुषाणामेकैवकाले विनाशः भवितुं कथं शक्यते।

महर्षिः जगाद-मनुष्येषु जीवेषु च प्रकृतीनां समानता नास्ति, नास्ति च व्यवहाराणां समानता, परन्तु एतेषु विकृतेषु प्राणिषु समानकाले एव समानाः व्याधयः उत्पन्नाः, ते च सर्वत्र प्रसरन्ति प्राणिनो विनाशयन्ति च। प्रकृतेर्विनाशलीलातः त्रातुं राजतन्त्रस्योदयः राष्ट्ररक्षणाय या राज्ञां नीतिः सैव राजनीतिः। यया राष्ट्र संवर्द्धते उन्नतिं विकासञ्च लभन्ते सा नीति एव राजनीतिः।

**अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्।**
**युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नम उक्तिं विधेम।।**[1]

**अभीमं महिमा दिवं विप्रो बभूव सप्रथाः। उत श्रवसा पृथिवीꣳ सꣳ सीदस्व महाँ२।। असि रोचस्व देववीतमः। वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम्।।**[2]

शासकानामेवापराधैः लक्ष्मीवन्तः पुरुषा अपि सच्छिक्षाभावेन अन्यायेन द्रव्योपार्जनं कुर्वन्ति। साम्प्रतमुपार्जितानां द्रव्याणामेव नहि भवति समुचितोपयोगः, व्यापारेषु अपि नास्ति सत्यव्यवहारः। नास्ति समुचितव्यवहारः स्वधर्मपालनस्य, ततः तेषां गणना पापीनां श्रेणीषु। ते जनाः पापिनः अधर्मात्मानः इति संज्ञां लभन्ते। नास्तिका भूत्वा ते परमात्मानं निन्दन्ति, शास्त्रमपि निन्दन्ति। नास्ति धर्मः, नास्तीश्वर इति मिथ्याप्रचारं कुर्वन्ति। राज्ञः क्षुद्रतया नास्ति समुचितदण्डस्य प्रयोगः। कलिकालस्य प्रजाः अन्नहीनाः धनहीनाः सत्यहीनाश्च जायन्ते यतः राजा एव धर्मस्य अधर्मस्य न्यायस्य च शिक्षां दातुं समर्थः। राजा एव युगस्य प्रवर्तकः। समाजे अनाचारस्य दुराचारस्य भ्रष्टाचारस्य च या

[1] **शु०य० ४०.१६**

[2] **शु०य० ३८.१७**

प्रवृत्तिर्दृश्यते तत्र नास्ति दोषः युगस्य नास्ति दोषः प्रजाजनस्य तत्र राजनीतिः भ्रष्टाचार एव कारणम्। प्रजाजनस्य स्वभावः यथा राज्ञे रोचते तदेव करणीयः।

**अधर्मो धर्मतां याति स्वामी चेत् धार्मिको भवेत्।**
**स्वामिना गुणदोषाभ्यां भृत्याः स्युर्नात्र संशयः॥**[१]

**वाजस्य नु प्रसवे मातरं महीमदितिन्नाम वचसा करामहे। यस्यामिदँ विश्वं भुवनमाविवेश तस्यान्नो देवः सविता धर्म साविषत्॥**[२]

राज्ञः क्षुद्रतया बुद्धिदोषैः देशनगरनिगमजनपदानामधिकारिणः धर्मस्यातिक्रमणं कुर्वन्तः प्रजाजनानधर्मे पातयन्ति तदा तेषामाश्रिताः उपाश्रिताः पुरग्रामनगराणां निवासिनः तथा व्यवहारोपजीविनः जनाः अधर्ममधिकमधिकं वर्धयन्ति। तदा अधर्मः धर्मं लोपयति नाशयति च। धर्महीनान् जनान् देवा अपि त्यजन्ति गर्ते पातयन्ति च। ऋतुषु एवं परिवर्तनं जायते, यत्र मेघो न वर्षति, वायुः विकृतं प्रवहति, पृथिवी अन्नहीना जलहीना दृश्यते। ओषधयो विलुप्ताः भवन्ति।

भूतप्रेतरक्षोगणाः जनपदान् विध्वंसयन्ति तत्र मूलकारणमधर्मः। जनानामभिशापैः उत्पन्नेषु जनसंहारेषु अधर्ममेव कारणम्। लुप्तधर्माः जनाः मातृपितृ गुरुवृद्धऋषिसाधुपूज्यपुरुषाणामनादरमपमानञ्च कुर्वन्ति। तदा ते अभिशापैः तान् पापिनः अभिशप्तान् कुर्वन्ति। अशुभानामुत्पत्तिः दुराचारादधर्माच्च जायते। आदिकाले धर्मप्रधाने सत्ययुगे मानवाः देवाः सहशाः बलशालिनः अतिनिर्मलाः प्रभावशलिनश्चासन्। ते देवानां ऋषीणां धर्माणां च परिपुष्ट्यै यज्ञयागादिसत्कर्माणि अकुर्वन् ततः तेषां शरीराणि वज्रसदृशानि सुस्थिराणि प्रसन्नवर्णानि मनोहराणि वायोरिव बलशालिनः वेगवन्तः पराक्रमशीलाश्चासन्। अनुरूपप्रमाणा आकृतयः

---

[१] **म०भा० ८.३३**

[२] **शु०य० १८.३०**

बुद्धिशालिनश्चाभवन्। ते देवैः पितरैः ऋषिभिश्च सह प्रत्यक्षं परस्परं वदन्ति स्म। ते सत्यार्जवदयादानदमनियमतपोपव्रतब्रह्मचर्यपरायणाश्चासन्। रागद्वेषलोभमोहक्रोधभयशोकमानरोगनिद्रातन्द्राश्रमकल्मषपरिग्रहप्रभृतिभिः दोषैः विवर्जिताः असीमितायुष्मन्तश्चासन्।

एतादृशानामुदारहृदयानां दयादाक्षिण्यादिगुणयुक्तानां सदाचारसम्पन्नानां महापुरुषाणां कृते भूमौ अचिन्त्यरसवीर्यपरिपाकप्रभावगुणसम्पन्नसुस्वादवन्नानि च जायन्ते। यतः तादृशसत्त्वसम्पन्ने सत्ययुगे पृथिवीयं सर्वगुणैः परिपूर्णा आसीदिति अवलोक्यते।

**प्रतूर्वन्नेह्यवक्रामन्नशस्ती रुद्रस्य गाणपत्यं मयोभूरेहिं।**
**उर्वन्तरिक्षं वीहि स्वस्तिगव्यूतिरभयानि कृण्वन्पूष्णा सयुजा सह।।**[१]

**आगत्य वाज्यद्ध्वानꣳ सर्वा मृधो विधूनुते।**
**अग्निꣳ सधस्ते महति चक्षुषा निचिकीषते।।**[२]

**द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षꣳ समुद्रो योनिः।**
**विख्याय चक्षुषा त्वमभितिष्ठ पृतन्यतः।।**[३]

**आ त्वा जिघर्मि मनसा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा।**
**पृथुन्तिरश्चा वयसा बृहन्तँव्यचिष्ठमन्नै रभसन्दृशानम्।।**[४]

**राजधर्मः** –

यथा भगवान् विश्वकल्याणार्थं धर्मस्य ह्रासे जातेऽधर्मस्य च उत्थाने सति धर्मसंस्थापनाय युगे युगे पृथिव्यामवतारं गृहीत्वा अवतरति

---

[१] **शु०य० ११.१५**

[२] **शु०य० ११.१८**

[३] **शु०य० ११.२०**

[४] **शु०य० ११.२३**

तथैव धर्मस्य रक्षार्थं अधर्मस्य विनाशार्थं दुष्टानां दमनार्थं च प्रत्येकं राष्ट्रे सुशासकस्य अपेक्षा जायते। अतः राजा मुख्यतया धर्मस्य रक्षार्थं देशकालकर्मशक्तीनां चानुसारेण बहूनि रूपाणि धारयति नानाप्रकारकाणां नीतीनामनुसरणं करोति।

राजनीतिदृष्ट्या सर्वेषु ग्रन्थेषु शासनस्य मुख्योद्देश्यं रक्षणमेव। यथा महाभारते लिखितमस्ति– ब्रह्मदेवः सर्वेषां प्राणीनां सुखसमृद्ध्यर्थमेव धर्मस्य सृष्टिं चकार। अतः प्रत्येकं शासकस्य कर्तव्यमस्ति यत् प्रजाजनेषु अनुग्रहार्थं राष्ट्रे धर्मस्य प्रवर्तनं कुर्यात्। अतः राजनीतौ सामान्यमनुष्यवत् राज्ञ यथेच्छाचरणं निषिद्धं वर्तते। राजा यदि स्वेच्छाचारी वर्तते तर्हि प्रजाजना अपि स्वेच्छाचारिणं भूत्वा विचरन्ति। तस्य परिणामः कन्यानां बालानां चापहरणम्, सर्वत्र मत्स्यन्यायः अनाथानां क्रन्दनं दीनजनानां मारणम्, राष्ट्रीयव्यापारस्य उद्योगस्य च विनाशः। राजनीतिः दुषिता भवति स्म। यथा–

**आजुह्वानः सुप्रतीकः पुरस्तादग्ने स्वँयोनिमासीद साधुया।**
**अस्मिन्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत॥**[१]

राज्ञः स्वार्थानुरक्तवशाद् दण्डव्यवस्थायाः दौर्बल्यादेव कलिकालस्य प्रजाः उच्छृंखलाः भवन्ति।

**उत्तमराजनीतिः** –

**शशाम वृष्ट्यापि विना वनाग्निरासीद् विशेषा फलपुष्पवृद्धिः।**
**ऊनं न सत्वेष्वधिको बबाधे तस्मिन् वनं गोप्तरि गाहमाने॥**[2]

**क्षतात् किल त्रायते इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः।**
**राज्येन किं तद्विपरीतवृत्तेः प्राणैः रूपक्रोशमलीमसैर्वा॥**[१]

---

[१] **शु०य० १७.७३**

[२] **र०स० २ श्लो० १४**

**प्र वो महे मन्दमानायान्धसोऽर्चा विश्वानराय विश्वाभुवे। इन्द्रस्य यस्य सुमखꣳ सहो महि श्रवो नृम्णञ्च रोदसी सपर्यतः॥**[2]

**राजधर्मस्य आत्मा –**

शासकः स्वधर्मपरिपालनाय स्वसुखस्य स्वप्राणस्य चिन्ता मा कुर्यात्, तथाहि – यथा गर्भवती स्त्रीः स्वसुखमचिन्तयन् गर्भस्थं शिशुं चिन्तयति तस्य पुष्ट्यर्थं सुरक्षार्थञ्च निरन्तरं यतते, तद्वद् दयार्द्रहृदयः परदुःखासहिष्णुः शासकोऽपि सकलप्राणिसंरक्षणाय लोकोत्कृष्ट-धर्माचरणाय स्वव्यक्तिगतसुखस्य स्वार्थस्य चापेक्षां परित्यज्य प्रजान् पालयति, प्रजाहितमेव सततं चिन्तयति एष एव राजधर्मस्यात्मा।

राजधर्मेषु अपारशक्तिः विद्यते यथा राज्ञः सद्व्यवहारेण प्रतापेन सुशासनेन च उच्छृंखलाः पापात्मानः दुराचारिणोऽपि जनाः मर्यादायामावद्धाः सन् सत्पथमनुसरन्ति। ये कामक्रोधवशीभूताः उच्छृंखलापि पुरुषाः राज्ञः भयेन पापं परित्यजन्ति धर्मं च पालयन्ति सदाचारं सेवन्ते साधारणजनान् धर्ममुपदिशन्ति। येन जगतः कल्याणमभ्युदयं च भवति।

**विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह।**
**अविद्यया मृत्युन्तीर्त्वा विद्ययामृतमश्नुते॥**[3]

राजशास्त्रे लिखितं वर्तते यत् देशरक्षार्थं सेनायां युद्धरूपयज्ञेषु कुशलानां वीराणां मुख्यो धर्मः एष एव भवति ''देशरक्षार्थं संग्रामेषु प्रविश्य यथाशक्ति युद्धं कृत्वा विरोधिनां शिरांसि विदीर्णानि करणीयानि रक्तानि च तेषां मुखेषु आनेतव्यानि, अयमेव रक्तपातः तेषां कृते सोमपानमिव भवति। अनेन प्रकारेण राजधर्मेषु रणस्थलमश्वमेधयज्ञ इव,

---

[1] **र०स० २ श्लो० ५३**

[2] **शु०य० ३३.२३**

[3] **शु०य० ४०.१४**

तेषु स्वप्राणानां बलिदानं कुर्वन्तं वीरं यज्ञपशुः इति लोकाः वदन्ति। सहस्रवर्षपर्यन्तं कठोरतपसां याः गतीः सन्यासिनः लभन्ते ताः गतीः रणरूपाश्वमेधे प्राणत्यागं कुर्वन्तः वीराः लभन्ते। यथा–

**तपस्विभिर्या सुचिरेण लभ्यते प्रयत्नतः सत्रिभिरिज्यया च या।**
**व्रजन्ति तामाशु गतिं मनस्विनो रणाश्वमेधे पशुतामुपागता॥**[१]

एतत्सर्वं प्रत्यक्षं भवति। सर्वविधैः सुखैः ओतप्रोतः राजधर्मः प्राणिमात्रं सर्वविषयकं सुखं ददाति, सर्वं दुःखञ्च विनाशयति। एतत्सर्वं स्वयमेव जनाः अनुभवन्ति। नास्ति तस्मिन् छलकपटव्यवहारः। राजधर्मस्यानुष्ठानेनोत्तमादर्शः स्थापितो भवति। निखिले राष्ट्रे श्रद्धा, विश्वासः, सुराज्यम्, सुखसम्पत्तिश्च निश्चयेन गृहे गृहे सर्वत्र आनन्दः, मोदः, प्रमोदश्च समागच्छन्तीति दृश्यते। सर्वत्र समाजे गीतम्, वाद्यम्, नृत्यम्, तोरणपताका उत्तमोत्तमवस्त्राभूषणं महोत्सवं च अवलोक्यते।

दुराचारात् चरित्रस्य हीनता भवति, हीनतया च राष्ट्रस्य महती क्षतिर्भवति दुराचारिणो जनाः अनियन्त्रिताः भवन्ति तेन च लोकमर्यादां राष्ट्रमर्यादां परित्यज्य राष्ट्रस्य सम्पत्तिं विनाश्य राष्ट्रस्य लोकलज्जां विध्वंसयन्ति। अतः राजा दुरचारिषु भ्रष्टाचारिषु राष्ट्रसम्पत्तिविनाशकर्तृषु च वारं वारं पश्यतु, अन्यथा राष्ट्रविप्लवं विखण्डनं च भविष्यति। यदि विरक्तः सन्यासी अपि दुराचारी अनाचारी च भवति चेत्तर्हि तमपि दण्डयेत् नृपः। अन्यथा राष्ट्रं विनश्यति।

राजधर्मः ब्रह्मज्ञानात् श्रेष्ठतमो धर्मो भवति। दुष्टानामत्याचारैः भयभीताः सत्पुरुषाः यदि राज्ञः आदेशेन क्षणमात्रमपि विश्रामं सन्तुष्टिं च प्राप्नुवन्ति तर्हि सः वीरः नृपः स्वर्गजित्तमो भवति। युद्धे आत्मत्यागः सर्वप्राणिषु अनुकम्पा लोकव्यवहारस्य ज्ञानम्, प्रजारक्षणम्, विषादग्रस्तानां दुःखितानां पीडितानाञ्च विश्रामप्रदानं राज्ञो धर्मः राजधर्मो भवति, अतः

---

[१] **श०नी० प्रयु० यु० प्रकरणम्**

राष्ट्रस्य स्वधर्मरक्षणाय संस्कृतेश्च सुरक्षार्थं क्षणभंगुरशरीरस्य बलिदानमपि अश्वमेधसदृशं पुण्यदायकं भवति।

**सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना।**
**तदिन्द्रेण जयत तत्सहध्वँयुधो नर इषु हस्तेन वृष्णा॥**[1]
**स इषुहस्तैः स निषङ्गिभिर्वशी सꣳ स्त्रष्टा स युध इन्द्रो गणेन।**
**सꣳसृष्टजित् सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता॥**[2]

भारतस्य जीवनविधायिनी दृष्टिः अन्तः बाह्यमिति द्वयं प्रति सर्वथा पूर्णा भवति। अस्याः राजनैतिकदृष्टिः पर्याप्तमात्रायां स्वस्था प्रभावसम्पन्ना च वर्तते। दार्शनिकदृष्टिः सर्वव्यापिनी लोकपावनी दिव्या चास्ति। वैदिकाः ऋषयः अभयसंकल्पस्य लोकमंगलस्य च पूर्णतायां मानवजीवनसाधनायाः सार्थकतां मन्यन्ते, तेषामाध्यात्मभावः लोकमंगलस्य साधकः इति विचारः लोकहितकारी च दृश्यते। यथा–

**शन्नो मित्रः शं वरुणः शन्नो भवत्वर्यमा।**
**शन्न इन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः।**
**शन्नो वातः पवताꣳ शन्नस्तपतु सूर्यः।**
**शन्नः कनिक्रदद्देवः पर्जन्यो अभिवर्षतु॥**[3]

राष्ट्रियैश्वर्याणां पूर्णतायै सुरक्षायै च सोमस्य संस्तुतीः श्रुतयः चक्रुः। सोमः वीरेषु समर्थः परमशक्तिशाली अद्भ्यो विजेता तीक्ष्णशस्त्रास्त्रसम्पन्नः अस्त्रशस्त्रसंचालन– कुशलः युद्धेषु असंख्याक्रमणकर्ता स्वधनानामुपभोक्ता च वर्तते। तथा च श्रुतिः –

**सोमः पवते सोमः पवतेऽस्मै ब्रह्मणेस्मै क्षत्रायास्मै सुन्वते यजमानाय पवत इष ऊर्जे पवतेऽद्भ्य ओषधीभ्यः पवते द्यावापृथिवीभ्यां पवते**

---

[1] **शु०य० १७.३४**

[2] **शु०य० १७.३५**

[3] **शु०य० ३६.९-१०**

**सुभूताय पवते विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः॥**[1]

अनेकेषु मन्त्रेषु इन्द्रस्य राजरूपेण संस्तुतिर्विद्यते, तथाहि –

**वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः। यो अस्माँ२॥ अभिदासत्यधरं गमया तमः। उपयामगृहीतोसीन्द्राय त्वा विमृध एष ते योनिरिन्द्राय त्वा विमृधे॥**[2]

सामाजिकेषु जीवनेषु अमङ्गलस्योत्पीडनस्य च उत्पादकाः जनाः राष्ट्रस्य शत्रवः सन्ति। तेषामस्तित्वं राष्ट्रस्य सर्वनाशस्य कारणमिति। अत एव राष्ट्रस्य मङ्गलाय अशुभशक्तेर्निर्दलनमावश्यकम्। द्वेषभावैः परिपूर्णाः राष्ट्रस्य शत्रवः सुमतिहीनाः सर्पा इव विवेकशून्याः भवेयुः। स्वक्रोधेनैव ज्वलन्तस्ते स्वयमेव विनष्टा भवेयुः।

**इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताꣳशर्ध उग्रम्।**
**महामनसां भुवनच्यवानां घोषो देवानाञ्जयतामुदस्थात्॥**[3]

महर्षयः राष्ट्रस्य संवर्धनशीलं नियन्तारमाकर्षयितुं प्रयत्नशीला आसन्। विश्ववैभवं प्राप्तुं शतायुः प्राप्तये च कामयमाना आसन्। छलेन बलेन च अन्योपार्जितानां सम्पत्तीनामुपभोगयितुमुद्यमशीलाः राक्षसाः अपराधिनः आसन्। तेषां दमनायैव सुनृपाणामावश्यकता वर्तते।

**राजनैतिकदृष्ट्या समीक्षणम्** –

राजसूययज्ञो राजकृतयज्ञ इति। अकृतवाजपेययज्ञो नृप अधिकारी आसीत्। एतस्मिन् यागे कस्मिंश्चिदुन्नते मञ्चे आसीनं नृपं राजगुरुरध्वर्युः वाऽभिषेकमकरोत्।–

---

[1] **शु०य० ७.२१**

[2] **शु०य० ८.४४**

[3] **शु०य० १७.४१**

**अभिषेकः –**

**स्थितं प्राञ्चमभिषिञ्चति पुरोहितोऽध्वर्युर्वा पुरस्तात् पालाशेन प्रथमं, पश्चादितरे, द्वितीयेन स्वस्तृतीयेन मित्र्यो राजन्यो वैश्यश्चतुर्थेन 'सोमस्य त्वा द्युम्नेनेति' प्रतिमन्त्रम्॥**[१]

फाल्गुनमासस्य शुक्लपक्षस्य प्रतिपदायां प्रारभतेऽयं यज्ञः। मुख्यरूपेण नवदिवससाधकोऽयं यज्ञ इति। अग्निः विष्णुः वायुः सोम सविता मरुतः इन्द्रः सरस्वती बृहस्पतिः अदितिः वरुणः बृहस्पतिप्रभृतयो देवाऽस्य प्रमुखाः पूज्याः यजनशीलाश्च सन्ति। एतेषां कृपया राष्ट्रमुन्नतिं समृद्धिं च लभते। बहूनां तीर्थानां नदीनां समुद्राणां स्रोतसां च जलेनाभिषेकोऽभवत्। एषां यज्ञानां माध्यमेन नृपः स्वशक्तिं प्रदर्शयति स्म। राजनैतिकशक्तेः सामर्थ्यस्य च प्रदर्शनं दृश्यते स्म। प्राचीनतमे काले भारतवर्षः अनेकेषु मण्डलेषु राज्येषु च विभक्त आसीत्। ते मण्डलाधीशाः नृपतयश्च परस्परं कलहेन सह निवसन्ति स्म। नास्ति तेषां मध्ये स्वाभाविकं सौहार्दम्। सबलो नृपः अन्यं समीपस्थं नृपं पराजितं विधाय तस्य निखिलां सम्पत्तिं अविवाहितां कन्यां च अपहरति स्म। अत्र वाजपेयराजसूयाश्वमेधप्रभृतियज्ञेषु स्वशक्तिं प्रदर्श्य प्रबलराजनैतिकलाभं लभते स्म। यथा–

**बृहस्पते परिदीया रथेन रक्षोहा मित्राँ२॥ अपबाधमानः।**
**प्रभञ्जन् सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम्॥**[२]

एतेषां यज्ञानां सर्वाधिकं महत्त्वं राजनैतिकमासीत्। राष्ट्रस्य लाभाय एते यज्ञा आसन्। यज्ञकर्ता राजा जनधनवैभवसैन्यशक्तिभिश्च परिपूर्ण आसीत्। एतेषां प्रदर्शनं यज्ञेनाभवत्। यज्ञसमाप्त्यनन्तरं नृपः सम्राट् इति उपाधिना विभूषितोऽभवत्। ततो न कोऽपि समीपस्य

---

[१] **का०श्रौ०सू० १५.५.३०**

[२] **शु०य० १७.३६**

शत्रुराजाऽऽक्रमणाय समर्थो भवति स्म। राजनैतिकशक्तिप्रभावेण सो नृपः विश्वविजेताऽभवत्।

**उरोर्वरीयो वरुणस्ते कृणोतु जयन्तन्त्वानुदेवा मदन्तु॥**[1]

राज्ञः प्रजास्नेहः, प्रजानां राज्ञां प्रति राजभक्तिः, राज्ञः राष्ट्रं प्रति निष्ठा पवित्रता आस्तिकतायाश्च प्रदर्शनमभवत्। राज्ञः प्रभावः प्रजाजनेषु जायते स्म। प्रजाऽपि नृपसदृशमाचरणम् कर्म परमार्थं पुरुषार्थं लोकहितभावनाञ्च प्रदर्शयति सम। मानवजीवनं भव्यमुदात्तमुन्नतिशीलं चासीत्।

**ज्येष्ठ्यञ्च म आधिपत्यञ्च मे मन्युश्च मे भामश्च मेमश्चमेम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धञ्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम्॥**[2]

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे राजनीतिः'** नाम चतुस्त्रिंशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

---

[1] **शु०य० १७.४९**

[2] **शु०य०सं० १८.४**

# अथ पञ्चत्रिंशोऽध्यायः

# वैश्विकदृष्ट्या यजुर्वेदे नीतीनां वैदिकाख्यानानां च समीक्षणम्

यस्मादभ्युदयो भवति स एव धर्मः, अभ्युदयप्राप्तेः यत्साधनं भवति सा एव नीतिरिति। यजुर्वेदे प्रतिपादिता नीतिः सूत्रजीवनस्य व्यापकस्वरूपं प्रकटयति। धार्मिकार्थिकप्राशासनिकराजनीतिक-विश्वजनीनादयः विषयाः तत्रैव समाहिताः सन्ति। मनुष्येण स्वपरकीययोः, सजातीयविजातीययोः, मित्रशत्र्वोः, परिचितापरिचितयोः केन प्रकारेण व्यवहारः कर्तव्यः, एतादृशी शिक्षा वेदप्रतिपादितनीतिसूत्रादेव प्राप्ता भवति। विश्वशान्तेः, विश्वबन्धुत्वस्य विश्वसंस्कृतेश्चोन्नयनस्य च नीतिः वेदे वर्णिता अस्ति। अस्मिन्नध्याये परिवारः, समाजः, राष्ट्रः, श्रीवृद्धिः, जनकल्याणम्, सङ्गठनम्, अभ्युदयः विश्वबन्धुत्वमित्यादियजुर्वेदोक्तनीतिसूत्राणां प्रतिपादनं विश्वकल्याणार्थं वैश्विकदृष्ट्या विहितम्। समाजराष्ट्रविश्वादीनाभ्युदयार्थं सत्यस्य प्रतिष्ठा अनिवार्या, सत्यं यदि आधारशिलारूपेण प्रतिष्ठापितं क्रियते तदैव राष्ट्रस्य कल्याणं भवति। भगवती श्रुतिः कथयति –

**अग्ने व्रतपते व्रतञ्चरिष्यामि तच्छकेयन्तन्मे राध्यताम्। इदमहमनृतात्सत्यमुपैमि॥**[१]

---

[१] **शु०य० १.५**

अभिप्रायस्तु – यज्ञस्य साफल्यं तदैव भवति यदा वयमसत्यस्य मार्गं त्यक्त्वा सत्यस्य मार्गं स्वीकुर्मः। सत्यवचनं मनुष्यस्य सर्वतः रक्षणं करोति[1]। यजुर्वेदस्य अनेकेषु मन्त्रेषु धनवैभवप्राप्तये प्रार्थना कृता वर्तते। तद्यथा यजुर्वेदस्य श्रुतिः कथयति –

**व्वाजश्च मे प्प्रसवश्च मे प्प्रयतिश्च मे प्प्रसितिश्च मे धीतिश्च्च मे क्क्रतुश्च्च मे स्वरश्च्च मे श्श्लोकश्च्च मे श्श्रवश्च्च मे श्श्रुतिश्च्च मे ज्योतिश्च्च मे स्वश्च्च मे यज्ञेनकल्पन्ताम्**[2] इति।

शुक्लयजुर्वेदसंहितान्तर्गतरुद्राष्टाध्याय्यां भगवतः रुद्रस्य विशदं वर्णनं निहितमस्ति। शिवभक्तः रुद्राष्टाध्याय्याः मन्त्रपाठेन साकं जलेन, दुग्धेन, पञ्चामृतेन, इक्षुरसेन, नारिकेलरसेन, गङ्गाजलादिना भगवतः शिवलिङ्गस्य अभिषेकं करोति। रुद्राष्टाध्याय्याः अष्टमाध्यायस्य ऋषिः देवः स्वयमेव, देवता अग्निः। अत एव एषः अध्यायः अग्निदैवत्यः, यज्ञदैवत्यो वा स्वीक्रियते। प्रत्येकमन्त्रस्यान्तिमे – **यज्ञेन कल्पन्ताम्** इति पदमायाति।

यज्ञस्य साधनरूपेण यानि यानि वस्तूनि आवश्यकानि भवन्ति तानि सर्वाणि यज्ञफलादेव प्राप्तानि भवन्ति। एतानि वस्तूनि यज्ञार्थं, जनसेवार्थं, परोपकारार्थं विश्वकल्याणार्थञ्चोपयुक्तानि भवन्तु, एतादृशी शुभकामना अत्र निहिता वर्तते। वेदः कथयति अस्मभ्यं योक्षक्षेमः प्राप्तो भवतु – **योगक्षेमो नः कल्पताम्**[3] इति। प्रत्येकमनुष्यस्य कर्तव्यमस्ति यत् सः अन्यस्याः व्यक्तेः सहायतां करोतु, एवं कष्टे दुःखे च तस्य सहयोगं करोतु – **पुमान् पुमाꣳसं परिपातु विश्वतः**[4] इति। भगवती

---

[1] **सा मा सत्योक्तिः परि पातु विश्वतः (ऋक्० १०.३७.२)**

[2] **शु०य० १८.१**

[3] **शु०य० २२.२२**

[4] **शु०य० २९.५१**

यजुर्वेदस्य श्रुतिः कथयति यत् मनुष्यः शतवर्षपर्यन्तं पुरुषार्थं कृत्वा जीवितो भवतु। तथाहि– **कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः॥**[१]

यजुर्वेदे आदर्शसमाजस्य सुन्दरं चित्रणं वर्तते। समाजे परस्परं शत्रुता न भवतु, समाजः ज्ञानवान् भवतु, जनाः परस्परमादरं कुर्वन्तु, लक्ष्यमेकमेव भवतु, मनुष्याः सन्मार्गे स्थित्वा उच्चविचारयुक्ताः भवन्तु, परस्परं सुमधुरसम्भाषणं कुर्वन्तु – **भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि** इति। परमात्मना भद्रवाणी कथनाय एव मनुष्यस्य उत्पादनं कृतम्। समाजः भयमुक्तो भवतु, सर्वतः अभयं भवतु। प्रजाः पशवश्च अभयं प्राप्नुवन्तु –

**यतोयतः समीहसे ततो नो अभयङ्कुरु।**
**शन्नः कुरु प्रजाभ्योभयन्नः पशुभ्यः॥**[२]

भगवती श्रुतिः कथयति –

**विश्वानि देव सवितर्दुरितानि परा सुव। यद्भद्रं तन्न आ सुव**[३] इति।

अर्थात् परमात्मा अस्माकं दुर्गुणं दूरीकरोतु, सद्गुणं च प्रयच्छतु। सर्वे जनाः मां मित्रदृष्ट्या पश्यन्तु एवमहमपि मित्रदृष्ट्या पश्येयम्। सर्वे परस्परमपि मित्रभावनया पश्यन्तु। तथा चाह –

**दृते दृꣳह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्।**

**मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे। मित्रस्य चक्षुषा समीक्षामहे॥**[४]

---

[१] **शु०य० ४०.२**

[२] **शु०य० ३६.२२**

[३] **शु०य० ३०.३**

[४] **शु०य० ३६.१८**

वयं राष्टे सदा जागृयामः, एवं राष्ट्ररक्षायै सदा अग्रण्यः भवेमः– **वयꣳ राष्ट्रे जागृयाम पुरोहिताः।**[१] इति। यजुर्वेदे जलदेवतातः स्वराज्यप्राप्तये स्तुतिः कृता वर्तते। तद्यथा – **स्वराज स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त**[२] इति। स्वराज्यं तदैव स्थिरं भवति यदा जनानां कल्याणं भवति, जनाश्च सुखिनः भवन्ति। स्वराज्येन साकं विश्वस्य हितमपि चिन्तनीयम्। भगवती यजुर्वेदस्य श्रुतिः कथयति –

**जनभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त विश्वभृत स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा विष्वभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तापः स्वराज स्थ**[३] इति।

मनुष्यमात्रेण साकमेकत्वस्य तादात्म्यस्य च अनुभूतिः कर्तव्या, तदैव भयशोकादयः दूरी भवन्ति, विश्वबन्धुत्वभावोऽपि तदैव उदेति –

**यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः।**
**तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥"**[४]

सम्पूर्णं विश्वं रोगरहितं, प्रसन्नचित्तं सुखसम्पन्नं च भवतु।[5] भगवता शिवेन सह प्रार्थना कृता अस्ति यत् हे गिरीशायिन्! वयं शान्तिकरस्तोत्रेण आभिमुख्येन भवतां स्तुतिं कुर्मः। भवन्तः प्रसन्नाः सन्तः किमपि एतादृशं कुर्वन्तु येन सम्पूर्णमपि जगद्रोगहीनं प्रसन्नं च भवेत्–

---

[१] शु०य० ९.२३

[२] शु०य० १०.४

[३] शु०य० १०.४

[४] शु०य० ४०.७

[५] यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् (यजुः १६.४८)

**शिवेन वचसा त्वा गिरिशाच्छा वदामसि।**
**यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत्॥**[1]

यजुर्वेदे प्रतिपादितः राजनीतिकादर्शः भारतीयराजनीतिकदर्शनस्य आधारस्तम्भमस्ति। वैदिकाख्यानस्य समीक्षणेन स्पष्टं भवति यत् राष्ट्रस्य एवं विधेः शासनस्य अवधारणं पाश्चात्यसभ्यतया दत्तं नास्ति अपितु भारतीयधरोहरमस्ति। अन्तरमेतदेवास्ति यद्विधिसम्मतं शासनमथवा नियन्त्रितसर्वकारस्य ब्रिटिशकालीनायामवधारणायां सर्वकारद्वारा राज्यशक्तेः नियन्त्रणे बलं प्रदत्तमस्ति, परन्तु भारतीयपरम्परायां तु स्वनियन्त्रणे बलं प्रदत्तमस्ति। यतो हि सर्वकारीयनियमास्तु परिधौ युक्तः, यस्य मनोऽनुकूलं व्याख्यां कृत्वा राज्यशक्तेरमर्यादितरूपेण प्रयोगमपि कर्तुं शक्यते। अस्य विपरीतं बाल्यावस्थातः स्वनियन्त्रणम्, कर्तव्यपालनं तथा यमनियमादीनामभ्यासेन विभिन्नव्यक्तीनाम्, संघानां तथा राज्यानामधिकारस्य सुरक्षा, शान्तिः, सौहार्द्रश्च सम्भवति। तैत्तिरीयोपनिषदि ऋतसत्यस्वाध्यायतपदमशमादीनां महत्तायाः विशेषरूपेण वर्णनं कृतं वर्तते। तदाह –

**सत्यमिति सत्यवचा राथीतरः। तप इति तपोनित्यः पौरुशिष्टिः स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः। तद्धि तपस्तद्धि तपः॥**[2] इति। वैदिकस्वराज्यस्यावधारणा यमनियमादीनां पालनस्यादर्शे आधारिता वर्तते। यदा आत्मतत्त्वस्य ज्ञानवान्, नीतिमान् संयमी च मानवः शासनादिकार्यस्य संचालनं करोति तदैव राजनीतिकक्षेत्रे सामाजिकक्षेत्रे च स्वराज्यस्य प्रादुर्भावो भवति। शान्तिसन्तोषश्रमपालनसंयमानां महत्त्वं विमृश्य एव अद्य सर्वत्र अन्यायः, अत्याचारः, छलं दम्भश्च आधिक्येन भवन्ति। अद्य स्वतन्त्रतायाः

---

[1] **शु०य० १६.४**

[2] **तै०उ० ९.१**

समानतायाः तथा प्रजातन्त्रस्य निरर्थकवादानां फलस्वरूपं सर्वत्र हाहाकारः जायमानोऽस्ति। अद्य मानवः भोगलिप्साग्रस्तो भूत्वा स्वच्छन्दतां स्वतन्त्रतां जानाति। परिणामतः न्यायान्याययोः, धर्माधर्मयोः, सदसतोः भेदः प्रायः लुप्तः, एवं मानवः स्वशब्दस्य वास्तविकार्थः केवलं स्वशरीरमिति ज्ञात्वा अशान्तिमासुरीभावं च प्रस्तौति। मानवीयसभ्यतायाः अस्मिन् संक्रमणवेलायां यजुर्वेदप्रतिपादितराजनीतिका-दर्शानां पालनं वास्तविकस्वराज्यस्य स्थापनाय परमावश्यकोऽस्ति। वैदिकधारणानुसारं स्वस्य क्षुद्रस्वार्थं त्यक्त्वा समस्तजनसमूहेन, राष्ट्रेन तथा राज्ञा तादात्म्यस्थापितकरणे एव वास्तविकस्वराज्यस्य स्थापना भवितुं शक्नोति। भगवती श्रुतिः कथयति-

**दृते दृꣳह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्। मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे। मित्रस्य चक्षुषा समीक्षामहे॥** [१] इति। यजुर्वेदानुसारेण राज्ञा प्रजाजनानामिच्छानुसारमा-दर्शानुरूपञ्चाचरणं कर्तव्यम्। राज्यस्याधारः केवलं शक्तिर्नास्ति, प्रत्युतजनसमर्थनमपि भवति। अत एव राजनीतिकसम्प्रभुता अर्थात् जनमते आधारितायाः राजसत्तायाः अवधारणा वैदिकराजदर्शनेनैव प्रदर्शनीया। यजुर्वेदप्रतिपादितराजदर्शने ब्रह्मबलस्य क्षात्रबलस्य च मञ्जुलं समन्वयमस्ति। ब्रह्मबलस्य क्षात्रबलस्य च समन्वयसम्बन्धिनां तत्त्वानां जीवन्तप्रतिमानं यजुर्वेदस्याख्याने उपलब्धो वर्तते। भगवती श्रुतिः कथयति -

**यत्र ब्रह्म च क्षत्रञ्च सम्यञ्चौ चरतः सह।**
**तँल्लोकं पुण्यं प्रज्ञेषँयत्र देवाः सहाग्निना॥**[२]

---

[१] **शु०य० ३६.१८**

[२] **शु०य० २०.२५**

यजुर्वेदे प्रतिपादितः स्वराज्यवादः, जनसहमतिः, शस्त्रबले शास्त्रबले च समन्वयः तथा विकेन्द्रीकरणस्यादर्श एव अद्य स्वार्थमूलकराजनीतिना जनसमाजं मुक्तीकृत्य सर्वतो भावेन प्रगति पथे समारुढं कर्तुं शक्नोति। नीतिद्वारैव शास्त्रं धर्मश्च प्रतिष्ठितौ भवतः। नीतिं विना शास्त्रं धर्मश्च प्रतिष्ठितौ न भवतः। नीतिद्वारैव सामाजिकसुव्यवस्थायाः शान्तेश्च भवने सति धर्मस्यानुष्ठाने सारल्यं भवति, तथा धर्मभावनायाः विस्तृतीकरणे एव नीतिरपि कार्यान्विता एवं सफला भवति।

वैदिकादर्शस्य श्रेष्ठं प्रतिमानं भगवतः श्रीरामस्य उदात्तचरित्रे उपलब्धो भवति। श्रीरामराज्ये रजकस्यापि वार्ता श्रूयते स्म। श्रीरामराज्ये कुक्कुरैः पशुभिश्च न्यायः प्राप्यते स्म। परन्तु तस्मिन् समये लोकतन्त्रस्य अवगुणा न आगच्छन्ति स्म। वर्तमानसमये राजनेतृभिः भारतीयप्राचीनधर्मनियन्त्रितराजनीतेः अध्ययनमपि कर्तव्यं, तादृशनियमाः स्वीकर्तव्याः अपि। यत्र ब्राह्मणाः ब्रह्मवर्चससम्पन्नाः सन्ति, क्षत्रियाः ओजस्तेजबलवीर्यपूर्णाः धनुर्धराश्च सन्ति, वैश्याः अनन्तधनधान्यसम्पन्नाः सन्ति, स्त्रियः सत्यः साध्व्यश्च सन्ति, दलिताः विविधकलासम्पन्नाः द्विजातेः सेवाव्रतिनः सन्ति, महाबलवन्तः हृष्टपुष्टसन्तुष्टाः नरर्षभाः सन्ति, वसुमती अनन्तधान्यदानयुक्ता अस्ति, सौन्दर्यमाधुर्यसौरस्य-सौगन्ध्यसम्पन्नानि मधुरमनोहराणि फलयुक्तानि वनस्पतयः सन्ति तदेव रामराज्यं कथ्यते। भगवती श्रुतिः कथयति –

**आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो**

**जायतान्निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्ताँयोगक्षेमो नः कल्पताम्॥**[१] इति।

धर्मभावना ईश्वरभावना च यदि उत्पद्यते तर्हि रामराज्यं भवितुं शक्नोति। श्रीरामसदृशः जितेन्द्रियः, धर्मात्मा, पक्षपातविहीनः शासकः यदि कोऽपि भविष्यति तदैव चौरोत्कोचानाचारादयः न भवितुं शक्नुवन्ति। अद्यतनसमाजे तु एषः दोषोऽस्ति यत् वादबलात् स्वमतस्थापनाय प्रयासः क्रियते। समानतायाः स्वप्नदर्शनमपि कष्टं, व्यवहारे समानता स्वीकरणं अनर्थस्यैव कारणं भविष्यति। गौछागयोः आध्यात्मिकदृष्टिकोणेन तु समानतायाः दर्शनं कर्तुं शक्यते परन्तु व्यवहारे न कर्तुं शक्यते। यतो हि वैतरणी नदी तरणाय गोदानं क्रियते, अजादानं तु न क्रियते। पारमार्थिकदृष्ट्या समानतायाः दर्शनं कुर्वन् अपि व्यावहारिकभेदस्य स्वीकरणमेव बुद्धिमत्ता भवति। आख्यानेषु सर्वत्र नीतिवचनानि कथितानि, भगवती श्रुतिः कथयति –

**ईशा वास्यमिदꣳ सर्वं यत्किञ्च जगत्याञ्जगत्।**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम्॥**[२]

अखिलब्रह्माण्डे यत्किञ्चिदपि जडचेतनात्मकं जगदस्ति तत्सर्वमीश्वरेण व्याप्तमस्ति। तस्मादेव हे शिष्य! त्वं त्यागपूर्वकमस्य उपभोगं करोतु, कस्यापि धनं स्वीकरणस्य इच्छां मा कुरु –

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः।**
**एवन्त्वयि नान्यथेतोस्ति न कर्म लिप्यते नरे॥**[३]

अस्मिन् लोके ईश्वरपूजार्थं कर्म कुर्वन् शतवर्षपर्यन्तं जीवनस्य इच्छां कुरु, एवम्प्रकारेण त्यागभावनया ईश्वरार्थं क्रियमाणं कर्म तव

---

[१] **शु०य० २२.२२**

[२] **शु.य.४०.१**

[३] **शु.य.४०.२**

मनुष्यस्य कृते अस्ति, अन्यथा अन्यः मार्गः नास्ति। यद्येतत्क्रियते चेत् मनुष्यः कर्मणा लिप्तो न भवति। उपनिषदपि कथयति– **असतो मा सद्गमय तमसो मा ज्योतिर्गमय, मृत्योर्मामृतं गमय।।**[1] इति।

**।। प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ।।**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'वैश्विकदृष्ट्या यजुर्वेदे नीतीनां वैदिकाख्यानानाञ्च समीक्षणम्'** नाम पञ्चत्रिंशोऽध्यायः।

**।। बलं विष्णोः प्रवर्धताम् ।।**

[1] **बृ.उ.१.३.२८**

# अथ षट्त्रिंशोऽध्यायः
# यजुर्वेदे धर्मविषयको विचारः

**धर्मार्थकाम इति योऽभिहितस्त्रिवर्ग**
**इक्षा त्रयी नयदमौ विविधा च वार्ता।**
**मन्ये तदेतदखिलं निगमस्य सत्यं**
**स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः॥**[1]

अर्थधर्मकामप्रभृतिषु त्रिवर्गेषु सर्वाधिकं महत्त्वं धर्मस्य विद्यते। सर्वेषां पुरुषार्थानामाधारस्तम्भ धर्म एव। यतः धर्मात्मानः इह लोके परलोके च सर्वत्र सुखं मोदञ्च प्राप्नुवन्ति। यथा–

**प्र वो महे मन्दमानायान्धसोर्चा विश्वानराय विश्वाभुवे। इन्द्रस्य यस्य सुमखꣳ सहो महि श्रवो नृम्णञ्च रोदसी सपर्यतः॥**[2]

**कुतस्त्वमिन्द्र माहिनः सन्नेको यासि सत्पथे किन्त इत्था। संपृच्छसे समराणः शुभानैर्वोचेस्तन्नो हरिवो यत्ते अस्मे। महाँ२॥ इन्द्रो य ओजसा कदाचन स्तरीरसि कदाचन प्रयुच्छसि॥**[3]

विवेकिपुरुषाणां प्रधानेच्छाया विषयो धर्मः अर्थः कामः मोक्षश्च इति एते चत्वारः पुरुषार्थाः सन्ति। एतेषां प्राप्तेरभिचरितोपायः धर्म एव। अतः एतेषु सर्वप्रधानो धर्म एव। यतः कामः मोक्षश्च केवलं फलमात्रमेव। एताभ्यां कस्यापि पुरुषार्थस्य सिद्धिर्नैव जायते।

---

[1] भा०म०पु० ७.६.२६

[2] शु०य० ३३.२३

[3] शु०य० ३३.२७

अर्थोऽल्पशक्तिमान् बहुभिर्दोषैः पूरितश्च वर्तते। अत एव सकलानां पुरुषार्थानां साधकत्वात् सर्वेषु पुरुषार्थेषु प्रधानः धर्म एव। अतः एव महर्षिः जैमिनिः धर्मस्य महत्त्वं प्रतिपादयन् कथितवान्।

**धर्मादेव प्रयुकादभिदधाति सतां धर्मकामार्थमोक्षान्।**
**नन्यार्थो काममोक्षौ धनमबहुफलदोषवर्गान्वितं च।**
**इत्थं सिद्धान्तकारैर्धृतिकृदयमतः सेव्यते सावधानैः।**
**रादानेतन्निबन्धन् विषयफलयुतं शास्त्रमाविश्चकार।।**[१]

जगतः धारणार्थं ईश्वरनिर्मिताः कथिताः वा नियमानुकूलाः एवं जीवात्मनां धारणं पोषणं अभ्युदयं च कर्तुं समर्थाः कायिकवाचिकमानसिकसत्क्रियाः एव धर्मः, एतेषां विपरीतं शास्त्रविरुद्धमाचरणमेवाधर्मः। यथा–

**साक्षात्कृतधर्माणः ऋषयो बभूवुः। तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः। उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुः वेदं च वेदाङ्गानि च। बिल्मं भिल्मं भासनमिति वा।।**[२]

कार्यकारणयोरभेदेन निर्देशात् तद्धेतौ तद्भावाः, अनया दृष्ट्या कारणे कार्यस्य आरोपं कृत्वैव शास्त्रेषु प्रायः धार्मिकविधिः धार्मिकक्रियाः संस्कारः यज्ञः दानं सत्यं दया प्रभृतयो सत्कर्माणि एव धर्मा इति धर्मपदवाच्याः भवन्ति। यथा–

**यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।**
**ते ह नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः।।**[३]

---

[१] **मिमांसापादुका**

[२] **निरुक्तम् १.६ पृ.५७**

[३] **शु०य० ३१.१६**

सत्कर्मणामाचरणेन मनुष्याणामभिष्टसिद्धिः, असत्कर्मणामाचरणेन अनिष्टसिद्धिः अधःपतनं च जायते। सत्कर्मस्यासत्कर्मस्य च ज्ञानं शास्त्रेणैव भवति। अतः असत्कर्माणि परित्यज्य सत्कर्माणामनुष्ठानमेव श्रेयस्करम्।

मनुष्याणां भूतभविष्यवर्तमानसूक्ष्मव्यवहितविप्रकृष्टप्रभृतीनां विषयाणामिष्टप्राप्तेरनिष्टपरिहारस्य च कर्तव्यानां ज्ञानमवबोधनं चैकमात्रेण वेदेनैव भवति। यतः धर्मः अधर्मश्च अतीन्द्रियपदार्थः अस्मिन् विषयेमुख्यतया वेद एव सर्वोपरि प्रमाणम्।

**धर्मो विश्वस्य जगतः प्रतिष्ठा। लोके धर्मिष्ठं प्रजा उपसर्पन्ति। धर्मेण पापमदनुपति। धर्मे सर्वं प्रतिष्ठितं तस्माद् धर्मं परमं वदन्ति॥**[१]

तत्त्ववेत्तारः महर्षयः अखण्डतपोबलेन समाधिस्थो भूत्वा मनुष्याणामुन्नतेरवनतेश्च कारणं तेषामाचरणमेव इति जगदुः। अर्थात् सत्कर्मभिः तेषामुन्नतिरसत्कर्मभिः तेषामवनतिरधःपतनं च जायते। इति विचार्य सत्कर्म एव उन्नतेः कारणमसत्कर्म एव पतनस्य कारणम्। संसारे यावन्मात्राणि पुण्यस्य पापस्य च कर्माणि भवन्ति तेषां सर्वेषां मूलकारणं रागः द्वेषश्च। एते दोषाः विश्वं ब्रह्मात्मकं न हि मन्यन्ते।

अयं निजः परो वेति इत्थं भेदभावैः मूढाः भवन्ति। एतादृशं विचारं त्यक्तुमेव वेदः सर्वं विश्वमेकात्मकं ब्रह्मात्मकं च मन्यते। जीवात्मनः परमात्मनश्च यथार्थरूपं ज्ञात्वा तस्य अनवरतं चिन्तनेन शोकमोहप्रभृतयो दोषाः विनश्यन्ति। यथा वेदः प्रतिपादयति–

**यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः।**
**तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥**[१]

---

[१] **तैत्तिरीयारण्यकम् १०.६३**

बद्धजीवात्मनः स्वरूपं परमात्मनः स्वरूपमेव अत्यन्तविशुद्धं सर्वविधशान्तं ज्ञानशक्तिसम्पन्नं च वर्तते। परन्तु अस्माकं कर्मसु एव निखिलं परमार्थरूपं गुणं तिरोहितं वर्तते सः स्थूलरूपेण सूक्ष्मरूपेण वा प्रकृतिनामेकेन जडपदार्थेन सह घनिष्ठसम्बन्धं संस्थाप्य नानाविधदुःखगर्ते पातयति। ईश्वरः सर्वेषां विषये समः विद्यते। तस्य नास्ति कश्चित् प्रिय अप्रियो वा। कर्मानुसारेण सः नानाजीवान् पशुपक्षीमृगगुल्पलतावृक्ष–प्रभृतिजीवान् नानायोनिषु उत्पादयति। तेषु बहवो मूर्खः बहवो दीनाः अनाथाश्च सन्ति। अत्र विषमसृष्टेः कारणं कर्म एव। यथा–

**अन्धन्तमः प्रविशन्ति येसम्भूतिमुपासते।**
**ततो भूय इव ते तमो य उ समभूत्याꣳ रताः॥**[२]

मनुष्याणां कर्माणि एव मरणानन्तरमदृष्टफलं प्रयच्छन्ति, तैः सह चलन्ति सुखं दुःखं चोत्पाद्य नाना योनिषु भ्रामयन्ति।

**स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथ्वीमय अपोमयो वायुमय आकाशमयस्तेजामयोऽतेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोधमयो धर्ममयोऽधर्मयः सर्वमयस्तद् यदेतदिदम्मयोऽदोमय इति यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पपः पापेन। अथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत् कर्म कुरुते यत् कर्म कुरुते तदभिसम्पद्यते॥**[३]

---

[१] **शु०य० ४०.७**

[२] **शु०य० ४०.९**

[३] **बृ०उ० ४.४.५**

बद्धजीवात्मरूपेण वर्तमानमस्माकं स्वरूपमपि परमात्मनः स्वरूपमेव अत्यन्तविशुद्धं सर्वविधज्ञानमयं शक्तिसम्पन्नञ्च विद्यते। ईश्वरः सर्वस्मिन् जगति समत्वेन विद्यते। सदाचारः शिष्टाचारश्च प्रवृत्तेः निवृत्तेश्च धर्मस्य मूलम्। मानवतायाः पूर्णविकासाय सर्वेषां मनुष्याणामाचरणे संस्कारस्य परिष्कारस्य च महती आवश्यकता वर्तते। अतः समस्तानां वर्णाश्रमाणाम् अवर्णाश्रमाणां च विद्यमानानां जनानां कृते विशुद्धाचरणस्य महती आवश्यकता वर्तते।

सदाचार एव मनुष्यजीवनस्य शुद्धः परिष्कृतः आचरणं विद्यते। आर्यजनानामाचरणानि शास्त्रीयपद्धत्या शुद्धानि परिष्कृतानि भवन्ति। अतः भद्रपुरुषाणां समग्रं जीवनं सदाचारमयं भवति। भारतभूमौ आर्यावर्ते प्रदेशे च सर्वत्र आर्यजनानामेव प्राधान्यं वर्तते। भारतवर्षः सदाचारस्य प्रमुखकेन्द्रः वर्तते।

अतः अन्येभ्यो देशवासिभ्यो सदाचारस्य शिक्षा अत एव मिलति। अन्वेषणेन ज्ञातं भवति यत् विश्वस्य मानवस्य सभ्यता–संस्कृति–सदाचार–धर्मस्य च परं प्राचीनमूलग्रन्थः वेद एव। वेदस्य प्राचीनतां सर्वे स्वीकृतवन्तः। वेदादेव मानवानां सर्वाः शिक्षाः वैदिकैः विद्वद्भिः अस्मिन् जगति विस्तृताः जाताः।

**स नैव व्यभवत्तच्छ्रेयोरूपमत्यसृजत धर्मं तदेतत्क्षत्रस्य क्षत्रं यद्धर्मस्तस्माद्धर्मात्परं नास्त्यथो अबलीयान्बलीयाꣳ समाशꣳ सते धर्मेण यथा राज्ञैवं यो वै स धर्मः सत्यं वै तत्तस्मात्सत्यं वदन्तमाहुर्धर्मं वदतीति धर्मं वा वदन्तꣳ सत्यं वदतीत्येतद्ध्येवैतदुभयं भवति।।**[१]

[१] **बृ०उ० १.४.१४**

**सदाचारात्धर्मोत्पत्तिः। धर्मस्य जनकः सदाचार इति यथा सदाचारप्रभावो धर्मः॥**[१]

यथा पर्वतात् नद्यः प्रादुर्भवन्ति तद्वत् सदाचारात् धर्मस्योत्पत्तिः। अतः धर्मस्य मूलस्रोतः सदाचार एव। सदाचारः स्थायी वर्तते न हि परिवर्तनशीलः। अनादिपरम्परया स आगच्छति। सदाचारः सनातनः न हि आधुनिकः इति विदुषां मतमस्ति।

अत एव मानवसमाजे सर्वेषां वर्णानामाश्रमाणां च सर्वविधव्यवहारेषु सदाचारस्य समावेशो दृश्यते। स्नानादिभ्यः शरीरशुद्धिः सरलस्वभावः ब्रह्मचर्यमहिंसापरोपकार– प्रवणतादेवपूजप्रभृतीनि कर्माणि शारीरिकसदाचारः।

सत्यं प्रियभाषणं सद्ग्रन्थाध्यनमशिवनस्तवनमिति प्रभृतिकर्माणि वाचिकसदाचार इति प्रसन्नता सौम्यता कारुण्यं मनोजयः धैर्यं स्थैर्यं भावशुद्धिः क्षमाप्रभृतीनि कर्माणि मानसिकसदाचार इति एतेषां विपरीतानि क्रूरता असत्यभाषणं छलकपटधूर्तताराागः द्वेषः दम्भः अभिमानः दुराचारः अनाचारः कदाचारः भ्रष्टाचार इतिप्रभृतीनि कर्माणि अधर्मस्य मूलानीति।

एतेभ्य एवाधर्मस्योत्पत्तिः इति। ततः मनुष्याणां अधःपतनं जायते। दुराचारैः क्रियमाणं निखिलं कर्म धर्मानुष्ठानं वा तुषकण्डनन्यायेन निरर्थकं जायते। यथा –

**आचारहीनं न पुनन्ति वेदा यद्यप्यधीता खलु षड्भिरङ्गैः।**
**छन्दांस्येनं मृत्युकाले त्यजन्ति नीडं शकुन्ता इव जातपक्षाः॥**[२]

धर्म–ईश्वरं परलोकं च लक्ष्यं कृत्वा नराः महदपि दुःखं स्वीकृत्य ज्ञात्वा वा अधिकमधिकं वा श्रमं सम्पाद्य परोपकारं कुर्वन्ति।

---

[१] **योगसूत्रपुरुषार्थचतुष्टयम्**

[२] **महाभारतम्**

आत्मोन्नतिं कामयमानाः नराः आत्मनिरीक्षणं कृत्वा आत्मशुद्ध्यर्थं सततं यतन्ते। आत्मशुद्धिहेतवे आत्मनिरीक्षणस्य यावन्मात्रा विद्यते तावन्मात्रं स्वविहितानां पापानां पश्चात्तापमपि करणीयमस्ति। पश्चात्तापेन विना मलिनता न हि नश्यति। अतः मानवाः दीर्घदर्शिनः भवेयुः। अधर्माणामाचारणे भ्रष्टाचारप्रवृत्तौ ये गच्छन्ति ते आत्मवञ्चकाः सन्ति।

विवेकशीलाः बुद्धिमन्तः पुरुषाः दोषान् परित्यज्य सत्कर्मणि सदाचारे च प्रवृत्ताः भवन्ति। सुकृत्यैः जनाः स्वजीवनं कृतकृत्यं कुर्वन्ति। देशकालजातिवर्णाश्रमप्रभृतिभेदैः तत्प्रयुक्तसदाचारेष्वपि बहुभेदाः भवन्ति। अनेनैवं धर्मतत्त्वस्योन्नतिर्भवति। अतः सदाचार एव सामान्यधर्मः विशेषधर्मश्च वर्तते।

सदाचारस्योत्कर्षेण दुष्कृतस्य निवृत्तिः आत्मोन्नतिश्च जायते। अत्र कारणं धर्म एव यद्यपि सर्वेषां प्राणिनां शरीरेषु समानि पञ्चभूतानि वर्तन्ते। तथापि तेषां वर्णाश्रमानां धर्माणि पृथक् पृथक् निरूपणं विधाय अयं ब्राह्मणः अयं क्षत्रियः इत्यादयः भेदा निर्मिताः यथा स वासनामूलकप्रवृत्तीनां नियन्त्रणं संकुचितं विधाय धर्मसंग्रहं कुर्यात्।

देशः कालः फलं निमित्तमधिकारी तथा धान्यप्रभृतीनां वस्तूनां संग्रहः सुलभतया भवेत् कर्मसिद्धिविषये मा कश्चित् विघ्नो भवेत्। स एव शोभनः कालः।

यत्र ब्राह्मणभक्तानामभावः कृष्णसारमृगस्यापि अभावः स देशोऽपवित्रो भवति। म्लेच्छाः संस्कारहीनाः जनाः यत्र निवसन्ति, मलिनाः लोलुपा कामिनश्च यत्र निवसन्ति, सः देशोऽपवित्र इति। परिस्थितिवशात् कालवशाच्च वस्तूनां शुद्धिः अशुद्धिश्च भवति।

अधिकतया न्यूनतया च वस्तूनां शुद्धिः अशुद्धिश्च भवति। स्पर्शादिदोषैः महतां जलाशयानां शुद्धिर्जायते परञ्च लघुजलाशयानां स्पर्शैः अशुद्धिर्भवति। शक्त्या अशक्त्या च शुद्धिः अशुद्धिर्भवति। यथा

स्वस्थपुरुषाणां स्नानैः शुद्धिः ज्वरादिरोगैः ग्रस्तानां स्नानेनाशुद्धिर्जायते। ज्ञानेनापि शुद्धिरशुद्धिश्च भवति। बन्धुबान्धवानां दशदिवसानन्तरं जन्ममृत्युज्ञानेन शुद्धिः भवति। जननमरणज्ञानेनाशुद्धिर्भवति। वैभवादपि शुद्धिरशुद्धिर्भवति। वैभवशालिनां सूतकान्नमशुद्धं भवति। दरिद्राणां कृते तदेव सूतकान्नं शुद्धं भवति।

द्रव्यदेशवचनप्रभृतीनि शुद्धाशुद्धिविषये कारणानि भवन्ति। यथा निर्भयप्रदेशे स्नानेन शुद्धिर्भवति। व्याघ्रादिभ्यः आक्रान्ते प्रदेशे स्नानरहितेऽपि शुद्धिः। स्वस्थपुरुषाणां युवकानां च कृते स्नानेन शुद्धिः, रोगादिभिः आक्रान्तानां बालानां च कृते स्नानरहितेऽपि शुद्धिरिति। शास्त्रीयाचारः लौकिकाचारश्च सततं पालनीयः। हितेच्छुभिः आचारादेव धर्मोत्पत्तिः। ग्राम्यधर्मः जातिधर्मः देशधर्मः कुलधर्मश्च सततमादरणीयः स्यात्।

मानवसमाजस्य सर्वविधसदाचारस्य धर्मस्य च मुख्याः प्रवक्तारः सम्प्रवर्तकाश्च मुख्यतया सप्तर्षिगणाः स्वयम्भूः मनुः प्रजापतयश्चासन्। परमात्मनः प्रेरणया एते सर्वे विश्वव्यवस्थाया संचालनहेतोः सदाचारस्य धर्मस्य च प्रचारं प्रसारञ्च कृतवन्तः। ऋषिमहर्षिप्रभृतीनां महापुरुषाणां परम्परयैव विश्वे सदाचारस्य धर्मस्य प्रचारः प्रसारः दृश्यते। यथा–

**यान्यस्माकꣳ सुचरितानि। तानि त्वयोपास्यानि॥**[१]

स्वाधिकारानुचारमुचितमार्गेण सकामधर्मस्य यथेच्छमनुष्ठानं सम्पद्य तत्फलस्वरूपार्थस्य कामस्य च उचितमात्रायामुपार्जनं कुर्वन्नीश्वरार्पणबुद्ध्या इहलौकिकानां सुखानामुपभोगं कुर्वन् शनैः शनैः वितृष्णो भूत्वा निवृत्तिधर्मस्यानुष्ठानं कृत्वा मानवजीवनं साङ्गोपाङ्गं सफलं निष्कण्टकं विधातव्यम्। यथा–

---

[१] **तैत्तिरीयोपनिषद् १.११.२**

**विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह।**
**अविद्यया मृत्युन्तीर्त्वा विद्ययामृतमश्नुते॥**[१]

ये सत्यवादिनः वर्तन्ते त एव धर्मं जानन्ति धर्मं वदन्ति च। यथा–

**यो वै धर्मः सत्यं वै तत्। तस्मात् सत्यं वदन्तमाहुः धर्मं वदति धर्मं वा वदन्तं सत्यं वदतीति। तद् ह एव एतत् उभयं भवति॥**[२]

**सत्यं वै चक्षुः। तस्माद् यद् इदानीं कौ विवदमानौ एमाताम्। अहम् आदर्शम् अहम् अश्रौषम् इति। यः एवं ब्रूयात् अहम् अदर्शम् इति, तस्मै एव श्रद्धयाम्। तत् एव एतत् समर्षयति॥**[३] **स एव तपस्वी स एव विद्वान् स एव महात्मा वर्तते यः आत्मानं राष्ट्राय धर्माय च समर्पयति॥**[४]

एतत् खलु वाव तपः इत आहुः यत् स्वं ददाति। मनुष्येषु विनयस्य अहंकारस्य च स्पर्धा निरन्तरं प्रचलति। अहंकारस्यान्तिमे सीम्नि गत्वा स एवं सर्वोच्चं सर्वश्रेष्ठं च मन्यते।

ततः स धर्मस्य सत्कर्मणः यज्ञस्य च निरोधं वदति। सः स्वयं विचारयति यत् अग्नौ हवनेन को लाभः, दानेन को लाभः, सत्यवदनेन को लाभश्च। स्वेच्छया स्वमुखे हवनेन शरीरपोषणं जायते इति। एतादृशी स्वेच्छाचारिता तस्मिन् जने समायाति।

प्रजापतेः पुत्रैरसुरैः अभिमानकारणात् अनादरं जगति प्राप्तम्। अत्यन्ताभिमानः शास्त्रीयदृष्ट्या वर्जितो विद्यते। यतः तेन अनादरः जायते।[५] ते उभये प्रजापत्या पस्पृधिरे। ततः असुराः अतिमानेन एव

---

[१] **शु०य० ४०.१४**

[२] **शतपथ० १४.४.२.३६**

[३] **शतपथ० १.३.४.२७**

[४] **तै०सं० ६.१.६**

[५] **शतपथ० ५.१.१.१**

कस्मिन् नु वयं जहुयाम इति स्वेषु आस्येषु जुहुतः चरुः। ते अतिमानेन पराबभूवुः। तस्मात् न अतिमन्येत। पराभवस्य हि एतत् मुखं यद् अतिमानः।[१]

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे धर्मविषयको विचारः'** नाम षट्त्रिंशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

[१] **शतपथ० ५.१.१.१**

# अथ सप्तत्रिंशोऽध्यायः
# यजुर्वेदे अर्थविषयको विचारः

**अर्थो नराणां पतिवङ्गनानां वर्षानदीनां ऋतुराट् तरूणाम्।**
**स्वधर्मचारी नृपतिः प्रजानां गतं गतं यौवनमानयन्ति॥**[1]

द्वितीयः पुरुषार्थः अर्थ एव। अर्थेन नराणामिहलोकस्य परलोकस्य च सर्वेषां प्रयोजनानां सिद्धिर्भवति। अर्थः भोगस्य आरोग्यस्य धर्मस्य च प्राप्तेः मुख्यं साधनमस्ति। अर्थस्य अपरनाम अभिलषितवस्तु इति। यथा–

**सुखस्य मूलं धर्मः। धर्मस्य मूलमर्थः॥**[2]

येन मनुष्याणां जीविका चलति स एव अर्थः। अर्थस्य मूलम् आजीविका। धर्मः कामश्च अर्थोपरि आश्रितौ भवतः। भूमिः धनम्, द्रव्यं विद्या कला कृषिः पशुपालनप्रभृतयः आजीविकासम्बन्धिसर्वाणि प्रयोजनानि अर्थ एव। शौर्यं बलं धैर्यं मित्राणि सहजानि सर्वाणि जीविकासाधनानि अर्थ एव। कृषिः व्यापारः गोपालनं विविधानि शिल्पानि च अर्थप्राप्तेः साधनानि सन्ति। अर्थ एव सर्वेषां कर्मणां मर्यादायाः पालने सहायक इति धर्मः कामश्च अर्थस्यैव अवयवौ। मनुष्याणां निखिलानां सर्वेषां प्राणिनां च जीविकाया उद्गमक्षेत्रमर्थ एव। धनधान्यगृहसम्पत्तिवस्त्रप्रभृतिजीवनोपयोगिपदार्थानां जनयित्री भूमि एव मुख्योऽर्थः। भूमेरतिरिक्तं सर्वं वस्तु गौणरूपेणार्थः। यथा–

---

[1] **सुभाषितरत्नभाण्डागारम्**

[2] **चाणक्यसूत्रम् 1.1.2**

**ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतञ्च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रञ्च म औद्भिद्यञ्च मे यज्ञेन कल्पन्ताम्।**

**रयिश्च मे रायश्च मे पृष्ठञ्च मे पुष्टिश्च मे विभु च मे प्रभु च मे पूर्णञ्च मे पूर्णतरञ्च मे कुयवञ्च मे क्षितञ्च मेऽन्नञ्च मे क्षुच्च मे यज्ञेन कल्पन्ताम्॥**

**वित्तञ्च मे वेद्यञ्च मे भविष्यच्च मे सुगञ्च मे सुपथ्यञ्च म ऋद्धञ्च म ऋद्धिश्च मे क्लृप्तञ्च मे क्लिप्तिश्च मे मतिश्च मे सुमतिश्च मे यज्ञेन कल्पन्ताम्॥**

**व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मेणवश्च मे श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम्॥**

**अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यञ्च मे यश्च मे श्यामञ्च मे लोहञ्च मे सीसञ्च मे त्रपु च मे यज्ञेन कल्पन्ताम्॥**[१]

**वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इत्या च मे गतिश्च मे यज्ञेन कल्पन्ताम्॥**[२]

अन्नस्य साधनं कृषि:। प्राणिनां हितं विचारयन् धर्मानुसारं यथोचितरीत्या कृषिकर्मणा अन्नमुत्पाद्य विविधयज्ञान् सम्पाद्य सुखोपयोगिसर्वाभि: सामग्रीभि: मनुष्य: पूर्णो भवेत्। कृषे: श्रेष्ठत्वात् न हि कश्चित् अर्थ न हि कश्चित् धर्म न हि कश्चित् लाभ: न हि किञ्चित् सुखस्य साधनम्। अत एव कृषक: नास्ति दीन: नास्ति

---

[१] शु०य० १८.९-१३

[२] शु०य० १८.१५

अभावग्रस्तः। गवादीनां पशूनां पालनमतिथीनां सेवासत्कारः च कृषिणा एव भवति। विद्यावान् जनः नास्ति असत्यवादी नास्ति दरिद्रः दीनश्च। सदाचारनिष्ठः नास्ति स्थानहीनः भाग्यहीनश्च।

**धनस्य निरुक्तिः ''धनं कस्मात्'' धिनोतीति सतः।।** [१] धिनोतिस्तर्पणार्थः सर्वेषां भोग्यपदार्थानां विनिमयस्य साधनं वित्तमेव। जगतः व्यवहारस्य मूलं साधनं धनमेव यथा पर्वतात् बह्व्यः नद्यः निःसरन्ति तद्वत् जगतः व्यवहारस्य सर्वाणि वस्तूनि अर्थेनैव प्राप्नुवन्ति। धर्मस्य मूलश्रोतोऽर्थः। अत एव तस्य गणना पुरुषार्थमध्ये भवति। त्रिवर्गस्य सिद्धिप्राप्तिविषये अर्थः असाधारणं कारणं दृश्यते। अनेनैव पुरुषार्थानां सिद्धिः इति एतत् सर्वे जानन्ति एव। अतः तस्य अपारमहिमा सिद्धिनां मूलं तदेव जगतः सर्वाणि व्यवहाराणि अर्थोपरि निर्भराणि सन्ति। प्राणिनां प्राणयात्राऽपि अर्थोपरि वर्तमाना अस्ति। धनसंग्रहो नास्ति जगतः जीवनस्य आत्यन्तिकं लक्ष्यं परञ्च शरीरयात्रायाः निर्वाहकः, तथा देशस्य समाजस्य च स्थूलाभावानां दूरीकरणायार्थस्य विशेषावश्यकता वर्तते। अत एव लौकिके जगति धनागमनाय बुद्धेः सदुपयोगः विधातव्यः। यथा शास्त्रार्थं विना शूरता नास्ति स्त्रियं विना गार्हस्थ्यं नास्ति तद्वदर्थं विना धर्मः कामश्च न स्तः। दुर्लभात्मकः मोक्षपुरुषार्थः अर्थमन्तरा न हि सिद्ध्यति। अर्थस्य धर्मे विनियोगतया मोक्षप्राप्तेः सुलभं कारणमर्थ एव भवति। यथा–

**सो अग्निर्यो वसुर्गृणे सँयमायन्ति धेनवः। समर्वन्तो रघुद्रुवः सꣳ सुजातासः सूरय इषꣳ स्तोतृभ्य आभर।।**[२]

**आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इषव्योतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः**

---

[१] **निरुक्तम् ३.२ पृ. १३१**

[२] **शु०य० १५.४२**

**पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतान्निकामेनिकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्ताँयोगक्षेमो नः कल्पताम्।।**[१]

येऽर्थाधिकारात् दानधर्मे अगुडाकेशिनः कामान्धाः मदोन्मत्ताः वर्तन्ते, तान् बालबुद्धिवत्तया अनभिज्ञान् जनान् परलोकस्यास्तित्वे नास्ति तेषां विश्वासः। भोगस्यायमेव लोकः नास्त्यपरः। तेऽल्पज्ञाः परमात्मनः कठोरनियन्त्रणस्य यातनामनुभवन्ति। वैदिकानां ऋषीणाञ्च बहुषु मन्त्रेषु अर्थमोहान्धजनानां विषये उद्बोधनं विद्यते। यथा–

**न सम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम्।**
**अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे।।**[२]

समाजस्य राष्ट्रस्य च अर्थनीतेः सुव्यवस्थैव स्थायी गौरवस्याधारशिला वर्तते। प्रायः मानवानां प्राणिनां वा जीवने मत्स्यन्यायस्य स्वाभाविकता अर्थलोभस्य क्षेत्रे स्पष्टं दृश्यते। यदा कश्चित् बुभुक्षितः पुरुषः भिक्षां याचनार्थं यस्य कस्यचित् पुरुषस्य द्वारे अन्नार्थम् आगच्छति तदा तं दृष्ट्वा अन्नवन्तः धनिकाः निष्ठुराः भवन्ति, व्यर्थं प्रलपन्ति च। मनुष्याणां मरणे नास्ति बुभुक्षाकारणं परन्तु अन्नवन्तः धनवन्तश्च म्रियन्ते तत्र कारणमन्यत् विद्यते। बुभुक्षितेभ्यः जनेभ्यः भोजनदानैः नहि केचन दानशीलाः दरिद्राः भवन्ति। परञ्च कृपणाः स्वविविधैः सन्तापैः सन्तप्यन्ते। यथा –

**ईशावास्यमिदꣳ सर्वं यत् किञ्च जगत्याञ्जगत्।**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम्।।**[३]

---

[१] **शु०य० २२.२२**

[२] **कठोपनिषद् १.२.६**

[३] **शु०य० ४०.१**

मनुष्याणां कृते अपमानस्य लज्जां विहाय भयं त्यक्त्वा दातव्यं, लज्जां च विहाय दातव्यम्, जीवनस्य यथार्थस्वरूपस्य बोधनाय दातव्यम्। निखिलस्य जगतः प्राणिनः देवाः पशवश्च सर्वे परमात्मनः नियमानामुल्लङ्घनं कदापि न हि कुर्वन्ति परन्तु केवलं मानवा अनुशासनं सर्वं त्यजन्ति तथा नितान्तं घृणितां आसुरीं वृत्तिमनुसरन्ति। अनेन सिद्धं भवति यत् मनुष्येषु भोगोन्मादस्य आसुरीप्रवृत्तिः अधिकमधिकं निवसति।

मानवप्रकृतेः सहज-आसुरी-उन्मादात् त्राणाय राष्ट्रस्य विचारकाणां वाणीषु राष्ट्रीयजीवननिर्वाहाय भाविनेऽभ्युदयाय चार्थस्य विषये सर्वे शालीनतायाः स्वरूपं यावत् न हि प्रकटयिष्यन्ति तावत् पर्यन्तं सर्वस्मिन् हृदये प्रतिशोधात्मकमुग्रमावेशं जागरितं न भविष्यति। अतः सर्वेषां जनानां मनसि आत्ममङ्गलस्य अर्थविषयकमञ्जुलध्वनिः प्रकाशितो भूयात्। वेदज्ञानमथवा परात्परब्रह्म अस्माकमन्तर्जगतः रक्षकं भवतु कल्याणयज्ञस्य आनन्दमयस्य चास्माकमन्तरात्मनः मङ्गलं कुर्यात्। ये ज्ञानं विहाय केवलं कर्मणामुपासका सन्ति गम्भीरेऽन्धकारे पतन्ति ततोऽपि अधिके तमसि पतन्ति ये आत्मनः आत्मीयतायाश्च सूक्ष्मसौन्दर्यचिन्तने निमग्नाः सन्ति। यथा-

**अन्धन्तमः प्रविशन्ति येविद्यामुपासते।**
**ततो भूय इव ते तमो यऽउ विद्यायाꣳ रताः॥**[१]

अर्थः सर्वेषां गुणानां गुणिजनानां चाकर्षणस्य केन्द्रो भवति। किंकर इव गुणिनः तस्य पार्श्वे स्वयमेव गच्छन्ति। अर्थवतां सर्वे दोषाः गुणाः भवन्ति। अत एव शास्त्रेषु अर्थस्य अर्थवतां च महिमा सर्वोत्तमः विद्यते। विद्यावृद्धा विद्वांसः तपोवृद्धा तपस्विनः वयोवृद्धाश्च सेवका इव धनिनां द्वारेषु निवसन्ति। आवश्यकवस्तूनां याच्ञामपि कुर्वन्ति। अर्थः

---

[१] **शु०य० ४०.१२**

सर्वेभ्यो जनेभ्यः स्वाधिकारं प्रयच्छति। स तु स्वयं स्वतन्त्रः इति। उपभोगरहिताः वृक्षा अपि स्वाभिलाषं पूरयितुं धनिकस्याधीनाः भवन्ति। का वार्ता नराणां मनुष्येषु यावन्तो गुणाः सन्ति ते अर्थवतां पार्श्वे सर्वाणि सद्गुणाः भवन्ति। न हि केचित् सत्कुलत्वात् सदाचारमात्रत्वाच्च लोकाराध्याः न हि भवन्ति अपि तु केवलं वित्तैरेव लोकपूज्याः जायन्ते। येषां पार्श्वे धनानि सन्ति ते एव महान्तः कुलीनाश्च वर्तन्ते। अत एव स्वकर्तव्येन न्यायेन चार्थोपार्जनं विधातव्यम्। अर्थप्राप्तिविषये सन्तोषः नहि करणीयः।

**अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः।**
**अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषꣳ स्तोतृभ्य आ भर॥**

**सो अग्निर्यो वसुर्गृणे सँयमायन्ति धेनवः।**
**समर्वन्तो रघुद्रुवः सꣳ सुजातासः सूरय इषꣳ स्तोतृभ्य आभर॥**[1]

**अथ द्वितीयां धनैषणामापद्येत। प्राणेभ्यो ह्यनन्तरं धनमेव पर्येष्टव्यं भवति। न ह्यतः पापा् पापीयोऽस्ति यदनुपकरणस्य दीर्घमायुः। तस्मादुपकरणानि पर्येष्टुं यतेत्। तत्रोपकरणोपायाननुव्याख्यास्यामः। तद्यथा- कृषिपाशुपाल्यवाणिज्यराजोपसेवादीनि। यानि चान्यान्यपि सतामविगर्हितानि कर्माणि वृत्तिपुष्टिकरणानि विद्यात्तान्यारभेत् कृतम्। तथा कुर्वन् दीर्घजीवितं जीवत्यनवमतः पुरुषो भवतीति द्वितीया धनैषणा व्याख्याता भवति॥**[2]

अर्थप्राप्तेः तस्य सुरक्षायाश्च मूलं कारणम् ''विनयम्'' एव विनयमेव शीलः। विनयात् पुरुषः अर्थप्राप्तेः अधिकारी भवति। विद्यया विनयप्राप्तिर्भवति। इन्द्रियसंयमः पुरुषार्थचतुष्टयसम्प्राप्तौ सर्वश्रेष्ठं कारणं वर्तते। यथा-

---

[1] **शु०य० १५.४३**

[2] **चरकसंहिता १०.५**

**विद्या ददाति विनयं विनयाद्याति पात्रताम्।**
**पात्रत्वाद्धनमाप्नोति धनाद्धर्मः ततः सुखम्।।** [1]
**यदीच्छसि श्रियं तात यादृशी सा युधिष्ठिरे।**
**विशिष्टां वा नरव्याघ्र शीलवान् भव पुत्रक।।**
**शीलेन हि त्रयो लोकाशक्या जेतुं न संशयः।**
**न हि किञ्चिदसाध्यं वै लोके शीलवतां भवेत्।।** [2]

उद्योगोऽपि अर्थप्राप्तेर्मूलकारणं दृश्यते। विद्योपार्जनानन्तरं स्वस्वयोग्यतानुसारमधिकारानुसारञ्च न्यायोचितेन मार्गेण अर्थोपार्जनाय प्रयत्नः करणीयः। तथाहि नीतिवाक्यम् –

**उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः** इति। महत्त्वाकांक्षापूरणार्थं सर्वे यत्नानि कुर्वन्ति। यदा कदा उद्यमोऽपि निष्फलत्वं लभते, वैभवं प्राप्तये मनुष्याणां भाग्यमपि वर्तते। अविवेकिनां निर्बलानामनीतिज्ञानां पुरुषाणाञ्च कृते कदाचिद् भाग्यवशात् नानाप्रकारकाणि राज्यादिसुखभोगानि वैभवानि च यथा प्राप्तानि भवन्ति तथैव गुणवन्तः विवेकिनः विद्वांसोऽपि सत्यपि धनाभावे नानायातनां दैववशात् लभन्ते। एतेनापि कदापि विद्वद्भिः हतोत्साहैर्न भवितव्यं न वा उद्यमः परित्यक्तव्यः। यतः अर्थोपार्जनस्य मुख्यं कारणं धर्म एव। अर्थाभिलाषिणः धर्मानुष्ठानमपि यदा कदा कुर्युः। इमं विषयमधिकृत्य बहूनि विचाराणि यत्र तत्र कथितानि सन्ति।

तपसा विना न किमपि प्राप्तव्यं भवति। अतः महद् वैभवमिच्छमानः जनः तपः कुर्यात्। पुण्यसंचयेन अभिलषितानि सर्वाणि वस्तूनि प्राप्तव्यानि भवन्ति। अर्थप्राप्तेः सर्वश्रेष्ठमुपायं वर्तते ''बुद्धिः''। सद्बुद्धिं विना इतरेभ्यः प्रयत्नेभ्यः अर्थस्याभिवृद्धिः नहि भविष्यति।

---

[1] **योगसूत्रस्य पुरुषार्थचतुष्टयप्रकरणे**

[2] **म०म०सं०प० १२.१७**

बुद्धिमतां स्वल्पमपि धनं दिनं प्रतिदिनं वर्द्धते। शूरता नीतिः बलं धनं च एभिः चतुर्भिरुपायैः पशवः पक्षिणश्च वशवर्तिनो भवन्ति। अर्थोपार्जनस्य विषये एतत् ज्ञातव्यं वर्तते यत् भूमिः गृहम्, धनम्, सम्पत्तयः, विद्या, विविधाः कलाश्च जीवनोपयोगीनि सर्वाणि वस्तूनि ''अर्थ'' एव। अतः जीवनाय एतेषां सर्वेषां वस्तूनां प्राप्तये प्रयत्नानि कर्तव्यानि। एतेषामर्जनाय पुरुषार्थः उद्यमश्च नितान्तः आवश्यकः। श्रद्धापूर्वकं कृतेनोद्यमेन सिद्धिः सर्वथा भवति। उद्यमेन कृषकाः अन्नानि व्यवसायिनः धनानि राजानः राज्यानि विद्यार्थिनः विद्याः, भृत्याः वेतनानि, देवाः अमृतम्, ऋषयः वैष्णवपदं च लभन्ते।

अकिञ्चनतायाः दीनतायाश्च कारणेन केनापि जनेन आत्मग्लानिः कदापि न हि विधातव्या, यः जनः भाग्यं सदैव धिक्कारयति सः कदापि विभूतिं न हि लभते। भाग्यस्यापमर्दनं न हि कर्तव्यम्। उत्साहहीनाः निरुद्योगिनः अभिमानिनः लोकाचारभयभीताः दाराः कदापि अर्थं नहि लभन्ते। शनैः शनैः अर्थोपार्जनं भवति। विद्या शिल्पः भूतिः सेवा पशुपालनम्, व्यापारः, कृषिः, धैर्यम्, भिक्षाटनप्रभृतिकर्माणि मनुष्याणां जीविकायाः साधनानि सन्ति। स्वावलम्बिनः एव अर्थशालिनो भवन्ति।

अन्यायेनार्थोपार्जनं चिरकालपर्यन्तं नहि तिष्ठति, शीघ्रं विनश्यति। यज्ञः, दानम्, परोपकारः, देशोद्धारः, भगवत्सेवा, परोपकारः इत्यादिसद्‌गुणैः राष्ट्रस्य संरक्षणं कर्तव्यम्, तदर्थञ्च अर्थस्य व्ययः कर्तव्यः। कदाचित् सद्‌गुणैः देशः राष्ट्रं वा सञ्चाल्यमानेऽपि कदाचित् अकालाद्यापत्तिः समागच्छति, तन्निवृत्त्यर्थं जनानां हिताय राष्ट्रसंरक्षणार्थञ्च अर्थस्य व्ययः करणीयः। उदाराणं नरेन्द्राणां दानशीलानां जनानां परमार्थशीलानां व्यापारिणां च लक्ष्मीः कदापि न नश्यति। दिनं प्रतिदनं वर्द्धते। यथा जलसम्पदा कमलनीनां पोषणम्, सद्‌बुद्ध्या लक्ष्म्याः पोषणम्, उद्योगेनार्थस्य पोषणं सदा भवति। शरीरस्य छाया इव लक्ष्मीः

एतादृशानां जनानां सदा वर्द्धते संगच्छते च। निर्व्यसनशीलानां कर्तव्यपरायणानामुत्साहसम्पन्नानां जनानां पार्श्वे लक्ष्मीः स्वयमेव निवासहेतोः आगच्छति। यथा नद्यः स्वयमेव समुद्रं गच्छन्ति। सुखसमृद्धिकामयमानाः पुरुषाः धर्मेणार्थस्योपार्जनं कृत्वा उपार्जितस्य अर्थस्य भागत्रयं कुर्युः। एकस्य भागस्य विनियोगं धार्मिकार्थिककार्याणां सम्पादने द्वितीयस्य भागस्य कामविषयकावश्यकतानां पूर्त्यै तथा भागत्रयस्यार्थस्याभिवृद्धौ च कुर्युः। अनेन न हि आगमिष्यति काचित् आर्थिकसमस्या जीवनयापनमपि सुकरो भविष्यति।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे अर्थविषयको विचारः'** नाम सप्तत्रिंशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

# अथाष्टात्रिंशोऽध्यायः
# यजुर्वेदे कामविषयको विचारः

कामस्तृतीयः पुरुषार्थः। यथा धर्मार्थौ द्वौ पुरुषार्थौ लोकस्थितेः मुख्यसाधनत्वात् उपादेयौ स्तः तद्वत् कामोऽपि प्राणिनां लोकयात्रायामुपयोगी सुखसामग्रीणां च मुख्यसाधनत्वादत्यन्तोपादेयः वर्तते।

विषयस्येन्द्रियाणां च सम्पर्कात् उत्पन्नो मानसिकानन्द एव कामः। अपेक्षितानां कर्मणां सम्पादनाय अस्माकं नेत्रप्रभृतीन्द्रियाणि सहायकानि सन्ति। यथा नेत्रम् आकर्षकं वस्तु दृष्ट्वा रूपस्यानन्दमनुभवति। कर्णेन्द्रियं मधुरं संगीतं श्रुत्वा शब्दस्यानन्दमनुभवति। क्षुधाशान्तिहेतवे भोजने रसनेन्द्रियम् आहारस्य स्वादग्रहणं कृत्वा रसस्यानन्दमनुभवति। नासिकेन्द्रियं गन्धग्रहणे, त्वगिन्द्रियं शयनकाले शय्यायाः मार्दवमनुभवति। तद्वत् गृहस्थाश्रमस्य जीवने गुह्येन्द्रियं सन्तानप्राप्तुं विषयभोगस्यानन्दमनुभवति।

कामः चित्तस्य संकल्पः। अस्य स्वरूपमत्यन्तसूक्ष्ममनुभवगम्यं च। शरीराणामिन्द्रियाणां च उपयोगिनः ऐहिकाः पारलौकिकाश्चाभिलषिताः पदार्था एव 'कामः पुरुषार्थः' वर्तते। कामसुखस्य प्रधानसुखानि स्त्रीः, पुत्रः, गृहम्, क्षेत्रम्, धनम्, धान्यम्, भक्ष्यम्, भोज्यम्, पानम्, नृत्यम्, गीतम्, वस्त्रम् अलंकारप्रभृतीनि द्रव्याणि च शरीराणामिन्द्रियाणां चोपयोगीनि सन्ति। फलत्वेनेच्छायाः विषयाणि साधनत्वेन इच्छाया विषयाणि च 'कामः' सन्ति।

मानवजीवनस्य मुख्यं फलमस्ति 'तत्त्वज्ञानम्'। तत्त्वज्ञानाय स्वस्थजीवनमत्यन्तमपेक्षितं वर्तते। मानवजीवनं यथा स्वस्थं सुरक्षितं

भवेत् तथैव तत्त्वज्ञानमप्यधिगतं भविष्यति। कामस्य मुख्यं फलमिन्द्रियप्रीतिः नहि केवलमपि तु तस्य प्रयोजनं 'जीवननिर्वाहः', तावन्मात्रं कामः सेवनीयः स्यात् यावन्मात्रेण शरीरं स्वस्थं भूयात्। यथा रसनया तावन्मात्रं रसः, सेवनीयस्स्यात् यावन्मात्रेण शरीरं स्वस्थं भूयात्। जीवनधारणे तत्त्वज्ञाने कामस्यात्यन्तोपयोगः अत एव तस्य गणना पुरुषार्थमध्ये भवति। अतः कामस्य यथार्थफललाभाय विशद् शास्त्रीयं विवेचनं बृहदारण्यकोपनिषदि वर्तते। तद्यथा–

**स ह प्रजापतिरीक्षाञ्चक्रे हन्तास्मै प्रतिष्ठां कल्पयानीति स स्त्रियꣳ ससृजे ताꣳ सृष्ट्वाध उपास्त तस्मात् स्त्रियमध उपासीत स एतं प्राञ्चं ग्रावाणमात्मन एव समुदपारयत्तेनैनामभ्यसृजत॥**[१]

**सा चेदस्मै दद्यादिन्द्रियेण ते यशसा यश आदधामीति यशस्विनावेव भवतः॥**[२]

**स यामिच्छेत् कामयेत् मेति तस्यामर्थं निष्ठाय मुखेन मुखꣳ संधायोपस्थमस्या अभिमृश्य जपेदङ्गादङ्गात् संभवसि हृदयादधिजायसे। स त्वमङ्गकषायोऽसि दिग्धविद्धामिव मादयेमाममूं मयीति॥**[३]

**अथ यामिच्छेद् दधीतेति तस्यामर्थं निष्ठाय मुखेन मुखꣳ संधायापान्याभिप्राण्यादिन्द्रियेण ते रेतसा रेत आदधामीति गर्भिण्येव भवति॥**[4]

**स य इच्छेत् पुत्रो मे शुक्लो जायेत वेदमनुब्रुवीत सर्वमायुरियादिति क्षीरौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै॥**[१]

---

[१] बृ०आ० ६.४.२

[२] बृ०आ० ६.४.८

[३] बृ०आ० ६.४.९

[४] बृ०आ० ६.४.११

**अथ य इच्छेत् पुत्रो मे कपिलः पिङ्गलो जायेत द्वौ वेदावनुब्रुवीत सर्वमायुरियादिति दध्योदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै॥**[2]

**अथ य इच्छेद् दुहिता मे पण्डिता जायेत सर्वमायुरियादिति तिलौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै॥**[3]

**अथ य इच्छेत् पुत्रो मे पण्डितो विगीतः समितिंगमः शुश्रुषितां वाचं भाषिता जायेत सर्वान् वेदाननुब्रुवीत सर्वमायुरियादिति माꣳसौदनं पचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवा औक्षेण वार्षभेण वा॥**[4]

काम एव अजरः, अमरः, आत्मानं जगतः प्रपञ्चे जीवनमरणचक्रे च पातयति। एष एव प्राणिनां जन्ममृत्युरूपबन्धनस्य हेतुः। सदसत्कर्मसु प्राणिनः प्रेरयति तथा समस्तसृष्टेः संचालकः। विश्वे यत् किञ्चिदभवत् यद्भवति यद्भविष्यति च तस्य सर्वस्य कारणं काम एव। यथा–

**कोऽदात् कस्मा अदात् कामोऽदात् कामायादात्।**
**कामो दाता कामः प्रतिग्रहीता कामैतत्ते॥**[5]

आन्तरिककामस्योत्पत्तिः बाह्यकामात् भवति। कर्णादिभिरिन्द्रियैः वारं वारं बाह्यविषयदर्शनेन श्रवणेन च विविधान् विषयान् प्रति चेतः आकृष्टो भवति तदनन्तरं तानि विषयाणि चित्ते अंकितानि भवन्ति। आन्तरिककामस्योत्पत्तेः प्रारम्भः इन्द्रियाणां सम्पर्कैर्भवति।

---

[1] **बृ०आ० ६.४.१४**

[2] **बृ०आ० ६.४.१५**

[3] **बृ०आ० ६.४.१७**

[4] **बृ०आ० ६.४.१८**

[5] **शु०य० ७.४८**

आन्तरिककामस्योत्पत्तेः कारणं बाह्यविषयाणि सन्ति। आन्तरिककाममवरोद्धुं बाह्येन्द्रियाणामेव अवरोधः परमावश्यकः। बाह्यकामानामवरोधेन आन्तरिककामस्यावरोधः सुकरः। एतदर्थं शुद्धं ब्रह्मचर्यपालनं परमावश्यकम्। सात्त्विकजीवनवृत्तेः परिपालनाय ब्रह्मचर्यपरिपालनमावश्यकम्। यथा– बाह्यानामाभ्यन्तराणां च सत्यानां पूर्णबोधाय लोकमंगलस्य हेतवे साधनासमाधिसिद्ध्यर्थं च कारणं ब्रह्मचर्य एव। यथा–

**दीर्घसत्रं वै एष उपैति, यो ब्रह्मचर्यमुपैति।।**[१]

**अथ यद् आचार्यवचसं करोति, यद् आचार्याय कर्म करोति। स एनम् आविशति।।**[२] तथा च–

**तमेवं विद्वांसम्, एवं चरन्तं सर्वे वेदाः आविशन्तिज, यथ्ज्ञाह वै अग्निः समिद्धो रोचते, एवं हवै सस्नात्वा रोचते यः एवं विद्वान् ब्रह्मचर्यं चरति।।**[३]

ब्रह्मचर्यपालनकर्तृणां जनानां सर्वाः विद्याः प्रशस्ताः भवन्ति, यथा प्रज्वलिताग्निः प्रकाशते तद्वत् ब्रह्मचर्यं मानवेषु दीप्यते। स्नातकोपयुवकः निश्चितरूपेण प्रकाशते। कालोऽपि ब्रह्मचारीणां पार्श्वे नहि व्रजति।

**ब्रह्म वै मृत्यवे प्रजाः प्रायच्छत् तस्मै ब्रह्मचारिणं एव न प्रायच्छत्।।**[४]

---

[१] **शतपथ० १६.३.३.१**

[२] **शतपथ० ११.३.३.६**

[३] **शतपथ० ११.३.३.७**

[४] **शतपथ० ११.३.३.१**

कामस्य कृते कामिनां संगतिः बहुभयात्मिका भवति। साधारणपुरुषास्तु वशवर्तिनः भवन्त्येव वीतरागतपस्विमहर्षिसौभरेः चित्तेऽपि मत्सरूदम्पतिनां कामोपभोगे प्रवृत्तं दृष्ट्वा कामस्य महती वासना जागृता चाभवत् ततः सः महात्मा बाह्यविषयाणां विषयीजनानां कुसंगस्य प्रभावं ज्ञात्वानुभवं च कृत्वा उवाच – मुमुक्षवः स्वहितं कामयमानाः कुसंगत्याः प्रभावेण सावधानाः भवन्तु। आन्तरिकः कामः अत्यन्तदुःखदः। कामासक्तिवशात् बाह्यकामेषु एतादृशः दृढाभिनिवेशो भवति।

यथा ते काममात्रस्य पुरुषार्थत्वं मन्यन्ते। कामस्य प्राप्त्यर्थमर्थोऽपेक्षितो वर्तते। एतदर्थं ते सततं येन केन प्रकारेण अर्थप्राप्तये कर्तव्यमकर्तव्यञ्च कुर्वन्ति। अहर्निशं ते कामस्य तृप्त्यर्थं अर्थमनर्थं च कुर्वन्ति। एतादृशाः मानवाः कुसंगतिप्रभावेण अभ्युदयस्य निःश्रेयसस्य च मार्गं परित्यज्योत्तरोत्तरमधोगतिं प्राप्नुवन्ति। कामिनां संगतेः परित्याग एव अभ्युदयस्य निःश्रेयसश्च मार्गम्। कामलोलुपानां संगतिः सर्वथा वर्जनीया। तेषां गोष्ठीषु गमनं तेषामभिमतानां वस्तूनां संग्रहश्च मा करणीय इति। चेतसां विषयानां च एकीकरणे कृते सति विषयाणां परित्याग दुष्कर इति प्रबलकामवशवर्तिजीवः कदापि जितेन्द्रियः नहि भवितुं शक्नोति। अजितेन्द्रियः पुरुषः बहुषु यातनासु पतति निरन्तरमनर्थं भजते च। कामस्य प्रसिद्धो नाम एव मन्मथः।

सः दधिवत् प्राणिनां मनांसि दृढात् मथ्नाति गर्ते दुःखस्य दावाग्नौ च पातयति। विद्यया ज्ञानेन च अविद्यायाः निवृत्तिर्भवति। विषयस्य विषयीविभागस्य च नष्टे सति स्वाभाविकस्य परिपूर्णस्याद्वैतानन्दस्यानुभूतिर्भवति। यथा–

युवा स्यात् साधुयुवाध्यापक आशिष्ठो दृढिष्ठो बलिष्ठस्तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्। स एको मानुष आनन्दः। ते ये शतं मानुषा आनन्दाः॥[१]

स एको मनुष्यगन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं मनुष्यगन्धर्वाणामानन्दाः। स एको देवगन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं देवगन्धर्वाणामानन्दाः। स एकः पितॄणां चिरलोकलोकानामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं पितॄणां चिरलोकलोकानामानन्दाः। स एक आजानजानां देवानामानन्दः॥[२]

श्रोत्रियस्य चाकामहतस्य। ते ये शतमाजानजानां देवानामानन्दाः। स एकः कर्मदेवानां देवानामानन्दाः। ये कर्मणा देवानपियन्ति। श्रोत्रियस्य चाकामहतस्य। ते ये शतं कर्मदेवानां देवानामानन्दाः। स एको देवानामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं देवानामानन्दाः। स एक इन्द्रस्यानन्दः॥[३]

श्रोत्रियस्य चाकामहतस्य। ते ये शतमिन्द्रस्यानन्दाः। स एको बृहस्पतेरानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं बृहस्पतेरानन्दाः। स एकः प्रजापतेरानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्दः। श्रोत्रियस्य चाकामहतस्य॥[४]

---

[१] तैत्तिरीयोपनिषद् २.८.१

[२] तैत्तिरीयोपनिषद् २.८.२

[३] तैत्तिरीयोपनिषद् २.८.३

[४] तैत्तिरीयोपनिषद् २.८.४

याः सर्वाः कामनाः हृदयाश्रिताः सन्ति ताः सर्वा यदा हृदयात् निःसरन्ति तदैव पुरुषः स्वस्थः भवति तदा सः अमरत्वं लभते तथा अनेन शरीरेण सह ब्रह्मभावस्य आनन्दमनुभवति।

कामः मनुष्याणां बुद्धिं नानाविषयेषु पातयति छिन्नं भिन्नं च विदधाति। यदा हृदयात् सर्वाः कामनाः सर्वाणि विषयाणि च बहिः निःसरन्ति तेन मनुष्याणां बुद्धिः स्थिरा भवति, तथा च शाश्वतस्यानन्दस्य प्राप्तिर्भवति।

कामः अनादिकालात् मनुष्याणां शरीरेषु निश्चलो भूत्वा निवसति। तस्य हृदयात् निःसरणं नास्ति। एतत् साधारणं कार्यमत्यन्तकठिनं चास्ति। विषयाणां सहसा परित्यागोऽसम्भवः।

यदि कश्चित् जनः विषयत्यागं करोति तदा स त्यागः श्मशानवैराग्य इव अस्थायी त्यागः। आवेशात् विषयाणां परित्यागः मध्ये मध्ये दीनतायाः आमन्त्रणमिव भवति। विषयेभ्यः सन्तापः मोहश्च जायते। अतः शनैः शनैः एतेषां परित्यागः विधातव्यः। आयासेन च सिद्धिर्भविष्यति। विषयाणां परित्यागस्य सर्वश्रेष्ठोपायो ईश्वराश्रयः भवतीति। यथा–

**येऽन्येऽरविन्दाक्ष विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः।**
**आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोऽनादृतयुष्मदङ्घ्रयः॥**[१]

अभिप्रायस्तु भगवदाश्रयं गृहित्वा एव शनैः शनैः विषयेभ्यः विरक्तिः विधातव्या। विषयाणामुपेक्षा कृते सति विषयान् प्रति उत्सुकतायाः ह्रासो भवति, तथा च मनसि विषयाणां संकल्पस्याभावो जायते। शनैः शनैः निष्कामभाव आपद्यते।

---

[१] **भा०पु० १०.२.३२**

अत्र प्रयासः अभ्यासश्च माध्यमः। ईश्वरस्याश्रयत्वात् अन्तःकरणे विद्यमानानां दोषाणां निवृत्तिः ततश्च परमशान्तिः इति। भगवदनुरागोऽपि काम एव, एवञ्च लौकिकविषयाणि परित्यज्य भगवदनुरागरूपे कामे मतिः भूयात् चेत् तर्हि लौकिककामनिवृत्तिर्भवति।

अन्तःकरणस्य शुद्धौ सत्यां केवलं भगवद्विषयिणी कामना प्रबला भवति तया उत्तरोत्तरं भगवद्विषयकस्य संकल्पस्य चिन्तनं मननं ध्यानं स्मरणं च प्रचलति। ततः जीवस्य सांसारिकबन्धनाभावः मोक्षस्य हेतुश्च। यथा गोपाङ्गना–मीरा–सूरदास–तुलसीदासप्रभृतयः महापुरुषाः भगवद्विषयक– कामनायैव विश्ववन्दिताः पूजिताश्च भवन्ति। यथा –

**कामादिभिरनाविद्धं प्रशान्ताखिलवृत्ति यत्।**
**चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचित्॥**[१]

गृहस्थाश्रमगमनकाले आचार्योऽन्तेवासिनमुपदिशति। गृहस्थाश्रमे आगन्तुकामः साधारणः स्नातको न हि सः अमोघमेधाशक्तिसम्पन्नः महामानव इति।

**वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्।**[२]

**देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि। तानि**

---

[१] **भा०पु० ७.१५.३५**

[२] **तैत्तिरीयोपनिषद् १.११.१**

**सेवितव्यानि। नो इतराणि। यान्यस्माकꣳ सुचरितानि। तानि त्वयोपास्यानि॥**[1]

प्राणिनां कामस्य प्रवृत्तिः स्वाभाविकी एव अत्र नास्ति किञ्चित् कारणम्। कामे प्रवृत्यर्थं शास्त्रेषु नास्ति कश्चित् विधिः। रागतः प्राप्तां स्वेच्छामयपाशविकीं प्रवृत्तिमवरोधनाय नियमैः मर्यादितार्थो विवाहः यज्ञश्च विधिः वृद्धाः कथितवन्तः, ते मर्यादानियन्त्रितं कृतवन्तश्च। सर्वे मानवाः जन्मतः संसारस्य विषयभोगेषु प्राणेषु सम्बन्धिजनेषु च स्वयमेव आसक्ताः भवन्ति।

एषा आसक्तिः तेषामात्मोन्नतौ बाधिका अनर्थस्य कारणञ्च भवति। दुःखस्य निवृत्तिः तथा सुखस्य प्राप्तिरेव मानवानां सर्वाधिकमभिलाषं विद्यते। सुखस्य आत्मनश्च एकैवलक्षणत्वात् आत्मनः सुखस्य च एकता विद्यते। सुखम् आत्मा च द्वौ निरुपाधिकस्य निरतिशयस्नेहस्य च आस्पदौ वर्तेते। सुखम् आत्मनः स्वरूपमेवास्ति। सुखार्थं यदा प्राणिनामन्तःकरणं शान्तं स्वस्थं निश्चलं अन्तर्मुखं सत्त्वात्मकञ्च भवति तदैवान्तःकरणे वास्तविकानन्दस्य रसस्य चाभिव्यक्तिर्भवति। तदेव लौकिकं सुखम् ''कामः'' इति। यथा–

**काम एव यस्यायतनꣳ हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात् सर्वस्यात्मनः परायणꣳ स वै वेदिता स्यात्।**[2]

तथा च–

**इदꣳ हविः प्रजननं मे अस्तु दशवीरꣳ सर्वगणꣳ स्वस्तये। आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि। अग्निः प्रजां बहुलाम्मे करोत्वन्नं पयो रेतो अस्मासु धत्त॥**[1]

---

[1] **तैत्तिरीयोपनिषद् १.११.२**

[2] **बृहदारण्यकोपनिषद् ३.९.११**

तथाहि – धर्मानुष्ठानाय अर्थोपार्जनाय च शरीरस्य भरणं पोषणं चात्यन्तमावश्यकम्। जीवनधारणाय च कामस्य शास्त्रानुकूलं यथोचितं सेवनमेव शोभनम्। ग्राम्यसुखस्य विषयसुखस्य चानुभवानन्तरमेव वैराग्यमायाति। स्वतः प्राप्तभोगानां त्यागोऽवहेलना वा विरक्तजनानामपि अनुचितम्। यथा–

**उद्यतस्य हि कामस्य ऽतिवादो न शस्यते।**
**अपि निर्मुक्तसङ्गस्य कामरक्तस्य किं पुनः॥**[२]

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे कामविषयको विचारः'** नाम अष्टात्रिंशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

---

[१] **शु०य० १९.४८**

[२] **भा०पु० ३.२२.१२**

# अथैकोनचत्वारिंशोऽध्यायः

## यजुर्वेदे मुक्तिविषयको विचारः

मुच्लृधातुतः मुक्त्यर्थकोऽर्थात् यत्र सर्वविधदुःखप्रहाणः स मोक्षः। सर्वोत्तमः सर्वसुखमयः सर्वप्रियः निरवधिकाखण्डानन्दमयः, सरसः पुरुषार्थः, मोक्षः, अस्यैवापरनाम मुक्तिः। मोक्ष एव समस्तपुरुषार्थानां समस्तसुखानाञ्च सम्राट् इति। सांसारिकसुखस्यानुभवकाले प्राणिभिः यानि यानि वस्तूनि सुखमयानि प्रतीतानि भवन्ति तानि सर्वाणि दुःखमयानि एव [1] । परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः। तथा च श्रुतिः -

**तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माभयꣳ रूपम्। तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमेवमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरं तद् वा अस्यैतदाप्तकाममात्मकाममकामꣳ रूपꣳ शोकान्तरम्॥**[2]

अन्यच्च-

**स यो मनुष्याणाꣳ राद्धः समृद्धो भवत्यन्येषामधिपतिः सर्वैर्मानुष्यकैर्भोगैः सम्पन्नतमः स मनुष्याणां परम आनन्दोऽथ ये शतं मनुष्याणामानन्दाः स एकः पितृणां जितलोकानामानन्दोऽथ ये शतं पितृणां जितलोकानामानन्दाः स एको गन्धर्वलोक आनन्दोऽथ ये शतं गन्धर्वलोक आनन्दाः स एकः कर्मदेवानामानन्दो ये कर्मणा**

---

[1] **योगसूत्रस्य पुरुषार्थचतुष्टयम्**

[2] **बृ०उ० ४.३.२१**

**देवत्वमभिसम्पद्यन्तेऽथ ये शतं कर्मदेवानामानन्दाः स एकः आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ ये शतमाजानदेवानामानन्दाः स एकः प्रजापतिलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ यै शतं प्रजापतिलोक आनन्दाः स एको ब्रह्मलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथैष एव परम आनन्द एष ब्रह्मलोकः सम्राडिति होवाच याज्ञवल्क्यः सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीत्यत्र ह याज्ञवल्क्यो बिभयाञ्चकार मेधावी राजा सर्वेभ्यो मान्तेभ्य उदरौत्सीदिति।।**[१]

सांसारिकं सुखं परिणामतः विनाशशीलं भवति, तच्च दुःखरूपमिति। विषयसुखस्य नाशः अवश्यम्भावी विद्यते। विनाशे प्राप्ते सति महद्दुःखमापद्यते। मानवानां मनसि येषां येषां विषयाणां प्रति अनुराग उत्पद्यते तत्तद् विषयाणां विनष्टे सति स एवानुरागः शोकरूपपारावारे निपतति। अत एव विद्वद्भिः भगवच्चरणारविन्देऽनुरागः विधातव्यः। स एव अनुरागः मोक्षमापद्यते। नास्ति केवलं नरके दुःखं परञ्च पतनस्य दुःखं स्वर्गेऽपि विद्यते। जीवः वारं वारं गर्भमागच्छति जन्म गृह्णाति च।

यदा कदा गर्भे विनश्यति यदा कदा जन्मकालमेव मृत्युं लभते। य उत्पन्नः स बाल्यावस्थायां युवावस्थायामथवा जराग्रस्तो भूत्वा वृद्धावस्थायां म्रियते, यावन्मात्रं जीवति तावन्मात्रं दुःखमेव अनुभवति।

द्रव्याणामुपार्जने रक्षणे विनाशे च सति, इष्टमित्राणां विपत्तिग्रस्ते सति नानाविधदुःखं मनुष्याणां सम्मुखे वारं वारं समागच्छति। स्त्रीः, पुत्रः, मित्रम्, अर्थः, गृहम्, धनसम्पत्तिः क्षेत्रमितिप्रभृतीनि सर्वाणि भौतिकानि वस्तूनि दुःखदायकानि सन्ति।

---

[१] **बृ०उ० ४.३.३३**

एतेषां दुःखसमूहानां शान्त्यर्थं महौषधिर्भवति ''भगवत्प्रीतिः'' इति। अत एव विवेकिनः पुरुषाः भगवत्प्राप्त्यर्थं सततं यतन्ते। तेषां प्राप्तेः साधनं ज्ञानं कर्म च वर्तते। यथा–

**अन्धन्तमः प्रविशन्ति येसम्भूतिमुपासते।**
**ततो भूय इव ते तमो यऽउ सम्भूत्याᳬं रताः॥**[1]
**सम्भूतिञ्च विनाशञ्च यस्तद्वेदोभयᳬं सह।**
**विनाशेन मृत्युन्तीर्त्वा सम्भूत्त्यामृतमश्नुते॥**
**अन्धन्तमः प्रविशन्ति येविद्यामुपासते।**
**ततो भूय इव ते तमो य उ विद्यायाᳬं रताः॥**[2]
**विद्याञ्चाविद्याञ्च यस्तद्वेदोभयᳬं सह।**
**अविद्यया मृत्युन्तीर्त्वा विद्ययामृतमश्नुते॥**[3]

प्रयत्नं विनापि दुःखानि स्वयमेव प्राप्तानि भवन्ति। तद्वत् कर्मणां फलस्वरूपे अचिन्त्यगतिकालस्य प्रेरणया सर्वेभ्यः सर्वत्र स्वभावतः प्राप्तानि भवन्ति। सुखैः किं प्राणिनां कल्याणम्। हृदये द्वैतभावस्य विराजमानत्वात् प्राणिनः भयात् निवृत्तिं न लभन्ते।

अतः हृदयात् द्वैतभावं निष्काश्य अद्वयेन परमाननदमयेन परमात्मना सह एकीभावस्य सम्प्राप्तिरेव मानवजीवनस्य सर्वोत्तमं लक्ष्यमस्ति। यदा मानवीयसत्तायाः भगवत्सत्तया सह व्यापकमेकीभावं च प्राप्तं भवति तदैव कैवल्यं परमपदं स्वराज्यप्राप्तिर्वा भवतीति कथ्यते।

अत्र नास्ति कञ्चिद्दुःखम्। सर्वेषां दुःखानां संसर्गस्याभावो भवति। अथवा सुखिनो भूत्वा स्वस्यानन्दमयस्य स्वरूपस्य साक्षात्कारं कृत्वा परमात्मना सह अभिन्नत्वं लभते जीवः। एष एव मोक्षः मुक्तिः

---

[1] **शु०य० ४०.९**
[2] **शु०य० ४०.११-१२**
[3] **शु०य० ४०.१४**

निर्वाणं परमं पदमिति। मुख्यः पुरुषार्थः मोक्ष एव। मोक्षस्य प्राप्तये एव त्रिवर्गस्यापेक्षा भवति। मुख्यपुरुषार्थे मोक्षे उपयोगित्वात् त्रिवर्गमपि लोके जनाः पुरुषार्थं कथयन्ति। धर्मः अर्थः कामः एते त्रयः पुरुषार्थाः साक्षात् परम्परया वा मोक्षस्य साधनानि सन्ति। मुख्यः पुरुषार्थस्तु मोक्ष एव। अतः लोके मोक्षः परमपुरुषार्थः। यथा–

**प्र तद्वोचेदमृतन्नु विद्वान् गन्धर्वो धाम विभृतङ्गुहा सत्।**
**त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुः पितासत्॥**[१]

मुक्तौ प्राप्तायां सत्यां जीवानां दुःखपरम्परारूपसम्पूर्णानर्थानां निवृत्तिर्जायते। अतः मुक्तिरेव परमपुरुषार्थः सैव मानवजीवनस्यान्तिमं लक्ष्यमिति। तदैव जीवानां सर्वदुःखस्य निवृत्तिः। स्वर्गं प्राप्य पुनः मृत्योः भयभीतः जीवः भवति, कारणं स्वर्गफलमल्पकालिकम्।

जीवस्य तु निश्चितकल्याणं मुक्तौ प्राप्तायां सत्यां भवति सैव मोक्षः निःश्रेयस इति। स च जीवस्य सर्वोत्तमं हितम् अभीष्टफलमिति। शरीरस्योपभोगार्थं प्राप्ताः धर्मार्थकामपुरुषार्थाः सदैव आधिव्याधिप्रभृतिभिः सांसारिकैर्दुःखैः आच्छादिताः इति अत्र नास्ति आत्यन्तिकसुखम्।

अतः अक्षयफलमविनाशिसुखं निःश्रेयस एव। स्त्री पुत्रः धनधान्यप्रभृति– भौतिकसुखानि क्षणिकानि सन्ति। एतादृशानि सुखानि यदा कदा दुःखपारावारे परिणतानि भवन्ति। आत्मतत्त्वस्य वास्तविकं ज्ञानं सर्वासां चेष्टानां सर्वथा निवृत्तिरेव परमपुरुषार्थमुक्तिरेव।

सांसारिकं सुखं नास्ति पुरुषार्थः। पुरुषार्थस्तु आत्मतत्त्वस्य वास्तविकं ज्ञानमेव। जीवस्य परमात्मनि विलीने सति सदा सर्वदा स्थायी आनन्दानुभवं भवति। सूक्ष्मदर्शिनः विवेकिनः सांसारिकसुखस्य दुःखस्य च निवृत्तिमार्गस्याश्रयं गृह्णन्ति। यथा–

---

[१] **शु०य० ३२.८**

**स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा। यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त॥**

**परीत्य भूतानि परीत्य लोकान् परीत्य परीत्य सर्वाः प्रदिशो दिशश्च। उपस्थाय प्रथमजामृतस्यात्मनात्मानमभिसंविवेश॥**

**परि द्यावापृथिवी सद्य इत्वा परि लोकान्परि दिशः परि स्वः। ऋतस्य तन्तुं विततविचृत्य तदपश्यत्तदभवत्तदासीत्॥[१]**

परमपुरुषार्थस्य मोक्षस्य मुक्तेर्वा ज्ञानं प्रत्यक्षादिप्रमाणैर्न भवति। मुक्तिविषयकं ज्ञानं तु शास्त्रादेव भवति। शास्त्राणि एव परमात्मतत्त्वस्य मोक्षस्य वा व्याख्यानं कुर्वन्ति।

**मायां न सेवे भद्रं ते न वृथा धर्ममाचरे।**
**शुद्धभावं गतो भक्त्या शास्त्राद् वेद्भिर्जनाद्रनम्॥[२]**

प्राणिनां शरीरस्य रचना पुण्यैः पापैश्च भवति। पुण्यस्य फलं सुखं पापस्य फलं दुःखम् इति। शरीरे विद्यमाने सति सुखस्य दुःखस्य च नास्ति निवृत्तिः। सम्पूर्णानर्थानां सम्पूर्णदुःखानां चाविद्या (अज्ञानम्) एव जननी वर्तते। सम्पूर्णज्ञानस्य संसारस्य च मूलमिति। अविद्यायाः विनाशस्य विद्या आत्मज्ञानमेव कारणम्। पापपुण्यस्य कारणं रागद्वेषादिदोषाः सन्ति।

ब्रह्मात्मकाज्ञानेनायं दोष उत्पद्यते। अनेनैव कुमतिः जीवः मोहान्धकारेण आवृतं भूत्वा पंचभूतात्मके देहे ''अहम्'' मम च दृढ़भावनया आवृतः नानारूपानर्थमुत्पादयति। दुःखं चानुभूयते। जीवात्मनः परमात्मनश्च यथार्थस्वरूपं ज्ञात्वा अनवरतं परमात्मनः चिन्तनेन सांसारिकः शोकः मोहः रागः द्वेषश्च नश्यन्ति। यथा–

---

[१] **शु०य० ३२.१०-१२**

[२] **महाभारतम् ६८.५**

**यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः।**
**तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥**

**स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳशुद्धमपापविद्धम्। कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः॥**[१]

यदा मनुष्यः रागद्वेषयोः भावं त्यजति, समदर्शी भवति, भगवन्मयदृष्टिर्भवति च तदैव सर्वा दिशः तस्मै सुखरूपाः भवन्ति। जीवः मोदते च।

**वेदाहमेतं पुरुषं महान्तमादित्यवर्णन्तमसः परस्तात्।**
**तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेयनाय॥**

**प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते।**
**तस्य योनिं परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा॥**[२]

मायामोहरागद्वेषादीनां बन्धने बद्धस्य जीवस्य भगवत्प्राप्तेः स्वाभाविकोऽधिकार इति। तत्प्राप्तये भगवद्विषयकनिश्चयसम्पन्नसाधक एव पारलौकिकफलस्य कामनां करोति।

अतः पारलौकिकफलवत्सु अनुष्ठानेषु प्रवृत्तिं कुरुते। ततः नरकपतनात् जन्मजन्मान्तरस्य दुःखाद् मुच्यते। ये ज्ञाननिष्ठा वर्तन्ते तेभ्य एव नित्यमोक्षस्य प्राप्तिः शास्त्रेषु कथितं वर्तत इति। द्विधा मुक्तिर्भवति। सद्यो मुक्तिः क्रममुक्तिश्च।

वर्तमानशरीरस्य त्याग एव सद्यो मुक्तिः। अर्चिरादिमार्गद्वारा तत्तल्लोकं गच्छन् ब्रह्मलोकं प्राप्य चिरकालपर्यन्तं दिव्यानां भोगानामनुभवं कृत्वा तत भोगेभ्योऽवसानं प्राप्य पूर्वज्ञानोत्पन्नेन ब्रह्मलोकस्यावसानं प्राप्ते सति ब्रह्मदेवेन सह या मुक्तिः प्राप्यते तस्याः नाम क्रममुक्तिरिति।

---

[१] **शु०य० ४०.७-८**

[२] **शु०य० ३१.१८-१९**

आत्यन्तिकपुरुषार्थसिद्धिश्च द्विविधा सद्योमुक्तिः क्रममुक्तिश्चेति। वर्तमानदेहपतनानन्तरमेव सिद्ध्यति। सद्योमुक्तिः उत्तरमार्गेण गत्वा ब्रह्मलोके चिरं भोगाननुभूय तत्रोत्पन्नस्य ब्रह्मलोकावसाने सिद्ध्यति क्रममुक्तिः।

एतदतिरिक्तं सालोक्यः, स्राष्टिः, सामीप्यम्, सारूप्यञ्च चत्वारो मुक्तेः भेदाः सन्ति। मोक्षरूपपरमतत्त्वस्यान्वेषणायैव न्यायवैशेषिक–सांख्ययोगपूर्वमीमांसा–उत्तरमीमांसाद्यास्तिकदर्शनानां बौद्ध–प्रभृतिनास्तिदर्शनानां च निर्माणमभवत्।

तत्र यद्यपि एतानि आस्तिकदर्शनानि श्रुतिमूलकानि सन्ति परन्तु एतेषां मतेषु विभिन्नता वर्तते। तथापि श्रुतेः लक्ष्यं तु ''आत्मतत्त्वबोध'' इति। अस्य विवेचने एतेषां मतं भिन्नं भिन्नं वर्तते।

अतः श्रुतेः मार्गात् बर्हिर्भूत्वा भिन्नं तात्पर्यं तैः स्थापितम्। वेदान्तदर्शनं तु श्रुतेरनुसरणं कृतवान् अतः सर्वेषु दर्शनेषु तस्य श्रेष्ठस्थानं विद्वद्भिः स्वीकृतम्। अयमेव मोक्षपथस्य मुख्यः प्रदर्शकः।

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः।**
**एवन्त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥**[१]
**विद्याञ्चाविद्याञ्च यस्तद्वेदोभयꣳ सह।**
**अविद्यया मृत्युन्तीर्त्वा विद्ययामृतमश्नुते॥**[२]

वेदान्तदर्शनानुसारमात्मतत्त्वस्य श्रवणं मननं निदिध्यासनं च कृत्वा आत्मतत्त्वस्य साक्षात्कारः कर्तव्यः। आत्मतत्त्वस्य ज्ञाने सति नास्ति कश्चिदवशिष्टः कर्तव्यः ततः मानवजीवनस्य सर्वं लक्ष्यं प्राप्तं जातं भवति। सः ''जीवनमुक्तः'' भवति।

---

[१] **शु०य० ४०.२**
[२] **शु०य० ४०.१४**

केवलं वर्तमानशरीरपर्यन्तमेव तस्य प्रारब्धस्य भोगः विद्यते। प्रारब्धानुसारं वर्तमानशरीरस्य विनष्टे सति सः मुक्तः विदेहमुक्तिरूपकैवल्यं लभते। यथा–

**अमूलमेतद्बहुरूपरूपितं मनोवचः प्राणशरीरकर्म।**
**ज्ञानासिनोपासितया शितेन छित्वा मुनिर्गां विचरत्यतृष्णः॥**[१]

अविद्यायाः विनाश एव एकमात्रपुरुषार्थः। वेदान्तविद्ययैव अविद्यायाः विनाशो भविष्यति। मुक्तिप्राप्तेः मुख्यं साधनमध्यात्मविद्या एव। आत्मज्ञानं विना नास्ति मोक्षः।

एतदर्थं सर्वासामेषणानां त्यागः सर्वथा कर्तव्यः। पितृऋण–ऋषिऋण–देवऋणेति ऋणत्रयैः मुक्तो भूत्वा ईश्वरार्पणबुद्ध्या निष्कामधर्मानुष्ठानेन अन्तःकरणं यथा शुद्धं भवति तद्वद्वेदशास्त्राणि अधीत्य धर्मपूर्वकं पुत्रानुत्पाद्य शास्त्रविधिना यज्ञयागादीनामनुष्ठानं विधाय मोक्षार्थं यतितव्यम्।

**एषो ह देवः प्रतिदिशोनु सर्वाः पूर्वो ह जातः सऽउ गर्भे अन्तः।**
**स एव जातः स जनिष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्वतोमुखः॥**[२]

जीवः शरीरेण सह स्नेहः सहवासः अभिमानश्च विशेषरूपेण विदधाति, एतदेव बन्धनस्य कारणम्, यदा ज्ञानिनः सांसारिकं मायाजालं छित्त्वा परमात्मनः एकत्वं भजन्ते तदा तेषां कालसमुद्रादुद्धारो जायते।

परमात्मनः साक्षात्कारे कृते सति पुनर्जन्मतः मुक्तो भवति। संशयरहितः पुरुषः सुखेन जीवनयापनं कुर्वन् शोकेन मोहेन च रहितो भूत्वा परमात्मानं सततं चिन्तयेत्। यथोक्तम् –

---

[१] **योगसूत्रस्य पुरुषार्थचतुष्टयप्रकरणे**

[२] **शु०य० ३२.४**

**ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः।**
**अनन्येनैव योगेन मां ध्यायन्त उपासते।।**
**तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।**
**भवामि नचिरात्पार्थ मय्यावेशितचेतसाम्।।**[1]

**।। प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ।।**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'यजुर्वेदे मुक्तिविषयको विचारः'** नाम एकोनचत्वारिंशोऽध्यायः।

**।। बलं विष्णोः प्रवर्धताम् ।।**

[1] **गीता० १२.६-७**

# अथ चत्वारिंशोऽध्यायः
# वैश्विकदृष्ट्या यजुर्वेदे पुरुषार्थचतुष्टयस्य समीक्षणम्

पुरुषार्थपदे संयुक्तं पुरुषपदं मनुष्यस्य बोधं कारयति। अत्र पुरुषशब्दस्यार्थः मनुष्यः अर्थात् नरः नारी च। पुरुषशब्दस्य व्युत्पत्तिरस्ति - पुः=पुरं, शरीरं च, पुरि शेते इति पुरुषः। अर्थ्यते प्रार्थ्यते सर्वैः इति अर्थः, अनया व्युत्पत्त्या अभिलषितः विषयः अर्थः कथ्यते। पुरुषाणामर्थः पुरुषार्थः, अथवा पुरुषैः अर्थ्यते इति पुरुषार्थः। अनया व्युत्पत्त्या मनुष्यः यस्य फलस्य इच्छां करोति स एव पुरुषार्थः। वेदशास्त्रादिषु पुरुषस्यार्थात् मनुष्यजीवनस्य सर्वेषु अभीष्टेषु मुख्यमभीष्टं केवलं चत्वारः एव सन्ति। अत एव मनुष्यस्य यः प्रधानाभिलषितः विषयः स एव पुरुषार्थः। तानि अभिलषितानि तत्त्वानि तु - धर्मार्थकाममोक्षाः। एते चत्वारः पुरुषार्थाः, श्रीमद्भागवते भगवता वेदव्यासेन कथितं यत् जगति धर्मार्थकाममोक्षरूपाः चतुर्वर्गाः समस्तपुरुषाणां सम्पूर्णचेष्टानां लक्ष्यमस्ति-

**पुंसाममायिनां सम्यग्भजतां भाववर्धनः।**
**श्रेयो दिशत्यभिमतं यद्धर्मादिषु देहिनाम्॥**[1]

परमात्मना प्राणिनां कृते बुद्धीन्द्रियमनःप्राणानां रचना कृता, एतेषु प्राणद्वारा जीवनधारणमिन्द्रियद्वारा वेदशास्त्राणां श्रवणम्, मनसा तत्त्वचिन्तनमेवं मननेन बुद्ध्या वा तत्त्वस्य निश्चयं कृत्वा आत्मनः साक्षात्कारः कर्तुं शक्यते -

---

[1] **श्रीमद्भागवते ४.८.६०**

**बुद्धीन्द्रियमनः प्राणान् जनानामसृजत् प्रभुः।**
**मात्रार्थं च भवार्थं च आत्मनेऽकल्पनाय च॥**[१]

उपर्युक्तेषु चतुर्षु उद्देश्येषु अन्तिममुद्देश्यं वर्तते अकल्पनाय अर्थात् "कल्पना निवृत्तये मुक्तये इत्यर्थः" इति पूर्णकरणकुशला साधनसम्पत्तिः पूर्णरूपेण तेषु कस्यापि पार्श्वे विद्यमाना नास्ति। अमुमेव अपूर्णतां दृष्ट्वा विधातुः सन्तोषः न जातः। तदा विधात्रा पुरुषस्य आविर्भावः कृतः, यं दृष्ट्वा विधाता अत्यधिकः प्रसन्नो जातः। यतो हि पुरुषस्याभ्यन्तरे विधातारं जीवसृष्टेः मुख्यं प्रयोजनमर्थात् जीवस्य तमपूर्णतां दूरीकृत्वा ईश्वरस्य साक्षात्कारकरणयोग्या बुद्धिः विधात्रा दृष्टा। तदेवाह –

**सृष्ट्वा पुराणि विविधान्यजयाऽऽत्मशक्त्या**
**वृक्षान् सरीसृपपशून् खगदंशमत्स्यान्।**
**तैस्तैरतुष्टहृदयः पुरुषं विधाय**
**ब्रह्मावलोकधिषणं मुदमाप देवः॥**[२]

अस्मात्कारणात् पुरुष एव धर्मार्थकाममोक्षोपार्जितुमधिकारी अस्ति। तथा मनुष्ययोनिः सर्वयोनिषु श्रेष्ठा योनिरस्ति। मनुष्येषु आत्मकल्याणाय उत्कृष्टं साधनं विद्यमानमस्ति। मनुष्येषु आत्मसाक्षात्कारकरणयोग्या बुद्धिरस्ति। तस्मादेव सृष्टिकर्त्रा स्वरचितसृष्टौ मनुष्यदेह एव सर्वाधिकप्रिय इति मनुते।

**धर्मः** – पुरुषस्य प्रथमाभिष्टः धर्म एवास्ति। भगवता वेदव्यासेन मनुष्यस्य उन्नतिः, अवनतिश्च धर्माधर्मयोः फलमिति कथितमस्ति। तदाह–

---

[१] **श्रीमद्भागवते १०.८७.२**

[२] **श्रीमद्भागवते ११.९.२८**

**वारणाद् धृतिरित्यर्थाद् धातो धर्मः प्रकीर्तितः।**
**अधारणेऽमहत्त्वे च, अधर्म इति चोच्यते।।**[1]

महर्षिकणादेन धर्मादुत्पन्नस्य फलस्योपरि दृष्टिं स्थापयित्वा एवं प्रकारेण धर्मस्य लक्षणं कृतम्– **"यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः"**[2] इति। अर्थात् येन मनुष्याय परमान्दन्दस्य, सर्वोच्चलक्षस्य भगवतः प्राप्तिः तथा मोक्षसिद्धिर्भवति स एव धर्म कथ्यते। महर्षिजैमिनिना धर्मस्य प्रमाणे फले च दृष्टिं प्रदर्श्य अनेन प्रकारेण लक्षणं कृतम् – **"चोदनालक्षणोऽर्थो धर्मः"**[3] इति। अर्थात् मनुष्यस्य सम्पूर्णाभिष्टसिद्धये वेदप्रतिपादितः साधनविशेष एव धर्मः कथ्यते। महर्षिवेदव्यासेन **"ध्रियतेऽनेन इति धर्मः"** इति एवं प्रकारिकां व्युत्पत्तिं हृदये सन्निवेश्य – धारणात् धर्म इति। अर्थात् यः प्राणिनां धारणं पोषणं च करोति, यः सर्वेषामाधारः स एव धर्मः एतादृशं लक्षणं विहितम्।

ऋषिभिः स्वस्य दिव्यतपोबलादेवं ज्ञानोत्कर्षद्वारा च धर्मस्य साक्षात्कारः कृतः। धर्मं प्रकाशयितुमेव सम्पूर्णानि मन्त्राणि वेदाः वेदाङ्गानि च वर्तन्ते। पूर्वकाले ऋषिभिः यं पुरुषं धर्मस्य साक्षात्कारः स्वयं भवितुं न शक्नोति स्म, तस्य कृते मन्त्राणामुपदेशः कृतः। तदनन्तरं यदा जनाः अल्पज्ञाः, अल्पशक्तिमन्तः तथा आलस्ययुक्ताः भवन्ति तदा पुनः तेषां समुद्धारार्थमृषिभिः धर्मज्ञानाय वेदाङ्गानि प्रणीतानि। भगवान् मनुः कथयति –

**वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।**
**एतच्चतुर्विधं प्राहुः साक्षाद् धर्मस्य लक्षणम्।।**[4]

---

[1] **वायुपुराणम् ५७.५८**
[2] **वैशेषिकसूत्रम् १.१.२**
[3] **जै०सूत्रम् १.२**
[4] **मनु०स्मृ० २.१२**

प्रत्येकस्य व्यक्तेः अभ्युदयस्य निःश्रेयस उन्नतेः मुख्यं साधनं धर्म एव। धर्म एव विश्वस्यास्य आधारः। भगवती श्रुतिः कथयति –

**“धर्मो विश्वस्य जगतः प्रतिष्ठा। लोके धर्मिष्ठं प्रजा उपसर्पन्ति। धर्मेण पापमपनुदति, धर्मे सर्वं प्रतिष्ठितम्। तस्माद् धर्मं परमं वदन्ति” इति।**

**अर्थः** – द्वितीयपुरुषार्थस्य नाम अर्थोऽस्ति। अर्थः तद्वस्तु वर्तते, येन प्राणिनां जीविका प्रचलितुं शक्नोति। अर्थस्य मूलमस्ति आजीविका अर्थात् वृत्तिः। अर्थे एव धर्मकामौ निर्भरौ स्तः। तदाह – **“मनुष्याणां वृत्तिः अर्थः। मनुष्यवती भूमिरित्यर्थः”**[1] इति। अर्थ्यते सर्वैः इति अर्थः अर्थात् यं प्राप्तुमभिलाषा सर्वैः क्रियते, स एव अर्थः कथ्यते। देवर्षिनारदेन प्रोक्तं वर्तते – **“अर्थमूलाः क्रियाः सर्वा यत्नस्तस्यार्जने मतः”**[2] इति। अर्थात् मनुष्यस्य सर्वाः क्रियाः अर्थमूलिकाः सन्ति। अत एव तस्योपार्जने मनुष्येण महान् प्रयत्नः कर्तव्यः। महर्षिशुक्राचार्येण प्रोक्तमस्ति यत् अर्थेन मनुष्यस्य सर्वे पुरुषार्थाः सिद्धाः भवन्ति –

**अर्थाद् धर्मश्च कामश्च मोक्षश्चापि भवेन्नृणाम्।**
**शस्त्रास्त्राभ्यां विना शौर्यं गार्हस्थ्यं तु स्त्रियं विना।।**[3]

**कामः** – तृतीयपुरुषार्थस्य नाम कामोऽस्ति। काम्यते इति काम इति व्युत्पत्त्यनुसारेण विषयेन्द्रियसम्पर्केण उत्पन्नः मानसिकानन्द एव मुख्यतया कामपदेनोच्यते। चक्षुःश्रोत्रनासिकारसनात्वग्भिः ज्ञानेन्द्रियैः स्वप्रधानोद्देश्यपूरणे रूपरसगन्धशब्दस्पर्शानां विषयाणां सम्पर्केण प्राप्तः मानसिकः आनन्दः कामः वर्तते। एषः कामः चित्तस्यैव सङ्कल्परूपः।

[1] **कौ०अर्थशास्त्र० १५.१**

[2] **ना०स्मृ०**

[3] **शु०नी० १.८४**

अस्य स्वरूपमत्यन्तं सूक्ष्ममस्ति। अत एव केवलोऽनुभवगम्यः। तस्मादेव कारणात् महाभारते व्यासेन प्रोक्तम् -

**द्रव्यार्थस्पर्शसंयोगे या प्रीतिरुपजायते।**
**स कामश्चित्तसङ्कल्पः शरीरं नास्य दृश्यते।।**[१]

कामशब्दस्य मुख्यतया त्रयोऽर्थाः भवन्ति - सुखम्, सुखस्य साधनम्, सुखस्य कामना चेति।

**मोक्षः** - चतुर्थः पुरुषार्थः मोक्षः। एषः परमपुरुषार्थोऽपि वर्तते। मोक्षस्यार्थो वर्तते - मुच्यते सर्वैर्दुःखबन्धनैर्यत्र सः मोक्षः। अर्थात् यं पदं प्राप्य जीवः आध्यामिकादिसम्पूर्णदुःखबन्धनात् मुक्तो भवति स एव पदार्थः मोक्षः। तस्मादेव अस्य नाम मुक्तिरपि वर्तते। मुक्तिशब्दोऽपि मुच्लृ मोचने इत्यस्माद्धतोः क्तिन्प्रत्यये सति निष्पद्यते। अस्यार्थो भवति बन्धनयुक्तानां प्राणिनां बन्धनात् मुक्तिः। अज्ञानेन कल्पितस्य समस्तस्यानात्मभावस्य परित्यागं कृत्वा जीवस्य स्ववास्तविकपरमात्मस्वरूपे अर्थात् स्वस्वरूपेणावस्थानमेव मुक्तिरिति। तथा चोक्तम् -

**निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः।**
**मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः**[२] इति।

महर्षिचाणक्येनापि निगदितं यत्- **दुःखानामौषधं निर्वाणम्**[३] इति। अर्थात् निर्वाणमेव सर्वदुःखानामौषधिरस्ति। भगवती श्रुतिः कथयति यत् -

---

[१] **म०भा०वनपर्वः ३३.३**

[२] **श्रीमद्भागवते २.१०.६**

[३] **चाणक्यसूत्रम् १.६९**

**विद्याञ्चाविद्याञ्च यस्तद्वेदोभयꣳ सह।**
**अविद्यया मृत्युन्तीर्त्वा विद्ययाऽमृतमश्नुते॥**[१]

आर्यजीवनस्य चरमं लक्ष्यं धर्मार्थकाममोक्षाणां पुरुषार्थचतुष्टयानां प्राप्तिरेव। यजुर्वेदे पुरुषार्थचतुष्टयस्य व्याख्यायां विभिन्नसिद्धान्तानां प्रतिपादनं वर्तते। आध्यात्मिकपारलौकिकाभ्युदयार्थं यजुर्वेदे मनुष्येण करणीयानि विभिन्नानि कर्माणि, कर्तव्याणाञ्च विधानं कृतं वर्तते। महर्षियाज्ञवल्क्यकात्यायनपारस्करादिभिः ऋषिभिः ऐहिकपारमार्थिकयोरुभयलोके सिद्धिप्राप्त्यर्थमनेकानि साधनानि व्याख्यातानि सन्ति। अस्मिन् अध्याये वयं भाग्यवादिविचारधारायाः विपरीतं यजुर्वेदे उल्लिखितपुरुषार्थप्रधानतायाः विचारधारायाः चिन्तनं कृतवन्तः। यजुर्वेदे मनुष्यः शतवर्षजीविनो भूत्वा पुरुषार्थः प्राप्नुयात् इति प्रेरणा प्रदत्ता अस्ति। भगवती श्रुतिः कथयति –

**शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसन्तनूनाम्।**
**पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः॥**[२]

अर्थात् – हे देवाः! भवान् शतवर्षायुःपर्यन्तमस्माकं समीपे तिष्ठतु, यस्मिन् आयुषि अस्माकं शरीरं जरावस्थायां प्राप्तो भवति, यस्मिन् आयुषि अस्माकं पुत्राः पितरः अर्थात् पुत्रवान् भवन्ति, तादृशस्य गमनशीलस्यायुषः मध्ये खण्डितं न भवेदिति भवन्तः पश्यन्तु। तथा च–

**तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतꣳ श्रुणुयाम शरदः शतं प्र ब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्**[३] इति। देवतानां हितकारी, परमेश्वरस्य चक्षुरूपः सूर्यशरीरः ब्रह्मदेवः पूर्वस्यां दिशि

---

[१] **शु०य० ४०.१४**

[२] **शु०य० २५.२२**

[३] **शु०य० ३६.२४**

उदितो भवति, तं वयं स्वसम्पूर्णायुःपर्यन्तं सदैव पश्येमः। वयं शतवर्षजीविनो भवेमः, शतवर्षपर्यन्तं श्रुणुयामः, शतवर्षपर्यन्तं प्रब्रवामः, शतवर्षपर्यन्तमदीनाः स्यामः, शतवर्षादुपर्यपि वयं योगशक्तिप्रभावेण बहुकालपर्यन्तं जीविनो भवेमः। यजुर्वेदस्य जीवनदर्शनं व्यक्तौ, परिवारे, समाजे, राष्ट्रे, विश्वमानवतायाः सामञ्जस्ये सौमनस्यस्थापनायाञ्च लक्ष्यं स्थापितं करोति। वैदिकपुरुषार्थे तु परिश्रमपूर्वकमर्थोपार्जन एव महत्त्वं प्रतिदितमस्ति। वैदिकपुरुषार्थवादस्य अवधारणायां तु मनुष्यैः सत्कर्म विधातव्यमिति प्रेरणां प्रददाति। तदाह–

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः।**
**एवन्त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥"**[1]

सत्कर्माणि कृत्वैव मनुष्येण शतवर्षपयन्तं जीवनस्य इच्छा कर्तव्या। एवं प्रकारेण हे जीव! तव मुक्तिर्भवितुं शक्नोति। अनेन सन्मार्गेण तु तव मृत्युर्नास्ति, एवम्प्रकारेण कर्मसु रतः सन् जीवनयापने तत्परो भव। जगद्गुरुणा वासुदेवेनापि उपदिष्टम्, तद्यथा –

**ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।**
**लिप्यते न स पापेन पद्मपत्रमिवाम्भसा।**[2]
**आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते।**
**योगारूढस्य तस्यैव शमः कारणमुच्यते॥**[3]

यजुर्वेदे कर्णाभ्यां भद्रं श्रुणुयाम, नेत्राभ्यां भद्रं पश्येम, अङ्गाः सुदृढ़ाः स्थिराश्च भवेम इति उपदेशः प्रदत्तो वर्तते। तद्यथा –

---

[1] **शु०य० ४०.२**

[2] **श्रीमद्भगवद्गीता ५.१०**

[3] **श्रीमद्भगवद्गीता ६.३**

**भद्रङ्कर्णेभिः श्रुणुयाम देवा भद्रं पश्येमाक्षभिर्जयत्राः।**
**स्थिरैरङ्गैस्तुष्टुवाꣳ सस्तनूभिर्व्यशेमहि देवहितँ यदायुः॥**[१]

यजुर्वेदीयमन्त्रेषु यस्य दिव्यवातावरणस्य निर्माणं विहितं वर्तते, तादृशं वातावरणमस्मभ्यं मानवजीवनस्य क्षुद्रतातः दूरं गत्वा देवतासदृशं सुमतिं प्राप्य देवतानां साकं विचरणस्य प्रेरणां प्रददाति। तदेवाह –

**देवानां भद्रा सुमतिर्ऋजूयतां देवानाꣳ रातिरभि नो निवर्तताम्। देवानाꣳ सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे**[२] इति।

अर्थात् देवतानां कल्याणकारिणी श्रेष्ठा बुद्धिः सर्वदैव अस्माकं सन्मुखे भवतु, देवतानां दानं वयं प्राप्नुयामः, वयं देवतानां मित्रतां प्राप्नुयामः, देवताः अस्माकमायुः जीवननिमित्तं वृद्धिं कुर्वन्तु। वैदिकजीवनमीमांसा धर्मार्थयोः, अध्यात्मभौतिकतयोः, श्रेयःप्रेयसोः, इहलोकपरलोकयोः मध्ये समुचितसामञ्जस्यस्थापनाय समन्वयप्रतिष्ठापनाय च बलं प्रददाति।

वैदिकयथार्थवादमाधृत्य राष्ट्रियभावनातः प्रेरितो भूत्वा धर्मसम्राट्करपात्रस्वामिना स्वराज्यस्य अर्चनायाः उपदेशः प्रदत्तः, मातापितरौ सदृशः सुखदायकः तथा पक्षपातशून्यः वैदेशिकराज्यापेक्षया स्वाराज्यस्य वरीयता प्रदत्ता तथा वेदार्थपारिजातसदृशभक्तिज्ञानभावसम्पन्ने ग्रन्थे वेदमन्त्राणां रहस्यमुद्घाट्य वेदभगवता सह सनातनधर्मावलम्बिनां कृते अखण्डस्य, चक्रवर्तेः, सार्वभौमस्य, साम्राज्यस्य च स्थापना तथा स्वदेशं पराधीनतारूपात् पाशात् मुक्तये कामना व्यक्तीकृता। यजुर्वेदस्योपदेशः देशकालसम्प्रदायवर्णलिङ्गकृत्रिमसीमानामतिक्रमणं कृत्वा सर्वजनीनस्य सौहार्द्रस्य, सार्वदेशिकस्य भ्रातृभावस्य तथा दिव्यमनुष्यत्वस्य प्रतिष्ठापनां करोति। बुद्धेरन्यपर्यायः मेधा वर्तते। यजुर्वेदे

---

[१] **शु०य० २५.२१**

[२] **शु०य० २५.१५**

मेधाप्राप्तिविषयका अनेका उदात्तविचाराः व्यक्ताः सन्ति। यथा- **यां मेधां देवगणाः**[१]**, मेधां मे वरुणो ददातु**[२] इत्यादिमन्त्रेषु मनुष्यस्य कृते तस्याः मेधायाः कामना कृता वर्तते, या मेधा अस्माकं पूर्वजैः देवगणैश्च प्राप्ता आसीत् तथा यस्याः उपासना तैः अतीतकाले कृता आसीत्, तादृश्याः मेधायाः प्राप्तये कामना अद्यतनमनुष्यैः कर्तव्या, क्रियते चेत्तर्हि समाजस्य कृते श्रेयस्करं लाभदायकं समुन्नायकं च भविष्यतीति मे मतिः।

वस्तुतः वैदिकसंस्कृतिरेव विश्वसंस्कृतिः। तस्मिन् एव मनुष्यस्य सर्वाङ्गीणं हितं निहितमस्ति, एषा मानवीयसंस्कृतिः यजुर्वेदश्रुतिना प्रथमा संस्कृतित्वेन तथा विश्वं संस्कृतित्वेन च प्रतिपादिता अस्ति - **सा प्रथमा संस्कृतिर्विश्ववारा, स प्रथमो वरुणो मित्रो अग्निः**[३] इति।

अस्याः संस्कृतेः प्रवर्तकः स्वयमीश्वर एव, यस्य व्यवस्थाया अधीने संसारे मानवसृष्टेः प्रसारो भवति, एवं मनुष्यः स्वकल्याणाय पुरुषार्थयुक्तो भूत्वा प्रयत्नशीलो भवति। यजुर्वेदस्यैतां सर्वाभौमशिक्षाम् **अग्ने नय सुपथा राये**[४] इत्यादिमन्त्रद्वारा व्यक्तीकृता। अत्र अग्रण्याः नेत्र्याः अग्निदेवतायाः प्रार्थना कृता वर्तते यत् सा देवता अस्मभ्यमैश्वर्यं तथा वास्तविकसुखप्राप्तये सुपथगामीं करोतु। मनुष्यस्य नेतृत्वकरणे क्षमता तस्यामग्निदेवतायामेव वर्तते, या देवता सर्वविधप्रकारेण दोषरहितः तथा परिपूर्णादर्शयुक्तोऽस्ति। एवम्प्रकारक उपदेशः यजुर्वेदस्य सार्वभौमसत्तायां स्पष्टं प्रमाणं भवति।

यजुर्वेदे राष्ट्रभक्तिः मातृभूमिं प्रति प्रेम इत्यादिविषया अपि चर्चिताः सन्ति। यजुर्वेदोक्तराष्ट्रभावना भौगोलिकसीमातः आबद्धदेशविशेषं

---

[१] **शु०य० ३२.१४**

[२] **शु०य० ३२.१५**

[३] **शु०य० ७.१४**

[४] **शु०य० ७.४३**

प्रति व्यक्ता नास्ति। सा देशभावना सम्पूर्णस्य विश्वस्य कृते वर्तते। वेदे सर्वं विश्वमपि राष्ट्रसंज्ञया अभिहितमस्ति। शुक्लयजुर्वेदस्य द्वात्रिंशदध्याये राष्ट्ररक्षायै भगवती श्रुतिः कथयति– **आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायताम्**[१] इति। राष्ट्ररक्षायां तत्परं राष्ट्रहितैषिनं पुरोहितवर्गं जागृतये सन्देशमपि प्रदत्तं वर्तते– **वयं राष्ट्रे जागृयाम पुरोहिताः**[२] इति। राष्ट्रभक्तेः भूमिमातुराराधनायाः व्यापकः उदात्तः एवं ओजस्वीभावः ब्रह्मसूक्तौ वर्णितः वर्तते। यजुर्वेदस्य उद्बोधनं सम्बोधनं च समग्रमानवतायाः कृते वर्तते। वेददृष्ट्या सर्वे मनुष्याः परमात्मनः दिव्यामृतपुरुषाः भवन्ति। भगवती श्रुतिः कथयति –

**युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोक एतु पथ्येव सूरेः।**
**शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः॥**[३]

यजुर्वेदे व्यक्तः सार्वभौमः भावः तथा तत्र निहितं चिन्तनमस्यां मान्यतायामाधारितं भवति यत् परमात्मना रचिता एषा सृष्टिः मनुष्यस्य सर्वविधकल्याणाय निर्मितास्ति। आध्यात्मिकतायाः सर्वोच्चभावं यदि वयं स्वस्मिन् जागृतं कर्तुं समर्थाः भवेमः तथा **"सर्वभूतेषु चात्मानम्"**[४] इति चरितार्थं कुर्मः तदा सृष्टौ सर्वत्र वयं मधुरतामेवं प्रसन्नतामेव पश्येमः। यजुर्वेदे भद्रसूक्तस्य[5] मन्त्रा अपि सार्वभौमशिक्षां द्योतयन्ति। भद्रसूक्तस्य मन्त्रे वैश्विककल्याणभावनायाः प्रतिपादनं कृतं वर्तते।

यजुर्वेदे रुद्रसूक्तं स्थावरजंगमजगतः समीचिनां प्रतिकृतिं प्रस्तुतं करोति। अत्र सभा अस्ति चेत् सभापतिरप्यस्ति, गणोऽस्ति चेत्

---

[१] **शु०य० २२.२२**

[२] **शु०य० ९.२३**

[३] **शु०य० ११.५**

[४] **शु०य० ४०.६**

[५] **शु०य० १५.३८**

गणपतिरप्यस्ति। सेना अस्ति चेत् सेनापतिः, रथि-रथिः, कुलालः, कर्मकरः, निषादः, श्वानः एवं श्वपतिः, ह्रस्वः एवं वामनः, वृद्धः एवं युवा, ज्येष्ठः एवं कनिष्ठः, पूर्वजः एवं अपरजः, मध्यमः एवं जघन्यः, कवचधारी एवं धर्मधारी, धनुषधारी एवं इषुधारी एते सर्वे चराचरात्मकजगतः एकां विचित्रां प्रतिकृतिं प्रस्तुवन्ति। यजुर्वेदस्य वर्ण्यविषयः सार्वभौमः सार्वकालिकश्च वर्तते। यजुर्वेदे प्रायः मातृभूमिः, मातृभाषा, एवं मातृसंस्कृतिः एताः देवीरूपेण वर्णिताः सन्ति। तथाहि -

**तिस्रो देवीर्हविषा वर्धमाना इन्द्रं जुषाणा जनयो न पत्नीः।**
**अच्छिन्नं तन्तुं पयसा सरस्वतीडा देवी भारती विश्वतूर्तिः॥**[१]

सरस्वत्याः श्रीदेव्या आराधना जगत्कल्याणाय वर्तते, एतत्तत्त्वं मनसि विधाय लक्ष्यीकृत्य च मेधाजननसूक्तौ भगवती श्रुतिः कथयति -

**इदम्मे ब्रह्म च क्षत्रञ्चोभे श्रियमश्नुताम्।**
**मयि देवा दधतु श्रियमुत्तमान्तस्यै ते स्वाहा॥**[२]

यजुर्वेदस्य प्रार्थना मनुष्यजातेः सामूहिकहिताय, अभ्युत्थानाय सर्वविधकल्याणाय च वर्तते। पुरुषसूक्तौ परमपुरुषस्य, विराट्नाम्ना अभिहितस्य परमात्मनः तथा तस्य सृष्टेः रचना प्रतिपादिता वर्तते। द्वात्रिंशदध्याये परमात्मनः दिव्यसत्तायाः वर्णनं वर्तते। राष्ट्रस्य शिक्षा दीक्षा, समाजव्यवस्था, व्यवहारनीतिः, राजनीतिः, दण्डपद्धतिः, शासनपद्धतिः एताः सर्वाः व्यवस्थाः सर्वाङ्गीणरूपेण वेदशास्त्रे एव अन्तर्गताः सन्ति।

**यज्ञः** - वैदिकमन्त्रद्वारा देवतामुद्दिश्य द्रव्यस्य दानमेव यज्ञः। तथाहि - 'मन्त्रैर्देवतामुद्दिश्य द्रव्यस्य दानं यागः' इति। तथा च **द्रव्यं देवता**

---

[१] **शु०य० २०.४३**

[२] **शु०य० ३२.१६**

**त्यागः**[१] इति। द्विजः जन्मत एव ऋषिऋणस्य, देवऋणस्य, पितृऋणस्य च ऋणी भवति। ब्रह्मचर्यद्वारा ऋषिऋणात्, यज्ञद्वारा देवऋणात्, सन्ततिद्वारा पितृऋणात् मुक्तो भवति। अत एव एतेभ्यः ऋणेभ्यः मुक्तिः तथा पुरुषार्थचतुष्टयस्य प्राप्तये तत्तत्प्रतिपादकावश्यानुष्ठेययज्ञानां सम्पादनं कर्तव्यम्। नित्यनैमित्तिकभेदेन यज्ञः द्विविधः। येन कर्मणा विशेषफलस्य प्राप्तिर्भवेन्न वा परन्तु न करणे सति पापमवश्यं भवति तदेव नित्यकर्म कथ्यते। नित्यकर्माकरणे प्रत्यवायः यथा सन्ध्यावन्दनम्, पञ्चमहायज्ञादिकर्म। सन्ध्यावन्दनं तथा पञ्चमहायज्ञकरणेन आत्मोन्नतेः साकं पूर्वजन्मनः पापादपि निवृत्तिर्भवति। "सर्वगृहस्थैः पञ्चमहायज्ञा अहरहः कर्तव्याः" इति, पञ्चमहायज्ञास्तु – ब्रह्मयज्ञः – वेदानां स्वाध्यायमेव ब्रह्मयज्ञः कथ्यते। देवयज्ञः – स्वेष्टदेवस्योपासना एवं परब्रह्मणः निमित्ता कृता पूजा, हवनादिकं च देवयज्ञः कथ्यते।

भूतयज्ञः – कृमिकीटपतङ्गपशुपक्षीणां सेवा भूतयज्ञः कथ्यते। पितृयज्ञः – परलोकगामिनः पितरस्य निमित्तं तर्पणपिण्डदानादिश्राद्धकर्म पितृयज्ञः कथ्यते। मनुष्ययज्ञः – क्षुधापीडिते मनुष्ये गृहे आगते सति तस्य भोजनादिसेवारूपः यज्ञः मनुष्ययज्ञः कथ्यते।

नैमित्तिककर्म अपि श्रौतस्मार्तभेदेन द्विविधं भवति। श्रुतिप्रतिपादितः यज्ञः श्रौतयज्ञः, एवं स्मृतिप्रतिपादितः यज्ञः स्मार्तयज्ञ इति कथ्यते। श्रौतयज्ञे केवलं वैदिकमन्त्राणां प्रयोगः भवति, तथा स्मार्तयज्ञे वैदिकतान्त्रिकपौराणिकमन्त्राणां प्रयोगो भवति। यज्ञयागादयः सात्त्विकराजसिकतामसिकभेदेन त्रिविधाः। वेदोक्तयज्ञादिकर्म यदा आसक्तिसहितं क्रियते तदा तेन स्वर्गलाभो भवति। यदा आसक्तिरहितं क्रियते तेन क्रोधादितः मुक्तो भूत्वा कर्तुः चित्तशुद्धो भवति तथा सः मोक्षस्याधिकारी भवति। सत्कर्मकरणमेव वैदिककर्मकाण्डस्य

[१] **कात्यायनश्रौतसूत्रम् १.२.२**

उद्देश्यमस्ति। वेदोक्तयज्ञादिकर्मकरणे चित्तः शुद्धो भवति तदा ब्रह्मविद्यायाः वार्ता श्रवणेन पुरुषार्थचतुष्टयस्य च प्राप्तिर्भवति।

**कल्याणानां निधानं कलिमलमथनं पावनं पावनानां**
**पाथेयं यन्मुमुक्षोः सपदि परपदप्राप्तये प्रस्थितस्य।**
**विश्रामस्थानमेकं कविवरवचसां जीवनं सज्जनानां**
**बीजं धर्मद्रुमस्य प्रभवतु भवतां भूतये रामनाम॥**[१]

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

इति वत्सकुलावतंसभक्तिमन्मूर्धन्यनानापण्डिताश्रयस्य वैकुण्ठवासिनः श्रीमद्वासुदेवमिश्रस्य प्रपौत्रेण अशेषशास्त्रवीथीसञ्चरणपञ्चाननपण्डितशिरोरत्नस्य स्मृतिशेषस्य श्रीमत्प्रभुनाथमिश्रस्य पौत्रेण अभिषिक्तसमस्तशास्त्रस्मृतिवारिमुखस्य पङ्क्तिपावनस्य उन्मीलितलोकप्रशस्तमार्गस्य पण्डितश्रीनन्दकुमारमिश्रस्य पुत्रेण याज्ञवल्क्यव्यासाद्यनेकपुरस्कारमण्डितेन मिश्रकुलप्रभाप्रदीपेन शास्त्रनिःश्वसितेन लोकलोकानुकर्त्तव्येन विद्यावाचस्पतिना महामहोपाध्यायेन आचार्यदेवेन्द्रप्रसादमिश्रेण विरचिते 'यजुर्वेदे वैश्विकचिन्तनम्' नामके ग्रन्थे **'वैश्विकदृष्ट्या यजुर्वेदे पुरुषार्थचतुष्टयस्य समीक्षणम्'** नाम चत्वारिंशोऽध्यायः।

**॥ बलं विष्णोः प्रवर्धताम् ॥**

[१] **हनुमन्नाटकम् १.१**

# उपसंहारः

भगवच्छ्वासप्रश्वासरूपेण निःसृतानां वेदानां महदर्थगाम्भीर्यमिति, तदर्थविषये बहुधा विप्रतिपत्तिः दृश्यते। संस्कृतवाङ्मयस्य मुख्यरूपेण द्वौ भागौ प्रसिद्धौ, वैदिकसंस्कृतभागस्तथा लौकिकसंस्कृतभागः। वैदिकसंस्कृतभागे संहिताब्राह्मणारण्यकोपनिषदां गणना क्रियते। लौकिकसंस्कृतवाङ्मयारम्भः वाल्मीकिरामायणादेवेति इतिहासविदः मन्यन्ते।

वेदास्तावत् साक्षात्कृतधर्मभिः ऋषिभिः स्वप्रातिभचक्षुद्वारेणानुभूताना- मध्यात्मशास्त्रतत्त्वानां विशालो विमलश्च शब्दराशिः। पितृगणानां देवानां मनुष्याणां च सनातनं चक्षुर्वेद एवास्ति।[1] वैदिकसाहित्यस्य प्राचीनानुसन्धानपरम्परायां सूत्रग्रन्थेषु प्रच्छन्नरूपेण निबद्धानामर्थानां प्रकाशनाय सूक्ष्मविवेचनपुरस्सरं भाष्यम्, वृत्ति-विवृति-व्याख्या-टीका- टिप्पणी-प्रभृतिभिः शब्दैः व्यवहृतं दृश्यते। अनुसन्धानशब्दोऽयम् अनुसमुपसर्गपूर्वकधाञ्धातोः ल्युट्प्रत्यये विहिते सति निष्पद्यते। यथाह भगवान् मनुः-

**आर्षं धर्मोपदेशं च वेदशास्त्राऽविरोधिना।**
**यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः॥**[2]

अनुसन्धानं जिज्ञासुवृत्तेः उत्पद्यते, यथोक्तम्-'**अथातो ब्रह्मजिज्ञासा।**[1]' अनुसन्धाता विनययुक्तो जिज्ञासुश्च भवेत्। वेदे तु विद्या

---

**१ मनुस्मृतिः, १२/९४**

**२ मनुस्मृतिः, १२/१०६**

स्वयमेव कामरूपिणी भूत्वा ब्राह्मणं कञ्चिदाजगाम। प्रह्वीभूतः सन् उवाच च गोपाय माम्। ततस्तेऽहं शेवधिः भविष्यामि। यः खलु छात्रः असूयकः परापवादशीलः क्रूरस्वभावः अशुचिश्च वर्तते, एवं लक्षणाय न मां ब्रूयास्त्वम्-

**विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि।**
**असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती तथा स्याम्।।**[२]

वैदिकानुसन्धाने शोधे वा तथ्यान्यन्विष्यन्ते। सत्यस्यान्वेषणपूर्वकोपलब्धिरतीव जटिला। भगवती श्रुतिर्वदति-

**हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।**
**योऽसावादित्ये पुरुषः सोऽसावहम्।।**[३]

मन्त्राक्षराणामनितरसामान्यप्रभावत्वेऽपि अर्थानुसन्धानमन्तरा भस्मन्यनग्नावाज्यहोमवत् पर्यवस्येत् स्वाध्यायः। अत एव अर्थविचारवर्जकः स्वाध्यायी **'स्थाणुरयं भारहारः०'** [४] इति निन्दास्पदमभूत् पूर्वेषाम्। इह खलु द्विजानां वेदाभ्यास एव धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थसिद्धेः कारणमिति वैदिकसिद्धान्तः। अत्र श्रुतिरपि वदति-**'योऽधीतेऽनुब्रूते यजति जुहोति यजते याजयते तस्य ब्रह्म सवीर्यं भवति भद्रमश्नुत** इति।'

वेदानुसन्धानस्यावश्यकतायां वेदोऽपि प्रमाणम्। तथाहि श्रुतिः -

---

**१ ब्रह्मसूत्रम्, १/१/१**

**२ निरुक्ते, ग्राह्य-शिष्य-निरूपणप्रसङ्गे। (नि.२/१/१)**

**३ यजुर्वेदः ४०/१७**

**४ यास्क-निरुक्तम्- १/६**

**ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः।।**[१] इति।

तथैव **द्वितीयाध्याये** विश्वसमाजस्य यजुर्वेदीयं हितचिन्तनं क्रोडीकृत्य वैश्विकदृष्ट्या वैदिकसमाजसमीक्षणपर्यन्तं विशिष्टमध्ययनं सम्पादितम्। मन्त्राणां ऋग्यजुः साम्नां स्वरूपाणि सूत्रितानि जैमिनिना **'तेषां ऋग् यत्रार्थवशेन पादव्यवस्था, गीतिषु सामाख्या, शेषे यजुः शब्दाः।'** ऋचो मन्त्राः छन्दोबद्धाः, ऋचो गेयाः सामानि, शिष्टाः गद्यरूपाः मन्त्राः यजूंषीति त्रिधा व्यवस्थितं वेदत्रयं त्रयीशब्दवाच्यतां भजते। ऋचां समुदायः ऋग्वेदसंहिता, यजुषां यजुस्संहिता, साम्नां च सामवेदसंहितेति व्यवहारः। चतुर्थी अथर्ववेदसंहिता अन्या च वर्तते, तत्र ऋचो यजूंषि च सन्ति। अस्य महतो भूतस्य ब्रह्मणो निःश्वसितं वेदा इति श्रूयते। ऐतरेयशतपथब्राह्मणेभ्यः इदमवगम्यते यद् भूर्भुवः-स्वराख्य-व्याहृतित्रयलक्षितत्रैलोक्यस्याध्यक्षैरग्निवाय्वादित्यैः क्रमश ऋग्यजुःसाम्नां प्रादुर्भावः सम्पादित इति।

प्रश्नोत्तररूपेण ब्राह्मणादिसृष्टिं वक्तुं ब्रह्मवादिभिः प्रश्ना उच्यन्ते। प्रश्नोत्तराण्याह-

**ब्राह्मणोऽस्य मुखमासीद्बाहूराजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्याॅं शूद्रो अजायत।।**[२]

आर्याणामावासभूमिरार्यावर्तो ब्रह्मावर्तो वासीत्।[3] कालान्तरे ब्रह्मसमाजो यथाकर्म त्रिधा विभक्तः। यथा- ब्रह्माणः, देवा मानवाश्च। देवासुरमानवेषु ये केचित् ब्रह्मचर्यमाजीवनं धारयन्ति स्म ते ब्रह्माणो

---

**१ यजुर्वेदः ३४/५८**

**२ शुक्लयजुर्वेदे ३१/११**

**३ शतपथ.११/१/६**

बभूवुः। ब्रह्मणां नेता ब्रह्माऽऽसीत्[१] ' मनुष्याणां संस्कृतिर्ब्रह्मवंशोद्भवेन मनुना प्रवर्तिता। मनोः प्रजासु ऋषयः प्रामुख्यं भजन्ते'[२] मानवसंस्कृतौ गार्हस्थ्यधर्मस्य महिमा वर्तते। गृहमेधिन एव भवन्ति मानवाः। गार्हस्थ्यविधानात् मानवानां कौटुम्बिकं सामाजिकं च जीवनं सुव्यवस्थितमासीत्। ब्रह्माणो देवाश्चापि गार्हस्थ्यपरायणीं मानवीयसंस्कृतिं स्वीकृतवन्तः। मानवेषु सन्निविष्टाः सन्तो ब्रह्माणस्तु ऋषिभिः सह ब्राह्मणा बभूवुः। यथाकर्म देवाः राजन्या वैश्याः शूद्राश्च सञ्जाताः। मानवसंस्कृतेरियं समन्वयात्मिका वृत्तिर्विश्वस्यैकीकरणाय निरतिशयं महत्त्वं गायामि। आर्याः आर्येतरे च मानवीं संस्कृतिं स्वीकृत्य यथाकर्म ब्राह्मणाः, क्षत्रियाः, वैश्याः, शूद्राश्च बभूवुः।[3] विदेशेभ्यः समागता जनसमुदाया नाचिरं महर्षिमनोर्योजनानुसारं चातुर्वर्ण्यव्यवस्थया सुनिबद्धा बभूवुः। पुरा ये केचित् दासा गन्धर्वा राक्षसा यक्षाः किन्नराः वा आसन्, ते सर्वे कालान्तरेण चातुर्वर्ण्यं स्थापयन्तः सन्तो मानवा बभूवुः। नानासांस्कृतिकवर्गाणां संघर्षस्योन्मूलनं वर्णव्यवस्थया समन्वयविधिना चाभूत्। मानवसमाजे प्रायः सामञ्जस्यगतिका असंख्यजना वसन्ति। बृहत्तमसमाजस्य कल्पना भारतीयैः ऋषिभिरुदारभावेन कृता। सा **"वसुधैव कुटुम्बकम्"** इति वाक्येन प्रसिद्धा। विश्वसमाजस्य कल्याणं विधातुमेवास्माकं प्रवृत्तयो भवन्तु। ब्रह्मणामादिपुरुषो ब्रह्मा एव वर्तते। स एव ब्रह्मसंस्कृतेः प्रवर्तकः।

पृथिव्यप्तेजोवाय्वाकाशसन्दर्भितं प्रकृतिचिन्तनमुपादाय तस्य वैश्विकं स्वरूपं याथार्थ्येनोपपादितम्। यजुर्वेदोक्तबहुषु मन्त्रेषु पृथिवीतत्त्वस्य वर्णनं विद्यते। **"पृथिव्यसि मातरिश्वनो घर्मोऽसि**

---

**१ शतपथ ११/१/७**

**२ ऋग्वेदे २/३३/१३**

**३ बृहदारण्यकोपनिषदि. १/४/१२/१३**

**विश्वधा असि।"**[1] अत्र पृथिवीतत्त्वस्य विवेचनं महीधरभाष्ये सङ्केतरूपेण कृतं दृश्यते। यद्यपि यज्ञपरतया व्याख्यानमत्र आचार्यैः कृतं तथापि पृथिव्यसि पृथिव्याः सकाशात् उद्धृततया मृदा निष्पन्नत्वात् पृथिवीरूपत्वमिति पृथिवीतत्त्वस्योल्लेखः मन्त्रेऽस्मिन् दृश्यत इति वक्तुं शक्यते। एवं **'ध्रुवमसि पृथिवीं दृꣳह ब्रह्मवनित्वा क्षत्रवनि।'**[2] प्रोक्षणशेषोदकत्वं पृथिव्या विशेषेण क्लेदनमसि। हे दर्भमुष्टि! विशेषत्वं विष्णोः स्तुपोऽसि। वेदरूपाभूमे! वर्हिषा त्वामाच्छादयामि। देवोपकाराय सुखेनासितं स्थानभूता स्थीयते। हविर्ग्रहणकाले परिधिभ्यो यद्धविः स्कन्नं तत्भुवपत्यादिभ्यः अग्नेर्भ्रातरो वषट्कारभयात् भूमिं प्राविशंस्तददुःखेनाग्निरपि पलास्योदके प्राविशत्ततो देवैरानीय स्वाधिकारे स्थाप्यमानः एवमवद्यदेतैरमरभ्रातृभिर्मापरिधत्तैषां च यज्ञ भागः कल्प्यताम्। ततस्तेऽग्नेः भ्रातरः परिधियो जातास्तेषां च स्कन्नं हविर्भागः। पृथिव्यप्तेजोवाय्वाकाशेषु तेजः अग्निः शब्दस्पर्शरूपगुणैर्युक्तः प्राधान्यं भजते। श्रुतिर्ज्ञापयति–

**शं नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नो अस्तु।**
**शं न ओषधीर्वनिनो भवन्तु शं नो रजसस्पतिरस्तु जिष्णुः॥**[3]

यजुर्वेदोक्तबहुषु मन्त्रेषु वरुणः स्तुतः। वरुणस्य प्राकृतिकपृष्ठभूमिर्विस्तृता सर्वावरक आकाशः। आकाशश्च वेदेषूत्तरसमुद्ररूपेण स्मृतः। अतो वरुणः समुद्रदेवो जलदेवो वा जातः। परवर्तिकाले पार्थिवसमुद्रदेवरूपेणापि वरुणस्य वर्णनम्। विश्वस्य प्रकृतेः शरीरस्य मनस आत्मनश्च सर्वविधव्यवस्था जलेन सह सम्बद्धा। समाजे जलदेवो न्यायस्य प्रेम्णश्च प्रतिनिधिः। जलदेवो महान्यायकारिरूपेण तथा च महाप्रेममयरूपेणापि च प्रतिपादितः। मित्रो देवः जलस्य प्रेमरूपं

---

**१ शुक्लयजुर्वेदः १/२**
**२ शुक्लयजुर्वेदः १/१७**
**३ ऋग्वेदः म.७ सू.३५**

प्रकटीकरोति। ऐश्वर्यञ्चास्य देवस्य यजुर्वेदे बहुत्र वर्णितं वर्तते। प्रसन्नस्वभावश्चायं जलदेवः। वरुणदेव आचाररक्षको देवः इति प्रख्यापयति। जलदेवस्य पार्श्वे स्तोतॄणां पापकर्मशमनाय शतमुपचाराः सन्ति। स स्तोतॄणां पापानि प्रसन्नश्चेद् विविधैरुपचारैः शमयति। भगवती श्रुतिर्वदति–

**आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो धृतप्वः पुनन्तु। विश्वꣳहि रिप्रं प्रवहन्ति देवी रुदिदाभ्यः शुचिरा पूत एमि। दीक्षातपसोस्तनूरसि तां त्वा शिवाꣳशग्मां परिदधे भद्रं वर्णं पुष्यन्।**[१]

देवशास्त्रीयमध्ययनं स्यात् नियामकतत्वेन चिन्तनं वा स्यात् अग्निः श्रेष्ठदेवरूपेणैव दृश्यते। श्रुतिर्ज्ञापयति यदग्निः सर्वेषां स्वामी तस्मात् सर्वाणि तत्त्वानि परस्परं मेलयति।यजुर्वेदे स यथा प्रतिपादितः तथा समीक्षितः। अनुभवसिद्धमेतद्यदग्निः व्यक्ताव्यक्तरूपेण सर्वत्र व्याप्तः वर्तते। अग्निः पार्थिवदेवेषु सर्वाधिकमहिमान्वितो देवः। अग्निदेवं सर्वे देवाः स्वकीयं मुखं कृत्वा हविरादिकं गृह्णन्ति। अयं विश्वेषां देवानां मध्ये माहात्म्येनाद्वितीयः। अग्निदेवः सर्वदर्शी देवः। स्वपूजापरायणान् अयमग्निदेवः रक्षति। पृथिवीस्थानेषु सर्वेषु देवेषु अग्निदेवः श्रेष्ठः वर्तते। अग्निः सर्वदेवस्वरूपः यथोक्तम्

**अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्र।**
**येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः।**[२]

**यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति।**[३] ऋषिः यस्यां कस्याञ्चिद् देवतायाम्

---

१ शुक्लयजुर्वेदसंहिता, ४/२

२ यजुर्वेदः १२/४८

३ निरुक्तम्, ७/१/१

अर्थस्वामित्वं वेच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति। मन्त्रार्थज्ञानाय देवतापदानां विषये ज्ञानमावश्यकम्। ऋषयो देवतानां स्तोतारो मन्त्राणां द्रष्टारो वा। एकैकस्मिन् मन्त्रे यः स्तूयते प्रार्थितस्यार्थस्य प्रभुत्वेन वोच्यते, स एव देवता भवति। मन्त्रास्तावत् त्रिविधाः परोक्षकृताः, प्रत्यक्षकृताः, आध्यात्मिक्यश्च। **प्रघासिनो हवामहे मरुतश्च रिशादसः। करम्भेण सजोषसः।** [१] मरुत्संज्ञकाः देवाः एकोनपञ्चाशतसंख्यकाः सन्ति। तेषां मध्ये ये प्रघासिनः हविषां स्नेहेन भक्षकाः सन्ति तान् प्रघासिनः अस्मिन् यज्ञे यजमानाः आह्वयन्ति।

द्यावापृथिव्यौ रुद्रस्य विभूतिरूपेण स्तः। अस्याः आकाशदेवतायाः महाभाग्यात् नानानामधेयानि यजुर्वेदे समुपलभ्यन्ते। द्वितीयाध्याये एकादशतमे मन्त्रे आकाशतत्त्वस्याभिधानभूयस्त्वं दृश्यते। तस्याङ्गिरसो बृहस्पतिर्नाम ऋषि आकाशानुद्दिश्येदं कथयति, यद् उपहूतो द्यौः पिता अभ्यनुज्ञातो द्यौः पिता पाता। पितृवत् पालकः द्युलोकः अस्मिन् यज्ञे उपहूयताम्–

**उपहूतो द्यौष्पितोप मां द्यौष्पिता ह्वयतामग्निराग्नीध्रत्स्वाहा। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। प्रतिगृह्णाम्यग्नेष्ट्वास्येन प्राश्नामि।।** [२]

यजुर्वेदे येषां देवानां शंसनं वर्तते ते सर्वे देवस्वभावाः प्रकृतितत्त्वेन सम्बद्धाः सन्ति। बहुशः देवाः पृथिव्यन्तरिक्षाकाशानां नानाप्राकृतिकतत्त्वानाम् अभिव्यक्तयः सन्ति। मन्त्रद्रष्टार ऋषयः प्रकृतेः स्थूलस्वरूपस्य स्तुतिं कुर्वन्तः तदभिमानिचेतनतत्त्वस्य निरूपणं कृतवन्तः। अग्नेः प्रकाशमानं तेजोयुक्तं भैतिकस्वरूपं सर्वैरनुभूयते। तत्त्वतः एक एवाग्निः त्रिषु लोकेषु प्रकाशते। पृथिव्यां देदीप्यमानः

---

१ शुक्लयजुर्वेदसंहिता, ३/४४

२ शु.य.सं. २/११

दाहकोऽग्निः सर्वेषां जीवभूतः आकाशे विद्युताग्निः वृष्टिप्रेरको द्युलोके च सूर्यरूपः जगतः प्रसविता प्रसिद्ध एव। यजुषि यथा–

**तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः।**
**तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः॥**[१]

वनस्पतिः, शस्यम्, श्यामला, वसुन्धरा, समुद्रः, आकाशः, सर्वमपि नीलवर्णनम्– उषा, सन्ध्या, सूर्यः, चन्द्रः, तारकाणि– सर्वमपि लोहितम्। इदं सर्वं परमात्मनो नीललोहितशरीरम्। अग्नेरेव अन्तरिक्षस्थं स्वरूपं वैद्युताग्निरिति नाम्ना प्रसिद्धम्। अग्निः भास्वरः अस्ति–

**अग्निः आकाशं जलं च स्वतेजसाव्याप्नोति।**
**स हि मुखम् अपि देवानाम् उक्तः।**[२]

यस्मिन्मन्त्रे मन्त्रसमुदाये वा प्रतिपाद्योऽर्थः सम्यग्वर्णितस्तत्सूक्तमित्यर्थः। यजुर्वेदस्यैकत्रिंशोऽध्यायः पुरुषसूक्तम्। तत्र हि द्वाविंशतिमन्त्राः सन्ति। सायणाचार्यः कथयति– **अव्यक्तमहदादिविलक्षणश्चेतनो यः पुरुषः। 'पुरुष'** शब्दस्याऽऽदिपुरुषः, परमात्मा, ब्रह्म इत्यादयोऽर्थाः वर्तन्ते। पुरुषसूक्तस्य ऋषिर्नारायणः। अव्यक्तमहदादिविलक्षणश्चेतनो यः पुरुषः। "सहस्रशीर्षा षोडशनारायणः पौरुषमानुष्टुभं त्रिष्टुबन्तं त्विति" कात्यायनसूत्रानुक्रमणिकायामुक्तम्।

सर्वप्राणिसमष्टिरूपो ब्रह्माण्डदेहो विराडाख्यो यः पुरुषः सोऽयं सहस्रशीर्षा। सहस्रशब्दस्योपलक्षणत्वादनन्तैः शिरोभिर्युक्त इत्यर्थः। एवं सहस्राक्षित्वं सहस्रपादत्वं च। स पुरुषो भूमिं ब्रह्माण्डगोलकरूपां विश्वतः

---

१ **शुक्लयजुर्वेदः ३२/१**

२ **श.ब्रा. ३/९/१/६**

सर्वतो वृत्वा परिवेष्ट्य दशाङ्गुलपरिमितं देशमत्यतिष्ठत्। अतिक्रम्य व्यवस्थितः। दशाङ्गुलमित्युपलक्षणम्। भगवती श्रुतिर्वदति–

**सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।**
**स भूमिꣳ सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम्।।**[१]

सम्पूर्णमृषिवाक्यमेव सूक्तमभिधीयते। यजुर्वेदस्य षोडशोऽध्यायः रुद्रसूक्तम्। तत्र हि षडधिकषष्ठिमन्त्राः सन्ति। यजुर्वेदे रुद्रस्य निरतिशयं महत्त्वमस्ति। ब्रह्मविष्णुमहेशेषु रुद्रस्यैवाधिकं महत्वम्। अन्ये देवाः किन्तु रुद्रो महादेवः। रुद्रमन्त्रेषु परमात्मनश्चर्चैवास्ति, तस्य वाचामगोचरत्वात्। निरुक्तकारो यास्कोऽपि रुद्रस्य परमात्मत्वं समर्थयति। शिवस्य मूर्तिरपि तत्र सर्वदेवानामावासं प्रकटयति। शिरसि सोमो मस्तकेऽग्निः तस्य शरीरं नीलवर्णम्, तच्च नीलवर्णं शिरःस्थेन सोमेन तथा मस्तकस्थेनाग्निना लोहितवर्णभूषितम्। रुद्रसूक्तमन्त्रेषु रुद्रस्य परमात्मस्वरूपं स्फुटीभवति।[2]

यजुर्वेदस्य द्वाविंशोऽध्यायः ब्रह्मसूक्तम्।[3] तत्र हि चतुश्त्रिंशन्मन्त्राः सन्ति। अस्मिन् अध्याये सर्वज्ञस्य सर्वव्यापिनः सर्वशक्तिमतश्च ब्रह्मणो महिमा वर्णितः। मनुष्यस्य जीवनयात्रायां ब्रह्म एव मार्गप्रदर्शकः। यद्यपि यात्रा तु मनुष्येण स्वपुरुषार्थेनैव कर्त्तव्या, यतः स्वपुरुषार्थं विना मनुष्यस्य विकासो न सम्भवति। जीवनयात्रायां मार्गे ब्रह्ममार्गप्रदर्शकरूपेणास्माभिः सह वर्तते। जीवनान्धकारे स प्रदीपं गृहीत्वाऽस्माभिः सह प्रयाति। ईश्वरः सदैव सहायताप्रदानाय तत्परः। स सर्वेषां पिता विधाता बन्धुर्माता च वर्तते। ब्रह्मणः प्रकाशं गृहीत्वा पुरुषार्थे तत्परः सर्वहिते रतो जनः सदाऽऽनन्दे तिष्ठति।

---

१ शु.य.वेदः, ३१/१

२ शुक्लयजुर्वेदसंहिता, १६/१-६६

३ शुक्लयजुर्वेदसंहिता, २२/१-३४

**ये मित्रे वरुणे सूक्तवाचः**[१] इत्याद्यृङ्मन्त्रे सूक्तस्तोत्रशब्दयोः पर्यायवाचकत्वेन दर्शनात्। यजुर्वेदस्य द्वात्रिंशोऽध्यायः यमसूक्तम्।[2] तत्र हि षोडशमन्त्राः सन्ति। अस्मिन्नध्याये सर्वशक्तिमतः परमात्मनो महिमा प्रतिपादितः। परमात्मा सदैव रक्षकरूपेणास्माभिः सह वर्तते। यः कश्चिदपि मनुष्यः पुरुषार्थं विदधत् तस्य परमात्मनो ध्यानं करोति, प्रकाशेन तस्य बुद्धिरालोकिता भवति, स मेधावान् भवति। अनन्तस्य परमात्मनोऽनन्ते विश्वस्मिन्ननन्ता आनन्दाः। तेषामानन्दानां निरन्तरवृष्टिर्जायते, यस्य यावत्पात्रं स प्राप्नोति। अस्माभिः सर्वजनैः सह स्नेहभावेनाचरणीयं नित्यं **'सर्वजनहिताय सर्वजनसुखाय'** प्रयतितव्यम्। भगवती श्रुतिर्वदति ब्रह्मणः परमेश्वरस्य सर्वात्मत्वम् -

**तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः।**
**तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः।।**[३] **इति**

यजुर्वेदस्य पञ्चत्रिंशोऽध्यायः प्रेतसूक्तम्।[4] अस्मिन्नध्याये पितृमेधसम्बन्धिनो मन्त्रा उक्ताः सन्ति। पितृमेधः मृतस्य पितुः वार्षिकस्मरणे भवति। वार्षिकस्मृतिस्तु विषमवर्षेषु भवति। एकतारकनक्षत्रे चित्रादौ दर्शे वा ग्रीष्मे शरदि माघे भवति। पितृमेधं करिष्यता द्विजेन कुम्भेऽस्थिसंचयः कार्यः। मृतस्य च यावन्तोऽमात्मपुत्रपौत्रास्तावन्तः कुम्भाः कर्मदिने आनेतव्याः। ततः अरण्ये कुम्भाः स्थापनीयाः। कुम्भेऽस्थिसंचयनं कृत्वा ग्रामसमीपे समानीय शय्यायां कुम्भं नवीनवस्त्रेण सर्वान् कुम्भान् विविधवाद्ययन्त्रेषु वाद्यमानासु मृतस्य परिवारजनाः कुम्भेस्थितानामस्थीनां प्रदक्षिणं परिचरन्ति। तमस्थिकुम्भं गृहीत्वा ग्रामात् बहिः श्मशानभूमौ गत्वा श्मशानकर्म कुर्वन्ति। तत्र

---

**१ ऋ. ५/४९/९**

**२शु.य.वेदः, ३२/१-१६**

**३ यजुर्वेदः ३२/१**

**४ यजुर्वेदः, ३५/१-२२**

निखिलं श्मशानकर्म सम्पाद्यगृहमागत्य तं गृहेषूच्छ्रयेत्। एतदुच्छ्रयणं प्रजावृद्ध्यै कार्यम्। अस्याध्यायस्य पितरो देवताः आदित्याः ऋषयो देवा वा।

वेदार्थज्ञानं विना भारतीयविज्ञानवैशिष्ट्यं ज्ञातुं न शक्यते। यजुर्वेदः भारतीयविज्ञानधारावाहकः सर्वार्थाविद्योतक इत्येतत्तु विदितमेव समेषां ज्ञानपिपासूनाम्। वेदो न केवलशब्दराशिः अपितु परिच्छिन्नानि सर्वाण्यपि वस्तूनि वेद एव। सगुणावस्थायां वर्तमानाः सर्वेऽपि पदार्थाः वेद एव। उपनिषद्युगे देवविद्याया नक्षत्रविद्यायाश्चाध्ययनं कृतम्। ते भौतिकविज्ञानस्य परिधौ समन्विते पञ्चतत्त्वानां वैज्ञानिकानुशीलनं कृतम्। तेषां प्राथमिकस्वरूपमणुपरमाणुतः सिद्धमिति पर्यालोचितम्। भौतिकविज्ञानविषये **'शक्तेः'** कर्मणामध्ययनं भवति। साधारणतोऽस्मिन् शास्त्रे गति, विद्युत्, प्रकाशः, इत्येतच्छब्दप्रभृतिविषयाणामध्ययनं भवति। एते विनाशरहिताः परिवर्तनशीलाश्च वर्तन्ते। यजुर्वेददृष्ट्या शक्तिस्वरूपं विमृश्यते–

**इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः।**
**रथीतमꣳ रथीनां वाजानाꣳ सत्पतिं पतिम्।।**[१]

बहुषु मन्त्रेषु रसायनविज्ञानमपि दृष्टिगोचरं भवति। यथा–

**दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः।**
**अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेताः।।**[२]

अत्र भाष्ये विविधानां धातूनां विवेचनं दृश्यते। सोमयज्ञप्रसङ्गेऽपि रसायनविज्ञानस्य चर्चा बहुधा तत्र तत्र कृता दृश्यते।

---

**१ यजुर्वेदसंहिता, १२/५६**

**२ यजुर्वेदसंहिता, १२/१**

सर्वेषां वस्तूनां क्रमिकज्ञानं विज्ञानं वर्तते। यत् स्वयमेव प्रचलति, स्वयमेव वर्धते, स्वयमेव प्रजनयति तथा निजक्रमिकविकासेन सह स्वदशां परिवर्तयितुं स्वयमेव समर्थः। कानिचिदेव क्षेत्राणि सन्ति यानि जीवशास्त्रस्य विभागजातानि उच्यन्ते।

यत्र जीवजन्तूनां क्रमिकाध्यायनं भवति तत्प्राणिशास्त्रम्। यत्र विविधानां वृक्षाणां गुल्मलताप्रभृतीनां च क्रमबद्धमध्ययनं भवति तदेव वनस्पतिविज्ञानमिति। यत्र जीवितानां प्राणिनां रूपैः संरचनाभिश्च सम्बन्धो वर्तते तदेव आकृतिविज्ञानम्। शरीरक्रियाविज्ञानम्- यत्र शरीरस्य सामान्यक्रियाभिः सम्बन्धः तेषामध्ययनं भवति तदेव सामान्यक्रियाविज्ञानम्। यत्र कौशिकानां क्रमिकरूपेणाध्ययनं भवति तदेव कौशिकविज्ञानम्। यत्र पैत्रिकलक्षणानां संरचनायाः क्रमिकाध्ययनं तदेव आनुवंशिकीविज्ञानम् भवति। यत्र अजातभ्रूणस्याध्ययनं भवति तदेव भ्रूणविज्ञानमिति कथ्यते, अत्र अन्ये च बहवो विभागाः वर्तन्ते येषां संख्याः प्रतिवर्षं वर्धन्त इति प्रतिभाति। सन्ततिविज्ञाने गर्भाधानं प्रथमं मुख्यस्थानं भजते तत्र स्त्रीषु ऋतुस्रावोऽपि मुख्यं तथ्यं वर्तते।

संस्कृतभाषा विज्ञानावनिः। तस्मादनेकानि विज्ञानरत्नानि उत्पद्यन्ते प्रकाशन्ते च। तेष्वेदमायुर्विज्ञानम्। आयुषः विज्ञानम् इति आयुर्विज्ञानम्। महर्षिभिः देवैश्च सम्पादिते आयुर्विज्ञाने प्रयोजनं किम् इति वक्तुं न शक्यते। कालोऽयं कलिपूर्णः तस्य प्रभावः रोगरूपेण दृश्यते। वैदिककाले पुरुषाः स्त्रियश्च ये केचन मानवाः आसन् ते न अल्पायुषः न रुग्णाश्च। अल्पमृत्युदोषोऽपि तदा न दृश्यते स्म। साम्प्रतं बहवो जना अकालमृत्युग्रस्ताः दृश्यन्ते। एतस्मात् प्रमादात् उद्धर्तुम् आयुर्वेद एव समर्थः। आयुर्विज्ञानं साम्प्रतम् आयुर्वेदनाम्ना प्रसिद्धं दृश्यते। आङ्ग्लविद्यामोहिताः भक्ताश्च जनाः आयुर्विज्ञानमूलभूतमायुर्वेदं न स्मरन्ति। बहूनि शास्त्राणि आयुर्वेदं पञ्चमवेदः इति कथयन्ति। भगवती श्रुतिः कथयति-

**ओषधय:समवदन्त सोमेन सह राज्ञा।**
**यस्मै कृणोति ब्राह्मणस्तꣳ राजन्पारयामसि॥**[१]

ज्योतिर्विज्ञानं वेदाङ्गेषु परिगण्यते। यत्र वेदाङ्गत्वेन प्राचीनत्वं दृश्यते। ज्योतिर्विज्ञानशास्त्रे मूलभूतं बीजं सन्निहितमस्ति। ज्योतिर्विज्ञानशास्त्रं यज्ञानां काल: कथ्यते। यथा सुष्ठुकाले कृतमेव यज्ञकर्म सफलं भवति। अशुभकाले कृतं कर्म निष्फलं ज्ञेयम्। वेदाङ्गस्वरूपनिदर्शनपूर्वकं ज्योतिषस्य श्रेष्ठत्वं प्रोक्तमस्ति। इदं शास्त्रं मूर्ध्निस्थितमेवास्ति। विशेषत: ज्योतिर्विज्ञानम् 'ग्रहनक्षत्राण्यधिकृत्य कृतो ग्रन्थ:। ज्योतिर्विज्ञानं विद्यासु अर्थकरीविद्यारूपेण परिगण्यते।'

पितृदेवमनुष्याणां हव्यकव्यान्नदानेषु वेद एव चक्षुरिव, चक्षुरनश्वरं तत्प्रमाणत्वादसन्निकृष्टफलकव्यदानादौ प्रमाणान्तरानवकाशात्। **'विद्यन्ते ज्ञाप्यन्ते धर्मादिपुरुषार्थचतुष्टयोपाया अनेन स वेद:।'**[2] परिच्छिन्नानि सर्वाण्यपि वस्तूनि वेद एव। तथा च निर्गुणं ब्रह्मापि वेदरूपं धत्ते। ब्रह्म च ज्ञानरूपेणोपनिषत्सु उद्धृतमस्ति। सगुणावस्थायां वर्तमाना: सर्वेऽपि पदार्था: वेद एव। एतावता इदमवगम्यते यन्न केवलं निर्गुणत्वम् अपितु सगुणा अपि सर्वे पदार्था: वेदशब्दवाच्या इति। **'विज्ञानं यज्ञं तनुते, कर्माणि तनुतेऽपि च।**[३] **'** विज्ञानशब्दस्य त्रयोऽर्था: सम्भाव्यन्ते विशेषं ज्ञानं विज्ञानम्, विविधं ज्ञानं विज्ञानम् तथा च विरुद्धं ज्ञानं विज्ञानम्। विशेषभावानुगतं विशेषभावाभिन्नं विविधं ज्ञानमेव विज्ञानम्।

यज्ञदेवता: समुद्दिश्य सर्वविधयज्ञानां विधानस्यापि सयुक्तिकं चिन्तनमास्थापितम्। वैदिकोऽयं यज्ञो भारतीयानामृषीणामौदार्यस्य लोककल्याणकामनाया: च उज्ज्वलम् उदाहरणम्। यज्ञस्य

---

**१ यजुर्वेद:, १२/९६**

**२ कृ.य.वेदभा.भू.सायणाचार्य:**

**३ तैत्तिरीयारण्यक. ८.५.१**

महत्वमुद्घोषयन्ती श्रुतिरमुं **'यज्ञम्'** भुवनस्य सकलस्य नाभित्वेनोपवर्णयति। यज्ञशब्दो **'यज'** धातोः देवपूजासङ्गतिकरणदानार्थकात् नङ्प्रत्ययकरणेन[1] निष्पद्यते। अतः यजते देवान् पूजयति यद्वा देवतोद्देशेन द्रव्यं त्यजति इत्यर्थे **'यज्ञ'** शब्दो निष्पन्नो भवति, यजते सङ्गमयति इत्यर्थेऽपि **'यज्ञ'** शब्दो निष्पद्यते। अत्र अयं प्रश्नस्समुदेति यत् कः सङ्गमयतीति? यजमानं फलेन स्वर्गादिना सङ्गमयति इति समाधीयते। अत एव श्रुतिरपि यज्ञं विदधती कथयति– **दर्शपूर्णमासाभ्यां यजेत स्वर्गकामः।**[२] इत्यादिवाक्यगतैः स्वर्गकामादिपदैः फलमेव प्रतिपाद्यत इति। सर्वाण्यपि कर्माणि वेदोक्तानि फलजनकान्येव **'फलयुक्तानि कर्माणि।**[३]**'**

**महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः।**[४] पञ्चमहायज्ञानामनुष्ठानेन इदं शरीरं अर्थादेतत्तन्ववच्छिन्न आत्मा ब्राह्मतनुयुक्तो ब्रह्मप्राप्तियोग्यः क्रियते। अनेनेदं स्पष्टं यद्यज्ञः जीवस्य ब्रह्मत्वप्रापकः। जीवस्य अज्ञाननिवर्तनद्वारा ब्रह्मप्राप्तिहेतोर्यज्ञस्य महिमा सत्यं वाचां पार एवेति वक्तव्यम्। अत एव श्रुतिर्वदति– **यज्ञो वै श्रेष्ठतमं कर्म।**[५] जगद्गुरुणा वासुदेवेनापि अयं यज्ञः मनुष्याणां सर्वकामदोहने समर्था धेनुरिति उपदिष्टम्। यथा–

**सहयज्ञाः प्रजास्सृष्ट्वा पुरोवाचप्रजापतिः।**
**अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्।।**[६]

---

**१ 'यजयाचयत, विच्छप्रच्छरक्षोनङ्'। (पा.सू. ३/३/९०)**

**२ आप.श्रौ. ३/१४/८**

**३ कात्यायनश्रौतसूत्रम्, १/२**

**४ मनुस्मृतिः, २/२८**

**५ शु.य.वे. १/१ (महीधरभाष्य)**

**६ श्रीमद्भगवद्गीता, ३/१०**

वेदानां त्रयो विभागाः सन्ति कर्म, उपासना, ज्ञानञ्च। उपासनाया विषयः संहिताभागे वर्णितः। मनुष्यो विविधशारीरिकमानसिक-बौद्धिकात्मिकरोगैर्ग्रस्तोऽस्ति। सर्वेषामाधिव्याधीनां निवारणोपाय ईश्वरोपासना एव। विद्या द्विधा- परा अपरा चेति। परा अर्थात् श्रेष्ठविद्यैव ब्रह्मविद्या, अपरा कर्मप्रधानत्वात् कर्मविद्या। कर्मविद्यायाः फलोपलब्धिः कालान्तरे जायते, परन्तु ब्रह्मविद्या तत्कालफलदायिनी विद्या वर्तते। कर्मफलानि विनश्वराणि भवन्ति, परन्तु ब्रह्मविद्यायाः फलमविनश्वरं भवति। शुक्लयजुर्वेदीयशतपथब्राह्मणस्यान्तिमा षडध्यायाः **'बृहदारण्यक'** नाम्नोच्यन्ते, तदेव बृहदारण्यकोपनिषद्। अत्र बाहुल्येन सृष्टितत्त्वं। ब्रह्मतत्त्वञ्च प्रतिपादितम्। अत्र मैत्रेयीं प्रति याज्ञवल्क्यस्योपदेशो महत्त्वपूर्णः - **आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति।** [१] ब्रह्मतेजः प्राप्त्यर्थं गायत्र्याः उपासनादृश्यते। यथा-

**तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।**
**धियो यो नः प्रचोदयात्।**[२]

देवताया अलौकिकं सामर्थ्यं भवति। अत एव एक आत्मा बहुत्र स्तूयते। यास्काचार्यो देवताविषयं विवृणुते- **महाभाग्याद् देवताया एक एव आत्मा बहुधा स्तूयते।**[३] स्वीयैश्वर्यशक्त्या सङ्कल्पानुसारेण सः जडरूपेण चेतनरूपेण वा जायते। देवाः सर्वमपि कर्तुमकर्तुमन्यथाकर्तुं समर्थाः। नैरुक्ताः तिस्रो देवताः- अग्निः वायुः इन्द्रो व, सूर्यश्चेति देवतेति वदन्ति। पृथिवीस्थानीया देवता अग्निः, अन्तरिक्षस्थानीया देवता वायुः इन्द्रो वा। द्युस्थानीया देवता सूर्यः। तथा च तासां देवतानां महदैश्वर्याद् एकैकस्या अपि बहूनि नामानि भवन्ति। यथा निघण्टुशास्त्रे

---

**१ बृ.उ. २/४/५**

**२ शु.य.वे. ३/३५**

**३ नि.या. ७/१/५**

पृथिवीस्थानीयानाम् अग्निप्रभृतीनि द्विपञ्चाशन्मितानि नामानि, अन्तरिक्षस्थानीयानां वायुप्रभृतीन्यष्टषष्टिमितानि नामानि, द्युस्थानीयानां देवतानां च अश्विनीप्रभृतीनि एकत्रिंशन्मितानि नामानि वर्णितानि।[1]

पुराणम्, तर्कः, मीमांसा, धर्मशास्त्रम्, चत्वारो वेदाः, शिक्षा, व्याकरणम्, निरुक्तम्, छन्दः, ज्योतिषम्, कल्पाख्यानि षडङ्गानि मिलित्वा चतुर्दशविद्यास्थानानि सन्ति। विद्याश्चतस्रः- आन्वीक्षिकी, त्रयी, वार्ता, दण्डनीतिश्चेति। द्विजानां वेदाभ्यास एव धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थसिद्धेः कारणमिति वैदिकसिद्धान्तः। साक्षात्कृतधर्माण ऋषयो बभूवुः। तेऽवरेभ्योऽसाक्षात्कृतधर्मस्य उपदेशेन मन्त्रान् सम्प्रादुः।[2] स्मृतिश्च-

**धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः।**[३]
**आर्षं धर्मोपदेशं च वेदशास्त्राऽविरोधिना।**
**यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः॥**[४]

धर्मः भारतीयानां निधय एव। वैदिकधर्मस्य वैशिष्ट्यं यज्ञविधानमेव। अत्र श्रुतिरपि-

**यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।**
**ते ह नाकं महिमानः: सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥**[५]

अर्थेन मनुष्याणामिहलोकस्य परलोकस्य व सर्वेषां प्रयोजनानां सिद्धिर्भवति। अर्थ एव मनुष्याणां भोगस्यारोग्यस्य धर्मस्य च मुख्यं साधनं वर्तते। अत एव अर्थलाभाय सर्वे सततं यतन्ते- **अर्थार्थं प्रवर्तते**

---

**१ निघण्टुशास्त्रस्य पञ्चमाध्याये**

**२ निरुक्तम्, १/२०**

**३ मनुस्मृतिः, २/१३**

**४ मनुस्मृतिः, १२/१०६**

**५ यजुर्वेदः ३१/१६**

**लोकः।**[१] प्राणिनां सुखस्य मूलं धर्मः, धर्मस्य मूलम् अर्थः।[2] वृत्तिमूलम् अर्थः। अर्थमूलौ धर्मकामौ।

प्राणिनां दुःखस्य मूलं कारणमधर्मः। सर्वेषामधर्माणामुत्पत्तेः कारणं दुराचारः। ये दुराचारिणः सन्ति ते दुर्बुद्धयः दुःसाहसिनश्च। आचरणस्य हीनतया मनुष्याणां सद्विचारः प्रतिभाः व्यक्तित्वं च सर्वं विनश्यति। अविवेकिनः पापाचारिणः अधोगतिं लभन्ते। एतादृश्यां व्यवस्थायां राजा चतुरो वर्णान् स्वधर्मे सदाचारे च स्थापयेत्। तेषु अपचरत्सु दण्डं धारयेत्। यजुर्वेदे स्थाने-स्थाने दण्डव्यवस्थाविवक्षायां विराजन्ते ते मन्त्राः यैः प्रकृष्टगुणसम्पन्नाः राजानो न्यायाधीशा दण्डाधिकारिणो व पदे-पदे विबोधिताः। भगवती श्रुतिर्वदति-

**माऽपो मौषधीर्हिꣳसीर्धाम्नो धाम्नो राजँस्ततो वरुण नो मुञ्च।**
**यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च।**[३]

भारतस्य जीवनविधायिनी दृष्टिः बाह्याभ्यन्तरोभयं प्रति सर्वथा पूर्णा इति। अस्य राजनैतिकदृष्टिः पर्याप्तमात्रेण स्वस्था प्रभावापन्ना च वर्तते। वैदिकऋषयः अभयङ्कल्पस्य लोकमङ्गलस्य च पूर्णतायां मानवजीवनसाधनायाः सार्थकतां मन्यन्तः तेषामाध्यात्मभावः लोकमङ्गलस्य साधकः इति विचारः लोकव्यापी च दृश्यते। यथा-

**शन्नो मित्रः शं वरुणः शन्नोभवत्वर्यमा।**
**शन्न इन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः॥**[४]

धर्माऽधर्मयोर्विषये वेदानां प्रामाण्यमक्षुण्णम्। धर्माऽधर्मव्यवस्थापि वेदाधीनैव। वेदविहितकर्मणामनुष्ठानेनैव मनुष्यः श्रेयः

---

**१ वा.सू. ७ अ.२८**
**२ चा.सू. ७/१/२**
**३ यजुर्वेदः, ६/२२**
**४ यजुर्वेदः, ३६/९**

प्रेयश्चोभावप्यनायासेनाऽधिगच्छति। अस्य धर्मस्यानुष्ठानेनैव मनुष्योऽभ्युदयनिःश्रेयसप्राप्नोति।[1] स्वकृतस्य कर्मणोऽनुरूपमेव जीवस्तत्तज्जन्मानि, सुखम्, दुःखम्, स्वर्गम्, नरकं च लभते। वेदा एव मनुष्यं विहितकर्मसु प्रवर्तयन्ति तथा निषिद्धकर्मणो निवर्तयन्ति च। वेदविहितानि सर्वाणि यज्ञयागादीनि कर्माणि तत्तद्देवतामुद्दिश्य विहितानि। सामाजिकजागरणे राष्ट्रियसुरक्षाभावनायाञ्च राजनैतिकदृष्ट्याऽपि वेदानां योगदानं वर्तते। यदा राष्ट्रं स्वशक्तिप्रदर्शनेऽसमर्थतां प्राप्तं तदा पार्श्ववर्तीनि राष्ट्राणि तदाक्रामन्ति। अस्मिन्नेवार्थेऽप्रतिरथसूक्ते[2] वर्णितेन्द्रस्य पौरुषं राष्ट्रस्य शक्तिप्रदर्शने सहायकं भवति। प्रजापतिः वेदादेव सृष्टिं विदधाति तस्याः नियमनाय प्रायः नीतित्रयमवलम्ब्यते धर्मनीतिः, अर्थनीतिः, दण्डनीतिश्च। त्रिगुणमयजगदिदं सत्त्वरजस्तमोख्यैर्गुणैः क्रमशः धर्मार्थदण्डनीतिः प्रभावयति। सत्त्वप्रधानेन धर्मेण मानवोत्कर्षः। रजःप्रधानव्यापारेणार्थोपार्जनम्। तमःप्रधानया दण्डनीत्या प्रजानुशासनम्। सृष्टेः संरक्षणं सम्बर्द्धनं च एताभिः नीतिभिः धार्यते।

अस्यां सृष्टौ विद्यमानेष्वन्येषु स्थावरजङ्गमेषु प्राणिषु मनुष्य एव सर्वोत्कृष्टजीव इति प्रजापतिः मेने।[3] मनुष्याणां समवायः समाजः। मनुष्यं विना समाजस्य परिकल्पनाऽपि कर्त्तुं न शक्यते। चतुर्विधपुरुषार्थेषु धर्म एव प्रथमत आगच्छति। धर्ममूला एवान्ये पुरुषार्थाः। कोऽयं धर्मः? कस्मादुत्पद्यते? किमनेन साध्यते इत्यादयो बहवः प्रश्नाः पुरः समागच्छन्ति। यद्यपि विविधपृष्ठभूमिषु धर्मस्य परिभाषा भिन्नैव भवति, तथापि निःश्रेयस्साधनाय अपूर्वत्वेन तस्य कल्पना क्रियते। अत एवोच्यते- **आचारप्रभवो धर्मः धर्मस्य प्रभुरच्युत**[4] इति।

---

**१ श्रीमद्भगवद्गीता, ३/२०**

**२ शुक्लयजुर्वेदसंहिता, १७**

**३ श्रीमद्भागवते, ११/९/२८**

**४ विष्णुसहस्रनाम, १३७**

द्वितीयपुरुषार्थः अर्थः। भूमिः, धनम्, द्रव्यम्, विद्या, कला, कृषिः, पशुपालनम्, स्वर्णम्, रजतम्, नानाविधपात्राणि लौहधातुनिर्मितानि लाङ्गलप्रभृतिद्रव्याणि कारवायुयानप्रभृतिसर्वाणि द्रव्याणि अर्थ एव। अयं संसारः कर्मभूमिः जीविकायाः साधनभूतानां कर्मणां सर्वत्र प्रशंसा दृश्यते। कृषिः, वाणिज्यम्, गोरक्ष्यं विविधानि शिल्पानि अर्थप्राप्तेः साधनानि सन्ति। यथा- **संवर्चसा पयसा संतनुभिरगन्महि मनसा सꣳ शिवेन।**[१]

सन्तत्या शोभते गृहमिति शिष्टोपदेशाद् गृहस्थाश्रमः सन्तत्या युक्तः नूनं भवेत्। बृहदारण्यकोपनिषदि सीमन्थपुत्रमन्थादयो बहवः कामविषयकप्रयोगा अपि दृश्यन्ते।[2] यथा-

**अथ स य इच्छेत् पुत्रो मे शुक्लः, पिङ्गलः, श्यामो वा जायेत इत्युपक्रम्य कामनाभेदेन हविषो विधानं विधीयते। अथ य इच्छेत् दुहिता मे पण्डिता जायेत सर्वमापुरियादिति तिलौदनं पाचयित्वा सर्पिष्मन्तमश्नीयाताभीश्वरौ जनयितवै।** गर्भाधानं करिष्यन् तत्प्रयोगविधिः प्रतिपाद्यते।

कर्मकाण्डेन विधूतकल्मषस्य ज्ञानकाण्डेऽधिकार[3]इति शास्त्रसारो वर्तते। पाञ्चभौतिकशरीरस्योपचारः पाञ्चभौतिकतत्त्वैरेवानुष्ठीयते। गृहस्थाश्रमे स्थितः मनुष्यः सर्वमात्मीयं सामाजिकमुत्तरदायित्वं परिसमाप्य तत् आत्मनः सद्गतिं चिन्तयेत्।[4] शास्त्रोपदिष्टमार्गानुसरणं कुर्वन् यदा मनुष्यः मुक्तिं लभते, तदानीं तस्य स्थितिः यादृशी भवति तदत्र प्रस्तूयते-

---

**१ यजुर्वेदससंहिता, २/२४**

**२ बृ.उ. ६/४/१४-२२**

**३ वेदान्तसारानुबन्धचतुष्टयनिरूपणम्।**

**४ मैत्रेय्युपनिषत्, २/१८-२१**

**भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।**
**क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥**[१]

भारतभूमिविषये मनीषिणां 'वसुधैवकुटुम्बकमिति' चिन्तनस्य समीक्षणं 'यत्र विश्वं भवत्येकनीडमित्युद्घोषस्य परिशीलनम् पुमान् पुमांसं परिपातु विश्वमिति' वेदोद्घोषस्य विश्लेषणमिति सार्वभौमिकचिन्तनमेवाध्ययनस्य सोपानं वर्तते। भगवत्पदप्राप्तये शास्त्रेषु बहवो मार्गाः समुपदिष्टाः सन्ति। अनन्यभावचेतसा भगवतः संस्मरणेनापि मुक्तिं लभते मनुष्यः।[2] **यत्पिण्डे तद् ब्रह्माण्ड** इति कृत्वा पिण्डब्रह्माण्डयोरैक्यं चिन्त्यते तत्त्वविद्भिः।

अष्टाध्यायोपपन्नः विद्यावाचस्पत्युपाध्यर्थं सङ्घटितः शोधप्रबन्धः मया पाठकजनसौकर्याय विषयविवेचनसौलभ्याय च चत्वारिंशदध्यायेषु निम्नरूपेण प्रकाश्यते –

**प्रथमाध्याये** वेदपदार्थः इत्यध्यायमादाय वेदपदपर्यायाः, वेदपदनिर्वचनम्, वेदपदस्य परिभाषेत्यादिविषया निरूपिताः। **द्वितीयाध्याये** वेदस्यैतिह्यम् इत्यध्यायमुद्दिश्य वेदनामाविर्भावादिविषया वर्णिताः। **तृतीयाध्याये** आधुनिकसन्दर्भे यजुर्वेदानुसारं कीदृशं वैश्विकं तच्चिन्तनमिति प्रस्तुतम्। **चतुर्थाऽध्याये** विश्वोत्पत्तिः कथं केभ्यः कारणेभ्य ईश्वरः विश्वं सिसृक्षतीत्यादि चर्चितम्। **पञ्चमाध्याये** मानवजातेः सर्जना तद्विकासः इत्यादिविषयः सविशदं प्रकाशितः। **षष्ठाध्याये** वर्णाश्रमाः कति, तदीया धर्माः के इति विषयोपस्थापनं कृतम्। **सप्तमाध्याये** लोकजनजीवने वैदिकसंस्काराणां कथम्भूतः प्रभावः इत्यादिविषया उपनिबद्धाः। **अष्टमाध्याये** वैश्विकदृष्ट्या वैदिकसमाजस्य समीक्षणमिति विषयः प्रतिपादितः। **नवमाध्याये**

---

**१ मुण्डको. २/८**

**२ गीता, १८/६६**

पाञ्चभौतिकतत्त्वान्यतमस्य पृथिवीतत्त्वस्य विचार: कृत:। **दशमाध्याये** जलतत्त्वस्य सूक्ष्मविचार: कृत:। **एकादशाध्याये** सूक्ष्मेक्षिकया अग्नितत्त्वं विमृष्टम्। **द्वादशाध्याये** वायुतत्त्वोऽपरि वैचारिकदृष्ट्या बलं दत्तमस्ति। **त्रयोदशाध्याये** भौतिकसृष्टिविचारावसरे आकाशतत्त्वस्य विमर्श: कृत:। **चतुर्दशाध्याये** यजुर्वेदानुगुणं प्रकृतितत्त्वचिन्तनस्य समीक्षा विहिता। **पञ्चदशाध्याये** पुरुषसूक्तस्य समीक्षणं कृतम्। **षोडशाध्याये** रुद्रसूक्तद्वारा रुद्रस्वरूपं तत्पर्याया: तन्निमित्तमन्त्रविनयोगश्चेत्यादिनां विषयाणां विचार: कृत:। **सप्तदशाध्याये** ब्रह्मसूक्तगतै: मन्त्रै: ब्रह्मतत्त्वविचार: कृत:। **अष्टादशाध्याये** यजुर्वेदालोके मेधासूक्तविचारणा कृता। **एकोनविंशाध्याये** यजुर्वेदमाश्रित्य यमसूक्तसमालोचना कृता। **विंशाध्याये** वैश्विकदृष्ट्या यजुर्वेदे पञ्चसूक्तानां समीक्षा सम्पादिता। **एकविंशाध्याये** यजुर्वेदधिया भौतिकविज्ञानमिति विषय: अनुसंहित:। **द्वाविंशाध्याये** रसायनविज्ञानमिति प्रसिद्ध: विषय: सस्पष्टं विचारित:। **त्रयोविंशाध्याये** यजुर्वेदे जीवविज्ञानम् इत्ययं महत्त्वपूर्णविषय: शोधदृष्ट्या प्रस्तुत:। **चतुर्विंशाध्याये** आयुर्विज्ञानमित्युपरि बलं दतम्। **पञ्चविंशाध्याये** ज्योतिर्विज्ञानमिति विषयमुद्दिश्य ज्यौतिषशास्त्रस्य गूढार्थ: विचारित:। **षड्विंशाध्याये** वैश्विकदृष्ट्या यजुर्वेदे वैज्ञानिकपरिकल्पनाया: समीक्षा कृता। **सप्तविंशाध्याये** यज्ञयागादे: निरूपणावसरे श्रौतयज्ञानां वैश्विकचिन्तने योगदानं विवेचितम्। **अष्टाविंशाध्याये** स्मार्तयज्ञानां वैश्विकचिन्तने योगदानम् इत्याख्य: विषय: निरूपित:। **एकोनत्रिंशाध्याये** यजुर्वेदानुसारं उपासनापद्धति: कीदृशी, तत्र के नियमा इत्येते विषया विचारिता:। **त्रिंशाध्याये** सामाजिकजीवने वैदिकदेवतानां वैश्विकदृष्ट्या समीक्षा कृता। **एकत्रिंशाध्याये** यजुर्वेदानुसारं नीतिलक्षणम्, धर्मनीतिश्चेत्यादि विषया विचारिता:। **द्वात्रिंशाध्याये** अर्थनीते: स्वरूपम्, उद्देश्यम्, अर्थनीतिर्नाम का चेति विषया गुम्फिता:। **त्रयस्त्रिंशाध्याये** दण्डनीतिविचार: कृत:।

**चतुस्त्रिंशाध्याये** राजनीतिविषयकविचारः प्रतिपादितः। **पञ्चत्रिंशाध्याये** वैश्विकदृष्ट्या नीतीनां वैदिकाख्यानानां च समीक्षा कृता। **षट्त्रिंशाध्याये** यजुर्वेदानुसारं पुरुषार्थचतुष्टये धर्मविषयको विचारः प्रतिपादितः। **सप्तत्रिंशाध्याये** अर्थविषयको विचारः विहितः। **अष्टात्रिंशाध्याये** पुरुषार्थचतुष्टयान्यतमः कामपुरुषार्थः उपवर्णितः। **एकोनचत्वारिंशाध्याये** मोक्षप्राप्तिः कथमिति यजुर्वेदधिया विषयः प्रस्तुतः। **चत्वारिंशाध्याये** वैश्विकदृष्ट्या पुरुषार्थचतुष्टयधर्मार्थकाममोक्षाश्चेति विषयः प्रकाशितः।

एवमनुसन्धानस्य प्रवहच्छोधशरणिमासाद्य उपकल्पितोऽयं शोधग्रन्थोऽद्यत्वे नूनमेव विदुषां मोदमाधास्यते। तथा च जिज्ञासूनां प्रज्ञोद्बोधनायापेक्षितं यावद्वस्तुजातं प्रदाय महोपकारकं साधयिष्यति। किञ्चास्य पुण्यदेशस्य ज्ञाननिकषप्रतिपादकग्रन्थसम्पदः कोऽपि अपूर्व इव निधिर्भविष्यति इति मन्ये।

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

**॥ समाप्तमिदं देवेन्द्रप्रसादमिश्रग्रन्थरत्नम् ॥**

**बलं विष्णोः प्रवर्धताम्**

# ग्रन्थानामनुक्रमणिका

**क्र.सं. ग्रन्थनाम, लेखकः/सम्पादकः/भाष्यकारः/प्रकाशकः एवं प्रकाशनवर्षम्**

(१) अथर्ववेदसंहिता, सायणभाष्यम्, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, वर्षम् **१९८७**

(२) अथर्ववेदसंहिता, श्रीकण्ठशास्त्री, धर्मप्रेस, **२०३** ए कमलानगरम्, देहली, वर्षम् **२०००**

(३) अथर्ववेदीयमंत्रविद्या, दयानन्दसंस्थानम्, हरध्यानसिंहमार्गः, देहली, वर्षम् **१९९७**

(४) अथर्ववेदभाष्यम्, चौधरीप्रतापसिंहः, धर्मार्थट्रस्ट, **५७** एल., मॉडलटाउन-करनालम्, वर्षम् **१९७५**

(५) अष्टाध्यायी, चन्द्रलेखा-हिन्दीव्याख्यायुता, चौखम्बाविद्याभवनम्, वाराणसी, वर्षम् **१९९५**

(६) अर्थसंग्रहः, लौगाक्षिभास्करप्रणीतः, चौखम्बासुरभारती प्रकाशनम्, गोपाल-मन्दिर-लेन, वाराणसी, वर्षम् **२००५**

(७) आर्षेयब्राह्मणम्, वर्नल-सम्पादितम्, तिरुपतिः, वर्षम् **१९९२**

(८) ईशादि नौ उपनिषद्, शङ्करभाष्यार्थः, गीताप्रेस, गोरखपुरम्, पुनर्मुद्रण वि.सं. **२०७१**

(९) ऐतरेयब्राह्मणम्, ए. हॉगसम्पादितम्, कोलकाता, वर्षम् **१९६१**

( १० ) ऋग्वेदसंहिता, पद्मभूषणम् डॉ.श्रीपाददामोदरसातवलेकरः, स्वाध्यायमण्डलम्, किल्लापारडी, जि. बलसाड, वर्षम् **१९८५**,

( ११ ) ऋग्वेदसंहिता, नागपब्लिशर्स, **११**ए, यू. ए. जवाहरनगरम्, देहली, वर्षम् **२००१**

( १२ ) ऋग्वेदसंहिता, श्रीमोक्षमूलरभट्टः, चौखम्बासंस्कृतसीरीजआफिस, वाराणसी, वर्षम् **१९६६**

( १३ ) ऋग्वेदभाष्यभूमिका, सायणाचार्यः, वैदिकपुस्तकालयः, दयानन्दाश्रमः, अजमेरः, वर्षम् **१९९६**

( १४ ) ऋग्वेद का सुबोध भाष्य, भाष्यं–पद्मभूषण–डॉ.श्रीपाददामोदर सातवलेकरः, स्वाध्यायमण्डलम्, किल्लापारडी, जि. बलसाड, वर्षम् **१९८५**

( १५ ) कात्यायनश्रौतसूत्रम्, महर्षिकात्यायनमुनिप्रणीतं कर्काचार्य–याज्ञिकादिकृतभाष्येभ्यः सारमुद्धृत्य डॉ. अल्बेर्तेन वेबरेण शोधितम्, चौखम्बासंस्कृतसीरिज, वाराणसी आफिस, वाराणसी–**१**, वि. सं. **२०२९**

( १६ ) कौषीतकीब्राह्मणम्, कोलकाता, वर्षम् **१९६२**

( १७ ) कृष्णयजुर्वेदीयतैत्तिरीयसंहिता, सम्पादकः श्रीपाददामोदर–सातवलेकरः, स्वाध्यायमण्डलं पारडीनगरम्, बलसाडप्रदेशः, गुजरातप्रान्ते, आषाढस्य वि.सं. **२०१४**

( १८ ) कृष्णयजुर्वेदीयतैत्तिरीयारण्यकम्, भट्टभास्करभाष्योपेतम् मोतीलालबनारसीदासः, जवाहरनगरम् दिल्ली–**०७**, पुनर्मुद्रण वर्षम् **१९८५**

(१९) चार शुल्बसूत्र, (बौधायन, मानव, आपस्तम्ब और कात्यायन) डॉ. रघुनाथपुरुषोत्तमकुलकर्णी, महर्षिसान्दीपनिराष्ट्रियवेदविद्या-प्रतिष्ठानम्, उज्जैन्याम् ४५६०१० (म. प्र.), वर्षम् २००३

(२०) छान्दोग्योपनिषद्, सानुवादशङ्करभाष्यसहितम्, गीताप्रेसगोरखपुरम् -२७३००५ पुनर्मुद्रण वि.सं. २०७०

(२१) तैत्तिरीयसंहिता, महादेवशास्त्रिसम्पादितः, मैसूर, वर्षम् १९९६

(२२) तैत्तिरीयब्राह्मणम्, भट्टभास्कर-भाष्योपेतम्,मोतीलालबनारसीदासः, बंगलो-रोड़-जवाहरनगरम्, दिल्ली, पुनर्मुद्रण वर्षम् १९८५

(२३) निरुक्तम्, यास्काचार्यः, चौखम्बाप्रकाशनम्, वाराणसी, वर्षम् १९९२

(२४) पारस्करगृह्यसूत्रम्, डॉ. जगदीशचन्द्रमिश्रः, चौखम्बाप्रकाशनम्, वर्षम् २००८

(२५) पुराणविमर्शः, डॉ. बलदेव उपाध्यायः, चौखम्बाविद्याभवनम्, वर्षम् १९९६

(२६) बृहदारण्यकोपनिषद्, सानुवादशङ्करभाष्यसहितम्, गीताप्रेस-गोरखपुरम्-२७३००५, पुनर्मुद्रणम् वि.सं.२०७१

(२७) बौधायनश्रौतसूत्रम्, सायणाचार्यभाष्यसहितम्, रामलालकपूर ट्रस्ट रेवली, सोनीपत, हरियाणा-३९, वि.सं. २०६५

(२८) भारतीय दर्शन, डॉ. बलदेव उपाध्यायः, चौखम्बा-विद्याभवनं वाराणसी, वर्षम् १९९७

(२९) मनुस्मृतिः, कुल्लूकभट्टकृत-सुपरिमार्जितम्, मन्वर्थमुक्तावली-सहिता, चौखम्बा विद्याभवनम्, वाराणसी, वर्षम् १९९२

( ३० ) मार्क्सवाद और रामराज्य, स्वामीश्रीकरपात्रीजीमहाराजः, गीताप्रेसगोरखपुरम् –**२७३००५**, पुनर्मुद्रणम् वि.सं. **२०७०**

( ३१ ) मैत्रायणीसंहिता, श्रेडरसम्पादितः, लाड्य जिंग मैसूरः, वर्षम् **१९८२**

( ३२ ) वाजसनेयिसंहिता, बेवरसम्पादितः, निर्णयसागरप्रेस, मुम्बई, वर्षम् **१९६२**

( ३३ ) नन्दकुमारचरितम्, लेखकः – म.म. प्रो. केशवराम शर्मा, व्याख्याकारः प्रो.रामसलाहीद्विवेदी, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, वर्षम् **२०२१**

( ३४ ) वंशब्राह्मणम्, सत्यव्रतसामश्रमीसम्पादितम्, केन्द्रीयसंस्कृत विश्वविद्यालयः, तिरुपतिः, वर्षम् **२००१**

( ३५ ) वैदिक साहित्य एवं संस्कृति, आचार्यबलदेव उपाध्यायः, रवीन्द्रपुरी, वाराणसी, वर्षम् **१९९५**

( ३६ ) वेदशाखापर्यालोचनम्, प्रो.श्रीकिशोरमिश्रः, चौखम्बाविद्याभवनम्, वाराणसी, वर्षम् **१९९१**

( ३७ ) वैदिक कोश, नाग प्रकाशकः, देहली, वर्षम् **१९९५**

( ३८ ) वेदार्थपारिजातः, स्वामीश्रीकरपात्रीजीमहाराजः श्रीराधाकृष्णधानुका प्रकाशनसंस्थानम् श्रीधर्मसंघसंस्कृतिविद्यालयः, रमणरेती, वृन्दावनम् **२८११२१**, वि.सं. **२०५५**

( ३९ ) शतपथब्राह्मणम्, आनन्दचन्द्र–सम्पादितम्, चौखम्बाप्रकाशनं वाराणसी, वर्षम् **१९६१**

( ४० ) शतपथब्राह्मणम्, श्रीमत्सायणाचार्य–वेदार्थप्रकाशाख्यादिभाष्यम्, चौखम्बासंस्कृतसीरीज, वाराणसी, वर्षम् **१९७५**

**( ४१ )** शतपथब्राह्मणम्, हिन्दीव्याख्याकारः प्रो. श्रीयुगलकिशोरमिश्रः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, वर्षम् **२००७**

**( ४२ )** शुक्लयजुर्वेदीयमाध्यन्दिनिपञ्चपाठपौरुषाध्यायः, प्रो. श्रीश्रीकिशोरमिश्रः, चौखम्बाविद्याभवनम्, वारणसी, वर्षम् **१९८५**

**( ४३ )** शुक्लयजुर्वेदसंहिता, उव्वट-महीधर-भाष्यम्, चौखम्बाप्रकाशनम्, वाराणसी, वर्षम् **१९९६**

**( ४४ )** शुक्लयजुर्वेदीयप्रातिशाख्यम्, उव्वटभाष्य तथा अनन्तभट्ट कृत-भाष्य सहितम्, हिन्दी अनुवादकः - डॉ. वीरेन्द्रकुमारवर्मा, चौखम्बाविद्याभवनम्, वाराणसी, वर्षम् **१९९५**

**( ४५ )** शुक्लयजुर्वेदीयकाण्वसंहिता, सम्पादकः - पं. श्रीपाददामोदर सातवलेकरः, स्वाध्यायमण्डलं, बलसाड, गुजरातप्रान्त, शाकीयवर्षम् **१८६२**

**( ४६ )** शुल्बसूत्रम्, हिन्दीव्याख्याकारः -डॉ. देवेन्द्रप्रसादमिश्रः, सम्पादकः श्रीकेदारनाथद्विवेदी, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, वर्षम् **२०१५**

**( ४७ )** शुक्लयजुर्वेदीया शतरुद्री, भाषानुवादकः डॉ. देवेन्द्रप्रसादमिश्रः, प्रकाशकः - श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, वर्षम् **२०२२**

**( ४८ )** शुक्लयजुर्वेदीयगर्भाधानादिषोडशसंस्कारपद्धतिविमर्शः, म.म. आचार्यश्रीकेदारनाथद्विवेदी, प्रयागराजः, वर्षम् **२०२१**

**( ४९ )** सत्यार्थप्रकाशः, श्रीमद्स्वामिदयानन्दसरस्वती, आर्षसाहित्यप्रचार-ट्रस्ट, **४२७** नया बांस, दिल्ली-**११०००६,** वि.सं. **२०७१**

(५०) सामवेदसंहिता, सायणाचार्यः, चौखम्बासंस्कृतसीरीज, वाराणसी, वर्षम् **१९६६**

(५१) स्वोपज्ञशुल्बसूत्रवृत्तिसहितं श्रीमन्महर्षिकात्यायनप्रणीतं कात्यायन-श्रौतसूत्रम्, श्रीविद्याधरशर्माश्रीकेदारनाथद्विवेदीभाष्यद्वयसमन्वितम् सम्पादकः डॉ. देवेन्द्रप्रसादमिश्रः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, प्रथमसंस्करणम्, वर्षम् **२०१५**

(५२) श्रीमद्भगवद्गीता, गीताप्रेसगोरखपुरम्-**२७३००५**, पुनर्मुद्रणम् वि.सं. **२०६२**

(५३) श्रीमद्भागवतमहापुराणम्, गीताप्रेसगोरखपुरम्-**२७३००५,** पुनर्मुद्रणम् वि.सं. **२०५२**

(५४) श्रीमद्वाल्मीकीयरामायणम्, महर्षिवाल्मीकिप्रणीतम्, गीताप्रेस-गोरखपुरम्, वि.सं. **२०७१**

(५५) श्रीमद्रामचरितमानसम्, श्रीमद्गोस्वामितुलसीदासविरचितम्, गीताप्रेसगोरखपुरम्, वि.सं. **२०७१**

**॥ प्रीणातु भगवान् वेदः प्रीणन्तु सर्वदेवताः ॥**

**॥ बलं विष्णोः प्रवर्धताम् ॥**

शोध-प्रकाशनविभागः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः

बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110016